Guṇaratnagaṇi's

TARKA - TARAṄGIṆĪ

गुणरत्नगणिकृता

तर्कतरङ्गिणी

L. D. Series : 124

General Editor
Jitendra B. Shah

Editor :
Vasant G. Parikh

L. D. INSTITUTE OF INDOLOGY
AHMEDABAD - 380 009

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

TARKA-TARAṄGIṆĪ

L. D. Series : 124

General Editor
Jitendra B. Shah

Editor :
Vasant G. Parikh

L. D. INSTITUTE OF INDOLOGY,
AHMEDABAD-9

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

L. D. Series : 124

•

TARKA-TARAṄGIṆĪ

•

Edited by
Vasant G. Parikh

•

Publisher
Dr. Jitendra B. Shah
Director
L. D. Institute of Indology
AHMEDABAD

•

First Edition : 2001

•

Copies : 500

•

ISBN 81-85857-06-7

•

Price : Rs. 270/-

•

Typesetting
Sharadaben Chimanbhai Educational Research Centre
'Darshan' *Opp.* Ranakpur Society
Shahibaug **Ahmedabad**-380 004 (Gujarat State) INDIA
PHONE : 079-2868739. FAX : 079-2862026
e-mail : sambodhi@ad1.vsnl.net.in
Website : www.scerc.org

•

Printer
Chandrika Printery
Mirzapur Road
Ahmedabad-380 001
Phone : 5620578

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तर्कतरङ्गिणी

ला. द. ग्रंथश्रेणी १२४
प्रधान संपादक
जितेन्द्र बी. शाह

संपादक :
वसंत जी. परीख

लालभाई दलपतभाई भारतीय संस्कृति विद्यामन्दिर
अहमदावाद-९

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ला. द. श्रेणी : १२४

•

तर्कतरङ्गिणी

•

संपादक

वसंत जी. परीख

•

प्रकाशक

डॉ. जितेन्द्र बी. शाह

नियामक

लालभाई दलपतभाई भारतीय संस्कृति विद्यामन्दिर

अहमदावाद

•

प्रथम आवृत्ति : २००१

•

प्रतियाँ : ५००

•

मूल्य : रु. २७०/-

•

टाइप सेटिंग

शारदाबेन चिमनभाई एज्युकेशनल रिसर्च सेन्टर

'दर्शन', शाहीबाग, अहमदाबाद-३८० ००४

PHONE : 079-2868739. FAX : 079-2862026

e-mail : sambodhi@ad1.vsnl.net.in

Website : www.scerc.org

•

मुद्रक :

चन्द्रिका प्रिन्टरी

मिर्झापुर रोड़

अहमदाबाद-३८० ००१

फोन : ५६२०५७८

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

FOREWORD

We feel happy to publish the *Tarka-Taraṅgiṇi* of Guṇaratna gaṇi of Kharatara-gaccha. The Taraṅgiṇi in its original form is the work relating to the *Nyāya-veiśeṣika* philosophy. The study of the tenets of these two philosophical schools is indispensable for Indian philosophy. The thinkers of the other philosophical schools have also written on Nyāya-veiśeṣika doctrine. Guṇaratna gaṇi (V. S. 1610/A. D. 1554), a learned Jaina muni, wrote this commentary which deserves attention. Using different mss. available in the Jaina Bhaṇḍāras, the work has been carefully edited and is now published. Dr. Vasant Parikh is the editor of this important work. We thank him for his efforts.

We hope that this publication will be useful to the scholars as well as students of the Nyāya-Vaiśeṣika schools.

L. D. Institute of Indology
Ahmedabad; - A. D. 2001

Jitendra B. Shah
Director

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

PREFACE

Tarkataraṅgiṇī by Guṇaratnagaṇi, though a subcommentary on Tbh. a very exhaustive and comprehensive volume of Nyayā-vaiśeṣika school. In it we find a pleasant blending of ancient Nyāya and Neologic-[Navyanyāya] together with the cardinal principles of Vaiśeṣika school. It is a matter of pleasure, therefore, that it is now being published for the first time by L. D. Institute, Ahmedabad—a renowned Institute devoted solely to the high ideals of Indian culture and philosophy.

I am deeply obliged by and grateful to late Āgamaprabhākara Muni Shri Puṇya Vijayjī through whose good offices, I could procure the microfilm copy of the Ms. of Tt., from the British Museum, London. I am also thankful to the authorities of the Oriental Institute, Vadodara, for kindly allowing me to use the rare Ms of Tt. My thanks are due to the authorities of L. D. Institute of Indology, particularly to Pundit Shri Dalasukhbhai Malvania for encouraging me by accepting this critical edition of Tt. as their publication.

I have no words to express my gratefulness to my teacher and guide late Dr. J. S. Jetly who not only taught me the subject and important doctrines of Nyaya-vaiśeṣika philosophy and the science of editing but also encouraged me in editing Tt.

I am thankful to Dr. Jitendra Shah, who made the publication of this work possible. It is his prompt and liberal cooperation, that makes the publication of this work possible. I am also beholden to Prof. Kanjibhai Patel of this Institute without whose encouragement and support this publication would not have seen the light of the day.

I am also thankful to Prof. Kapadia to take active interest in this publication. I am thankful to Parulben Shah for her careful proof-reading and other scholars of the Institute for rendering help in the publication.

My thanks are also due to my student and then colleague Prof. Dr. Vinod Pandya in helping me in preparing the index.

Amreli 14th Jan. 1999. ***Vasant Parikh***

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ABBREVIATIONS

Bp.	Bhāṣāpariccheda
Gn.	Guṇaratna Gaṇi
Gv.	Govardhana
Ke.	Keshavamiśra
Nb.	Nyāyabodhinī
Nku.	Nyāyakusumānjali
Ns.	Nyāyasūtra
Nsb.	Nyāyasūtrabhāṣya
Sp.	Saptapadārthī
Tbh.	Tarkabhāṣā
Tc.	Tattvacintāmaṇi
Td.	Tarkasaṁgrahdīpikā
Tpk.	Tarkabhāṣāprakāśikā
Ts.	Tarkasaṁgrah
Tt.	Tarkataraṅginī

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

INTRODUCTION

(1) THE ACQUAINTANCE

It is a well established fact that Jainācāryas, while contributing in the field of Indology, have written not only on Jain Śāstras, but have studied and explored other systems of Indian thought also. The cause for this can be traced in their pursuit of the golden doctrine of Anekāntavāda that gives the noble maxim that the realization of truth can be held by various angles of approach. They have written, therefore, commentaries and sub-commentaries on a number of volumes other than their own.[1]

In the realm of these commentaries, those on Nyāya-vaiśeṣika seem to be conspicuous by their number. Dr. Jetly notes no less than twelve such commentaries in his edition of Tarkasaṁgraha.[2] One of them is Tarkataraṅgiṇī by Guṇaratna Gaṇi. Dr. Jetly has also written a paper on Tt. that appeared in JOI, Baroda,[3] wherein the learned author suggested that this commentary might prove very useful to those who want to learn the Navya-Nyāya system.

This paper created a curiosity to know more about Tt.—a commentary on Tpk. of Gv.—a commentary on Tbh. by Ke. On my inquiry, I found that there existed only two MSS. of this work, viz., (i) at the Oriental Institute, Baroda, and (ii) at the British Museum, London. The commentary consists of about 7500 śloka measure. The further inquiry inspired me to edit this unedited and unpublished text.

Dr. D. R. Bhandarkar in his introduction of Tbh. gives a long list of different commentaries on Tbh.[4] Tt. perhaps being a sub-commentary, is not included in it. However, Prof Paranjape, in his introduction of the Tbh., edited together with Tpk. mentions Gn., as the commentator of Tpk.[5] Prof. H. D. Velankar takes notice of the Ms. of Tt. in his Jinaratnakoṣa.[6] In the

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

catalogue of the British Museum it is shown that the Ms. of Tt. is unique.[7] However, there also exists another Ms. of this work at the Oriental Institute, Baroda.

Gn. had written Tt. for the use of the students especially for his pet-student Ratnaviśāla.[8] The author has, therefore, like a sincere teacher, made it exhaustive and simple. Almost all the important problems of Nyāya-vaiśeṣika metaphysics are discussed in this work. Gv. the writer of Tpk., occasionally uses the terminology of Navya-Nyāya, but Gn. in Tt. displays remarkable influence of Navya-Nyāya. However the language of the work generally maintains the simplicity that is rare in some of the later Navya-Nyāya works.

(2) The date of Guṇaratna Gaṇi

Personal History and date

From the colophon of the Tt. we know that Gn. was a disciple of Vinayasamudra gaṇi, a disciple of Jinamāṇikyasūri, who was a contemporary of Jinacandrasūri.[9] Jinacandrasūri was contemporary of Hīravijayasūri and lived in the time of the Mogul Emperor Akabara. Gn. completed a big commentary consisting of 10,500 s'loka measure on the Kāvyaprakāśa, on the 7th day of the black-half of Jyestha in V. S. 1610, i.e., 1553 A. D. The commentary was written for his pupil Ratnaviśāla.[10]

Gv.'s date re-considered

Though the date of Gn. seems to be certain from the above-mentioned reference, it creates the necessity to re-consider the date of Gv. Prof. Paranjape[11] followed by Keith[12] puts Gv. about the end of 16th century A. D., because Gv. was the son of Balabhadra and the younger brother of Padmanābha, who is known to have written a Vīrabhadra Campu in praise of a king Virabhadra, in the year A. D. 1578. N. Bhattācārya thinks that Balabhadra, the author of Balabhadrasandarbha, a commentary on SP., is the same Balabhadra, and flourished in the 17th century A. D.[13]

The acceptance of these dates creates a new problem of putting Gn. either earlier than Gv., or at least his senior contemporary, which may not be the case.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

The problem can be solved, however, by re-considering the date of Gv. as the date of Gn. is already fixed on the strength of the colophon of his commentary of Kāvyaprakāśa as shown above.

Balabhadra, the commentator of SP. may not be the same Balabhadra, who is the father of Gv. Even the colophon of Balabhadrasandarbha suggests that this Balabhadra was a Tripāthī and not a Miśra.[14] Thus, there is not any definite proof to prove the identity. Hence, to fix the date of Balabhadra, the father of Gv. on the ground of Sp. is not of much help.

GV. himself states that he was the son of Balabhadra and the younger brother of Padmanābha, in the beginning of the Tpk.[15] This Balabhadra has also written a commentary on Tbh.[16] His date is fixed as 1578 A. D. by Prof. Paranjape. But this date is fixed only on the strength of the Vīrabhadra Campu. We have no proof excepting the authority of Aufrecht's catalogue of MSS. to believe that the author of Vīrabhadra Campu was the same Padmanābha, the elder brother of Gv. Again, there is not much authentic information confirmed by history about a particular king Vīrabhadra. So Gv.'s date, as 1578 A. D., is not proved satisfactorily.

It will be better to fix Gv.'s date on the strength of dates of Ke. and Gn. themselves. Ke. quotes Udayana,[17] who is generally supposed to have flourished about the end of the 12th century A. D. Again we have a commentary on Tbh. by Cinnambhatta, who lived under the auspices of Harihara and Bukkaraya, whose date is supposed to be between A. D. 1350-1400. So Ke.'s date may fall between A. D. 1200-1400. Gn.'s date is fixed as 1553 A. D. already. So the safest period for the date of Gv. may be the later-half of the 15th century A. D. or the beginning of the 16th century A. D.

(3) Gn.'s Scholarship

From the text, we come to know that Gn. has studied the Nyāya philosophy from Puṣkar Miśra, the son of Nārāyaṇa Miśra.[18] Nothing is yet known about both of them. The term Miśra may suggest their native place as Mithila, the seat of the learning in Navya-Nyāya. Gn. is a learned pupil of this scholar and a master of Navya-Nyāya, as he quotes not only scholars like Vatsyāyana, Udayana, Gangeśa and Pakṣadhara Miśra, but he also refers to scholars like Sanātanī Pundita, Ratnakoṣakāra, Haridās and Kruṣṇadās.[19] At

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

the end of the discussion of Asamavāyikāraṇa, he calls himself the Vāda-Cakra Cūdāmaṇi.[20] This shows that he was not only a successful teacher and a scholar, but was also a master of dialectical discussion.

(4) Gn.'s other works

Besides the commentaries on Tt. and Kāvyaprakāśa Gn. has also written a Śaśadhar Tippana, which is a short running commentary on the Nyāyasiddhāntadīpa of Śaśadhara Miśra (12 cent. A. D.).[21] From Tt. it can be assumed that perhaps he might have written one more Tippaṇa on the work of Śiromaṇi.[22] But as nothing is known of such a work at present, no more can be said about it.

(5) SOME IMPORTANT PROBLEMS DISCUSSED BY Gn.

Though Gn. generally follows Gv. in the line of discussion, he is interested in elaborating many important problems that are only casually discussed either by Ke. or by Gv. Sometimes, Gn. himself tries to raise a problem and discusses it in detail, though it is not even mentioned by his two predecessors. Some of these points are shown as under :-

(I) Mangalavāda

With the inception of Navya-Nyāya, it became a tradition with the commentators of different Śāstras to discuss Mangalavāda in the beginning of their commentaries. Gn. is not an exception to it. He discusses Mangalavāda in detail though Gv. does not touch the point.

Mangala—Its fruit

Gn. accepts the necessity of Mangala. But the point of his discussion is regarding the fruit of the same. In a dialectical method, he puts following alternatives regarding the fruit of Mangala whether it is (i) the completion of the work, or (ii) the prior negation of the Vighna or (iii) the destruction of the obstacles. Gn. cites the opinions of scholars like Udayanācārya, Maṇikāra, Pakṣadhara Miśra and Upādhyāya.

Udayana's view

Udayana thinks that the aim of Mangala is the completion of the work, through the destruction of the obstacles (विघ्नध्वंसद्वारा समाप्ति) as the

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

completion itself suggests the Vighnadhvaṁsa.[23]

Maṇikāra's view

Maṇikāra, however, does not agree with Udayana. According to him the Vighnadhvaṁsa is the real fruit for Mangala. The completion is bound to follow it. It is implied and for the brevity point of view, it does not require separate mention. There is no direct connection between Mangala and the completion(Samāpti). In order to have a completion of the work, Mangala should be free from any intervening difficulty. So, there cannot be Kāraṇa-Kārya-Saṁbandha between Mangala and Samāpti. It is Anyathāsiddha. Therefore, Vighnadhvaṁsa is the only right fruit of Mangala.[24]

(Pakṣadhara) Miśra's View

Miśra's view is altogether different. It is negative in nature. According to him, while starting a work, the author always wishes and prays for the absence of the obstacles in his work. "विघ्नो मे माऽभूत्" is his keen desire. Therefore, says Miśra, "the prior negation of the obstacles (Vighnaprāgabhāva) is the only fruit aimed at by the Mangalkartā". It seems that Miśra believes in the maxim 'Prevention is better than cure', and there is nothing much wrong in it. However, Guṇaratna does not approve of this opinion. Technically Prāgabhāva is beginningless (Anādi). It is not born and on the contrary, with the destruction of the Prāgabhāva its Pratiyogi emerges. Hence, in the case of Vighnaprāgabhāva, its destruction will bring Vighna into operation. Thus, if Mangala is the cause of Vighnaprāgabhāva, there must be Anvaya-Vyatireka relation between them. But, it is not so, because even before Mangala, there exists Vighnaprāgabhāva, as the later is Anadi. In this way, there is no sufficient Pramāṇa to prove the relation between Mangala and Vighnaprāgabhāva.[25]

Upādhyāya's view

Finally, Gn. gives the view of [Yagnapati] Upādhyāya. According to him the completion only (Samāptireva) is the fruit of Mangala and not the Nirvighnasamāpti as propounded by Udayana. Upadhyāya believes that the samāpti is the final and the only desire of the writer at the time of the beginning of the work, e.g., the performer of an Aśvamedha sacrifice keeps his eyes on the attainment of the heaven, the final result of the sacrifice–and

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

not on any other thing that he comes across during the process of the sacrifice. Same is the case with Mangala and Samāpti.

Though Gn. does not give his own view, it seems that he agrees with the last one. For, in the next section, while discussing the nature of the Mangala, he says, "अत्र मुख्यफलं समाप्तिः"

Notion behind Mangala-vāda

The discussion is technical rather than an epistemological. All of these four views are supplementary to each other rather than controversial. For, even Udayana says that Samāpti is the real fruit, but Vighnadhvaṁsa should be accepted at least as an Avāntaravyāpāra. Miśra's approach is psychological, but as he expressed it in technical terms, he invited the opposition.

(II) Samāsavāda

The priority of the discussion

After discussing Mangalvāda, Gn. tries to explain the nature of the compound (Samāsa) in the first Sūtra of Ns., as quoted by Ke, in Tbh. Gv. also has touched this point, though Ke has not.

Curiously enough the order of the discussion is found to be changed in Tt.. Gv. discusses Samāsavāda after the discussion of Mokshavāda, while Gn. prefers to discuss it first.[26]

This change of place is not a scribal error, because all the Mss. of Tpk. referred to[27] agree regarding the place of the discussion of Samāsavāda as after Mokshavāda. Therefore, it seems that Gn. has changed this order deliberately. He, perhaps, thinks that this discussion should come first to understand the meaning of the N. S. I. I. I. The word "Apavarga" comes at the end. So naturally, the compound of the sixteen categories should be explained first. In the explanation of this compound, naturally the discussion of Samāsavāda follows. So, priority given by Gn. seems to be more logical.

The nature of the compound

Gv. states that the compound in this Sūtra is Itaretaradvandva. Gn. supporting Gv. elaborately explains the different types of Dvandva compound

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

quoting the relevant sūtra from Pāṇini.[28] In this discussion, he also shows the fundamental difference between Karmadhāraya and Itaretaradvandva and concludes that the compound in the sūtra is Itaretaradvandva.

This shows that Gn. is well conversant with the Pāṇiniya grammar, though Jainas generally studied the system of Hemacandra.

(III) Mokshvāda

Moksha through Tattvagnāna

The first sūtra of N. S. as quoted by Ke., tells that the right knowledge of the sixteen categories leads to the final beautitude.[29] Ke. merely explains the meaning of the word Nihśreyasādhigama. Gv., however, takes up the discussion[30] and tries to solve the problem that how the knowledge of the sixteen categories is responsible for the final beautitude.

Śāstra and Tattvagnāna

According to Gv., in the beginning Śāstra is the main source for Tattvagnāna.[31] However, Śastra is not a synonym for Tattvagnāna. Śastra in a way produces Vyāpāra, which is a door in the attainment of Tattvagnāna, ultimately leading to Moksha.

Here, Gv. warns against the notion that Śāstra as well as Tattvagnāna is direct cause of Moksha. According to him Śāstra consists of words which are momentary according to Nyāya system. The Moksha comes at the end, i. e., after Tattvagnāna is produced, and, therefore, the ablative in Tattvagnānāt should not be understood in the sense of "Hetu", but in the sense of "Prayojakaiva". He goes a step further and declares that even Mithyāgnānadhvaṁsa cannot be the Vyāpāra for Tattvagnāna, as it does not start immediately after Tattvagnāna. He also dispenses with Śravaṇa, Manana and Nididhyāsana as direct means of Moksha.[32]

Gn. faithfully follows Gv. in this matter. He explains later's view more clearly by adding a few remarks of his own. With Gv. he also draws our attention to the fact that though ablative case in "Tattvagnānāt" is in the sequel of "Prayojakatva" there is no Lakshaṇā to be understood in the process. That, Śastra as well as Tattvagnāna is "Prayojaka" and not "Janaka" of the Moksha can be easily understood from the word itself. This shows

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Gn.'s interest in subtle grammatical peculiarities.[33]

Kāśīmaraṇa and Moksha

Gn. here also refers to one more interesting topic, viz., "Kāśīmaraṇamukti". The objector's view is stated that if the easy way of Kāśīmaraṇa can give Moksha, there is no need of Tattvagnāna at all.[34] Gn. refuting this view states that Kāśīmaraṇa is not the direct cause of Mukti, but it produces Tattvagnāna, which leads to Moksha. Thus, Kāśīmiraṇa is the cause of Tattvagnāna. Here the argument may follow that why one should take the trouble of studying Śastras and their Manana and Nididhyāsana for Tattvagnāna, leaving the easy way of going to Kāśi and die there !

Though a Jaina, Gn. does not put the argument referred to above. He simply states that Kāśīmaraṇa-janya-tattvagnāna is quite different from the Tattvagnāna produced by Śāstra. Here Gn. only supports the view of old Naiyāyika-pundits perhaps his own teachers and thus his honesty is shown as a commentator.

(IV) The three-fold Śāstra-pravrutti

Three-fold divisions

The three-fold Śāstrapravrutti is explained by Vātsāyana as Uddeśa, Lakshaṇa and Parīkshā.[35] The author of Tbh. is satisfied only in giving the respective definitions of these three. Gv., however, examines the pros and cons of all these definitions and ultimately declares them to be proper.[36] Gn. takes up the discussion and elaborates the same.[37] His zeal in entering in such types of discussions can be traced in the peculiar trend of the neo-logician's immense striving after the exactness of the meaning of each word used in the definition of an object. Really speaking, "merits of Navya-Nyāya speculations pre-eminently lie in their method of analysis of concepts and their formulations in exact terminology. The analysis is carried to its utmost limit".[38]

The formation of an appropriate definition (Lakshaṇa) was considered to be a touch-stone of the scholars, and here Gn. has to examine the definition of the 'definition' itself.

Lakshaṇa

The lakshaṇa (i. e. definition) is defined as a statement of a

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

differentia'[39]. However, to prove that a particular quality of an object, belongs only to that object exclusively is not really an easy task. Gn. following Gv. takes the substance 'Pruthvi' as an illustration and tries to define it by giving, 'water', 'prameyatva' and 'gandha' (smell)' as its peculiar qualities, one by one, and examines their relative merits. Finally he ascertains 'Gandha' to be its proper peculiar characteristic.

The negative nature of the Lakshaṇa

In fact the nature of a definition of a 'lakshaṇa' is more or less negative. It is of 'Vyatirekidharma' (exclusion)[40]. Its validity can be judged better by the method of disagreement (Vyatireka) rather than by the method of agreement (Anvaya). Therefore, Gn. explains it as 'Atyantābhāva-pratiyogitvam'.[41]

In short, the main object of the Lakshaṇa is to differentiate one object exclusively from all other objects. All other objects should possess its absolute negation. The quality fulfilling this fundamental requisite alone can be called the differentia (Asādhāraṇadharma)[42].

The above discussion can give us a fair idea about the style of Gn. in the treatment of a topic under consideration. This method of systematic and somewhat extensive presentation is generally maintained through out, in Tt. We, therefore, need not go into the details hereafter. Howęver, some of the important points are noted in short as to preserve the continuity of the contents of Tt.

(V) [Pramā] [प्रमा]

The laxaṇa of pramā as तद्वति तत्प्रकारत्वम् i. e. यथार्थानुभवत्व is explained by Gv. in Navya-Nyāya terminology concluding it as यदनवच्छेदेन-यत्सम्बन्धपुरस्कारेण यत्र-तत्सम्बन्धं तदनवच्छेदेन-तत्सम्बन्धपुरस्कारेण तत्र तदनुभवस्य प्रमा(त्वात्) ।[43]

Gn. elaborates this statement at length, analysing it word by word and then like a good teacher he puts it in a simplified manner.

(VI) Kāraṇa

Gn. discusses in detail the nature of a cause from the Nyāya-Vaiśeṣika point of view. He refutes the identity of cause and effect as accepted by Sāṁkhya. He clearly shows that even vyāpyavyāpakabhāva between the two

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

objects cannot be proved to be the kāryakāraṇabhāva of the same, as kāryakāraṇabhāva is different from vyāpyavyāpakabhāva.

After refuting the above view of the ancients, Gn. turns to the new-logicians. They accept either Svarupasaṁbandha or an independent category.[44] Gn. agrees with them. The kāraṇatā of stick (danda) etc. lies in their nature of being a cause as propounded by the kāryatā of a ghata etc. just like dandatva in a danda, it is related with the kāryatā of ghata. Thus he comes to rather a strange conclusion that the cause is a different object and at the same time it is a svarupaviśesa. How this paradoxical situation can be operative in its logical form is not explained by Gn. Perhaps he wants us to understand that though cause and effect are different, there is something peculiar in the very nature of the cause itself that makes the effect to be existent. If it is so, then the very definition of the cause as being an invariable, unconditional antecedent becomes useless. Gn. himself is pressed with this difficulty and tries unsuccessfully to avert it by saying that the definition is only suggestive of this real relation.

(VII) Asamavāyi kāraṇa

Gn. discusses various definitions of Asamāvayi kāraṇa in the light of Līlāvatī and the Cintāmaṇi. He shows that Śakti the independent category of Mīmāsakas and kurvadrūpatva of Buddhas are both included in the Asamavāyi kāraṇa.[45] Following Gv., he tries to distinguish Asamavāyi kāraṇa from the Nimitta kāraṇa. But he does not discuss it in a convincing manner.[46]

(VIII) Perception

In his treatment of perception Gn. clearly explains and severely criticises the Buddhist view of nirvikalpa pratyaksha. But in his criticism he resorts to the neo-logical concept of the nirvikalpa which is not identical with that of the Buddhist concept.[47]

(IX) The sixfold contact

Though Gv. does not touch sixfold sense-object-contact (sodhā-sannikarṣa), Gn. explores its significance in detail. He refuses to accept the first two types viz., samyoga and samyuktasamavāya. His arguments,

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

however, are not convincing. Because parts (avayavas) are not separately seen from the whole (avayavi). In fact he has not considered the full account of the problem.[48]

(X) Vyāpti

Gv. starts neo-logical discussion of the definition of Vyāpti, but does not go deep into it and stops abruptly saying—विस्तरो न लिख्यते बालानामनुपयोगात् ।[४९]

But Gn. is not satisfied with this. Following Gangeśa, he presents no less than five definitions of Vyāpti. He examines, criticises and modifies some of them.[50] In course of this discussion he suggests to refer to Śiromaṇi tippaṇa, perhaps his own work.

(XI) Hetvābhāsas

Gn. explains in detail the significance of the definition of hetvābhāsa as given by Gv.,[51] and shows how it can be applicable to all of the five hetvābhāsas. He also quotes Gangeśas' definition of hetvābhāsa and showing its limitations he rectifies the definition.[52]

Gn. shows the mutual difference between all the hetvābhāsas with one another. Curiously enough he tries to show the difference between satpratipaksha and sandeha, though this point is not even suggested either by Km. or by Gv. This is quite a new point that he discusses. According to him the second variety of Saṁsaya resembles much with satpratipaksha.[53]

(XII) Śabda

While Gv. is satisfied with the simple explanation of KM's definition of Śabda,[54] Gn. enters into a detailed discussion of the various aspects related to this Pramāṇa. He deals with some other problems also–e.g. the eternity of Śabda, the role of memory, the power of Śabda, Lakṣanā etc.

During the discussion he suggests to refer to Śiromaṇiprakāśa—probably a commentary on some work of Raghunātha.[55]

(XIII) Cārvāka on Pramāṇa

Gn. examines the Cārvāka's view about pramāṇa. Cārvāka thinks that only the perception is the valid and independent pramāṇa. Inference (anumāna) is based on induction (vyāpti). Later is only a probability. Its

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

validity depends upon sāmānya Lakṣaṇā pratyāsatti which is nothing but kind of perception. In the same way Śabdapramāṇa is based on gnānalakṣaṇā pratyāsatti—a variety of alaukika pratyaksha. Gn. refutes these arguments and affirms in the conclusion that Śabda is an independent pramāṇa.

In fact, one should not forget that Śabda pramāṇa is different from the perception of the śabda(śabdapratyaksha). In Śabda pramāṇa, the pramātva is based on the authority of Āpta, while in the perception of the Śabda, it is the hearing of the word. Cārvāka's view as stated by Gn. and his own contention are both based on misunderstanding.

(XIV) Prāmāṇyavāda

Prāmāṇyavāda has always been a bone of contention among the different schools of Indian Philosophy. The controversy of स्वतः प्रामाण्यं and परतः प्रामाण्यं however is seen more pertinent between the Naiyāyikas and Mīmāṁsakas. Mīmāṁsakas advocate the theory of स्वतः प्रामाण्यं and परतोऽप्रामाण्यं while to Naiyāyikas प्रामाण्य and अप्रामाण्य both are परतः.

The Mīmāṁsakas are however not uniform in their arguments to establish स्वतः प्रामाण्यं. Each of the three schools of Mīmāṁsā viz., those of Prabhākara, Kumārila and Murāri has to offer its own theory. Km. presents and refutes only the theory of the Bhāṭṭa school of Mīmāṁsā. Gv. makes a passing reference to all of the three schools, at the end of this topic.[56]

But Gn. discusses the theories of all these three schools from the very beginning. He examines each of the theories carefully and showing their relevant defects, he proves the validity of the Nyāya school at the conclusion.[57]

(XV) Dissolution

While explaining Paramāṇuvāda and the process of creation and dissolution, Gn. follows Gv. and Km. He, however, narrates in detail the controversy between ancient and modern Naiyāyikas regarding the process of dissolution.

The ancients hold the view that with one exception, (i. e. dvayaṇukas) the destruction of the effects is immediately brought about by the destruction of their samavāyikārṇas. Paramāṇus, though samavāyi kāraṇa of dvayaṇukas, are undestructible. The destruction of dvayaṇukas therefore, occurs by the

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

destruction of the paramaṇu-samyoga i. e. asamavāyikārananāśa.

Moderns hold the view that there is only one cause for the destruction of the effects, and that is the samyoganās'a i.e. asamavāyikāraṇanāśa.

Gn. does not agree with the moderns. He thinks that at the time of dissolution (Pralaya), tryaṇukas are destroyed by the destruction of dvyaṇukas–their samavayikāraṇa. According to him, the modern theory results into the absurdity of accepting an object like ghata, existing even in the absence of its samavāyikārana like kapālas.

However, Gn. agrees with Gv. in making the compromising statement that kāryadravyanāśa takes place by Nimittetarakāraṇaṇāśa.[58]

(XVI) Citra-rūpa

Here Gn. supports the ancient view and accepts citra-rūpa as an independent variety of colour (rūpa).[59] However he does not touch the original argument underlying in this case viz., the acceptance of colour (rūpa) as being vyāpyavṛtti. The neo-logicians do not accept the vyāpyavṛttitva of rūpa, hence the ancient view about the citrarūpa does not hold ground. Gn. avoids the fundamental discussion and presents only superfluous argument.

(XVII) Samyoga

In explaining the second variety of samyoga viz., karmaja-samyoga, Gn. very skillfully refutes the objection laid by pūrvapakṣha. He also disagrees with the traditional Nyāya view of accepting samyoga as avyāpyavṛtti, as shown even by KM. According to Gn., samyoga is vyāpyavṛtti. He also quotes the Līlāvatī in this context.[60]

(XVIII) Anyathākhyāti

In guṇaprakaraṇa while explaining apramā, Gn. takes the opportunity to discuss the well-known anyathākhyāti, the theory of error, of Naiyāyikas. He also refutes the akhyāti theory of Prabhākara.[61]

(XIX) Siddhānta

In case of the category Siddhānta, Km. follows the original Ns. and the Nbh. of Vātsyāyana. Gv. being the follower of Vārtikakāra, refutes Km.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

on that line. Gn. blindly follows Gv.[62]

(6) Gn.'s contribution to the Nyāya-vaiśeṣika system

The survey of the important problems discussed in Tt., will show even at a first glance Gn.'s deep study and acumen in the Nyāya-vaiśeṣika system. He is quite at home in both the trends—old and new of the Nyāya school. He refers not only to Gotama, Vātsyāyana and Udayana, but also to Gangeśa Vardhamāna, Raghunātha Śiromaṇi and other neo-logicians. It will be seen however, that he is lured by the charm of navya-nyāya more, and that can be justified because of the time in which he lived and also because he has studied this system from a Guru who probably belonged to Mithilā. His writing is therefore, pregnant with the navya-nyāya terminology. But at the same time, it should be noted that, it, in no way becomes too much hair-splitting and unintelligible. Gn. does not suffer from the morbid concern for the precision of language a concern which, on account of its morbidity led to the paradoxical consequence that "Navya-Nyāya texts constitute the least comprehensible sector of our philosophical literature."[63]

Gn. is always clear, precise and unambiguous. E.G. while explaining the मुख्यफल of मङ्गल he says :- मुख्यं फलं यथा यागे स्वर्गः । तज्जनको भवति यागः । तज्जनिका भवति होमादिसामग्रीः । सा त्वङ्गम् । तथाऽत्र नास्ति[64] ।

Simplicity, however, is not maintained in Tt., at the cost of the sincerity to explore the hidden significance of the problem under discussion. Gn., therefore, at times applies technical phraseology also. The whole of the chapter on Inference is full of such terminology and phrases.[65]

At the same time, it should be accepted to Gn.'s credit that whereever complicated technical expressions are used, Gn. takes special pains to analyse their intricacies. He chaffs the husk of the jargon and brings out the kernel of comprehension.

Gn. first selects the topic for discussion, explains it in general in the beginning; then deals with the probable objections quoting the views of other scholars where necessary. He never forgets his disciple even amidst extremely complicated discussions. Hence he goes on explaining one and the same point repeatedly till he feels satisfied that his disciple will be able to digest it. So the words—अयं प्रघट्टः अयमर्थः, अयं भावार्थः, अयं पुनरर्थः, पदकृत्य आदितः पदकृत्यं are

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

used frequently.[66] Gn. seems to be always a teacher in his treatment throughout whole of the Tt.

Sometimes after presenting several views, he winds up the discussion with वस्तुवस्तु etc.,[67] while sometimes he concludes the discussion like a learned professor in a class room, with a suggestion to refer to some scholarly work for further details.[68]

While presenting several views in case of a particular problem, generally Gn. does not seem to be persistent in giving his own view. However from the general drift of such discussions, it can be presumed that he may be sharing the last view. In spite of this attitude at times he does specifically put his own view discarding all other theories. E.g. in the discussion of षोढा सन्निकर्ष and other such points where he does not agree with the prevalent views.

Gn. is a faithful commentator. Though a Jainācārya, he shows considerable impartiality in his treatment. He never intermingles any Jaina doctrine or theory with that of the Nyāya system. On the contrary, certain Nyāya principles that have met severe criticism in Jaina school of thought, are faithfully presented and justified by him. For instance, he criticises मध्यमपरिमाणत्व of आत्मा—a theory acceptable to Jainas, and proves विभुपरिमाणत्व of आत्मा—the Nyāya theory as valid. The concept of Jāti is yet another proof for Gn.'s honesty as a commentator.

In the same way his faithfulness to Gv. is also sometimes remarkable. Except the definition of Sāṁkhya, where Gn. slightly differs from Gv. and the priority of the order of the discussion of samāsavāda and mokshavāda, Gn. accepts and justifies almost all the conclusions arrived at by Gv. Following Gv., he does not mention आप्तः, सपक्षः and निर्णयः. He prefers to discuss hetvābhāsas according to Gv.'s scheme. It seems, he is concerned more with Gv. than with Km., as he comments on Tpk. and not on Tbh. That is why, perhaps he agrees with Gv. in stating that the illustration given by Km. for अभ्युपगमसिद्धांत is improper and it should be placed under प्रतितन्त्र सिद्धान्त. Not only that but at least at one place, he is so concentrated on Tpk. that he does not even read Tbh. carefully. As a result, with reference to the destruction of the चरम शब्द Gn. subscribes a view to Km. which the later has presented as belonging to a pūrvapaksha !

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

His devotion to Gv., however does not prevent Gn. to explore some more interesting topics not referred to by Gv. Tt. in no way, is a short cut to Tpk. It is a thesis pregnant with scholarly discussions that may enrich the value of the original treatise, just as the Dinakarī enriches the Nsm.

Thus it will be seen that Gn. is a lover of details. He is not inclined to furnish any new theory of his own. He is concerned more with presenting the subtle points of Navya-Nyāya, which he has digested from the works of his predecessors. His originality, therefore, lies in the novelty of approach rather than that of the ideas. And because of that, Tt. can serve as a handy volume for the beginners of the Navya-Nyāya, and at the same time it may prove a ready reference to the scholars of Indian philosophy in general.

Foot-notes :

1. Vide जैनेतर ग्रन्थों पर जैन विद्वानों की टीकाएँ, भारतीय विद्या - वर्ष २, अङ्क ३, श्री अगरचन्द नाहटा
   Pl. see also SP. Ed. by Dr. Jetly, Intro. pp.7 & 9.
2. Published by Rajasthan Oriental Research Institute.
3. Vol. III, No.4, pp. 343-345.
4. Tbh. BSS. Vol. No. LXXXIV. Intro. p. xix.
5. P. 3.
6. JRK. p. 159.
7. No 329.
8. श्रीमद् रत्नविशालाख्य स्वशिष्याधीति हेतवे ।
   गुणरत्नगणिः चक्रे टीकां तर्कतरङ्गिणीम् ॥ Tt. p. 153
9. इति श्रीमद् खरतरगच्छाधीश्वरयुग प्रधान श्री जिनचन्द्रसूरिविजयनि श्री जिनमाणिक्यसूरि शिष्य श्री विनयसमुद्रगणिनां शिष्येण वाचकगुणरत्नगणिना गोवर्धन प्रकाशिका तर्कतरङ्गिणी नाम्नी सन्दष्टा । - इति श्रीतर्कतरङ्गिणी टीका समाप्ता Tt. p. 242
10. Vide Yugapradhāna Śri Jinacandrasuri (In Hindi). -Agaracanda Nahata. pp. 163-164. Also Appendix 'ca' referring to p. 164 p. See also B.O.I.J. Vol. III No. 4. Dr. Jetly's paper—p. 343.
11. Tbh. Intro. p. 3.
12. Indian Logic and Atomism p. 38.
13. Sp. Intro. p. 13.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

14. SP. p. 151.

15. p. 1.

16. Also named Tpk.

17. Tbh. p. 102.

18. श्रीमन्नारायणमिश्रात्मजपुष्करमिश्रमुख्यादधिगम्य वाचकगुणरत्नगणिना व्याख्यातं (प्रमाणम्) Tt. p. 153

19. See Appendix II.

20. इति वादे चक्रचूडामणिजितानेकवादिवृन्दवाचनाचार्य श्रीगुणरत्नविर(चित) गोवर्धनी टिप्पणे असमवायिकारणप्रकरणम् Tt. p. 58.

21. JOB. Vol. III, No. 4, p. 345.

22. Tt. pp. 74 & 82, a Śiromani-Tikā is also referred to on p. 22.

23. Tt. pp. 1-2.

24. विघ्नध्वंसं प्रति मङ्गलस्य जनकत्वे गृहीत एव समाप्तिं प्रति जनकत्वं गृह्यते-इत्यन्यथासिद्धः । तथा च न समाप्तिं फलम् । विघ्नध्वंसकामनायैव शिष्टानामाचारदर्शनात् । Igid, p. 2

25. यथा यदि विघ्नप्रागभावस्तदा विघ्नोत्पत्तिः केन वार्येत ? यदि विघ्नप्रागभावो नास्ति तदा मङ्गलस्य किं स्यात् ? विघ्नप्रागभावे प्रमाणाभावात् ? । Ibid p. 3

26. Tpk. p. 10. Viśvanātha also prefers the discussion of Samāsavāda to that of Mokshavāda, Vide N.S.V. p. 9

27. Besides the printed edition of Tpk. by Prof. Paranjape, Mss., Nos. 2133 & 2700 resp. of L. D. Inst. of -Indo. A'bad are also referred to.

28. सरूपाणां एकशेषः । पा. १. २. ६४

29. प्रमाणप्रमेय.....निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रम् । Tbh. p. 3

30. Tpk. p. 3

31. Gaurikānta-1 Commentator on Tbh. refutes this view of Gv. यत्तु तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमिति तन्न । Tpk. Notes p. 2

32. Mādhavadeva—commentator on Tbh. together with Gaurikānta differs from Gv. According to them Moksha is the direct result of Śravaṇa, etc.. Ibid. p. 2.

33. See Tt. pp. 9-11.

34. Ibid. p. 13.

35. N.S. 1- I-2.

36. Tpk. p. 37.

37. Tp. pp. 16 to 20.

38. Dr. Saikari Mookerji B. P. Int. p. XIV.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

39 असाधारणधर्मवचनम् । Tbh. p. 7. Cp- तत्रोदिष्टस्यं तत्त्वव्यवच्छेदको धर्मो लक्षणम् (Vā. on N.S. I-I-2)

40. व्यतिरेकित्वमेवासाधारण धर्मत्वमित्यर्थः । Tbh. p. 7.

41. तथा चात्यन्ताभावप्रतियोगिधर्मत्वमेव लक्षणम् । Tt. p. 18

42. Though Gn. has accepted and elabaroted Gv.'s view of 'व्यतिरेकित्व' as an 'असाधारण धर्म' of a 'लक्षण, गौरि' severally criticises Gv. on this point. असाधारणत्वं व्यतिरेकिधर्मत्वमिति गोवर्धनः । किञ्चिद्वृत्तित्वे सति किञ्चिद्वृत्तित्वं यत्र सर्ववृत्तितत्त्वं वेति बलभद्रः । उभावपि वर्वरौ । एवं सति प्रमेयपदार्थस्यालक्षणीयत्वापत्तेः । व्यतिरेकिधर्मस्य सर्वस्यैवाव्याप्तेः । प्रमाविषयत्वादिरूप-केवलान्वयिधर्मस्य तन्मते व्यतिरेकिधर्मत्वाभावेनालक्षणत्वादिति स्फुटतरमालोचनीयम् ।

Tpk. Notes. p. 4.

Though this objection is well taken Gaurikānta has missed the point by simply over-looking the explanation given in the very beginning of this discussion by Gv. The later says, "अत्रासाधारणेति पदानुपादाने प्रमेयाणामभिधेयत्वं धर्म इत्यादि वाक्येऽतिव्याप्तिः । अभिधेयत्वादीनां केवलान्वयितया व्यावर्तकया लक्षणत्वेन तत्प्रतिपादकस्य लक्षणात्मकशास्त्रत्वाभावात् । i. e. stress should be laid on असाधारणत्व instead on व्यतिरेकित्व.

43. Tpk.

44 Ibid. pp. 94. 95.

45. Tt. pp. 56-57.

46. Ibid. p. 58.

47. Ibid pp. 68-69.

48. Ibid. p. 56-57.

49. Tpk.

50. Tt. pp. 71-80.

51. Tpk. p.

52. Tt. p. 231.

53. Ibid. pp. 240-241.

54. एतावत्प्रपञ्चस्य बालबोधार्थं करणात् । Tpk.

55. विस्तरस्तु शिरोमणिप्रकाशे बोध्यम् । Tt. p. 125.

56. Tpk. p. 61-62.

57. Tt. pp. 135-140.

58. Tt. pp. 169-170.

59. Ibid. p. 180.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

60. Ibid pp. 191-192.
61. Ibid p. 199.
62. For detailed discussion vide- न्यायदर्शने सिद्धान्तननिरूपणम् Bulletin. Mithila. Re. Inst. Vol. iv-vi. p. 79, and Interpretation of the four types of siddhānt vāk; 69. p. 87- both articles by Dr. Jetly.
63. K. B. Dixit, Enquiry Vol. 3. pp. 107-108.
64. For more instances vide-TT. p. 35 :- fifth kind अन्यथासिद्धि
    P. 101-on व्यतिरेकी हेतु etc.
65. Tt. pp. 70-86.
66. vide. E.G. Gv.'s definition of प्रमा as explained by Gn.. Tt. pp. 23-30.
67. Vide.TT. pp. 11, 77, 80, 82, 97, 98, 166, 103, 128, 166 etc.
68. e.g विस्तरस्तु शिरोमणिप्रकाशे बोध्यः । : T.T. p. 125 शेषं शिरोमणिटिप्पणेज्ञेयम् । p. 86 एतत् लक्षणविचारो हरिदासटिप्पणात्ज्ञेय इतिदिक् । T.T. p. 86 etc.

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

A NOTE ON THE MANUSCRIPTS OF TT.

As mentioned in the beginning, only two Mss. of Tt. are available. The Ms. from Oriental Institute, Vadodara, is marked as "A" and the other Ms., belonging to British Museum London is marked as "B".

"A"—This Ms. has seventy eight leaves, written on both sides. Each side contains twenty two lines and there are seventy two letters in each line. The last leaf has only 6.5 lines. Each leaf measures 9.9"x4.4". Though the lines are too close to make the leaf sufficiently neat, the letters are clear and legible.

This Ms. seems to be very old. It is torn at many places and is also damaged by in sects. In spite of it, I have preferred the readings of this Ms. as its text seems to be more correct [śudha] than that of the "B". However I have accepted the readings of "B" at some places also as to suit the proper context.

The use of padimātrā is noticed in this MS. There is hardly any difference between त and न, between प and य and between छ and थ.

It is interesting to note that some explanatory notes are found in the margin of the leaves No 1 to 23, but it is stopped thereafter. The mode of the letters suggests this Ms., was written probably in the 17th cent. A. D.

"B"—As I had only photo-state copies prepared from the micro–film of this Ms., it is not possible to say anything about the nature and state of the leaves of this Ms. The description of this Ms., given in the catalogue of British Museum, London, under No. 329, reads as under.

"There are ninety one folios, each one measuring 12"x4\2". Each leaf has seventeen lines [Though the catalogue mentions eighteen lines, it may be a slip of counting]. There are sixty six letters in each line. The Ms. is written in regular and beautiful Nāgari hand with some Jaina characteristics of western India in 17th century". Its beginning is same as in "A". But in the end, it reads three more verses, not found in "A". Though this MS. is neat and clear, its reading is not correct at many places. A general carelessness, in the use of 'anusvāras' and 'visargas' is met frequently. The use of the Mātrās is also not regularly precise. However it is satisfactory in its presentation.

No explanatory notes are found in this MS.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

APPENDIX

Some of the Nyāya-Vaiśeṣika Scholars referred to in Tt.

[Gn. has quoted at least fifteen scholars by name, out of which Udayana, Pakṣadhara Miśra, Gaṅges'a, Vardhamān and like are too wellknown to need any introduction. Hence a short bio-data of only seven scholars is given herewith.]*

1. Bhavānanda Bhattācārya

He is generally known as Siddhāntavāgis'a. He belonged to Bengal and was the pupil of Kṛṣṇadāsa. Prof. Bhattāchārya thinks Bhavānanda to be a contemporary of Guṇānanda who flourished in the second half of the 16th cent. A. D. However the date of Gn. suggests that this date may be earlier.

Bhavānanda wrote commentaries on—
Ātmatattaviveka [Udayana]
Nyāyalīlāvatī [Vallabha],
Tattvacintāmaṇi [Gaṅges'a],
Kiraṇāvaliprakāśa and

Nyāyalīlāvatīprakāśa [Vardhamāna], Tattvacintāmanyāloka [Pakshadharar mis'raa] and Nyāyalīlāvatī prakāśadidhiti[Raghunātha]. His only available independent work is Siddhāntarahasya'.

2. Haridāsa—Nyāyālaṁkāra

Haridāsa also belonged to Bengal. His commentary on Kusumāñjali is well-known. He is generally supposed to be earlier than A. D. 1599. However on the authority of Gn., it can be pushed earlier than A. D. 1553 safely. He has also written commentaries on Tc. and Tattvacintāmaṇyāloka.

(★) The data for this appendix is taken from *"History of Navya Nyāya in Mithila"*—Prof. Dinesh Chandra Bhattāchārya and *"Gleanings from the History and Bibliography of the Nyāya-Vaiśeṣika Literature"*—Pt. Gopināth Kavirāja.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

3. Kṛṣnadāsa

Sārvabhauma is supposed to be the guru of Kṛṣnadāsa. He belonged to Nadia. His work is known as Pratyakshālokaprasāraṇi

4. Lālāvatīkāra—

It may be presumed that here Nyāya Līlāvatīkāra i. e. Vallabhācārya is implied. Gn. quotes Līlāvatī three times—(i) in the chapter on Asamavāyikāraṇa, (ii), in explaining the meaning of 'iva' in Navaiva in the chapter on Dravya and finally (iii) in the discussion on problem of Avyāpyavṛttittva of saṁyoga. Unfortunately, no such discussions are found in the available texts of Nyāyalīlāvatī. Should we therefore, infer that the Līlāvatī, referred to here, is the commentary of that name—on Praśastapādabhāsya ? But it cannot be so. For, Gn. calls Līlāvatīkāra a Navīna [Naiyāyika]

The only possible explanation of this discrepancy may be that Gn. perhaps quotes from memory some other commentary on Līlāvatī in the name of Līlāvatīkāra !

5. Sanātan [or-ni] Pundita—

While following Gv., Gn. has referred to Sanātana Pundit in Tt., in the discussion on Kathā. According to the later Kathā is of four types instead of three. He is quoted by Śankara Miśra in Vādi-Vinoda, by Vācaspati Miśra-I. In Tātparyapariśuddhi and also by Vācaspati Mis'ra II in Tattvāloka in the same context. Sanatana seems to be an old Nyāyācārya.

6. Sundalopādhyāya

This scholar is from Mithilā and is specially known as a propounder of an exceptional kind of Negation [Abhāva]. He is quoted by Ganges'a Maṇikaṇtha and Mathurānātha. His probable date is 1275 A. D.

7. Ratnakośakāra or Taraṇa Miśra

He was one of the great pre-Gangeśa authorities of Mithilā. His treatise is known as Ratnakośa. He is quoted by Manikantha, Vācaspati Miśra II, Vardhamāna and also by Śankara Miśra. His probable date is believed to be 1300 A. D.

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विषयानुक्रमः

विषयः		पृष्ठाङ्क
[१] मङ्गलवाद :		१
(I)	मङ्गलस्य फले मतद्वैविध्यम्	१
(II)	उदयनाचार्यमतम्	१
(III)	मणिकृदुक्तं दूषणम्	२
(IV)	मिश्रमतम्	३
(V)	मिश्रमतपरिहारः	३
(VI)	उपाध्याय[यज्ञपति]मतम्	४
(VII)	नव्यमतम्	४
(VIII)	मङ्गलस्य स्वरूपनिर्णयः	४
[२] उपोद्घातः		५
(I)	प्रयोजनम्	५
(VI)	सम्बन्धः	५
(VII)	अधिकारी	५
(IV)	समासवादः	५
[३] मोक्षनिरूपणम्		७
(I)	पुरुषार्थत्वम्	७
(II)	शक्तिः	७
(III)	प्रसङ्गात् परीक्षाविचारः	८
(IV)	मोक्षं प्रति शास्त्रस्य न कारणत्वम्	८
(V)	प्रयोजकतावादः	१०
(VI)	ईश्वरसाक्षात्कारस्य मोक्षजनकत्वम्	१५

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(VII) मिथ्याज्ञानध्वंसः १६
(VIII) पुरुषार्थत्वम् १६

[४] उद्देश-लक्षण-परीक्षाविचारः १७
(I) उद्देशनिरूपणम् १७
(II) लक्षणनिरूपणम् १९
(III) परीक्षाविचारः २१

[५] प्रमाणविचारः २२
(I) प्रमाणलक्षणम् २२
(II) प्रासङ्गिकी तर्कादिचर्चा २३
(III) प्रमाणलक्षणे दोषनिरासः २५
(IV) इन्द्रियस्य प्रमाकरणत्वम् २८
(V) फलायोगव्यवच्छिन्नं कारणमिति-मतनिरासः २९
(VI) प्रमाणस्य निष्कृष्टलक्षणम् २९
(VII) उक्तलक्षणस्य प्रमाणेषु विनियोगः ३०
(VIII) प्रासङ्गिकः जातिविचारः ३१
(IX) शब्दप्रमाणे उक्तप्रमाणलक्षणविनियोगः ३३
(X) शेषप्रमाणत्रयेऽपि विनियोगः ३३
(XI) प्रमाणलक्षणपरीक्षा ३३

[६] कारणनिरूपणम् ३६
(I) प्रासङ्गिकमन्यथासिद्धिनिरूपणम् ३६
(II) कारणलक्षणे नियतपदविचारः ३८
(III) कारणलक्षणपरीक्षा ३९
(IV) कार्यलक्षणम् ४१
(V) कार्यानुकृतान्वयव्यतिरेकित्वं कारणत्वमिति मतनिरासः ४१
(VI) समवायिकारणलक्षणम् ४५
(अ) प्रासङ्गिकः समवायविचारः ४५
(ब) गुणगुणिनोः समानकालीनत्वविचारः ४७
(क) चार्वाकमतम् उदयनकृत तत्परिहारश्च ४८
(ड) बौद्धमतचर्चा ४९

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(VII) असमवायिकारणविचारः ५०
(VIII) निमित्तकारणम् ६५

[७] मीमांसककृतप्रमाणलक्षणस्य निराकरणम् ६६

[८] प्रत्यक्षनिरूपणम् ६७
(I) निर्विकल्पसविकल्पप्रत्यक्षम् ६७
(II) सन्निकर्षचतुष्टयम् ७०
(III) षोढा सन्निकर्षः ७०
(IV) बौद्धमते प्रत्यक्षविचारः ७५

[९] अनुमान-निरू पणम् ७६
(I) अनुमानलक्षणम् ७६
(II) लिङ्गलक्षणम् ७८
(III) व्याप्तिनिरूपणम् ७८
(IV) अवच्छेदकत्वस्वरूपम् ९४
(V) व्याप्तिज्ञानस्यानुमितिं प्रति कारणता ९५
(VI) लिङ्गपरामर्शनिरूपणम् ९५
(VII) स्वार्थानुमानम् १०३
(अ) सामान्यलक्षणा प्रत्यासत्तिः १०३
(ब) ज्ञानलक्षणा प्रत्यासत्तिः १०६
(क) योगजधर्मलक्षणा प्रत्यासत्तिः १०७
(VIII) परार्थानुमानम् १०७
(IX) हेतुत्रयनिरूपणम् १०७
(X) पक्षतालक्षणम् ११२
(XI) विपक्षलक्षणम् ११४

[१०.] हेत्वाभासाः ११४
(I) व्याप्यत्वासिद्धः ११४
(अ) उपाधिस्वरूपम् ११४

[११] उपमानम् १२०

[१२] शब्दप्रमाणम् १२२

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(I) शब्दलक्षणम् १२२
(II) आकाङ्क्षाविचारः १२७
(III) योग्यता १२९
(IV) आसत्तिः १२९
(V) पदानां समूहालम्बनत्वम् १२९
(VI) शब्दस्यानित्यत्वनिरूपणम् १३०
(VII) शब्दस्यानित्यत्वम् १३०
(VIII) प्रत्यभिज्ञया शब्दग्रहणम् १३२
(IX) चार्वाकमतनिरासः १३५
(X) शक्तिः १३६
(XI) शब्दप्रमाणे लक्षणाविचारः १३७
(XII) शब्दप्रमाणलक्षणविचारः १३९
(XIII) प्रसङ्गात् वेदलक्षणम् १३९

[१३] अर्थापत्तिविचारः १४१

[१४] अनुपलब्धिप्रमाणान्तरविचारः १४१

[१५] प्रामाण्यवादः १४५

[१६] प्रमेयपदार्थनिरूपणम् १६७

(I) आत्मा १६७
(II) शरीरलक्षणे भोगः १७४
(III) शरीरम् १७६
(IV) इन्द्रियम् १७८
(V) अर्थाः १७९

[१७] अर्थप्रकरणे द्रव्यनिरूपणम् १७९

(१) पृथिवीनिरूपणे पाकजविचारः १८२
(२) तेजोनिरूपणे सुवर्णविचारः १८२
(३) वायुः १८३

परमाणुवादः १८४

(४) आकाशम् १९०

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(५) कालः । १९२
(६) दिक् १९४
(७) मनः १९४

[१८] अर्थप्रकरणे गुणनिरूपणम् १९४

(१) रूपम् १९६
(२) रसः १९७
(३) गन्धः १९८
(४) स्पर्शः १९८
(A) पाकजप्रक्रियानिरूपणम् १९९
(B) पाकजप्रक्रियायां क्षणविचारः २०१
(५) सङ्ख्या २०२
(६) परिमाणम् २०५
(७) पृथक्त्वम् २०६
(८) संयोगः २०७
(९) विभागः २१०
(१०-११) परत्वापरत्वे २११
(१२) गुरुत्वम् २११
(१३) स्नेहः २११
(१४) शब्दः २११
(१५) बुद्धिः २१६
(१६-१७) धर्माधर्मौ २१६
(१८) संस्कारः २१६
[C] अन्यथाख्यातिः २१७

[१९] अर्थप्रकरणे कर्मनिरूपणम् २१८

[२०] अर्थप्रकरणे सामान्यनिरूपणम् २१९

[२१] अर्थप्रकरणे विशेषनिरूपणम् २२१

[२२] अर्थप्रकरणे समवायनिरूपणम् २२१

[२३] अर्थप्रकरणे अभावनिरूपणम् २२३

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(१) संसर्गाभावः २२३
(२) अत्योन्याभावः २२४
(३) अत्यन्ताभावान्योन्याभावयो र्विशेषः २२४
(४) सामान्याभावः २२७
(५) प्रागभावः २२८
(६) प्रध्वंसाभावः २३०

[२४] **प्रमेयप्रकरणम्** **२३१**
(V) बुद्धिः २३१
(VI) प्रवृत्तिः २३१
(VII) दोषाः २३२
(VIII) प्रेत्यभावः २३२
(IX) फलम् (भोगः) २३२
(X) दुःखत्वम् (पीडा) २३३
(XI) अपवर्गः (मोक्षः) २३३

[२५] **संशयनिरूपणम्** **२३४**

[२६] **प्रयोजनम्** **२३६**

[२७] **दृष्टान्तः** **२३६**

[२८] **सिद्धान्तः** **२३६**
(I) सर्वतन्त्रसिद्धान्तः २३६
(II) प्रतितन्त्रसिद्धान्तः २३६
(III) (IV) अधिकरणाभ्युपगमसिद्धान्तौ २३७

[२९] **अवयवाः** **२३७**
(१) अवयवलक्षणम् २३७
(२) प्रतिज्ञा २३८
(३) हेतुः २३९
(४) उदाहरणम् २३९
(५) उपनयः २४०
(६) निगमनम् २४०

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(७) अवयवपदस्यार्थनिरूपणम् २४०

[३०] **तर्कविचारः** **२४१**

[३१] **वादः** २४४

(१) वादे निग्रहस्थानयोग्यताविचारः २४४

(२) प्रतिज्ञाहानिपञ्चकम् २४५

(३) प्रतिज्ञासन्यासम् २४५

(४) निरर्थकम् २४५

(५) अविज्ञातार्थम् २४५

(६) अर्थान्तरम् २४६

(७) अपार्थकम् २४६

(८) उपसंहारः २४६

(९) अन्यनिग्रहस्थानविचारः २४६

(१०) कथातात्पर्यम् २४६

(११) वादेऽनुद्भाव्यनिग्रहस्थानसप्तकम् २४७

(१२) प्रतिज्ञान्तरम् २४७

(१३) हेत्वन्तरम् २४७

(१४) अज्ञानम् २४७

(१५) अप्रतिभा २४८

(१६) विक्षेपः २४८

(१७) मतानुज्ञा २४८

(१८) पर्यनुयोज्यम् २४८

(१९) एतत्सप्तकस्योद्भावनं वादेऽयुक्तम् २४८

[३२] **जल्पः** **२४९**

[३३] **वितण्डा** २५०

[३४] **कथा** **२५०**

[३५] **हेत्वाभासप्रकरणम्** **२५२**

(I) हेत्वाभासलक्षणम् २५२

(II) असिद्धः २५५

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(III) विरुद्धः २५९
(IV) अनैकान्तिकः २५९
(V) प्रकरणसमः २६०
(VI) कालात्ययापदिष्टः २६२

[३६] छलम् २६२

[३७] जातिग्रन्थः २६३

[३८] उपसंहारः २६३

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Index of the scholars' works and schools referred to in TT

अतीवनवीना:	१३८
अर्वाचीन:	२५७
आचार्या:	१११
उदयनाचार्य:	१, २, ३६, ४८, ४९, ९८
उपाध्याय: [यज्ञपति:]	४
केशवमिश्र:	३, ४८, ७८, ७९, १०१, १०६, १२३, १३४, १४७, १५०, १५४, १५६, १६६
कृष्णदास:	२०८
गुणरत्नगणि:	४, ६४, १६६, २६३
गुरुमतम्	६९, १४७, १५०, १५४, १५६
गोवर्धन (टीकाकृत्)	१, ४, ५, ३७, ४३, ६४, १८२, २११, २१८, २६३
चार्वाक:(का:)	४८, ४९, १००, १३५
जीर्णमतम्[प्राचीना:-प्राञ्च:]	२४, २९, ४०, ५१, ७०, ७७, ९६, ९९, १००, ११३, ११५, १३७, १३८
जैमिनी	२३७
नव्या:-नवीना:	४, ४०, ५०, ७०, ८६, १००, १०२, १०३, १३५ १३७, १५९, १७०, १८१, २१०, २१३, २२६
नैयायिका:-न्यायमतम्	१३, ४८, ६२, ६३, ६९, ७१, ७५, ७६, १०२, ११५, १३६, १४१, १४५, १४६, १४७, १४८, १५०, १५१, १५२, १५३, १५५, १५६, १५७, १५९, १६०, १६१, १६२, १६४, १८२, १९६, १९९, २२३, २३६, २४०, २५८
न्यायकुसुमाञ्जलि:	४८
न्यायशास्त्रम्	५, ८, २३७

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रभाकरः	१७, ३१, ३४, १६३, २१८, २३६, २३७
बौद्धाः-बौद्धमतम्	४७, ४९, ६२, ७५
भाष्यकारः[वात्स्यायनः]	२१८
भवानन्दः भट्टाचार्यः	२०८
भाट्टः-भाट्टाः	१४२, १४७, १५६, १५८, १५९, १६१
महर्षिः[गौतमः]	२६३
मणिकारः-मणिकृद्[गङ्गेशः]	१४, ३६, ३८, ६४, ७१, ९८, १२०, १२५, १३८, १३९, १४२, १६०
मिश्राः(पक्षधरः)	३, ४०, ७९, ९१, १०१, १०६, १२३, १३४, १४६, १४७, १५०
मैथिलाः	४, ७४, १०२
मीमांसकाः	१३, ३१, ६२, ६६, १००, १४१, १४६, १४७, १५०, १५१, १५२, १५३, १५४, १५५, १५६, १६३, २२६, २३७
मुरारिः	१५०, १५६
रत्नकोशकारः	२५२
लीलावतीकारः	६२, १८१, २१०
वैशेषिकाः	१८२, १९६, १९९, २००, २०१
वर्धमानः	२३४
शिरोमणिः[रघुनाथः]	४०, ५०, ९४, ११४, १३४, १८१, १९५, २१७, २२५, २२८
शिरोमणिटीका	२५
शिरोमणिटिप्पणम्	८१, ९०
शिरोमणिप्रकाशः	१३५
सनातनपण्डितः	२५१
सार्वभौमः[वासुदेवः]	९२
सुन्दलोपाध्यायः	१३५
हरिदासटिप्पणम्	९४

□□□

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

॥ तर्कतरङ्गिणी ॥

ॐ गोस्वामिनं नमस्कृत्य[1]सर्वविघ्नतमोपहम् ।
गोवर्धनकृता टीका स्पष्टा व्याख्यायते मया ॥१॥

[2]वागीशपदद्वन्द्वनखचन्द्रमरीचयः ।
पान्तु वो [3]भवकान्तारयातायातक्रमच्छिदः ॥२॥[4]

इह खलु ग्रन्थारम्भे विशिष्टशिष्टाचारानुमितश्रुतिबोधि निर्विघ्नपरिसमाप्तिकर्तव्यताकं तत्परिसमाप्तिकामा मङ्गलमाचरन्ति **यत्तर्केति** अत्र मङ्गलं गुरुनामग्रहणमेव वस्तुनिर्देशात्मकम् ।

[१] ॥ मङ्गलवादः ॥

(I) मङ्गलस्य फले मतद्वैविध्यम् ।

अत्र मङ्गलस्य कारणता विचार्यते । वेदबोधिततत्कामकर्तव्यताके मङ्गले तत्कामानां शिष्टानामाचारात् स्वर्गकामकर्तव्यताकत्वेन वेदबोधिताश्वामेधादौ स्वर्गकामाचारात्[5] [6]कालान्तरसमाप्तेर्विना[7] किञ्चिद् द्वारमनुपपन्नायाः परिशेषेणावश्यकत्वाच्च विघ्नध्वंसद्वारकत्वेन तस्यावेदने फलत्वबोधनात् ।

(II) उदयनाचार्यमतम् ।

न च विघ्नध्वंसस्य द्वारकत्वेन[8] कल्पनीयत्वा[9]दर्थादेवायास्यतीत्यर्थः, तदंशे किमर्थं वेदः कल्पनीय इति वाच्यम् । कामनाविषयतावच्छेदकावच्छिन्नसाधनत्वात् मङ्गले शिष्टानामाचारदर्शनात् । 'कामना' शब्देनेच्छा तद्विषयतावच्छेदको भवति विघ्नध्वंसः तदवच्छिन्नं=तद्विशिष्टम्[10]; यथा निर्विघ्नसमाप्तिकामो मङ्गलमाचरेदित्यत्र विघ्नध्वंसः कामनावच्छेदको वृत्तः[11] । तथा च तद्विशिष्टस्यैव तदंशे वेदः कल्पनीयः । अपि च [12]बाधपरम्पराशङ्कानिवृत्यर्थं तथैव वेदकल्पनात् । कामनाविषयता यथा समाप्तौ तथा विघ्नध्वंसेऽपि समाप्तिरेव फलम् । न चैवमदृष्टादौ द्वारे वेदः कल्पनीय इति वाच्यम् ।

---

१. There is a lacuna here in A. २. B पार्श्वनाथ. ३. B नरका ४. B reverses the order of the lines of this verse. ५. B आचारवत्. ६. B कालान्तरीय । ७. Footnote in A समाप्तिकामा मङ्गलमाचरेदिति रूपो वेदः कल्पनीयः । किंवेति-विघ्नसमाप्तिकामो मङ्गलमाचरेदिति । ८. B द्वारत्वेन ९. B यत्वात्तदंशे १०. B शिष्टः. ११. B omits वृत्तः. १२. B ग्रन्थकारपराशङ्का The reading ग्रन्थप्रकार is out of context here.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तत्र कामनाविषयतावच्छेदकत्वाभावात् । अत्र तु विघ्नध्वंसस्य कामनाविषयतावच्छेदकत्वात् तदंशे वेदोऽवश्यं[१] कल्पनीयः । तस्माद्विजातीयविघ्नध्वंसप्रयुक्तसमाप्तिं प्रति नतित्वादिना कारणत्वम् ।

अयमर्थः [२]नतित्वकारणतावच्छेदकं विजातीयविघ्नध्वंसप्रयुक्त[३]समाप्तिकार्यतावच्छेदकं प्रयुक्तत्वं [४]स्वरूपसम्बन्धविशेषः कार्यतावच्छेदकः । तेन सम्बन्धेन वा तादृशध्वंसवत्त्वं कार्यतावच्छेदकम् । वैजात्यं=वैलक्षण्यम् । तत्तु नतित्वावच्छिन्ननाश्यतावच्छेदको जातिविशेषः उपाधिविशेषो वेति ।

[५]स्यादेतत् । [६]स्वप्रयोजकीभूतविघ्नध्वंसफलकनतिमत्त्वसम्बन्धेन समाप्तित्वं वा कार्यतावच्छेदकं, नतित्वादिकं कारणतावच्छेदकम् । प्रयोजकत्त्वं तु [७]कारणत्ववत् स्वरूप-सम्बन्धविशेषः अतिप्रसक्तिस्तु कारणतावच्छेदकसम्बन्धेनान्वयव्यतिरेकवशान्निराकरणीया । व्यभिचारसन्देहेऽप्यनेन रूपेण वेदेन कारणत्वबोधनान्न प्रवृत्त्यनुपपत्तिः ।

तस्मात् समाप्तिरेव फलमित्युदयनाचार्याः ।

[८]अत्राचार्याणामयमाशय :- समाप्तिं प्रत्येव मङ्गलस्य विघ्नध्वंसद्वारा[९] [१०]कारणत्वम् । मङ्गलं भवति कारणम्, विघ्नध्वंसोऽवान्तरव्यापारः, समाप्तिं फलं-निर्विघ्नसमाप्यतामिति । अनया कामनया शिष्टानां मङ्गले प्रवृत्तिदर्शनात् । तथैव वेदोऽपि[११] कल्पनीय इति ।

(III) उदयनाचार्यमते मणिकृदुक्तं दूषणम् ।

इदानीमाचार्यमते [१२]मणिकृदुक्तं दूषणं प्रकाश्यते । [१३]शिष्टाचारमूलकश्रुत्यनुमाने लाघवादावश्यकत्वाच्च विघ्नध्वंसकामो नतिमाचरेदित्येव श्रुतिकल्पनात्[१४] । न तु निर्विघ्नसमाप्तिकामो [१५]नतिमाचरेदित्यादिकां, गौरवात् व्यभिचाराच्च । न च विघ्नध्वंसेऽपि गङ्गास्नानादिना सम्भवादव्यभिचार इति वाच्यम् । नतिनाश्यजातीयविघ्ननाशं प्रति [१६]नतित्वेन कारणत्वात् । एवं स्तुतिनाश्यजातीयविघ्ननाशं प्रति स्तुतित्वेनैव कारणत्वं बोध्यम् । तथा च विशेषतयैव कार्यकारणभावकल्पनान्नव्यभिचारगन्धोऽपि । न चान्वयव्यतिरेकौ कारणत्वस्य ग्राहकौ । यथा मङ्गलसत्त्वे समाप्तिसत्त्वं, मङ्गलाभावे समाप्त्यभाव इति वाच्यष्टा[१७] लोकापगतकारणे नान्यथासिद्धेः ।[१८]

---

१. B omits अवश्यं. २. A reads here this footnote नतिनाश्यजाति...नतित्वादिना... गङ्गास्नानादिजन्यविघ्नध्वंसत्वादिना व्यभिचारः । ३. B समाप्तित्वं. ४. B च रूप. ५. B अन्यदेतत्. ६. B स्वर्गप्रयो. ७. B कारणतात्ववत्. ८. B तत्राचा. ९. B विघ्नविध्वंस. १०. B करणत्वम् ११. B omits अपि. १२. चिन्तामणिकृत्गङ्गेशः. १३. A reads here a broken footnote. १४. B श्रुति तत्कल्पनात् । १५. B मङ्गलमा. १६. B नतित्वे कार. १७. B omits वाच्यम्. १८. B सिद्धेश्चेति वाच्यम् मङ्गला...चेपि (!) समाप्ति...

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु तत्समाप्तिं प्रति नतित्वेन कारणत्वे को दोष इति चेत् भगवन्नमस्कारादीनां [१]सर्वपापनाशकत्वं श्रुतेस्तादृशपापनाशस्य समाप्तिं प्रति [२]प्रयोजकत्वावगमात् । न तु मङ्गलस्य समाप्तिं प्रति कारणत्वं प्रमाणाभावादन्यथासिद्धेश्च । यथाऽन्यं[३] प्रति पूर्वत्वे गृहीते एव यं प्रति पूर्ववर्तित्वं गृह्यते, स तं प्रत्यन्यथासिद्धः । यथा घटं प्रत्याकाशं [४]शब्दजनकत्वे गृहीते, एवं घटं प्रति जनकत्वग्रहात् तथा प्रकृतेऽपि विघ्नध्वंसं प्रति मङ्गलस्य जनकत्वे गृहीते एव समाप्तिं प्रति जनकत्वं गृह्यते - इत्यन्यथासिद्धः । तथा च न समाप्तिः फलम्, विघ्नध्वंसकामनयैव शिष्टानामाचारदर्शनात्[५] ।

अत्रागमोऽपि प्रमाणम् - यथा - सर्वे विघ्नाः शमं यान्तीति विनायकस्तुतिपाठादौ श्रवणात् । विघ्नध्वंस एवादृष्टद्वारा फलमिति **मणिकृत्सम्मतः** पन्थाः ।

(IV) [६]मिश्रमतम् ।

मिश्रास्तु इह प्रारिप्सिते विघ्नो मे माभूदिति कामनया मङ्गले प्रवृत्ते[७] विघ्नप्रागभाव एव फलम्, दुःखं मे माभूदिति कामनया कृतस्य प्रायश्चित्तस्य दुःखानुत्पादफलवत् [८]तावत्पर्यन्तमनवस्थायिनः तस्य पापध्वंसकारकत्वात् मङ्गलेऽपि [९]दूरदुष्टध्वंसद्वारकता कल्प्या । [१०]विधिरस्य विघ्नानुत्पादकामो नतिमाचरेदिति कल्प्यः[११] अन्यथा तत्कामनया प्रवृत्त्यनुपपत्तेरित्याहुः ।

(V) मिश्रमतपरिहारः ।

तन्न । प्रागभावस्याजन्यतया मङ्गले इष्टसाधनत्वाभावात् प्रवृत्त्यनुपपत्तेरिष्टसाधनताज्ञानस्यैव प्रवर्तकत्वात् । न चान्वयव्यतिरेकित[१२]यैव[१३] प्रागभावस्य साध्यता वक्तव्येति वाच्यम् ।

[१४]+मङ्गले सति विघ्नप्रागभावः, तदभावे प्रागभावाभावः विघ्न एवोत्पद्यते तदा+ प्रागभावस्य [१५]सत्वासत्त्वाभ्यां फलोत्पत्त्यनुपपत्तेः ।

एतदर्थः- यथा यदि विघ्नप्रागभावः तदा विघ्नोत्पत्तिः केन वार्येत ? यदि विघ्नप्रागभावो नास्ति तदा मङ्गलस्य किं फलं स्यात् ? विघ्नप्रागभावे प्रमाणाभावात् । न च तत्स्थानीयः प्रागभावस्थानीयोऽत्यन्ताभाव एव ग्राह्य इति वाच्यम् । तस्य नित्यत्वेन [१६]फलत्वासम्भवात् । ततो

---

१. B omits सर्व. २. B प्रयोजकाभावात् । ३. B ऽन्यथा. ४. B आकाशः. ५. B आचारे. ६. पक्षधरमिश्रः. ७. प्रवृत्तेः. ८. A reads a footnote here कारणं भवति विघ्नध्वंसः । समाप्तिं प्रति विघ्नध्वंसस्य कारणं भवति मङ्गलमिति..... ९. B omits दूर. १०. B विधिरपि. ११. B वेदः कल्प्यः. १२. A व्यतिरेकतयैव..... १३. A reads a footnote here - ध्वंसस्य लाभो मोक्षः (योगः ?) । लब्धस्य परिपालने क्षेमः । योगक्षेमसाधारणं प्रागभावस्य साध्यत्वं वक्तव्यमेतदर्थो व्यतिरेकेत्यादि..... १४. B omits the reading between +.....+ १५. B सत्ता. १६. B फलस्यास.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विघ्नप्रागभावोऽपि न मङ्गलफलमिति सिद्धम् ।

(VI)[1]उपाध्यायमतम् ।

उपाध्यायस्तु समाप्तिकामो मङ्गलमाचरेदित्येव वेदः कल्पनीयः । न तु निर्विघ्नसमाप्तिकाम इति । तत्कामनयैव शिष्टानां मङ्गले प्रवृत्तिदर्शनात् स्वर्गकामनयाऽश्वमेधादिप्रवृत्तिवत्[2] । न च व्यभिचारज्ञानात् यागेऽपि प्रवृत्तिः कथं स्यात् तद्व्यतिरेकेणापि गङ्गास्नानादिना स्वर्गोत्पत्तेरिति वाच्यम् । स्वर्गत्वसामानाधिकरण्येनैव [3]कारणकत्वं ग्राह्यमिति[4] चेन्न । कार्यत्वकारणत्वस्य व्यापकत्वघटकतया[5] यागे स्वर्गव्यापकत्वाभावात् कारणत्वं ग्रहीतुं न शक्यते । व्यापकमित्यत्र स्वर्ग-त्वावच्छिन्नस्वर्गसमानाधिका(क)-रणात्यन्ताभावप्रतियोगितानवच्छेदकत्वं [6]यागत्वम् । तच्चेह नास्ति । तथा च स्वर्गं प्रति यागस्य कारणत्वं ग्रहीतुं न शक्यमिति दृष्टान्ताशुद्धतया मङ्गलेऽपि समाप्तिं प्रति कारणत्वं दुर्ग्रहमिति ।

(VII) नव्यमतम् ।

अत्र **नव्याः** समादधिरे - कारणत्वमतिरिक्तं स्वरूपसम्बन्धविशेषो नेति **मैथिलाः** । कारणताबोधस्तु [7]कारणतात्वेन रूपेण, तदनन्तरं वैजात्यं कल्प्यते । तादृशकारणत्वज्ञानमेव[8] वा प्रवर्तकमिति दिक् ।

(VIII) मङ्गलस्य स्वरूपनिर्णयः

ननु मङ्गलमङ्गं वा निमित्तं वा प्रधानं वेति ? नाद्यः । मुख्यफलजनकजनकत्वाभावात् । मुख्यं फलं यथा यागे स्वर्गः तज्जनको भवति यागः । तज्जनिका भवति होमादिसामग्री । सा तु अङ्गम् । तथाऽत्र नास्ति । अत्र मुख्यं फलं समाप्तिः । तस्याः जनकं भवति मङ्गलम् । तज्जनकत्वं मङ्गले नास्ति । स्वं प्रति-स्वजनकत्वाभावात् ।

नापि नैमित्तिकम् । अकरणे प्रत्यवायाभावात्

ततस्तृतीय एव पक्षः । स्वातंत्र्येण साक्षात्मुख्यफलंजनकत्वात् । प्रधानमेव मङ्गलम् । प्राधान्येन कारणम् न त्वङ्गत्वादिति दिक् इति श्री वाचकगुणरत्नगणिविरचिते **गोवर्धनी** टिप्पणे मङ्गलवादः सम्पूर्णः[9] ।

---

१. यज्ञपतिः. २. B omits प्रवृत्ति. ३. B कारकत्वम् । ४. B omits ग्राह्यमिति चेन्न । ५. A reads here a footnote व्यापकत्व....तेनातिरिक्त [प]दार्थ इति **गौडाः** । ६. A reads here a footnote यागजन्यताधिकरणत्वं स्वर्गत्वेन तु यागजन्यताव्याप्यत्वम् । अयमर्थः - यत्र यागजन्यता तत्रापि स्वर्गत्वम्, न तु यत्र स्वर्गत्वं तत्र यागजन्यता । ७. B कारणतात्वेन. ८. B कारणकत्व. ९. This colophon is not found in B but the topic ends with -'इति मङ्गलवादः ।'

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[२] ॥ उपोद्घातः ॥

(I) प्रयोजनम् ।

मीमांसाया इति यथा वेदस्याभिधेयो भवति धर्मः स एव वैशद्यार्थं मीमांसायाः अपि प्रवृत्तायाः अभिधेय इत्यर्थः । **उक्तेति** उक्तस्य=गुरूक्तस्यार्थे या चिन्ता=विचारणा, तत्र सामर्थ्यविकलो भवति=शून्यो भवति । एवमन्ययोरपि योजना कार्या । अनधिकारिणः ते बालाः=**भाष्यादि**पाठे-ऽनधिकार(रि)णः पूर्वोक्तचिन्ताशून्यत्वादित्यर्थः । **एतावतेति न्यायस्य=न्यायशास्त्रस्य** प्रयोजनं यन्मोक्षरूपं तदेवास्यापि ग्रन्थस्य प्रयोजनम् ।

(II) सम्बन्धः ।

तत्सम्बन्धेनेति प्रतिपादकं शास्त्रम् प्रतिपाद्यो मोक्षः । अत एव **न्यायस्य** यत्प्रतिपाद्यं मोक्षरूपम् तदेवस्यापि ग्रन्थस्य प्रतिपाद्यम् । तथा च यथा **न्यायशास्त्रयोः** प्रतिपाद्यप्रतिपादक-रूपसम्बन्धः तथैतद्ग्रन्थमोक्षयोरपीत्यर्थः ।

(III) अधिकारी ।

अधिकारीति यस्य यत्र प्रवृत्तिः स तत्राधिकारी । तथा च प्रवृत्तिकारिणीभूतेच्छावानित्यर्थः ।

(IV) समासवादः[१]

प्रमाणेति भ्रान्ताशङ्का निरासायाह न **द्विगुरिति तथाविधेति** सङ्ख्यापूर्वमादि पूर्वपदाभावात् । अत्र सूत्रे द्वन्द्व एवेतरेतरयोगसाध्यः[२] । विशेष्यतया सर्वेषां प्रमाणादीनां भाबात्[३] । तत्त्वज्ञानेन समं स्वातन्त्र्येणान्वयात् । यथा प्रमाणादिविषयकं[४] तत्त्वज्ञानम् । अन्यथा समाहारद्वन्द्वे साहित्यस्यैव विशेष्यतया प्रमाणादेर्विशेषणतया तत्त्वज्ञानेन सममन्वयो न स्यात् । यथाऽहिनकुलं पश्येत् । यत्र दर्शनेन सममहिनकुलयोः संयोगेन सममन्वयात् न तत्राहिनकुलाभ्यामन्वयः अहिनकुलयोस्तु संयोगेनान्वयः[५] । तथा च यत्र पदार्थानां परम्परया क्रियया सममन्वयस्तत्र समाहारद्वन्द्वः ।

यत्र साहित्यसम्बन्धो विशेषतया भासते स समाहार द्वन्द्वः । ततः समाहारे एकवचनमेव साहित्यस्यैकत्वात् ।

ननु[६] अहिनकुलमित्यत्राहिनकुलयोः विशेष्यतया भाजं कुतो न भवतीति चेन्नः द्वित्वाश्रये

---

१. गोवर्धन has discussed the समासवाद in his प्रका॰ after the मोक्षनिरूपणम्, but गुणरत्न does it first. It is natural, therefore, if there is some discrepancy in the order of the प्रतीकs २. B तरेतरद्वन्द्वः. ३. B भावात्. ४. B विषयं. ५. B संयोगानामन्वयः. । ६. A तत्तु.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एकत्वस्यान्वयासम्भवात् । यथेतरेतरयोगे शशकुशपलाशान् छिन्धि-इत्यत्र शशादीनां विशेष्यतया[१] छेदनक्रियया[२] सममन्वयः तथा प्रमाणादीनामपि विशेष्यतया तत्त्वज्ञानेन सममन्वयः । न च शशेत्यत्रापि साहित्यस्यैव बोध इति वाच्यम् । साहित्येन समं छेदनक्रियया सममन्वयो न स्यात् साहित्यस्य संयोगविशेषत्वेन क्रियाधिकरणत्वाभावात् । तत इतरेतर एव द्वन्द्वः ।[३]

नन्वत्र द्वन्द्व एव न सम्भवति, पदार्थाभेदाभावात्; प्रमाणप्रमेयोरभेदात् पदार्थभेदे द्वन्द्व इत्यनुशासनात् । न च पदार्थावच्छेदकभेदे द्वन्द्व इति वाच्यम् सरूपाणामेकशेष (पा अ. १-२-६४) इति सूत्रं व्यर्थं स्यात्; भवति चेदं सूत्रं द्वन्द्वापवादकं यत्र द्वन्द्वस्थ प्रसक्तिस्तत्रेदं सूत्रमपवादकं यथा घटश्च[४] घटश्च घटाविति; इतरेतरद्वन्द्वप्रसक्तौ द्वन्द्वपवाद एकशेष एव कृतः, अत्र पदार्थतावच्छेदक-रूपघटत्वस्य भेदाभावात् द्वन्द्वाप्रसक्तौ तन्निषेधासम्भवात्[५] । प्रसक्तं हि प्रतिषिध्यत इति न्यायादेकशेषसूत्रकरणं व्यर्थं स्यात्; अपि च पदार्थतावच्छेदकभेदे च द्वन्द्वस्तदा कर्मधारयस्योच्छेदो स्याद्यथा नीलोत्पलमित्यत्रापि द्वन्द्वस्यापि सम्भवात्, नीलत्वोत्पलत्वयोः पदार्थतावच्छेदकभेदसत्त्वादिति चेत्, न । पदार्थता[७]वच्छेदकभेद एव द्वन्द्वः साध्यः ।

न च पूर्वोक्तदोष इति वाच्यम् । सरूपाणामेकशेष एक विभक्तौ'-इत्यत्र पयश्च पयश्च पयासीत्यत्र सार्थकता स्यात् । यतोऽत्र पदार्थतावच्छेदकजलत्वदुग्धत्वयोर्भेदात् । एवमक्षादिपदस्थलेऽपि सार्थकता बोध्या । न च कर्मधारयोच्छेद इति वाच्यम् । तत्र कर्तृविवक्षाया एव नियामकत्वात् । यदीच्छा कर्मधारये तदा कर्मधारयः, यदि[८] द्वन्द्वे तदा द्वन्द्व एव ।[९] तथा च वैयाकरणानां नीलोत्पलत्वयोः सामानाधिकरण्यज्ञानार्थं कर्मधारय इष्टः । तथा च पदार्थताऽवच्छेदकभेदे एव द्वन्द्व इति ।

केचित्तु समस्यमानपदप्रतिपाद्यभेदे द्वन्द्व :-यथा घटपटावित्यत्र समस्यमानपदे घटपटे[१०] । तयोः प्रतिपाद्यौ घटपटौ, अनयोः परस्परभेदसत्त्वात् । कर्मधारये च पदप्रति[११]पाद्य भेदाभावान्नी-लोत्पलमित्यत्र नीलपदे नीलगुणवती लक्षणा । अन्यथा कर्मधारयेऽभेदबुद्धिर्न स्यात् । यदेव नीलरूपवत्तदेपोत्पलमित्यभेदबुद्धौ तु पदयोः समानविभक्तिकत्वं तन्त्रम् । तच्च कर्मधारयेऽस्ति यथा नीलो घट इति । तदपि न, तर्हि[१२] एकस्मिन्नेव घटे घटः घटः घटाः(टौ?) इत्यापत्तिः स्यात् । घटपदप्रतिपाद्यानां घटत्पटत्वसम्बन्धानां परस्परं भेदसत्त्वात् । अप्रयोगादेव प्रयोग इति चेदप्रयोग एव कथमिति चेत् सार्थाभावादिति सार्थस्तु भेदः । स तु प्रतिपाद्यतावच्छेकदकयोरेवापेक्षितो न तु प्रतिपाद्ययोरपीति दिक् । [इति समासवादः]

---

१. B विशेषतया. २. B क्रियाया. ३. A omits एव. ४. A omits one घटः. ५. B निषेधाभावात्. ६. B ताविच्छेदक. ७. B पदार्थभाव. ८. B यदा. ९. B omits एव. १०. B घटपटपदे. ११. B omits पद. १२. B न तस्मिन्नेव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[३] ॥ मोक्षनिरूपणम् ॥

(I) पुरुषार्थत्वम् ।

[१]**एतावतेति** निःश्रेयसपदेन मोक्षप्राप्ततया स्रग्चन्दनवनितादीनां प्राप्ततया च मोक्षस्य कथं पुरुषार्थत्वमित्यर्थः । **पुरुषार्थत्व**मिति पुरुषार्थत्वं नाम स्वसमानाधिकरणदुःखावृतिः । दुःखध्वंसस्तु[२] सुखान्यतरत्व[म्]। तथा चात्रेदं मोक्षलक्षणमपि स्वपदेन दुःखध्वंसः ।· तत्समानाधिकरणं यत्कालिकसम्बन्धेन [३]यथा जन्यमात्रस्य कालोपाधित्वात् यदनन्तरं दुःखं न जायते [४]तत्कालिक-सम्बन्धेन दुःखावृत्तिः दुःखं दुःखेन वर्तते यद्दुखं तत्प्रतियोगिको यो दुःखध्वंसः स एव मुक्तिः ।

पदकृत्यं-यथा दुःखध्वंसो मुक्तिरित्युक्ते संसारिदशायां मोक्षत्वापत्तिः, तद्वारणार्थं दुःखावृत्तिरिति प्रतियोगिदुःखविशेषणम् । संसारदशायां तु दुःखानन्तरं दुःखस्य सत्त्वात् दुःखावृत्तित्वं नास्ति, तथापि व्यधिकरणदुःखावृत्तित्वमादाय संसारदशायामपि[५] मोक्षत्वापत्तिः । यथा चैत्रीयदुःखे-यत्र मैत्रीयदुःखम्[६], तस्य ध्वंसः सोऽपि दुःखावृत्तिदुःखध्वंसः भवत्येव । तस्यापि मुक्तित्वापत्तिः[७] । अत उक्तं **समानाधिकरणेति** । चैत्रीयदुःखं तु स्वसमानाधिकरणं न भवतीति । सुखमोक्षान्यतरत्वं पुरुषार्थत्वमिति सुखपदेन स्वर्गादिरूपं सुखम् । [८]सांसारिकसुखं तु बहुतरदुःखानुविद्धतया पुरुषार्थो न भवति । तथा च निष्कर्षः-स्वर्गमोक्षान्यतरत्वमेव पुरुषार्थः ।

ननु पुरुषकृतिसाध्यत्वं पुरुषार्थत्वमिति चेत्, न । जलताडनादेरपि पुरुषकृतिसाध्यत्वादपि न पुरुषार्थत्वं तस्येति । तथा च प्रकृते निःश्रेयसपदेन यद्यपि यागेन चन्दनादिजन्यं सुखमाप्यायति, तथापि रुढया निःश्रेयस पदेन मोक्ष एव ग्राह्य इत्यर्थः ।

(II) शक्तिः ।

स्वरूपज्ञानमिति प्रमाकरणत्वाद्यसाधारणधर्मज्ञानम् । **गृहीतशक्तिकेनेति** । येन पुरुषेण यस्य पदस्य यस्मिन्नर्थे शक्तिः गृहीता । कोऽर्थः ? यथाऽयं[८] कम्बुग्रीवत्वाद्विशिष्टोऽर्थ घटपदवाच्य एतादृशी शक्तिः ।

ननु तज्ज्ञानार्थमन्यापेक्षा, तथा प्रकृतेऽपि प्रमाणपदस्य येन चक्षुरादिषु शक्ति गृहीता, यथा चक्षुरादिकं प्रमाणपदवाच्यमिति शक्तिग्रहो यस्य वृत्तः तस्य प्रमाणपदश्रवणानन्तरमेव चक्षुरादीनां ज्ञानं

---

१. This discussion on मोक्ष is found before समासवाद in त.भा.प्र. २. B omits तु. ३. T h e reading between यथा....सम्बन्धेन is not found in B. ४. B omits अपि. ५. A reads here a broken foot note तदन्यान्यत्वं....प्रयोगः । ६. B मुक्तत्वापत्तिः । ७. B पुरुषार्थमि.. ८. B यथाऽयं घटो घटपद.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जायते । तच्च प्रथमसूत्रात् प्रमाणादिसूत्रात् ज्ञानं जातं-गुरूपदेशेनादिना सङ्केतो गृहीत इति प्रघट्टः ।

(III) प्रसङ्गात् परीक्षाविचारः ।

मूले परीक्षालक्षणमिदमुपपद्यते न वेति । अस्यार्थःइदम् लक्षणं नोपपद्यते, व्यभिचारित्वात् । यथा गोर्लक्षणं द्रव्यत्वं न भवतीति, भवति च सास्नावत्त्वम्, व्यभिचारित्वाभावात् । एतादृशो यो विचारो व्यभिचारादिनिरासार्थ सा परीक्षेत्युच्यते । न च तस्या[१] संशयेऽन्तर्भाव इति वाच्यम् । उभयकोट्युपस्थितिमन्तरेणापि तत्प्रतिपाद्यज्ञानात् । संग्रहस्तु एकत्रधर्मिणि नानाकोट्यवगाहिज्ञानरूपः । यथाऽयं स्थाणुर्वापुरुषो वेति । परीक्षायास्तु एकत्र धर्मिणि नानाकोट्यवगाहिज्ञानाभावान्न-संशयेऽन्तर्भावः । तथा चोद्देशादिसूत्राणि पक्षादिज्ञानार्थमवश्यं वाच्यान्येवेति । तथा चोद्देशः पक्षज्ञानार्थम्, लक्षणं तु[२] हेतुज्ञानर्थं परीक्षा च व्यभिचाराद्यभावज्ञानार्थमपेक्ष्यत एव[३] इत्यर्थः ।

(IV) मोक्षं प्रति शास्त्रस्य न कारणत्वम् ।

कृत्येति कृतिप्रत्ययः । तत्त्वज्ञानजनकीभूतः प्रयत्नः श्रवणादिरूप इत्यर्थः । तथैवं[४] श्रवणा-दिरूपता[५] तत्त्वज्ञानद्वारा प्राप्यते । अयमर्थः-आत्मनि यत्र क्षणे दुःखाभाव उत्पन्नः, तस्मिन्नेव क्षणे प्राप्त एवेति बोधयितुमधिगम[६] पदोपादानमित्यर्थः । अन्यथाऽधिगमपदवैयर्थत्वापत्तेः । **तत्त्वज्ञानस्येति** तत्त्वज्ञानस्य मोक्षं प्रति कारणत्वं समागतम्, न तु शास्त्रस्य । तथा च शास्त्रे इष्टसाधनत्वज्ञानाभावात् प्रवृत्तिर्न स्यात् । इष्टो मोक्षः, तत्साधनं तत्त्वज्ञानम् । शास्त्रे च नेष्टसाधनताऽनेन वाक्येन बोध्या [त]त्कथं तत्र प्रवृत्ती(त्ति)[रि]त्यर्थः । [७]**व्यापारेति** शास्त्रस्य=न्यायशास्त्रस्य-तत्त्वज्ञानद्वारा मोक्षजनकत्वं बोधयितुं तत्त्वज्ञानादि व्युत्पादनात् । ननु शास्त्रपदेपि व्यापारलाभः सम्भवत्येव, शिष्यते इति शास्त्रम्, अनुशासनस्य[८] व्यापाररूपता लभ्यत इत्याह-**शिष्यतेति**[९] **(त इति)** एवं इति अनुशासनं तत्त्वध्यापके गुरौ[१०]-तिष्ठतीति तत्रैव मुक्तिः स्यात् ।

व्यापारेति यत्र व्यापारस्तत्रैव फलोत्पत्तिः । यथा दण्डेन घटे जननीये संयोग-रूपव्यापारादिकरणे कपाले घटोत्पत्तिः । दण्डस्य[११] व्यापारः कपालद्वयसंयोगः, तत्रैव घटः । **औत्सर्गिकत्वादिति** सामानाधिकरण्यात्, ततु व्याप्तेः । अन्यथाऽग्निसंयोगरूपव्यापारवति घटे यथा रूपादिकमुत्पद्यते तथाऽग्नावपि व्यापरस्य संयोगरूपस्य विद्यमानत्वाद्रूपादेरुत्पत्तिः स्यात् ।

---

१. B तस्य. २. B omits तु. ३. B omits एव. ४. B यथैव. ५. B रूपया. ६. B omits पद. ७. A reads a footnote here- सर्वेषां निमित्तकारणानामसमवायिकारणं व्यापारो भवत्येव, अन्यथा व्यापाराभावे कथं खण्डपटोत्पत्तिरिति । यथा व्यापारवत्त्वे व्यापारिणोः सत्त्वे च यागादिभासे (वे)ऽपि पूर्वव्यापारसत्त्वे कारणत्वं यागादीनामस्त्येव । ८. B शासनव्या.. ९. B adds आह after शिष्यत इति. १०. B पुरो. ११. B स्याव्या..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सामानाधिकरण्यं बहुषु स्थानेषु[१] सम्बन्धः[२] । यथा पार्थिवत्वलोहलेख्यत्वयोरिवोत्सर्गो न तु नियम इत्यर्थः[३] ।

न हेतौ इति । अत्र प्रघट्टकार्थः-शास्त्रं मोक्षं प्रति न कारणम्, प्रमाणाभावात् । न च तत्त्वज्ञानादित्येव प्रमाणमिति वाच्यम् । पञ्चम्यां प्रयोजकत्वलाभात् । प्रयोजकत्वं तु जनकजनकत्वं फलपूर्व[४]वर्तित्वमात्रमिति यावत् । एवं जनकधारायामपि प्रयोजकत्वलाभः स्यात् । तथा च मोक्षं-प्रति शास्त्रं न साक्षात्कारणम्, शास्त्रस्य शब्दात्मकस्याशुतरविनाशित्वात् । न च तत्त्वज्ञानद्वारेति वाच्यम्, तदाऽप्रयोजकत्वमेव । न च द्वारेण द्वारिणः नान्यथासिद्धिस्तथा[५] च कारणत्वे वेतिवाच्यम्। अन्यथासिद्धिपञ्चकराहित्यं कल्पनीयत्वेन गौरवात् । अयमर्थः-कारणत्वे स्वीक्रियमाणेऽ-न्यथासिद्धिपञ्चकराहित्यं कल्पनीयमेव ।[+] अन्यथासिद्धिरत्रास्त्येव, अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वं +[६]अन्यथासिद्धिरित्येकाऽन्यथासिद्धिः ।+ यथाऽन्यचैत्रीयमोक्षं प्रति तत्त्वज्ञानस्य नियतपूर्ववर्तिन एव कार्यसकाशात्[७] मैत्रीयमोक्षसम्भवे सति तत्सहभूतं [८]तत्त्वज्ञानसहभूतं शास्त्रमन्यथासिद्धमिति, यथा घटं प्रति रासभः, तथा च गौरवात् शास्त्रं मोक्षं[९] प्रति न कारणम् । प्रयोजकं तु भवत्येव ।

साक्षादिति तथा च मिथ्याज्ञान[१०]ध्वंसद्वारा मोक्षं प्रति शास्त्रस्य कारणतेत्युक्तं तदपि न सम्भवति । मिथ्याज्ञानध्वंसस्यापि कालान्तरभावित्वात् शास्त्रस्याशुतरविनाशित्वेन तावत्पर्यन्तमनवस्थानात् । मिथ्याज्ञानध्वंसस्य च तत्त्वज्ञानसाध्यत्वेन शास्त्राजन्यत्वाच्च साक्षाच्छब्दात्मक शास्त्रजन्यत्वं नास्तीत्यर्थः । **मननेति** मननमनुमितिरूपं श्रवणानन्तरं भवति। तदनन्तरं निदिध्यासनं स्मरणरूपम्, तदनन्तरमीश्वरसाक्षात्कारः । 'तमेव विदित्वाऽतिमृत्यमेति' (श्वे. उप. ३. ८) इति ज्ञापकात् । तथा च मननादिद्वाराऽपि शास्त्रस्य न कारणत्वमित्यर्थः; । अनुमिति प्रति[११] परामर्शः कारणम्, स्मरणं प्रति संस्कारः कारणम्[१२], [१३]ईश्वरसाक्षात्कारं प्रति योगजधर्मः । तन्मध्य(ध्ये) शास्त्रस्याप्रवेशात् । ततो मननादिद्वाराऽपि शास्त्रस्य मोक्षं प्रति न कारणत्वम् । न श्रवणमेवेति द्वारमिति वाच्यम्, तस्य श्रुतिवाक्यजन्यत्वात्' शास्त्रजन्यश्रवणस्य मोक्षकारणत्वे प्रमाणाभावात् । प्रमाणं च श्रुतिवाक्येऽस्ति यथा श्रोतव्यं श्रुतिवाक्येभ्यः इति ।

---

१. B स्थलेषु. २. B सम्बन्धे. ३. B omits इत्यर्थः. ४. B omits पूर्व. ५. B सिद्धिरिति वाच्यम् । ६. B omits the reading between +–+ ७. A मोक्षे सा भवति । ८. B omits तत्त्वज्ञानसहभूतं. ९. B omits मोक्षं. १०. B मिथ्याज्ञानद्वारा. ११. B omits प्रति and reads अनुमितिपरामर्शकारणम्. १२. B कारणे. १३. B omits ईश्वर and reads साक्षात्कारे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(V) प्रयोजकतावादः ॥

प्रयोजकत्वमिति प्रयोजकत्वं नाम कार्यपूर्ववर्तित्वमात्रं न त्वन्यथासिद्धम् । ननु शास्त्रस्यान्यथासिद्धत्वं कथमित्यत आह-**शास्त्रेणेति** । अनुमितिरूपं यन्मननं तज्जनकं यल्लिङ्गज्ञानं तज्जननेन शास्त्रस्यान्यथासिद्धत्वादित्यर्थः । लिङ्गं तु लक्षणरूपम्, तच्छास्त्रेणैव प्रतिपाद्यते, यथा प्रमाकरणत्वमित्यादि । तथा च मोक्ष[१]शास्त्रयोः प्रयोज्यप्रयोजकभावो, नतु कार्यकारणभावः इत्युक्तं भवति।

ननु तर्हि [२]शास्त्रस्येष्टसाधनत्वज्ञानाभावाच्छास्त्रस्य प्रवृत्त्यनुपपत्तिरित्यत्राह-**इष्ट-प्रयोजकताज्ञानमिति**-प्रकृते इष्टस्य मोक्षरूपस्य प्रयोजकं शास्त्रम्, मोक्षजनकतत्त्व-ज्ञानजनकत्वात् । ननु इष्टसाधनताज्ञानमेव कुतो न प्रवर्तकमित्यत आह-**लाघवादिति** तथा चेष्टजनकज्ञानापेक्षया प्रयोजकत्वज्ञानस्य[३] [४]लघुवत्त्वमन्यथा[५]सिद्ध्यन्तभूतत्वेन लाघवम् जनकत्वज्ञानेऽन्यथासिद्ध्यन्तर्गत-त्वेन गौरवमिति भावः । न च कारणताज्ञानं कुत्रापि प्रवर्तकं न स्यात्, तथा च घटार्थिनो दण्डे प्रवृत्तिर्न स्यादिति वाच्यम् । प्रयोजकत्वस्य नियतपूर्ववर्तित्वेन कारणसाधारणत्वात् । न चाननुमतः,[६] कुत्रचित्कारणत्वज्ञानात्[७] प्रवृत्तिः, कुत्रचित्प्रयोज-कत्वज्ञानादितिवाच्यम् । प्रयोजकत्वस्य नियतपूर्ववर्तित्वेन कारणसाधारणत्वादिष्टप्रयोजकताज्ञानत्वेन[८] रूपेण प्रवर्तकत्वम्, तच्च कारणज्ञानेऽप्यस्तीति नियतपूर्ववर्तित्व-स्योभयसाधारणत्वात् । तथा च कृतिसाध्यत्वबलवदनिष्टाननुबन्धि[९]त्वेनेष्टसाधनता[१०]ज्ञानत्वेनैव प्रवर्तकत्वमिति राद्धान्तः । [११]कृतिसाध्यत्वज्ञानस्य प्रवर्तकत्वे विषभक्षणादौ प्रवृत्तिः स्यात् । अत आह **इष्टसाधनतेति** । तथा च विषभक्षणे इष्टसाधनत्वज्ञानाभावान्न प्रवृत्तिरित्यर्थः ।

ननु तथाप्यगम्यागमे प्रवृत्तिः स्यात्, तस्यापि[१२] कृतिसाध्यत्वे सति इष्टसाधनत्वात् । अत आह **बलवदिति** । ननु इष्टसाधनत्वे सति बलवदनिष्टाननुबन्धित्वमित्यास्तामिति चेत्, तदा चन्द्रेऽपि प्रवृत्तिः स्यात्, अत आह कृतीति । तथा च कृतिसाध्यत्वज्ञानाभावाच्चन्द्रे न प्रवृत्तिः । एतत् त्रितयविषयकं ज्ञानं प्रवर्तकमिति सिद्धान्तः ।

---

१. A शास्त्रमोक्षयोः. २. B omits शास्त्रस्य ३. A प्रयोजकत्वस्य. ४. A reads a footnote here-अन्यथासिद्धिचतुष्टयरहितत्वे सति नियतपूर्ववर्तित्वम्, कारणत्वं तु अन(?)न्यथासिद्धिपञ्चकरहितत्वे सति नियतपूर्ववर्तित्वम् । ५. B सिद्धिरत्नभूत. ६. B चानुमतः. ७. A reads a footnote here-एतत्त्रितयसमुदाय एव न प्रत्येकम् । ८. B ज्ञानेनैव प्रवर्तकत्वम्, ९. B बन्धित्वेष्ट. १०. B ताप्रवर्तक. ११. B कृत. १२. A reads a footnote here-इष्टसाधनताज्ञानं । तत्र नास्तीति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु इष्टसाधनताज्ञानस्यैव प्रवर्तकत्वे तृप्त्यर्थिनस्तृप्त्यकारणीभूते तण्डुलक्रयणादौ प्रवृत्तिः न स्यात् । 'आदि'पदात् घटार्थिनः दण्डाहरणे प्रवृत्तिः न स्यात् दण्डाहरणस्य[१] घटाजनकत्वादि त्याह **तृप्तीति** तथा च तण्डुलक्रयणादौ प्रवृत्त्यनुरोधेनेष्टप्रयोजकताज्ञानमेव प्रवर्तकमिति दिक् ।

ननु तत्त्वज्ञानादित्यत्र कथं प्रयोजकत्वे पञ्चमीत्युक्तं-अनुशासनाभावात् , वर्तते चानुशासनं हेतौ पञ्चमीति चेत्, न । अत्रापि वस्तुगत्या हेतावेव पञ्चमी । हेतुत्वं तु पूर्ववर्तित्वगर्भम् । पञ्चम्या तु पूर्ववर्तित्व[२]गर्भमन्यथासिद्धत्वमुपस्थाप्यते । शक्ते(क्त्यै)व तत्रान्यथासिद्धत्वं विहाय पूर्ववर्तित्वांशभागे मोक्षस्यान्वयः । तथा च पञ्चम्या शक्त्यैव नियतपूर्ववर्तित्वरूपं प्रयोजकत्वमुपस्थापितमित्याह-- **प्रयोजकत्वे चेति** तथा च घटपदस्य घटत्वविशिष्टे शक्तिः । तथा पञ्चम्याऽनन्यथासिद्धत्वविशिष्ट-नियतपूर्ववर्तित्वे शक्तिः । यथा घटपदेन घटघटत्वयोः बोधस्तथा पञ्चम्याऽनन्यथासिद्धत्वनियत-पूर्ववर्तित्वयोः बोधः ।

नन्वत्र पञ्चम्या प्रयोजकत्वे लक्षणा भवतु, मुख्यार्थस्य हेतुत्वस्य बाधादित्याशङ्क्याह- **पञ्चम्या न लक्षणेति** युक्त्या शक्त्यैव बोधसम्भवादिति भावः । ननु तर्हि मोक्षस्य नियतपूर्ववर्तित्वेन पदार्थैकदेशेन समं कथमन्वयः ? यतो मोक्षः पदार्थो भवति[३] [मोक्ष]पदवाच्य इत्यर्थः । द्वितीयपदार्थो भवति अनन्यथासिद्धनियतपूर्ववर्तित्वरूपः । तथा च नियतपूर्ववर्तित्वस्य[४] द्वितीयपदार्थैकदेशत्वात्कथं मोक्षरूपपदार्थस्यान्वयः ? यतः पदार्थः पदार्थेनान्वेति[५] न तु पदार्थैकदेशेनेति व्युत्पत्त्याऽन्वयनि-षेधमाशङ्क्य दृष्टान्तविधयाऽन्वयं दृढयति-**गौरनित्य इति** इदं पदद्वयात्मकमेकं वाक्यम् । तेन गो पदेन गोत्वविशिष्टस्योपस्थितिर्जाता । अनित्यपदेन ध्वंसप्रतियोगिन उपस्थितिर्जाता। तथा च गोत्वस्य नित्यतया गोत्वं विहायानित्यत्वस्य गवि यथाऽन्वयः गोत्वे बाधान्नान्वयः । तथा प्रकृतेऽपि नियतपूर्ववर्तित्वांशेऽनन्यथासिद्धिभागं विहायान्वया (यः) बाधकाभावात् । न च पदार्थः पदार्थेन[६] सममन्वेति, व्युत्पत्तिरेव [७]बाधके सति दृष्टान्ते तु पदार्थौ भवति गोत्वविशिष्टो गौः, द्वितीयपदार्थोऽनित्यत्वरूपस्तथाचानित्यत्वरूपस्य पदार्थस्य पदार्थैकदेशेनेति गवा समं कथमन्वय स्तद्वत्प्रकृते दृष्टान्तासिद्धया कथमन्वय इति वाच्यम् । पदार्थः पदार्थेनेति व्युत्पत्तेस्तु न नियमः किन्तूत्सर्गः[८] । कुत्रचिद्भवति कुत्रचिन्नेति ।[९]

---

१. B omits the reading between आदिपदात्.....घटाजनकत्वादि. २. पूर्ववर्तित्वमन्यथा. ३. A reads a footnote here-पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन यथा 'घटमानय'-इत्यत्रानयनं घट एवान्वेति न तु पटा(टोऽ)न्वे[ति]. ४. B omits the reading [मोक्ष] पदवाच्य इत्यर्थः । ५. B पदार्थेनेति. ६. B पदार्थेनेति व्यु.. ७. B बाधिते. ८. A reads a footnote here-बाधका...द्यो नियम उत्सर्गः । ९. A reads a footnote here-यथा राजा गच्छतीति वाक्ये पुत्रपुत्ररूपैकदेशेनाप्यन्वयसम्भवात् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शक्त्यैवेति गो पदेन यथा गोत्वस्योपस्थितिः शक्त्या क्रियते तथा गोरपि स्वातंत्र्येणोपस्थिति क्रियते । तथा त्वगोरन्याविशेषणत्वेन गोपदेन शक्त्यैव स्वतन्त्रतयैवान्याविशेषणतया गोव्यक्त्याऽन्वयः। न तु गोत्वेन समम् बाधात्, तथा प्रकृतेऽपीति ।

अयमर्थः-पदार्थः पदार्थेनेत्यस्यायमर्थः-पदार्थस्य पदार्थेन विशेष्येण साकाङ्क्षेण सममन्वयो भवति न तु पदार्थैकदेशेन विशेषणेन [१]निराकाङ्क्षेणान्वयः, पूर्वव्युत्पत्त्या । तथा च प्रकृते विशेषणरूपेणानन्यथासिद्धत्वेन समं मोक्षस्यान्वयो माऽस्तु । निराकाङ्क्षत्वात् । ननु निराकाङ्क्षत्वं कथमिति चेत्, [२]अन्यविशेषणत्वेनोपस्थितत्वात् । विशेष्येण नियतपूर्ववर्तित्वरूपेण सममन्वयो भवत्येव। तस्यापि अन्यविशेषणत्वेन साकाङ्क्षत्वात्। तथा च नियतपूर्ववर्तित्वरूपं प्रयोजकत्वं पञ्चम्या शक्त्यैपोपस्थापितं न[३] लक्षणयेति ।

वस्तुतस्तु पदार्थ इत्यादिरप्युत्सर्ग एव न तु नियमः, यतः पदार्थैकदेशेनापि सममन्वय इत्याह **पार्थ एवेति** पदार्थैकदेशेनापि सममन्वयः, यथा 'पार्थ एव धनुर्धरः'-इत्यत्र 'एव'कारार्थो भवत्यन्य-योगव्यवच्छेदः । तस्यैकदेशो भवति अन्योन्याभावस्तेन समं पदार्थस्य-पार्थरूपस्यान्वय इति ।

अयमर्थः-पार्थपदेन पार्थरूपोऽर्थ उपस्थापितः । [४]धनुर्धरपदेन धनुर्धररूपपदार्थ उपस्थापितः। एवं 'एवकार' पदेनान्ययोगव्यवच्छेद उपस्थापितः पदार्थोपस्थित्यनन्तरं वाक्यार्थो यः धनुर्धरः प्रतियोगिकान्योन्याभावव्यवच्छेदवान्पार्थः । तथा च पार्थे धनुर्धरप्रतियोगिकान्योन्याभावो नास्तीत्यतो धनुर्धरो न भवति । तथा च[५] एवकारस्य सम्पूर्णोऽर्थोऽन्ययोगव्यवच्छेदः, तस्यैकदेशो भवत्यन्योन्याभावः, तेन धनुर्धरस्य पार्थस्य चान्वयः । तस्मात्पदार्थैकदेशेनापि सममन्वयो भवति ।

पूर्ववाक्यस्य समाधानं करोति-**एवमिति** यत्र साकाङ्क्षता [६]विशेष्ये विशेषणे वा, तत्र पदार्थे वा [७]पदार्थैकदेशे वाऽन्वय इति व्युत्पत्तेस्तात्पर्यम् । **एतेनेति** एतेन=पञ्चम्या शक्तिसम्बन्धेन प्रयोजकत्वोपस्थापितकत्वेनेति ।

निरस्तमिति किं केनचिदूषणं दत्तमस्ति । पञ्चम्या प्रयोजकत्वे कथं न लक्षणेति तत्र हेतुमाह-**सुबिति** सुब्विभक्तौ लक्षणाङ्गीकारो नास्ति । कुत इति चेत्-यदि सुब्विभक्तौ लक्षणाङ्गीकारो नास्ति। कुत इति चेत्-यदि सुब्विभक्तौ लक्षणाङ्गीकारस्तदा स्मृ-[८]धातुयोगे कर्मत्वबोधकं षष्ठीपदानुशासनं

---

१. It is निराकाङ्क्षेण नान्वयः in both A and B. But it gives quite a contrary sense : so न is left out here. २. B अन्यविशेषणनियतपूर्व. ३. B लक्षणया नेति. ४. B omits धनुर्धरपदेन. ५. B omits च. ६. B विशेषेण विशेष्ये वा. ७. B कदेशेव सममन्वयो भवति । पूर्ववाक्यस्य समाधानं करोति य इति व्यत्प. It is clear that पर्व...करोति is a mere repetition in B. ८. B धातोर्योगे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यर्थं स्यात्। षष्ठ्या मुख्यार्थो भवति सम्बन्धः, तद्बोधे कर्मत्वं लक्षणयैव भविष्यति, कर्मवचनं व्यर्थं स्यात्। एवमन्यत्रापि सुब्विभक्तौ लक्षणानङ्गीकारः।

सुबिति किम्? तिङ्विभक्तौ तु लक्षणा स्वीकर्तव्यैव क्रियत एव। यथा रथो गच्छतीत्यत्र मुख्यार्थस्य [1]कृते बाधग[2]मनाश्रये लक्षणा। रथो गच्छतीत्यत्र गमनाश्रयो रथ इति **नैया[3]यिकमतं, मीमांसकमतं** गमनानुकूलव्यापारवान् रथ इति शाब्धबोध इति निरासार्थः। यथा मया पञ्चम्या प्रयोजकत्वं लक्षणया नोच्यते किन्तु शक्त्यैवेति। ततस्त्वदुक्तदूषणमल[4]ग्नकमेवेति वेदितव्यम्। स्वोक्तमुपंसहरति **तस्मादिति** तथा च हेतावेव पञ्चमी। प्रयोजनकत्वं तु हेत्वेकदेशेन बुध्यत[5] इति।

तत्त्वज्ञानमपीति तत्त्वज्ञानमपि शास्त्रप्रयोज्यं[6] भवति, न तु शास्त्रजन्यम्। यतः शास्त्रश्रवणानन्तरं पदार्थज्ञानं मननरूपम्, तत ईश्वरसाक्षात्कारः। तत्त्वज्ञानमपि मोक्षं प्रति ग्राह्यत्वेन न साक्षाज्जनकं किन्तु मिथ्याज्ञानध्वंसद्वारा। ईश्वरसाक्षात्कारानन्तरं मिथ्याज्ञानं शरीरेऽऽत्मबुद्धिरूपम्, तस्य नाशः, तदनन्तरं मोक्ष इत्यर्थः।

ननु काशीमरणादेरपि मोक्षजनकत्वमेवास्तु, तादृशश्रुतेः श्रवणादिति चेत्, न। तस्यापि प्रयोजकत्वात्। काशीमरणान्मुक्ति'रित्यत्रापि पञ्चम्या शक्त्यैव प्रयोजकत्वबोधनात्; न तु जनकत्वं गौरवात्। प्रयोजकत्वं तु तत्त्वज्ञानादिद्वारा।

ननु काशीमरणस्थले तत्त्वज्ञान[7] द्वारं किमर्थं स्वीक्रियते, तद्व्यतिरेकेणापि मोक्षस्य-सम्भवादिति चेत्, न। काशीमरणान्मुक्तिरित्यत्र मुक्ते दुःखध्वंससरूपतया [8]कार्यतावच्छेदकवै-जात्यादिककल्पनानवकाशेन, अन्यथा तूपपत्त्या तत्त्वज्ञाननिष्ठं वैजात्यं काशीमरणजन्यताऽवच्छेदकं कल्प्यते। काशीमरणजन्यं तत्त्वज्ञानं भिन्नमेव[9]। तत्र काशीमरणजन्यतावा[10]च्छेदिकैका जातिरस्ति। यत्र तु मननादिद्वारा तत्त्वज्ञानमुत्पद्यते तत्र सा जातिर्नास्ति। तथा च काशीमरणातिरिक्तस्थले तत्त्वज्ञानो-त्पत्तावपि न व्यभिचारः। विशेष्यस्य एव कार्यकारणभावस्वीकारात्। तथा च काशीमरणमपि शास्त्रवत् प्रयोजकमेव।

ननु तत्त्वज्ञाने काशीमरणजन्यतावच्छेदिका यथा जातिः स्वीक्रियते तथा मुक्तावेव काशीमरणजन्यतावच्छेदिका जातिः कथं न स्वीक्रियते, किमन्तर्गडुना तत्त्वज्ञानेनेति चेत्, न। ध्वंसे जातेरभावादित्युक्तमेव। तथा च काशीमरणेन[11] तत्त्वज्ञानमेव जन्यते।

---

१. B ऋते. २. B बाधगमने. ३. B नैयायिकमीमांसकमते. ४. B -मलग्नमेवे. ५. A reads a footnote here-नियतपूर्ववर्तित्वं हेत्वेकदेशेनैव. ६. A reads a footnote here-प्रयोज्यं पश्चाद्भावि शास्त्रानन्तर-भावि तत्त्वज्ञानस्य. ७. A reads a footnote here-काशीमरणेत्यादिप्रसङ्गेन तत्त्वज्ञानाभावेऽपि मोक्षजननम्। ८. B कार्यतयाऽव.. ९. A reads a footnote here-दुःखध्वंसकार्यस्यैकत्वात्कारणतावच्छेदकं भिन्नम्। १०. B -वच्छेदकै. ११. B मरणे तत्त्व.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्र कश्चिदाह-काशीमरणतत्त्वज्ञानजनकत्वे मानाभावः । 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतिबलात्तेनैव श्रवणादिरूपेण तत्त्वज्ञानोत्पादश्रवणात् । श्रवणेन मननं जन्यते, मननेन निदिध्यासनं तेन च साक्षात्कारस्तथा चानयैव रीत्या तत्त्वज्ञानोत्पादः श्रवणात् कथं काशीमरणेन श्रवणादिव्यतिरेकेणापि तत्त्वज्ञानं जननीयमिति । न च तत्त्वज्ञानं कथयति 'भगवानिहान्तकाले-'इत्यादिवचनात् काशीमरणेऽपि तत्त्वज्ञानोपदेशत्वेन तत्त्वज्ञानोत्पाद इति वाच्यम् । उपदेशस्य स्वातन्त्र्येण काशीमरणस्थलीयमोक्षं प्रति कारणत्वबोधकात् । अन्यथा तत्रापि मननादिकल्पनाप्रसङ्गेन गौरवात् ।

किञ्चान्तकालशब्देन मरणोत्तरकालो वा, मरणक्षणो वा मरणपूर्वकालो वा ? नाद्यः । [1]तच्छरीरे मरणोत्तरज्ञानानुत्पादात् । न च शरीरान्तरे तदुपदेश इति वाच्यम् । तथा सत्युपदेशस्य शब्दविधया शब्दादिक्रमेण[2] तत्त्वज्ञानोत्पादकत्वेन सामान्यरूपेण क्लृप्तकारणभावस्य श्रवणादिरेव तत्त्वज्ञानं प्रति कारणत्वम् (णम् ?) । काशीमरणं तत्त्वज्ञानं प्रत्यप्यन्यथासिद्धमिति [3]तत्त्वज्ञाननिष्ठं न जन्यतावच्छेदकजातिकल्पनम् । न द्वितीयः । मरणद्वितीयक्षणे मरणक्षणे वा ज्ञानानुदयात् । नापि तृतीयः । काशीमरणस्योत्तरकालवृत्तित्वेन तत्त्वज्ञानानुत्पादकत्वात् । न चान्तकालपदेन प्रथमक्षणोत्तरसाधारणः स्थूलकाल एव विवक्षित इति वाच्यम् । तथापि स्वातन्त्र्येयणोपदेशस्यैव कारणकारणत्वप्राप्तेः । अत्राहुः-'तमेव विदित्वा[ऽति]मृत्युमेति (श्वे. उप. ३-८)।'-इत्यादि श्रुतिबलाल्लाघवात् । अतिमृत्युपदेन मोक्षरूपसामान्यं प्रति तत्त्वज्ञानस्य कारणत्वं कल्प्यते, शब्देन बाधकाभावात् । मुक्तित्वावच्छेदकावच्छेदेन[4] कार्यत्वं बोध्यते ।

न च तादृशश्रुतितः कार्यत्वं कथं बोध्यते अन्यथासिद्धिनियतोत्तरवृत्तित्वरूपं कार्यत्वं 'तमे'वेत्यादि वाक्यामध्यैकेन पदेन बोध्यत इति वाच्यम् । आनन्तर्यं 'त्वा'प्रत्ययेन बोध्यते । न च 'त्वा'-प्रत्ययस्य पूर्वकालत्वाबोधे शक्तिः कथमुत्तरकालवृत्तित्वं बोधनीयमिति वाच्यम् । 'त्वा'-प्रत्ययस्य उत्तरकाल एव शक्यत्वमिति **मणिकारम**तमिति । यथा 'भुक्त्वा व्रजती'त्यत्र भोजनानन्तरं-तदुत्तरकाल एव गमनं बोध्यते, न तु गमनपूर्वभोजनम्, तथाऽनुभवाभावात् । तथा च वासनाविशिष्टदोषनाशकत्वेनावश्यं पूर्ववर्तित्वेन क्लृप्तस्येश्वरादिविषयकसाक्षात्कारस्य मोक्षार्थिनां प्रवृत्त्यनुरोधात्तत्त्वज्ञानस्यानन्यथासिद्धित्वं कल्प्यमेव । तथा च काशीमरणस्थलेऽपि तत्त्वज्ञानस्यावश्यकतया 'कथयति भगवान्' इत्यादि श्रवणत्तत्त्वज्ञानं प्रति जनकत्वम् । न चोपदेशस्तच्छरीरेऽन्यशरीरे[5] वेति द्वयमपि सम्भवतीति वाच्यम् । अस्मिन्नेव शरीरे उपदेशसम्भवात् । न च मरणानन्तरमस्मिन्नेव शरीरे न उपदेशो सम्भवतीति वाच्यम् । शरीरावच्छेदेनात्मनो विभागस्य शरीरे

---

१. B मच्छरीरे. २. B omits शब्दादिक्रमेण. ३. B न तत्त्व. ४. B -छेदकत्वेन. ५. B तत्र शरीरे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्राणविभागस्य वा मरणत्वादित्यभिप्रायः । तेनैतादृशो[१] मरणानन्तरमुपदेशः सम्भवतीति काशीमरणे मोक्षं प्रति प्रयोजकं तत्त्वज्ञानं कारणमिति स्थितिम् ।

सम्प्रदायस्तु मरणस्य तच्छरीरीयज्ञानादिजननात्मकमतः संयोगध्वंसरूपतया ध्वंसस्य चात्मवृत्तितया [२]शरीरान्तरे उपदेशेऽपि न क्षतिर्मरणस्य । तथा तत्पर्यन्तमवस्थायित्वात् । अन्यत्र तत्त्वज्ञानं प्रति श्रवणस्य मननादिद्वारा कारणत्वेऽप्यत्र साक्षादेव कशीमरणेनोपदेशद्वारा तत्त्वज्ञानोत्पादात्[३] । तथा चान्तकालशब्देन मरणोत्तरकाल एव ग्राह्यः । न च काशीमरणं [४]तत्त्वज्ञानेनावश्यक्लृप्तेत्यादिनाऽन्यथा-सिद्धिरिति वाच्यम् । मननादीनां कल्पनागौरवात् । [५]काशीमरणजन्यं तत्त्वज्ञानं भिन्नम्, श्रवणादिजन्य-तत्त्वज्ञानं भिन्नम् । अत [६]एवैतादृशतत्त्वज्ञाननिष्ठं वैजात्यं मननादिजन्यव्यावृत्तं कल्प्यत इत्याहुः । ।

इति श्रीगुणरत्नगणिविनिर्मिते टिप्पणे प्रयोजकतावादः[७] ॥१३०॥

(VI) ईश्वरसाक्षात्कारस्यमोक्षजनकत्वम् ।

ननु तत्त्वज्ञानं त्वनीश्वरविषयकसाक्षात्कारम्, इदानीमपि सामान्यलक्षणप्रत्यासत्त्या ईश्वरविषयकसाक्षात्कारस्य सत्त्वात्; नापि दोषाभावात्, विशिष्टेश्वरविषयकसाक्षात्कारत्वमीश्वर-साक्षात्कारानन्तरदोषनाशात्; नापि तत्त्वज्ञानत्वं जातिविशेषः ।, तुल्यन्यायतया यथा ईश्वरसाक्षात्कारस्य मोक्षं प्रति जनकत्वं तथा जीवात्मसाक्षात्कारस्यापि मोक्षजनकतया तत्त्वज्ञानत्वमादाय सङ्करत्वा[प्र]सङ्गात्, यत्र दैववशादुभयसमूहालम्बनात्मकं साक्षात्काररूपं ज्ञानं जातं तत्र सङ्करसम्भवादिति चेत्, न । तत्त्वज्ञानत्वं मानसज्ञानत्वव्याप्यो जातिविशेषः । यत्र यत्र सा जातिस्तत्र तत्र मानसज्ञानत्वम्, न तु यत्र यत्र मानसज्ञानत्वम्, तत्र [तत्र]तत्त्वज्ञानमिति नास्ति ! न च पूर्वोक्तसङ्कर इति वाच्यम्, [८]ईश्वरसाक्षात्कारस्यैव मोक्षं प्रति जनकत्वात् । जीवात्मसाक्षात्कारस्य मोक्षं प्रति जनकत्वे प्रमाणाभावात् । [९]नन्वत्रापि किं प्रमाणमिति चेत्, तमेवेत्यादि श्रुतेरेव प्रमाणत्वात् । न च सर्वसाधरण [१०]मनारोपितं रूपं तद्वति तत्प्रकारकत्वं मोक्षं प्रतिजनकत्व[११]मिति वाच्यम् । घटादेस्तत्त्वज्ञानमादायेदानीमपि मोक्षापत्तेरिति यथोक्तमेव वाच्यम् ।

---

१. and ५. B omits the reading between उपदेशो.....विभागस्य शरीरे and काशीमरणजन्यं...भिन्नम् ।
२. B °शरीरान्तरेऽप्यु. ३. B पादत्वात्. ४. B. ज्ञानेनान्यथा. ६. B एव ज्ञान. ७. B इति प्रयोजकतावादः ॥
८. A reads a footnote here-ईश्वरसाक्षात्कारस्य मोक्षकारणत्वे । ९. B न च तत्रापि. १०. A धारणाना.
११. B omits the reading मोक्षं प्रति जनकत्वम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(VII) मिथ्याज्ञानध्वंसः ।

ननु तत्त्वज्ञानमपि मोक्षं प्रति न जनकं किन्तु प्रयोजकमेवेत्यत आह द्वितीयसूत्रं[1] **दुःखेति** अस्यार्थः-मिथ्याज्ञानं स्थूलोऽहं गौरोऽहं सुखोऽहं ममेदमित्यात्मविशेष्यकमपरोक्षं ज्ञानं-तच्च वासना त्मकदोष[2]विशेषात्। तादृशज्ञानादपि वासनान्तरमिति बीजाङ्कुरन्यायेनादिनैव। दोषाः रागद्वेषमोहा इति वा, तैः सहापि बीजाङ्कुरन्यायः, यथा रागादिभिर्मिथ्याज्ञानं तेन च रागादिद्वय इति, तथा चोभयथाऽपि दोषाः प्रवृत्तिजनकाः। यद्यपि योगिनामपि भोगार्थं प्रवृत्तिस्तथापि-[3]अरक्तोऽद्विषंश्च भुङ्क्ते इत्यागमबलात् रागादिज-न्यताऽवच्छेदको जातिविशेषः प्रवृत्तित्वाख्यः। स चेश्वरयोगिकृतौ नास्तीति न व्यभिचारः। प्रवृत्तिस्तु धर्माधर्मौ प्रति कारणम्। धर्माधर्माभ्यां जन्मशरीरा[4]त्मकसंयोगविशेषः। जन्म च दुःखकारणम्। तथा चैतेषामु[5]त्तरोत्तरेषां पूर्वपूर्वकार्यकाणां मिथ्याज्ञानादीनामपायेन तदनन्तरं कार्यापयादपवर्गो मोक्ष इत्यर्थः ।

प्रघट्टकार्थो-यथा मिथ्याज्ञानं दोषाणां रागादीनां कारणम्। दोषाः प्रवृत्तिकारणम्, प्रवृत्तिस्तु धर्माधर्मौ प्रति कारणम्, धर्माधर्मौ जन्म प्रति कारणम्। जन्म च दुःखं प्रति कारणम्। एवं भावानां कार्यकारणभावो निरुपितः तथा क्रमेणैवोत्तरोत्तराभावः पूर्वपूर्वाभावं प्रति कारणम्। यथा-तत्त्वज्ञानेन मिथ्याज्ञानध्वंसः क्रियते, मिथ्याज्ञाननाशे दोषनाशः, दोषनाशेन प्रवृत्तिनाशः, प्रवृत्तिनाशेन, धर्माधर्मयोः नाशः, तयोर्नाशेन जन्मनाशः, जन्मनाशेन [6]च दुःख नाशः, सैवात्यन्तिकी दुःखनिवृत्तिर्मोक्ष इति गीयते। यद्यपि धर्माधर्मप्रतिपादकं पदं सूत्रे नास्ति तथापि तत्पदमध्याकृत्य व्याख्येयम्। तथा च मिथ्याज्ञाननाशा नन्तरं दोषनाशः, दोषानाशानन्तरं प्रवृत्तिनाशः, प्रवृत्तिनाशानन्तरं धर्माधर्मनाशः, तन्नाशानन्तरं जन्मनाशः, ततो दुःखनाशरूपा मुक्तिरिति। तथा च सूत्रेण तत्त्वज्ञानस्य मोक्षं प्रति प्रयोजकत्वम्, न तु कारणत्वम्, कारणत्वं[7] च मिथ्याज्ञानध्वंस एवेति स्थापितम्।

(VIII) पुरुषार्थत्वम् ।

पुरुषार्थेति नाम स्वर्गमोक्षान्यपरत्वम्। तथा च प्रकृते मोक्षस्य शास्त्रेण समं सम्बन्धाभावा-त्तत्रेष्टप्रयोजकताज्ञानाभावात्प्रवृत्ति र्नस्यादित्यर्थः। **एतदिति** एतत्सूत्रेण प्रामाणप्रमेयेत्यादिसूत्रेण शास्त्रस्य पुरुषार्थत्वं मोक्षप्रयोजकत्वं चावगतम्। तस्मिन्नवगते च शास्त्रे प्रवृत्तिः, प्रवृत्त्युत्तरं [8]चैतत्सूत्र-पाठे पुरुषार्थत्वज्ञानमित्यन्योन्याश्रय इत्यर्थः। अन्योन्याश्रयमुद्धरति-**धनगर्जितेति** यथा धनशब्दः श्रूयते परं तस्य क्रमो न ज्ञातस्तथा च प्रथममेवाप्तवाक्यात् श्रुतं यदेतत्सूत्रं[9] तस्मात्पुरुषार्थत्वं मोक्षप्र-योज[क]त्वमवगतम्, ततः [10]शास्त्रे प्रवृत्तिः, ततो तदन्तर्गतत्वेन सूत्रपाठेऽपि प्रवृत्तिरितिनान्योन्याश्रयः।[11]

[इति मोक्षनिरूपणम् ।]

---

१. B. सूत्रमित्याह. २. B. -वशात्. ३. B अशक्तो. ४. A -रात्मसं. ५. B -चोत्तरो. ६. A omits च. ७. B omits कारणत्वं. ८. B सूत्रेण पाठे. ९. B omits यदेतत्सूत्रं. १०. A शास्त्रप्रवृत्तिः. ११. B adds न द्विगुरिति । but it is redundant as it is out of context here.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[४] ॥ उद्देशलक्षणपरीक्षाविचारः ॥

(I) उद्देशनिरूपणम् ।

नाम्नेति अत्र च करणत्वविवक्षया तृतीया । नामकरणकं यद्वस्तुनः सङ्कीर्तनं-कथं तदुद्देश इति। तथा च [यदि]मात्रपदं त्यक्तं तदा लक्षणवाक्यान्तर्गते लक्ष्यदेशेऽतिव्याप्तिः । नाममात्रकरणकं वस्तुसङ्कीर्तनस्य सत्त्वात् । नाम च वस्तुप्रतिपादिका संज्ञा । तद्वारणार्थं मात्रपदम् । तथा च लक्ष्यभागे नातिव्याप्तिः, नाममात्रकरणकवस्तुसङ्कीर्तनत्वाभावात् । यथा प्रमाकरणं प्रमाणमित्यत्र लक्ष्यभागे प्रमाणे नाममात्रकरणकं वस्तुसङ्कीर्तनत्वं नास्ति । प्रभाकरणत्वस्यापि सहोच्चारात् प्रमाणमात्रेणानभिधानात् । किन्तु प्रमाकरणत्वेनाप्यभिधानमन्यकरणकमिति नामातिरिक्तस्य यत्करणं प्रमाकरणादि तद्वार्यते । तद्भागेनापि प्रमाणस्याभिधानात् । तच्चेति नामातिरिक्तकरणकं नामकरणके वस्तुसङ्कीर्तनम् ।

उद्देशस्य लक्षणं पुनरप्यतिव्याप्तम् । कथमतिव्याप्तमित्यत आह-[१]**लक्ष्यभागस्यापीति** प्रमाकरणं प्रमाणमित्यत्र यद्यपि वस्तुनः प्रमाणस्य नाममात्रेण प्रमाणपदेनाभिधानं नास्ति तथापि पृथिव्या लक्षणं गन्धवत्वमित्यत्र पृथिवीपदवस्तुनः[२] पृथिवीति पदमात्रेणैवाभिधानात् नान्येन । ततो लक्ष्यभागेऽतिव्याप्तिस्तदवस्थैवेति । अत एव लक्ष्यभागेऽतिव्याप्तिः । यतो लक्ष्यं लक्षणेन नाभिधीयते-यथा प्रमाकरणं प्रमाणमित्यत्र लक्ष्यभागो भवति प्रमाणरूपः । स तु प्रमाणपदेन प्रमाणवाचकत्वेनाभिधीयते, न तु लक्षणेन प्रमाकरणपदेन तद्वाचकत्वात् । यद्यस्य वाचकं भवति तत्तेन नाभिधीयतेयथा घटपदेन घटो नाभिधीयते इतीदमेवाह-**लक्षणेनेति अन्यथेति** यदि लक्षणेन लक्ष्यं नाभिधीयते तदा लक्ष्यतावच्छेदकलक्षणयोः सामानाधिकरण्यं-एकाधिकरणवृत्तित्वं न स्यादिति। यथा प्रमाकरणं प्रमाणमित्यत्र लक्ष्यतावच्छेदकं भवति [३]प्रत्यक्षादिनिष्ठं प्रमाकरणत्वम् तत्रैव लक्षणस्य प्रमाकरणत्वरूपस्य सत्त्वादिति सामानाधिकरण्यम् । यदि प्रमाकरणपदेनान्यः प्रमाणातिरिक्तः पदार्थ उच्यते, अथ च प्रमाणपदेन प्रमाणपदार्थ उच्यते तदा प्रमाकरणत्वप्रमाणत्वयोः सामानाधिकरण्यं नागतमिति लक्षणभागेनापि लक्ष्यमुच्यत एवेति नाममात्रकरणकवस्तुसङ्कीर्तनत्वाभावाल्लक्ष्यदेशेनाति-व्याप्तिरिति कण्टकार्थः ।

ननु मात्रपदे दत्तेऽपि प्रमाकरणं प्रमाणमित्यत्र लक्ष्ये भागे यद्यप्यतिव्याप्तिर्वारिता तथापि लक्ष्यविशेषेऽतिव्याप्तेः सत्वादित्याह-**पृथिव्या इति**-यथा पृथिव्याः किं लक्षणमिति पृष्टे उक्तं 'गन्ध' इत्यत्र नाम्ना पृथिवीति पदमात्रेण वस्तुनः पृथिव्यां सङ्कीर्तनादत्रापि लक्षणवाक्ये नाममात्रेणैव पृथिवीरूपपवस्तुनः सङ्कीर्तनात् । ननु गन्धपदेनापि पृथिव्यभिधीयते, तद(द्)वाचकत्वाद्गन्धपदस्येति, तथा च मात्रपदे दत्तेऽपि लक्षणवाक्यान्तर्गतलक्ष्यभागेऽतिव्याप्तिर्न वारितैवेति शङ्कार्थः ।

---

१. A and B लक्षण but in त. भा. प्र. it is लक्ष्य. २. B omits पृथिवपदवस्तुनः. ३. B प्रत्यक्षादिष्टं प्रमाकरणत्वम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

लक्ष्यभागेऽतिव्याप्तिं वारयति - [1]**नाम्नेति** मात्रपदस्य भिन्नक्रमः, कीर्तना[2]ग्रे मात्रपदस्य-दानात्। तेन किं छन्नमित्यत आह-मात्रपदेनेति अस्यार्थः-मात्र-पदेन लक्षणवाक्यान्तर्गतलक्ष्यदेशे नाम्ना वस्तुसङ्कीर्तनमात्रत्वाभावात् नाम्ना यद्वस्तुनः सङ्कीर्तनमात्रं [3]तन्नास्ति लक्षणभागस्यापि वर्तमानत्वादित्यर्थः । लक्ष्यत्वादिति[4] लक्षणवाक्यस्य लक्ष्यभागस्याप्युद्देशत्वादित्यर्थः । तथा[5] च तत्रातिव्याप्तिवारणार्थं मात्रदानं व्यर्थमित्यर्थः । **तत्रेति** यदि लक्षण वाक्यान्तर्गतलक्ष्य भागेनोद्देशसिद्धिस्तदा लक्षणवाक्यभिन्नोद्देशकथनं व्यर्थमिति । तत्रोच्यते न्यूनाधिकसङ्ख्याव्यवच्छेदार्थं भिन्नोद्देशकथनमिति दूषयति तत्रेत्यादिना । तत्र न्यूनधिकसङ्ख्याव्यवच्छेदे पृथगुद्देशत्वेन रूपेण न्यूनाधिकसङ्ख्याव्यवच्छेदेन बोध्यते, गौरवात् । लाघवादुद्देश[6]त्वेनैव रूपेण तद्बोधनात्, तथा च उद्देशस्तु लक्षणवाक्यान्तर्गत एवेति किं पार्थक्येन ।

ननु पूर्वं यदुक्तं पृथगुद्देशस्य न्यूनाधिकसंख्याव्यवच्छेदशक्तिर्नास्ति यदि, सा माऽस्तु, परं तात्पर्यग्राहार्थं पृथगुद्देशः कर्तव्य एव । तथा च पृथगुद्देशेन तात्पर्यमर्यादया न्यूनाधिकसङ्ख्याव्यवच्छेदो बोध्यते । अयं तात्पर्यार्थः-यथा घटादिप[7]देन घटादिपदार्थो[ऽ]वबोध्यः, एतादृशं यद्वक्तुर्ज्ञानं तत्तात्पर्यमुच्यते, तत्प्रतीतीच्छयोच्चारणम्, तथा च प्रकृतेर्वक्तुर्न्यूनाधिकसङ्ख्याव्यवच्छेद-बोधेच्छयोद्देशस्य वाच्यत्वमिति तात्पर्यनिर्वाहार्थं पृथगुद्देशकरणम्। तदपार्थक्योद्देशेन लक्षणवाक्यान्तर्गतोद्देशेनापि सम्भवतीत्याह-**अपृथगिति तत्रेति** न्यूनाधिकसङ्ख्याव्यवच्छेदे मानाभावादिति पराभिप्रायाज्ञाने प्रमाणमेव शरणमिति भावः ॥

[8]**लक्षणेनेति** च पृथगुद्देशेन न्यूनाधिकसङ्ख्याव्यवच्छेदो न बोध्यते । किन्तु लक्षणे जिज्ञासा जन्यते । तेन पृथगुद्देशस्य न्यूनाधिकसङ्ख्याव्यवच्छेदेन तात्पर्यमित्यर्थः । दूषयति **लक्ष्येति** लक्षणजिज्ञासां प्रति लक्ष्यज्ञानमेव कारणमिति, न तु पृथगुद्देशोऽपीति भावः । जिज्ञासां प्रति शब्दजनकत्वात् । तथा च पृथगुद्देशकथनप्रयोजनं नास्तीति पूर्वपक्षः ।

तत्रेति न्यूनाधिकसङ्ख्याव्यवच्छेदे । **व्यवहारेति** व्यवहारो नाम शब्दः प्रयोगविशेषः । यथा घटशब्दस्य घटे व्यवहारो वाच्यतासम्बन्धेन घटपदवत्वमेवशिष्टानां लक्षणे वाक्यान्तर्गतलक्ष्यभागे उद्देशस्याभिधानाभावादित्यर्थः । **उभयथापीति** मात्र पदस्य नामकीर्तनयोः पुरतो दानेऽपि लक्षणवाक्यान्तर्गतं यल्लक्ष्यं तत्प्रतिपादके नाम्नि प्रमाणादिकेऽतिव्याप्तिः । यथा प्रमाकरणं प्रमाणमित्यत्र लक्षणवाक्यान्तर्गतोलक्ष्यभागप्रमाणरूपः, तत्प्रतिपादकं नाम प्रमाणपदम् । तस्यापि नाममात्रेणाथ वस्तुसङ्कीर्तनमित्युभयथाऽपि सत्त्वादित्यर्थः । **अनुपदमिति** मया यदनुपदं शीघ्रं यद्वीक्ष्य-

१. B मात्रेति. २. B नान्ते. ३. B तत्रास्ति. ४. A लक्ष्यादिति. ५. B यथा. ६. B देशस्त्वे. ७. B पदार्थेन. ८. B लक्षणेति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

माणमुद्देशलक्षणं प्रतिसन्धीयमानेत्यादिकम्, तत्र मूलोक्तलक्षणस्य तात्पर्यमित्यर्थः । **प्रतिसन्धीयमानेति** प्रतिसन्धीयमानं ज्ञायमानं सद्यल्लक्षणवाक्याद्यसमभिव्याप्तं नाम तस्यैवोद्देशत्वात् । तथा च प्रतिसन्धीयमानपदेन मौनिकृतग्रन्थोद्देशे नातिव्याप्तिः । लक्षणवाक्यादित्यादिविशेषणात्, लक्षणपरीक्षावाक्यमध्ये लक्ष्यभागे नातिव्याप्तिः ।

(II) लक्षणनिरूपणम् ।

शास्त्रमित्यर्थ इति अन्यथा यथाश्रुतेः मोक्षार्थिनो गन्धादावपि प्रवृत्तिः स्यादिति भावः । व्यतिरेकित्वमेवेति अत्यन्ताभावप्रतियोगित्वं धर्मवत्त्वम् । न च तत्कृतित्वे सति तदितरावृत्तित्वमिति सत्यन्तमाकाशदावतिव्याप्तिवारणार्थमिति वाच्यम्, गौरवात् । तदितरावृत्तित्वस्य तदितरवृत्तित्वेन रूपेण तदितरवृत्तित्वस्याभावो वाच्यः । तथा च तदितरवृत्तिमध्येऽतीन्द्रियाकाशादेरपि [1]प्रदेशादनुमानादिना प्रतियोगिज्ञानं वाच्यम् । अनुमाने व्याप्त्यादिज्ञानमपेक्ष्यते, व्याप्तिज्ञाने च व्यभिचाराभावविशिष्टसहचारज्ञानमपेक्ष्यते-इत्यादिक्रमेण गौरवम् । तथा चात्यन्ताभावप्रतियोगिधर्मवत्वमेव लक्षणम् । यथा पृथिव्यां लक्षणं गन्धः, द्रव्यलक्षणं गुणवत्त्वम् । गन्धः पृथिव्याः लक्षणं भवति, तस्य जलादिनिष्ठात्यन्ताभावप्रतियोगित्वात् । न च गन्धे पृथिवीनिष्ठात्यन्ताभावप्रतियोगित्याभावादव्याप्तिरिति वाच्यम् । यस्य लक्षणं क्रियते तदितरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वस्य विवक्षितत्वात् । तेन पृथिव्या लक्षणं गन्धः क्रियते । ततः पृथिवीतरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वस्य गन्धे सत्त्वान्नातिव्याप्तिः ।

ननु पृथिव्याः लक्षणं जलं कुतो न भवतीति तस्यापि पृथिवीतरनिष्ठात्यन्ताभावप्रतियोगिकत्वादिति चेत्, न । तस्यापि संयुक्तसमवायसम्बन्धविशेषेण लक्षणत्वात् जलनिरुपितपृथिव्याधारकसंयोगविशेषस्य पृथिव्यामेव सत्त्वादिति [2]सम्बन्धविशेषेण रूपेण लक्षणं भवत्येव । लक्षणशास्त्रनित्यस्य [3]लक्षणासम्भवं शङ्कते **नन्विति व्याघातादिति** लक्षणं भवति गन्धादि[4], तदात्मकत्वं शास्त्रे नास्ति, गन्ध एव गन्धे गन्धात्मकत्व सम्भवात् । शास्त्रस्य शब्दात्मकत्वात् [तत्र]गन्धात्मकत्वाभावः[5] ।

फलितार्थमाह **व्यतिरेकीति** व्यतिरेकिधर्मप्रतिपादकं वाक्यं लक्षणमिति शास्त्रस्येदं सम्भवत्येव तथा च नासम्भवः । [6]लक्ष्यतावच्छेदकलक्षणयोरभेदमाशङ्कते - **एवं चेति** यथा पृथिवी पृथिवीत्ववतीत्यत्र लक्ष्यतावच्छेदकं भवति पृथिवीत्वम्, तदेव लक्षणमपि, तदा लक्ष्यतावच्छेदकलक्षणयोरभेदः संवृत्तः । ननु भवतु लक्ष्यतावच्छेदकलक्षणयोरभेद इति चेत्, न् । इतरभेदसाधनार्थं हि लक्षणं क्रियते । इतरभेदसाधनं चानुमानेन-यथा-'पृथिवीतरेभ्यो भिद्यते,

---

१. A प्रवेशाद. २. B omits सम्बन्धविशेषेण. ३. B लक्षणस्यास. ४. B गन्धादिति. ५. B -भावात्. ६. B लक्ष्याव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पृथिवीत्वात् ।' इत्यत्रेतरभेदवती पृथिवीत्यनुमित्या इतरभेदो विषयीक्रियते । यदि लक्ष्यता-वच्छेदकलक्षणयौरैक्यं तदा हेतुज्ञानासिद्धेः हेतुज्ञानासिद्धयाऽनुमित्यनुदयाद्यदि लक्षणज्ञानं जातम्, तदा लक्ष्यतावच्छेदकस्यापि ज्ञानं जातमेवेति । तथा च साध्यपक्षतावच्छेदकयोः प्रथमतः सामानाधिकरणस्य सिद्धौऽनुमानवैयर्थ्यात् । तथा च लक्ष्यतावच्छेदकलक्षणयोरभेदो न [१]स्वीकार्यः । अत एव पृथिव्याः लक्षणं गन्धः, न पृथिवीत्त्वमिति **मणिकृत्** । तेन[२] च पृथिवीत्वं लक्ष्यता-वच्छेदकमेव । यदवच्छेदेन[३] लक्षणं क्रियते, तल्लक्ष्यतावच्छेदकम् । प्रकृते त्वभेदकृता शङ्का ना सम्भवति[४] । लक्ष्यता-वच्छेदकलक्षणयोर्भेदस्य वाच्यत्वादित्याह-**वाक्यत्वेति** तेनासाधारणधर्मप्रतिपादकं वाक्यं लक्षणम् । तेनेदं [५]वाक्यार्थगर्भं लक्ष्यतावच्छेदकं त्वसाधारणधर्मप्रतिपादकं शास्त्रत्वम् । वाक्यत्वशास्त्रत्वयोः भेदात् । भेदस्तयोरित्यर्थः ।

यद्यपि शास्त्रं वाक्यमेव तथापि वाक्यत्वशास्त्रत्वयोर्भेद इति सिद्धम् । तथा च प्रतियोग्यसमानाधिकरणलक्ष्येतरपदार्थनिष्ठात्यन्ताभावप्रतियोगिसत्त्वे सति प्रतियोग्यसमानाधिकरण-लक्ष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मवत्त्वं लक्षणमन्ततो व्यावृत्तिः । तथा लक्ष्यनिष्ठात्यन्ताभावाप्रतियोगि-धर्मवत्त्वं लक्षणमित्युक्ते पृथिव्या लक्षणं गन्धोऽपि न स्यात् । तस्यापि पृथिवीनिष्ठात्यन्ताभाव-प्रतियोगित्वात् । कथमिति चेत् द्वित्वावच्छिन्नप्रतियोगिताकाभावस्य सत्त्वात् । तथाहि पृथिवीनिष्ठो यो गन्धगुणत्वोभयाभावो वर्तते, [६]यद्यपि पृथिव्यां गन्धो वर्तते परं गन्धगुणत्वरूप मुभयं नास्ति तत्प्रतियोगित्वाद् गन्धस्य, तथा च गन्धरूऽपे लक्षणेऽव्याप्तिरत उक्तं प्रतियोग्यसमानाधिकरणेति पदम्। तथा च प्रतियोग्यसमानाधिकरणं पदमभावविशेषणम्, गन्धाभावस्य प्रतियोगिसमानाधिकरण-त्वान्नाव्याप्तिः ।

तथापि पृथिव्या लक्षणं प्रमेयत्वं स्यात् । प्रमेयत्वस्यापि पृथिवीनिष्ठप्रतियोग्यसमाना-धिकरणात्यन्ता[७]भावाप्रतियोगित्वात् । पृथिवीनिष्ठो यः प्रतियोग्यसमानाधिकरणोऽत्यन्ताभावो जलत्वादीनां तत्प्रतियोगित्वात्प्रमेयस्येति । तद्वारणार्थं लक्ष्येतरेत्यादि सत्यन्तम् । तथा च प्रमेयत्वस्य पृथिवीतरजलादिनिष्ठात्यन्ताभावप्रतियोगित्वाभावान्नातिव्याप्तिः ।

ननु तथापि प्रमेयत्वेऽतिव्याप्तिः । तस्यापि पृथिवीनिष्ठप्रतियोग्यसमानाधिकरणात्यन्ता भावाप्रतियोगित्वं च तिष्ठत्येव । पृथिव्यां प्रमेयत्वस्याभावो नास्ति, अत एवाप्रतियोगित्वम् । तथा च

---

१. B स्वीकर्तव्य. २. A omits तेन च. ३. B यदनवच्छेदेन. But this reading gives a contrary meaning. ४. B न भवति. ५. B वाक्यत्व. ६. B omits the reading between यद्यपि.....मुभयं नास्ति. ७. B -भावप्रतियोगित्वात्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रथमदलमपि । द्वित्वावच्छिन्नप्रतियोगिताका[१]भावमादाय तद्वारणाय प्रतियोग्यसमानाधिकरणेति [२]प्रथमपदम् । द्वित्वावच्छिन्नप्रतियोगिता[३]काभावस्तु न प्रतियोग्यसमानाधिकरण इति दिक् ।

(III) परीक्षाविचारः ।

असाधारणपदार्थस्यायमे[४]वार्थोऽन्यथा प्रमेयत्वादेरप्यसाधारण्यं स्यात् । तस्यापि लक्षणत्वनिरासार्थमिदं वाच्यम्-येनेति यथा पृथिव्याः लक्षणं [५]कृतं गन्धवत्त्वम् । अत्र येन रूपेण-गन्धवत्त्वेन रूपेण यल्लक्षतावच्छेदकाक्रान्तस्यालक्ष्यतावच्छेदकं यत्पृथिवीत्वम्, तदाक्रान्तस्य-तदधिकरणस्य पृथिवीरूपस्य यल्लक्षणं कृतं गन्धवत्त्वादि[६], तल्लक्ष्यतावच्छेदकाक्रान्तस्य पृथिवीरूपस्य तल्लक्षणमुपपद्यते न वेति विचारः परीक्षा । [७]नायं सन्देहः । एकत्र पृथिव्यां विरुद्धनानार्थविषयं ज्ञानं नास्ति । यत उभयत्र पृथिव्यां गन्धे च विषयीभावात् ।

[८]**यथा शब्देति** तथा च 'यथा'शब्दस्यैवायमर्थः । येन रूपेणेति पदकृत्यं यथा प्रमेयत्वेन रूपेण गन्धं गृहीत्वा प्रमेयवती पृथिवीत्यपि लक्षणं स्यात् । गन्धस्यापि प्रमेयत्वात् । तथा च लक्ष्यतावच्छेदकं भवति पृथिवीत्वम्, तदाक्रान्ता भवति पृथिवी, तस्यां यल्लक्षणं प्रमेयवतीत्यादि, [९]तदुपपद्यते न वेति विचारः परीक्षा स्यात् । तद्वारणार्थं येन रूपेणेति । तथा च प्रमेयत्वेन रूपेण लक्षणकारणासम्भवान्नेयं परीक्षा । ननु प्रमेयत्वेन रूपेण गन्धमात्रप्रमेयमादाय लक्षणं कुतो न सम्भवति [१०]गन्धस्याप्यसाधारणधर्मत्वादिति चेत्, प्रमेयपदस्य पदार्थमात्रे शक्तत्वात् । **यल्लक्ष्यतावच्छेदकाक्रान्तत्वेनेति** लक्षणं कृत्वा द्रव्यस्येदं लक्षणं गन्धवत्त्वं सम्भवति न वेति विचारः परीक्षा स्वात् । तस्यापि गन्धवत्त्वेन रूपेण [११]गन्धवत्वं लक्षणं कृत्वा द्रव्यत्वेन रूपेण पृथिवीमात्रं गृहीत्वा, इदं द्रव्यं गन्धवदिति लक्षणं(ण)सम्भवात्तद्वारणार्थं यल्लक्ष्यतावच्छेदकाक्रान्तेति पदम् । तथा च द्रव्यस्य लक्ष्यतावच्छेदकाक्रान्तत्वाभावाद् द्रव्यं गन्धवदिति लक्षणसम्भवान्न परीक्षेति ।

तल्लक्ष्यतावच्छेदकाक्रान्तस्येति पदकृत्यपृथिवीत्वेन रूपेण पृथिवीं गृहीत्वा, गन्धवत्त्वेन च रूपेण गन्धं गृहीत्वा यल्लक्षणं [१२]कृतं गन्धवती पृथिवीति द्रव्यत्वेन रूपेण पृथिवीं गृहीत्वेदं लक्षणं द्रव्यस्योपपद्यते न वेति विचारः परीक्षा स्यात् । तद्वारणाय तदाक्रान्तस्येति । तथा च यद्धर्माक्रान्तस्य पृथिवीत्वधर्माक्रान्तस्य यल्लक्षणं कृतं गन्धवत्त्वादिति । [१३]तद्धर्माक्रान्तस्यपृथिवीत्वधर्माक्रान्तस्य नेयं परीक्षा । यथा द्रव्यस्य गन्धवदिति लक्षणं सम्भवति न वेति । यतो द्रव्यं गन्धवदिति द्रव्यत्वाक्रान्तस्यैव लक्षणम् । ननु द्रव्यत्वाक्रान्तस्य[१४] पृथिवीत्वधर्माक्रान्तस्यैवेयं परीक्षा भवत्विति चेत्, न । द्रव्यस्य

१. B -योगिकानां. २. A omits प्रथम. ३. B -योगिकाभा. ४. A -यमर्थो. ५. B omits कृतं. ६. B -वत्त्वादिति. ७. अ B omits the reading between नायं सन्देह..... विषयीभावात्. ८. A तथा. ९. B नोपपद्यते वेति. १०. B तस्याप्य. ११. B पृथिवीगन्ध. १२. A omits कृतं. १३. B omits तद्. १४. A -तस्यैव परीक्षा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गन्धवत्त्वलक्षणात् । गन्धवत्त्वं हि द्रव्यस्य[१] लक्षणं कुतो न सम्भवतीति चेत्, न्यूनवृत्तित्वात् द्रव्यत्वावच्छेदेने गन्धावृत्तित्वात्।

विवक्षायाः फलितार्थमाह[२]-**एवं चेति** एवं च येन रूपेणेत्यादिनेत्यर्थः । तदाक्रान्तस्येति पदकृत्यमाह पृथिवीत्वेनेति तथा च पृथिवीत्वेन[३] रूपेण पृथिवीं गृहीत्वा, गन्धवत्त्वं लक्षणं कृत्वा, घटत्वाक्रान्तस्येदं लक्षणम् । घटो गन्धवानिति लक्षणं-सम्भवति न वेति [विचारः]परीक्षा स्यात् । तद्धारणार्थं तदाक्रान्तस्येत्युक्तम् । तथा च यद्धर्मपृथिवीत्वरूपो धर्मस्तदाक्रान्तस्य पृथिवीरूपस्य यल्लक्षणं कृतं गन्धवत्त्वरूपम्, तदाक्रान्तस्य पृथिवीत्वाक्रान्तस्य सम्भवति न वेति विचारः परीक्षा भवति ।

ननु घटत्वाद्याक्रान्तस्य प्रकृते तु पूर्वत्र घटस्येत्यत्र घटत्वाक्रान्तस्यैवेति न परीक्षा । विवक्षायाः फलितमाह-तथा चेति परीक्षाप्रतिपादकं यद्वाक्यम्, येन हि वाक्येन परीक्षा प्रतिपाद्यते-यथा पृथिव्या लक्षणं गन्धवत्त्वमुपपद्यते न वेति विचारप्रतिपादकं वाक्यं [४]परीक्षात्मकशास्त्रम् । ततः परीक्षात्मकशास्त्रस्येदं लक्षणम्।

अतिव्याप्तिमुद्धरति-**शास्त्रेति** यदि प्रतिपादिवाक्ये शब्दो नित्यो न वेति रूपे परीक्षाप्रतिपादकवाक्ये परीक्षात्वं स्यात्, तद्धारणार्थं शास्त्रगर्भं परीक्षालक्षणं कर्तव्यम् । तथा च परीक्षाप्रतिपादकं शास्त्र परीक्षात्मकशास्त्रस्य लक्षणम् । वादिप्रतिवादिवाक्यं तु न शास्त्रम्, निर्णयाभावात् । न त्वेवं कृतेऽपि लक्ष्यतावच्छेदकस्यैव परीक्षात्मकशास्त्रस्य[५] परीक्षालक्षणेन परीक्षाप्रतिपादकं शास्त्ररूपं, लक्ष्यतावच्छेदकं तु न शास्त्रम्, निर्णयाभावात् । न त्वेवंकृतेऽपि [६]लक्ष्यतावच्छेदकस्यैव परीक्षात्मकशास्त्रस्य परीक्षालक्षणेन परीक्षाप्रतिपादकशास्त्ररूपेण महाभेदापत्तिरित्याशङ्कते-शास्त्रत्वविवक्षयेति अभेदमुदाहरति **परीक्षात्मेति** लक्षणं तु परीक्षाप्रतिपादकं शास्त्ररूपं व्यवहर्तव्यम् । अयं पूर्वोक्तो विचारः, परीक्षापदवाच्य इति ज्ञानत्वमिच्छात्वं वा[७] लक्ष्यतावच्छेदकमिति नाभेदः ।

[५] ॥ प्रमाणविचारः ॥

(I) प्रमाणलक्षणम् ॥

अत्रापीति प्रमाकरणं प्रमाणमिति लक्षणवाक्येऽपि[८] प्रमाणं प्रमाणत्वेन व्यवहर्तव्यम् । तथा

---

१. A omits द्रव्यस्य. २. B फलितमाह. ३. A पृथिवीत्वरूपेण. ४. A परीक्षाप्रतिपादकं शा.. ५. B शास्त्रत्वस्य. ६. B reads लक्ष्यतावच्छेदकं परीक्षा (?) व्यवहर्तव्यम् । and omits the reading between लक्ष्यता....शास्त्ररूपं ७. B च ८. B लक्ष्यवा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

च प्रमाणे यद्व्यवहर्तव्यं तल्लक्ष्यतावच्छेदकम्। अन्यथाऽत्रापि प्रमाणत्वस्य लक्ष्यतावच्छेदकत्वे लक्षणेन प्रमाकरणत्वेन सममभेदः स्यात्, प्रमाकरणस्यैव प्रमाण[१]त्वादिति भावः।

प्रघट्टार्थः-यथा प्रमाणमितरेभ्यो भिद्यते, प्रमाकरणत्वात्। इतरेतरभेदसाधने लक्ष्यतावच्छेदकलक्षणयोरैक्येऽनुमितिवैयर्थ्यापत्तिः। कथमिति चेत् अनुमितिस्तु पक्षतावच्छेदकसाध्य-सामानाधिकरण्यं विषयीकरोति। अत्र च पक्षतावच्छेदकं भवति प्रमाणत्वम्, साध्यं भवति प्रमाणेतरभेदः। अनयोः यत्सामानाधिकरण्यं तत्तु व्याप्तिज्ञानेनैव ज्ञातम्। [२]यथा प्रमाणेतरभेदाभावस्य व्यापकीभूताभावः प्रमाकरणत्वाभावः तत्प्रतियोगित्वं तु प्रमाकरणत्वे वर्तते। तत्तु व्यतिरेकसहचारज्ञानेन ज्ञातम्। यत्र प्रमाणेतरभेदाभावस्तत्र प्रमाकरणत्वाभाव इति रूपेण व्याप्तिग्रहात्। तयैव साध्यप्रमाकरणत्वयोः सामानाधिकरण्यग्रहादनुमितिवैयर्थ्यमिति भावः।

(II) प्रासङ्गिकी तर्कादिचर्चा।

[३]**तर्कशब्द** इति तर्कशब्दस्य विपर्येण समं पुनरुक्तिमाशङ्क्य समाधत्ते-**गोबलीवर्द इति** तथा च तर्कोऽप्याहार्यविपर्ययरूप एव। यथाऽऽहार्यं-इच्छाजन्यं ज्ञानं-आरोप इति यावत्। यथाऽत्र घटश्चेत् स्यात्तदा तु(तू)पलभ्येदित्ययं तर्कः। यतो घटाभाववति भूतले घटप्रकारकं ज्ञानं जायते, यत इच्छया घटस्यारोपः क्रियते। यद्यपि घटाभावं जानाति तथापीच्छया घटस्यारोपः क्रियते। आरोपशब्देन तदभाववति तत्सत्त्वोपादानमुच्यते। तेन तर्को विपर्यय एवान्तर्भवति-इति विपर्ययपदेनैव तर्कसङ्ग्रहात्पार्थक्येन तदुपादानं व्यर्थं स्यात्। सार्थकं कृतम्, यथा केनचिदुक्तं-'गोबलीवर्दमानये'ति-पदश्रवणानन्तरं बलीवर्दभिन्नगोपदार्थबोधो भवति धेनोर्बोधःश्रोतुर्भवति[४]। **तर्कभिन्नमिति** अनाहार्यरूपो विपर्यय-स्तर्कश्चाहार्यरूप इति विपर्ययविशेष इति न पुनरुक्तिः। तर्कविपर्ययोः प्रमात्वे दोषविशेषस्य प्रामाण्यं स्यात्। दोषेणैव विपर्ययरूपा बुद्धिर्जायते यथा शङ्खः पीत इति विपर्ययः-चक्षुरिन्द्रियनिष्ठपित्तकृतदोषस्तेन भ्रमः।

संशयोऽप्ययथार्थ एव, यथा-स्थाणु र्वा पुरुषो वेति। पुरुष एवेदृशः सन्देहो वृत्तः। तत्र पुरुषे यत्र वर्तते स्थाणुत्वं तद्भानात्। ननु तदभाववति तत्प्रकारत्वाद्विपर्यय एवान्तर्भवतु इति चेत्, [ना]विपर्ययश्च निश्चयः, अयं सन्देहः, विरोधस्यापि तत्र भावात्। विपर्यये विरोधभानं न भासते[५]। तदा निश्चयत्वम्, यथा भूतले घट इत्यत्र घटत्वाभावाप्रकारत्वे[६] सति घटत्वप्रकारत्वं[७] सत्यन्तं सन्देहवारणार्थम्। सन्देहे तु घटत्वाभावप्रकारत्वे सति घटत्वप्रकारकत्वे सति विरोधविषयत्वम्।

---

१. B प्रमात्वादिति. २. B यत्. ३. B repeats तर्कशब्द इति thrice !. ४. B भवतु. ५. B भासती (?) ति भेदः। ६. B भावप्र. ७. B घटत्वं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विरोधपदं तु समूहालम्बनज्ञाने संशयत्ववारणार्थम् । **कथंचिदिति** यद्यपि विशेषणरूपेण सादृश्यं नास्ति-यथार्थज्ञानयोः सादृश्ये द्रव्यत्वेन रूपेण नास्ति तथापि केनचिद्रूपेण प्रमेयत्वादिनाऽर्थज्ञानयोः [१]सादृश्यसत्त्वाद् भ्रमेऽतिव्याप्तिः । तथा च यथा कथञ्चिद्रूपेणार्थसादृश्यं न विवक्षितं सकलार्थवृत्तिधर्मसादृश्यं प्रमायामपि नास्त्यसम्भवादित्याह-**रजतत्वाःदीनामिति तद्वतीति**[२] तथा च यथार्थपदस्यार्थसादृश्यं न विवक्षितं किन्तु तद्वति तत्प्रकारकत्वम् तथा च भ्रमे नातिव्याप्तिः । कथमिति चेत्, शुक्तौ यज्जायते रजतत्वप्रकारकं ज्ञानम्, तत्तु रजतत्वाभाववत्यां शुक्तौ, तद्वतीतिपदं भ्रमेऽतिव्याप्तिवारणार्थम्, तत्प्रकार[क]त्वस्य भ्रमेऽपि सत्त्वात् । यथा शुक्ताविदं रजतमित्यत्र रजतत्वस्य प्रकारकत्वात् । प्रकारकत्वं च स्वरूपपसम्बन्धविशेष एव । यथाऽवच्छेदकत्वादिस्वरूपप-सम्बन्धविशेषः । तद्वद् यत्रान्यनिर्वचनं न भवति तत्र स्वरूपसम्बन्धत्वं फलैकोन्नेयं कल्प्यम् । ननु भासमानवैशिष्टं, प्रतियो[३]गित्वरूपम् । अयमर्थः यथा [४]भासमानं-ज्ञायमानं यद्वैशिष्ट्यं-सम्बन्धस्तत्प्रतियोगित्वं-तन्निरूपकत्वं यथा घट इत्युक्ते घटत्वं प्रकारः, तत्र भासमानं घटत्वनिरुपितं यद्वैशिष्टं समवायरूपं तत्प्रतियोगित्वं घटत्वस्येति घटत्वं प्रकारो विशेषणमिति यावदिति **जीर्णमतम्**।

तन्न, विशेष्यस्यापि प्रकारत्वापत्तेः । तस्यापि भासमानवैशिष्ट्यप्रतियोगित्वात् । यथा घट इत्यत्र भासमानवैशिष्ट्यप्रतियोगित्वं घटत्वे, तथा घटेऽपीति संयोगसमवाययोरुभयनिरुप्यत्वादिति । ननु तद्वति तत्प्रकारकत्वस्य भ्रमेऽपि सत्त्वादतिव्याप्तिः । कथमिति चेत्, यत्र गुज्जापुज्जवहः (ह्नी)तिष्ठतः, तत्र वैपरीत्येन यज्ज्ञानं जातं-गुञ्जापुञ्जो वह्निज्ञानं[५] वह्निज्ञाने च गुञ्जापुञ्जज्ञानमिति तद्वति गुञ्जापुञ्जे, वह्नित्ववति वह्नौ तत्प्रकारकत्वज्ञानं गुञ्जापुञ्जत्ववह्नित्वयोः प्रकारकत्वात् समूहालम्बनं ज्ञानस्यैकत्वादित्यत आह **[६]तद्विशेष्यकत्वे सतीति** तद्वान्प्रकारभूतो यो धर्मस्तद्वान्यः पदार्थः स विशेष्यः यत्र तत्प्रकारत्वम् । तथा च भ्रमरूपसमूहालम्बने तद्विशेष्यकत्वं नास्ति । गुञ्जात्वं तु वह्नौ परिभासते, वह्नित्वं तु गुज्जौ (-ज्जायां) परिभासते । तथा च गुज्जात्वनिष्ठप्रकारतानिरुपितविशेष्यत्वं गुञ्जायां नास्ति । वह्नित्व-निष्ठप्रकारतानिरूपितविशेष्यत्वं वह्नौ[७] नास्ति । अतो न तद्विषेष्यकत्वं ज्ञानभ्रम-रूपसमूहालम्बनेऽस्तीत्यर्थः ।

एतदेवाह-**भ्रम इति** शुक्तौ सत्यामिदं रजतमितिज्ञानं यद्यपि रजतत्ववति रजतत्व-प्रकारकं ज्ञानं भवति, यतस्तस्य ज्ञानस्य विषयो रजतत्ववानेव भवति, परं न रजतत्वादिमद्विशेष्यकः, इदमंशस्य शुक्तित्वादित्यर्थः । तथा च रजतप्रमाया इदं लक्षणम्रजतत्वनिष्ठप्रकारता-निरूपितरजतनिष्ठविशेष्यतानिरूपित विशेषणीयत्वावच्छिन्नरजतनिष्ठविशेष्यतानिरूपित-

---

१. A सादृश्यत्वात्. २. B omits this प्रतीक. ३. B -योगित्वम् । ४. B भासमानत्वं. ५. B omits वह्निज्ञानं. ६. B omits this प्रतीक at all. ७. B omits वह्नौ.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रजतत्वनिष्ठप्रकारतानिरूपितप्रकारित्वम् । अथ च रजतत्वनिरूपितसमवायनिष्ठसंसर्गाख्य-विषयतानिरूपितविषयत्वं रजतप्रमात्वमिति **शिरोमणिटीकायाम्** ।

(III) प्रमालक्षणे दोषनिरासः ।

[1]**अनुभवपदार्थान्तर्गतेति** अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानमित्यनुभवान्तर्गतं ज्ञानपदम् । तदेच्छायामतिव्याप्तिः । तस्या अपि तद्वति तत्प्रकारत्वे सति स्मृतिव्यतिरिक्तत्वात् । तथा चेच्छायामपीदमस्ति । यथा रजतमेव भवत्वितीच्छायां रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वे सति स्मृतिव्यतिरिक्तमस्तीति तद्वारणाय ज्ञानपदमितीच्छायां नातिव्याप्तिः । **रजतत्ववदिति** तथा च यत्र रजते शुक्तित्वप्रकारकमियं शुक्तिरिति ज्ञानं जातं तत्र रजतत्ववद्विशेष्यकत्वे सति स्मृतिव्यति-रिक्तज्ञानत्वमस्ति परं [2]रजतत्वप्रकारकत्वं नास्तीति नातिव्याप्तिः ।

[3]**अननुगतमिति** रजतत्ववतीत्यादिना । समाधत्ते-**तच्छब्देति** तथा च लक्ष्यमप्यननुगततमेव। कुत्रचिद् घटप्रमा ज्ञानप्रमालक्षी(क्ष्यम्), कुत्रचित्पटप्रमालक्ष्यमिति[4] । तेन लक्षणमप्यननुगतं वक्तव्यमित्यर्थः ।

अत्राकाशत्वमिति इदं ज्ञानं शाब्दं वाऽऽनुमानिकं चेति । अत्र शब्देन वस्तुतः आकाशमेव ग्राह्यम् । तथा चात्राकाशमिति ज्ञानेऽऽकाशवत्याकाशप्रकारत्वे सति स्मृतिव्यतिरिक्तज्ञानत्वं प्रामाण्यम्। यथेदं रजतमित्यत्र रजतत्ववति रजतत्वप्रकारकत्वे सति स्मृतिव्यतिरिक्तंज्ञानत्वं प्रामाण्यम् । तथा [5]चात्राकाशत्वमिति ज्ञाने प्रथमान्तमाकाशं विशेष्यम् । तत्र यस्यान्वयः, स तद्विशेषणमा-काशस्यैवान्वयात् । आकाशमेव विशेषणम् । तथा [6]चाकाशवत्याकाशप्रकारत्वे सति स्मृतिव्यतिरिक्तज्ञानत्वमेव प्रामाण्यं वक्तव्यम् । तत्र स्यादाकाशवत्त्वाभावादित्याशङ्क्यार्थः । नन्वाकाशवत्त्वं कथं नास्तीति चेत्, न । तस्यावृत्तिपदार्थत्वात् । **तत्सम्बन्धवतीति** तथा चैतादृशप्रामाण्यसंग्रहार्थं विवक्षेति । तथा चाकाशसम्बन्धः-आकाशत्वेन समं समवायसम्बन्धः आकाशत्वस्य शब्दात्मकत्वेन[7] शब्दस्य च[8] तद्गुणत्वेन । तथा [9]चाकाशवत्त्वं भवति शब्दः, आकाशं भवति द्रव्यं गुणिरूपम् । तेन गुणगुणिनोः समवाय एवेत्यर्थः ।

ननु तत्सम्बन्धवति तत्प्रकारकत्वे सति स्मृतिव्यतिरिक्तं ज्ञानत्वं प्रमात्वमिति लक्षणं कृतम्[10]। तत्र दूषणमाह-**समवायसम्बन्धेनेति** अयमर्थः-यत्र जलं गन्धवत्, समवायसम्बन्धग्रहणेनेदं ज्ञानं जातम् । तत्रापि भ्रमेऽतिव्याप्तिः । तस्यापि ज्ञानस्य गन्धसम्बन्धवतिजले गन्धप्रकारकत्वे सति स्मृतिव्यतिरिक्तज्ञानसत्त्वाज्जलेन समं सम्बन्धः संयुक्तसमवायोऽस्ति तथा च गन्धसम्बन्धवति

१. A and B read अनुभवपदान्तरि (?)ति. But in त.भा.प्र. it is as above. २. B रजतप्र. ३. B अनुगतमिति. ४. B घट. ५. B तथाऽत्रा. ६. B आकाश. ७. B -त्मकेन. ८. B न. ९. B चाकाशत्वं. १०. A omits कृतम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गन्धप्रकारकत्वेसति स्मृतिव्यतिरिक्तज्ञानत्वं गन्धमिति ज्ञानस्य सत्त्वादतिव्याप्तिरित्यर्थः । दोषान्तर[१]तत्रैवाह-**अपि चेति** यस्मिन्घटे पूर्वं श्यामं रूपं स्थितम्, तदनन्तरं पाकेन रक्तं रूपं जातं तद्दशायांरक्तता-दशायामिदानीं[२] श्याम इति भ्रमेऽतिव्याप्तिः । तत्रापि श्यामत्वसम्बन्धवति घटे श्यामत्वप्रकारकत्वे सति स्मृतिव्यतिरिक्तज्ञानत्वादित्यर्थः ।

विद्यमानतेति[३] इदानीं प्रकारस्याभावान्नातिव्याप्तिरिति भावः । प्रकारस्य विद्यमानताविवक्षायां दोषमाह-[४] **अश्याम इति** रक्तादशाया[५]मश्यामोऽयमित्येका प्रतीतिरपरा च पूर्वं श्याम इति । अनयोः प्रतीत्यो र्प्रमारूपयोः अप्रमात्वं स्यादित्यर्थः । पूर्वं श्यामोऽयमितिप्रतीतौ श्यामत्वस्य विद्यमानत्वाभा-वात् । तथा च प्रकारस्य विद्यमानताऽपि न युक्तेति भावः ।

न च (नु) प्रथमप्रतीतेः कथमप्रमात्वमिति चेत्, न[६]। अश्याम इत्यत्रापि श्यामत्वं प्रकारः, तस्य ज्ञानकाले विद्यमानत्वाभावादप्रमात्वमित्यर्थः यत इदानीं श्याम इति ज्ञाने एतत्कालावच्छेदेन श्यामत्वस्य भानादप्रमात्वम् । श्याम इत्युक्ते कालस्यानवच्छेदकत्वात् [७]यत्र कालोऽवच्छेदको नास्ति तत्र प्रतीतिः प्रमैव । यद्यप्येतत्कालावच्छेदेन[८] श्यामत्वं नास्ति, तथापि पूर्वकालावच्छेदेन श्यामत्वस्य स्थितेः प्रमैवेति भावः ।

लक्षणस्य निष्कर्षमाह-**यदनवच्छेदेनेति** यदनवच्छेदेन यत्र यत्सम्बद्धमथ च यत्सम्बन्धपुरस्कारेण यत्र यत्सम्बद्धं तदनवच्छेदेन तत्सम्बन्धपुरस्कारेण च[९] तत्र तदनुभवस्य प्रमात्वम्। तदनवच्छेदेनेत्यस्य यदनवच्छेदेनं सममन्वयः, तत्सम्बन्धपुरस्कारेणेत्यस्य यत्सम्बन्धपुरस्कारेण सममन्वयः । तथा च यदनवच्छेदेन यत्कालानवच्छेदेन यत्र यत्सम्बद्धं तत्कालानवच्छेदेन तत्र[१०] तदनुभवस्य प्रमात्वम् । यथा पूर्वं श्याम इत्येतत्कालानवच्छेदेन श्यामत्वसम्बद्धे भवति घटः । एतत्कालानवच्छेदेनैव तत्र घटे तदनुभवस्य-श्यामत्वानुभवस्य प्रमात्वमेव । एतत्कालावच्छेदेन तु श्यामत्वग्रहस्तु भ्रम एव सम्पूर्णलक्षणयोजना । यथेदानीं रक्तो घट इति प्रमाज्ञानम् । तत्रेदं लक्षणयोजनम् । तथा च यदनवच्छेदेनेत्यत्रोदाहरणे यत्पदेन पूर्वकालो ग्राह्यः । तथा च पूर्वकालानवच्छेदेन यत्सम्बद्ध रक्तत्वसम्बद्धो घटः, तदनवच्छेदेन-पूर्वकालानवच्छेदेन यत्सम्बन्ध-पुरस्कारेण-समवायसम्बन्धपुरस्कारेण रक्तत्वसम्बद्धो घटः । तत्सम्बन्धपुरस्कारेण-समवायसम्बन्ध-पुरस्कारेण घटोऽयमित्यत्र च यदनवच्छेदेन-पटत्वाद्यनवच्छेदेन तत्सम्बद्धः-घटत्वसम्बद्धो घटः । अद्य अथ यत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण यत्सम्बद्धःघटत्वसम्बद्धः [घटः ?]तदनवच्छेदेन-पटत्वानवच्छेदेन, तत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण तत्र-घटे

---

१. B दोषान्तरं आह. २. A omits रक्तादशायां . ३. A and B both read विद्यमान इति. But in त.भा.प्र. it is as above. ४. B श्याम इति. ५. B दशायां श्यामो. ६. B -चेच्छयाम इत्य. ७. B omits the reading between यत्र.....तत्र. ८. B यद्यपि तत्का. ९. B omits च. १०. B यत्र-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तदनुभवस्य-घटत्वानुभवस्य प्रमात्वमित्यर्थः । घटे पटादीनामनवच्छेदकत्वाद् घटत्वस्य समवायसम्बन्धेन वृत्तित्वाच्चेति योजना ।

आदितः पदकृत्यं यथा-यदनवच्छेदेनेत्यस्य त्यागे यत्र घटः पूर्वं श्यामः स्थितस्तस्य रक्ततादशायामिदानीं श्यामोऽयमिति ज्ञानेऽतिव्याप्तिः । तत्रापि यत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण श्यामत्वस्य घटेन सह समवायसम्बन्धः । तेन सम्बन्धनेन यत्र घटे यच्छ्यामत्वं तेन सम्बद्धो भवति घटः । [1]तत्पदेन यत्किञ्चिद्ग्राह्यं यत्-पदस्यानुक्तत्वात् तदनवच्छेदेन-पूर्वकालानवच्छेदेन तत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण तत्र घटे तदनुभवस्य-श्यामत्वानुभवस्य प्रमात्वं स्यात् । तद्वारणार्थं यदनवच्छेदेनेति । तथा च यदनवच्छेदेन यत्सम्बन्धं[2] तदनवच्छेदेन तदनुभवाभावान्नातिव्याप्तिः । श्यामत्वं त्वेतत्कालानवच्छेदेन घटसम्बद्धम् । तस्य चैतत्कालानवच्छेदेनैव पूर्वभ्रमदशायामनुभवात् । तेन नातिव्याप्तियत्सम्बन्धपुरस्कारेणेत्यस्य[3] पदकृत्यं-यथा यत्र शुक्तौ रजतज्ञानं जातं तत्रातिव्याप्तिः । तत्रापि यदनवच्छेदेन-घटत्वाद्यनवच्छेदेन यत्र यत्सम्बद्धं-शुक्तौ रजतत्वसम्बद्धं तत्र तदनवच्छेदेनघटत्वाद्यनवच्छेदेन, तत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण, तत्रशुक्तौ तदनुभवस्यरजतत्वानुभवस्य प्रमात्वं स्यादत आह-**यत्सम्बन्ध पुरस्कारेणेति** तथा च यत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण शुक्तौ रजतस्य सम्बन्धाभावान्नातिव्याप्तिः । समवायसम्बन्धेन शुक्तौ रजतत्वं नास्त्येवेति भावः ।

तदनवच्छेदेनेति पद कृत्य-अयं घट इत्यत्र [5]पटे यत्र यत्र घटभ्रमो जातस्तत्रातिव्याप्तिः । यतस्तत्रापि यदनवच्छेदेन-पटत्वाद्यनवच्छेदेन यत्सम्बन्धपुरस्कारेण-समवायसम्बन्धपुरस्कारेण यत्र-पटे यत्सम्बन्धं घटत्वसम्बन्धं तत्सम्बन्धपुरस्कारेण समवायसम्बन्धपुरस्कारेण तत्र पटे तदनुभवस्यघटत्वानुभवस्य प्रमात्वरूप लक्षणस्य सत्त्वादतिव्याप्तिः । तदनवच्छेदेनेति पददाने[4] तु यदनवच्छेदेन-पटत्वाद्यनवच्छेदेन घटत्वं सम्बद्धम्, तदनवच्छेदेन पटत्वाद्यनवच्छेदेन घटत्वाभावात् । तथा च यदनवच्छेदेन घटत्वं सम्बद्धं तदनवच्छेदेन तज्ज्ञानं जातमिति तत्सम्बन्धपुरस्कारेणेत्यस्य पदकृत्यम्-यथा गन्धवद् जलमित्यत्र समवायसम्बन्धेन गन्धस्य[6] जले प्रतीतिर्जाता तत्रातिव्याप्तिः । यतस्तत्र यदनवच्छेदेन-पृथिवीत्वाद्यनवच्छेदेन यत्सम्बन्धपुरस्कारेण[7] गन्धः सम्बद्धः, तदनवच्छेदेनपृथिवीत्वाद्यनवच्छेदेन तत्र जले तदनुभवस्य-गन्धानुभवस्य प्रमात्वं स्यात् । अत उक्तं-[8]**तत्सम्बन्धेनेति** - तथा च जले यत्सम्बन्धपुरस्कारेण गन्धः सम्बद्धः तत्सम्बन्धपुरस्कारेण गन्धानुभवस्य प्रमात्वं न त्वन्यसम्बन्धपुरस्कारेणेति । गन्धस्तु संयुक्तसमवायेनैव जले सम्बद्धमिति

१. B omits the reading between तत्पदेन.....नुक्तत्वात्. २. A यत्र वत्स. ३. A -कारेणेति पद. ४. B घटे. ५. A पदादाने. ६. A गन्धेन गन्धस्य. ७. A adds यत्र जले यत्सम्बद्धो-after पुरस्कारेण. ८. A तत्सम्बन्धेति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तेनैव सम्बन्धेन यो जले गन्धानुभवस्तस्य प्रमात्वमिति न तु समवायसम्बन्धेन, तत्सम्बन्धपुरस्कारेण तत्रावर्तमानत्वात् । **मूलकारो**ऽपि **तत्सम्बन्धपुरस्कारेणेत्यस्य** पदकृत्यमाह-**समवायेनेति** तथा च समवायसम्बन्धेन जले यदि गन्धज्ञानम्, तत्र नातिव्याप्तिः । समवायसम्बन्धपुरस्कारेण तत्रजले गन्धस्य[१] वर्तमानत्वात् । वर्तते च संयुक्तसमवायपुरस्कारेणेति । स तु संयुक्तसमवाय[२]स्यैवोट्टंकनात् । [३]यदनवच्छेतेनेति कृत्यं **मूलकारः** प्राह-**इदानीमश्याम**[४] इति यदि यदनवच्छेदेनेदं पदं न दातव्यं तदेदानीं श्याम इत्यत्र पूर्वकाले यः श्याम आसीत् तत्रेयं प्रतीतिः-इदानीं श्याम इति भ्रम एव । तत्रातिव्याप्तिः । तत्र यत्सम्बन्धपुरस्कारेण श्यामत्वस्य समवायसम्बन्धपुरस्कारेण यत्र यत्सम्बद्धं घटे श्यामं (श्यामत्वं ?) सम्बद्धं तत्सम्बद्धश्यामत्वस्य समवायसम्बन्धपुरस्कारेण तदनवच्छेदेनैव फलानवच्छेदेन [५]तत्र घटे तदनुभवस्य श्यामत्वानुभवो नास्ति । घटे तु श्यामत्वसम्बन्ध एतत्कालानवच्छेदेनानुभवस्तु भ्रमे पूर्वोक्ते[६] इदानीं श्याम इति रूपे एतत्कालानवछेदेनेति वृत्तौ वृत्तौ-इत्यर्थोऽपेक्ष्यते तु। **एतत्कालानवच्छेदेनेति क्रियेति** कार्यमित्यर्थः ।

(IV) इन्द्रियस्य प्रमाकरणत्वम् ।

व्यासङ्गेति प्राचीनमते इन्द्रियं ज्ञानं प्रमां प्रति करणम् । एवं व्यासङ्गदशायां यदा मनसा समं चक्षुरिन्द्रियादीनां संयोगो नास्ति, तदेन्द्रिये सत्यपि प्रमा नोत्पद्यत इत्यर्थः । इन्द्रियसन्निकर्षे तु सत्यविलम्बेन प्रमोत्पत्तेरिन्द्रियसन्निकर्षस्यैव कारणत्वं स्यात् । तदिन्द्रियादीनां सिद्धान्ते चेन्द्रियादीनामेव करणत्वस्वीकारात् । नन्विन्द्रिये सत्यविलम्बेनैव[७] कार्योत्पत्तिर्जायते । यथा (दा) घटेन समं चक्षुरिन्द्रियादिसंयोगो वर्तते, तदा चक्षुरिन्द्रियादिना घटविषयकं प्रत्यक्षमविलम्बेनैव जन्यते। न च सन्निकर्षस्यैव कारणत्वमायात्विति वाच्यम् । प्रमां प्रति जनकत्वे प्रमाणाभावात् । न च प्रमोत्पत्तिरेव प्रमाणमिति वाच्यम् । संयोगादिसम्बन्धेनैवेन्द्रियादीनां कारणत्वात् । न तु सम्बन्धस्यापि कारणत्वम्। [यदि]सम्बन्धस्यापि सम्बन्धः कल्पनीयस्तदा चानवस्था स्यादिति येनापि सन्निकर्षस्य कारणता स्वीक्रियते तेनापि चक्षुरिन्द्रियादीनां प्रमां प्रत्यवश्यं जनकत्वं स्वीक्रियते एव[८] । तथा चासम्बन्धिनोऽकारणत्वात्तेषां सम्बन्धो वक्तव्य एवेति[९] । ततो विशेष्ये एव घटप्रमां प्रति चक्षुर्घटसंयोगादिसम्बन्धेन चक्षुरादीनां कारणत्वम् । तथा च चक्षुरादीनां[१०] च घटादिसंयोगादिना सम्बन्धेन कारणत्वमावश्यकम्। तथा चावश्यकत्वाल्लाघवाच्च प्रमां प्रति चक्षुरादीनां कारणता तेन यद्व्यापरानन्तरमविलम्बेनैव

---

१. A गन्धस्यावर्तमानत्वात् । But here the writer wants to prove the absence of गन्ध in water by समवायसम्बन्ध using the hypothetical reasoning (तर्क), he accepts गन्ध in water by समवाय for the time being. २. B -वायस्योट्टं.. ३-४. The order of these two प्रतीकs is reverse in the available text of त.भा.प्र. ५. B घटेन. ६. B पूर्वोक्ते एतत्कालानवच्छेदेनेति वृत्तावपेक्ष्यते । एतत्का. ७. B omits एव. ८. B omits एव. ९. B इति. १०. A चक्षुसंयोगादी.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कार्योत्पत्तिस्तत्कारण[१] मिति लक्षणं पर्यवसन्नम् ।

(V) फलायोगव्यवच्छिन्नं कारणं करणमितिमत निरासः ।

ततः फलायोगव्यवच्छिन्नं कारणं करणमिति व्याख्या तन्न । इन्द्रियसन्निकर्षादिनामपि कारणत्वसम्भवात् कारणत्वग्राहकौ चान्वयव्यतिरेकावेव । तौ च यथेन्द्रियादीनां स्तस्तथा सन्निकर्षादीनामपि । तेन विनिगमनाविरहादिन्द्रियादि-वत्सन्निकर्षादीनामपि कारणत्वर्मा (मिति ?) । न च पूर्वोक्तं लाघवमेव विनिगमकमिति वाच्य तदा [२]दण्डसंयोगादीनामप्यकारणतापत्तिस्तथा चात्र प्रामाणिकमते गौरवम् । न चेन्द्रियादीनामकरणत्वं स्यात् । इन्द्रियसंयोगादिविलम्बेन कार्यविलम्बादिति । न चेन्द्रिय विलम्बेने-न्द्रिये सत्यपि कार्यानुदयादिति वाच्यम् । व्यापारवत्कारणस्यैव करणत्वमिति स्थाप्यत्वात् । एतदेवाह **व्यापारवत्त्वस्येति** ।

(VI) प्रमाणस्य निष्कृष्टलक्षणम् ।

प्रमाणस्यैवेदं निष्कृष्टं लक्षणमाह-**अनुभवत्वेति** अनुभवत्वस्य व्याप्या या जातिः, तदवच्छिन्ना या कार्यता, तया निरूपिता या कारणता तस्या आश्रयत्वे सति प्रमाकरणत्वम् । उदाहरणं यथा घटोऽयमिति चक्षुषा[३] यत्र प्रमारूपं ज्ञानं जातं तत्र चक्षुर्भवति प्रमाणम् । तत्रेदं लक्षणं योज्यते यथा घटोऽयमिति प्रमारूपे ज्ञानेऽनुभवत्वस्य व्याप्या जातिः चाक्षुषत्वरूपा । कथमिति चेत्, अनुभवत्वव्याप्यत्वं चाक्षुषत्वस्येदम् । तथाहि चाक्षुषत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नानुभवत्वसामानाधिकरण्यमनुभवत्वस्य व्याप्तम् ।

अस्यार्थो यथा चाक्षुषत्वसमानाधिकरणो योऽत्यन्ताभावः-घटत्वादीनामत्यन्ताभावस्तस्य प्रतियोगितानवच्छेदकमनुभवत्वम् । अनुभवत्वं तु व्यापकम्, अनुभवत्वं तु व्यापकतावच्छेदकम्[४] तदवच्छिन्नं भवत्यनुभवत्वम् । तेन सह सामानाधिकरण्यं चाक्षुषत्वे वर्तते । सामानाधिकरण्यं नाम एकाधिकरणवृत्तित्वम् । [५]यथा घटत्वद्रव्यत्वयोः[६] सामानाधिकरण्यम् । घटरूपे घटत्वद्र[७]व्यत्वयोः सत्त्वात् । तद्वत् चाक्षुषत्वानुभवत्वयोरेकाधिकरणवृत्तित्वेन सामानाधिकरण्यम् । यथाऽनुभव-त्वाधिकरण्ये चक्षुर्जन्ये ज्ञाने चाक्षुषत्वानुभवत्वयोः सत्त्वात् सामानाधिकरण्यम्, तथा चात्रानुभवत्वं भवति व्यापकम्, चाक्षुषत्वं भवति व्याप्यम् यत्र यत्र चाक्षुषत्वं तत्र तत्रानुभवत्वम् । यत्र यत्रानुभवत्वं तत्र तत्र[८] चाक्षुषत्वं नास्ति । अनुभवस्यानुमितौ सत्त्वेऽपि चाक्षुषत्वाभावात् । तथा च व्यापकत्वं नाम तन्नि[९]रूप्यत्वन्ता भावाप्रतियोगित्वम् । तच्छब्देन यद्[९] व्यापकत्वं यत्र ग्राह्यं स तत्र ग्राह्यस्तथा च प्रकृते चाक्षु[१०]स्य व्यापकत्वमनुभवे[१०], तथा चात्र शब्देन चाक्षुषत्वं ग्राह्यम् । तेन चाक्षुषत्वविषयो-

१. B -कारणमिति. २. B दिगसं. ३. B चाक्षुषज्ञाने यत्र. ४. B -तानव. ५. B न यथा. ६. B घटघटत्वयोः. ७. B घटद्रव्यत्वयोः. ८. B तत्राचा. ९. A omits यद्. १०. B व्यापकमनु.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ऽत्यन्ताभावो[१] घटत्वादीनां तदप्रतियोग्यनुभवत्वं तेन चाक्षुषत्वं व्याप्यम्, अनुभवत्वं व्यापकम्; व्यापकेन सह सामानाधिकरण्यमेव व्याप्यस्य। यत्र व्याप्यं तत्रावश्यं व्यापकमिति। यथा यत्र धूमस्तत्र वह्निः,[२] तथा च प्रकृते घटोऽयमिति चाक्षुषज्ञानेऽनुभवत्वव्याप्याजातिः चाक्षुषत्वरूपा, तयाऽवच्छिद्यते-अन्यतो व्यावर्तते या कार्यता-घटोऽयमिति [३]चाक्षुषज्ञाननिष्ठा कार्यता [४]तथा निरूपप्यते इति तन्निरूपिता या चक्षुर्निष्ठा कारणता तस्या आश्रयत्वे सति-यतः कारणताया आश्रयः चक्षुःस, अत एव तदाश्रयत्वे सति चक्षुषः प्रमाकरणत्वमिति।

ननु तत्कार्यतायाः कथं कारणतानिरूपकत्वमिति चेत्, न। कार्यताज्ञानव्यतिरेकेण कारणताज्ञानाभावात्। कार्यता[५] श्रयं भवति कार्यम्, तेन कार्यं प्रति यदनन्यथासिद्धत्वे सति नियतपूर्ववर्तित्वं तदेव कारणता। सा क(य) दा गृह्यते तदा[६] कार्यताश्रयत्वं गृहीत्वं भवति। अन्यथा कं प्रति कारणता ग्राह्या स्यात् ? अतः कार्यतानिरूपितकारणतेति। निरूपकत्वं च स्वरूपसम्बन्धविशेषो निरूप्यत्वमपि। तथा प्रतियोगित्वानुयोगित्ववत् यत्र पदार्थान्तरकरणे प्रमाणं नास्ति तत्र स्वरूपसम्बन्धविशेष उच्यते।

पूर्वोक्तमात्मादावतिव्याप्तिमुद्धरति आत्मादाविति आत्मा तु प्रमाणं न भवति। कथमिति चेत्, अनुभवत्वव्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वाभावात्। आत्मनि या प्रमां प्रतिकारणताऽस्ति[७], सा तु जन्यज्ञानत्वावच्छिन्नकार्यतानिरूपिता भवति। यतो जन्यकार्यत्वेन कार्यताऽऽत्मत्वेन कारणतेति कार्यकारणभावः। जन्यज्ञानत्वं च नानुभवत्वव्याप्यम्। यत्र यत्र जन्यज्ञानत्वं तत्र तत्रानुभवत्वमिति नास्ति। स्मृतौ व्यभिचारात्। अथवा जन्यानुभवत्वेन कार्यताऽऽत्मत्वेन कारणता। अथवा जन्यात्मविशेषगुणत्वेन कार्यताऽऽत्मत्वेन कारणतेति अत्राप्यनुभवत्वव्याप्यत्वं[८] जन्यानुभवत्वेऽपि नास्ति। यतो व्याप्यत्वं भेदगर्भम्, येन यत्रानुभवत्वं तत्रानुभवत्वमिति भावात्। अभेदे तु व्याप्यव्यापकभावः। तत्रैव यत्रान्यथाव्याप्यव्यापकाभावः यथा-अयं वृक्षः शिंशपात्वात्। शिंशपावृक्षयोरभेदेऽपि व्याप्यव्यापकभावस्वीकार इति। अथवाऽऽत्मत्वेन कारणता, जन्यात्मविशेषगुणत्वेन कार्यता। एतयोरुपाधित्वान्नात्मन्यव्याप्तिरिति भावः। एतदेवाह-**जन्यज्ञानत्वेनेति.**

(VII) उक्तलक्षणस्य प्रमाणेषु विनियोगः।

उक्तार्थं प्रमाणेषु चक्षुरादिष्विदं लक्षणं योजयति। **प्रमाणेष्विति** प्रमाणानि प्रत्यक्षानु-

---

१. A चाक्षुषत्ववति योऽत्य. २. A अग्निः. ३. B चाक्षुषनिष्ठा. ४. A omits तया. ५. B -श्रयः. ६. A यदा. ७. B omits अस्ति. ८. B व्याप्यत्वजन्यानु.

Jain Education International 2010_05　For Private & Personal Use Only　www.jainelibrary.org

मानोपमानशब्दास्तेष्वनुभवत्वेत्यादि लक्षणं विद्यते इत्यर्थः । [1]**शाब्दत्वादीनिति** ननु प्रत्यक्षत्वं[2] कथं व्यक्तमिति चेत्, प्रत्यक्षस्येश्वरज्ञानसाधारणत्वेन कार्यतानवच्छेदकत्वात् । नित्यवृत्तिधर्मस्तु कार्यतावच्छेदको न भवतीति जन्यप्रत्यक्षत्वेनेति चेत्, न । जन्यप्रत्यक्षत्वस्योपाधित्वेन जातित्वाभावात्। तथा च प्रत्यक्षत्वमपि जातिर्न भवति, प्रमाणाभावात् । तेन [3]प्रत्यक्षजन्यप्रत्यक्षत्वयोः जात्याभावाल्लक्षणागमनेन तत्प्रकृतमिति भावः । चाक्षुषत्वमादिधर्ममादायाग्रे लक्षणं[4] योजयति- **शाब्दत्वेति** 'ज्योतिष्टोमेन स्वर्ग कामो यजेत'-इति वाक्यं प्रमाणं भवति । स्वर्गसाधनं याग इति शाब्दबोधः । एतन्निष्ठा या शाब्दत्वजातिः, साऽनुभवत्वव्याप्या भवति । यत्र यत्र शाब्दत्वं तत्र तत्रानुभवत्वमिति तदवच्छिन्ना याग कार्यता, तन्निरूपिता या कारणता सा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र वाक्ये वर्तते । अथ च तत्र प्रभाकरणत्वमप्यस्ति । तत इदं वाक्यं प्रमाणम् ।

ननु शाब्दत्वजातौ किं प्रमाणामिति चेत् प्रतीति रेव प्रमाणम् । तथाहि स्वर्गं शाब्दयामि शब्देन जानामीत्यर्थः । यथा घटं साक्षा[त्]करोमीति प्रतीत्या साक्षात्त्वं जातिः सिध्यति तथा शाब्दत्वमपि। न च साक्षात्त्वं[5] सखण्डोपाधिर्भवतु, स चेन्द्रियजन्यत्वरूप एवेति वाच्यम् । ईश्वरज्ञाने साक्षात्त्वं न स्यात्। तस्य नित्यत्वेनेन्द्रियाजन्यत्वात् । न चाखण्ड एवास्तु । प्रमाणाभावादपसिद्धान्ताच्च । **मीमांसकै**रखण्डत्व(त्वा ?) स्वीकारात् । यत्र जात्यङ्गीकारे जातिसङ्करादिकं[6] बाधकं तिष्ठति तत्रोपाधिः कल्पनीयः । प्रकृते तु बाधकाभावात्साक्षात्त्वं [7]गुणत्वावान्तरजातेरेव बाधकाभावेऽपि यदि जातित्वं नाङ्गीक्रियते, तदा [8]घटत्वादीनामपि जातित्वं न स्यात् ।

(VIII) प्रासङ्गिकः जातिविचारः ।

प्रसङ्गाज्जाति र्विचार्यते । ननु घटत्वादिकं न जातिः, सत्तयैव सर्वत्र निर्वाहात् । कथमित चेत्, सत्तानिष्ठाधेयताविशेषनिरुपिताधारात् सम्बन्धेन घटे वर्तते या सत्ता सैव घटत्वम् । अनेन सम्बन्धेन घटमात्रवृत्तित्वात्सत्तायाः पटादौ च या सत्ताविषयिणी प्रतीतिः सा तु समवायसम्बन्धेन घटे च पूर्वोक्तसम्बन्धेन । ननु पूर्वोक्तस्य[9] सम्बन्धत्वे किं मानमिति चेत्, प्रतीतिरेव । घटवृत्तित्वविशिष्टा सत्ता पटे नास्तीति प्रतीत्या तादृशसम्बन्धलाभात् । न च समवायसम्बन्धेनैव घटवृत्तीत्यादिप्रतीतिसिद्धौ किं सम्बन्धान्तरकल्पनयेति वाच्यम् । तथा च समवायसम्बन्धेन घटवृत्तित्वेत्यादि प्रतीतिरेव न स्यात् । तेन सम्बन्धेन पटादावपि सत्तावृत्तेः । येन हि सम्बन्धेन यद्वस्तु यत्र वर्तते तेन सम्बन्धेन तत्र तदभावज्ञानं न [10]भवतीति । यथा संयोगसम्बन्धेन यत्र भूतले घटो वर्तते तत्र भूतले संयोगसम्बन्धेन

१. A शाब्दत्वादिति. २. A reads this footnote here -प्रत्यक्षत्वं जातिर्न भवति । साक्षात्त्वेन तुल्यत्वात् । घटत्वजात्यपेक्षया कलशत्ववत् साक्षात्पर्यायात्प्रत्यक्षस्य । ३. B -त्यक्षेण जन्य. ४. Pl. add व्युत्पाद्यमेवास्तीति शाब्दत्वधर्ममादाय लक्षणं. ५. B त्त्वमुपा. ६. B रादि बा. ७. B गुणत्वान्तर. ८. B पृथीवित्वादी. ९. B पूर्वोक्तसम्ब. १०. A भवति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घटाभावज्ञानं न भवतीति वा । ततो घटवृत्तित्वविशिष्टसत्ता पटे नास्तिति प्रतीतिः समवायसम्बन्धेनापादयितुमशक्या । समवायसम्बन्धेन च सत्ता पटादौ वर्तत एव । तथा च घटवृत्तित्वविशिष्टा सत्ता पटे नास्तीति प्रतीत्यन्यथाऽनुपपत्तया तादृशसम्बन्धः स्वीकर्तव्य एव । स च सम्बन्धो घटातिरिक्तो नास्ति । वर्तते च यावत्घटमात्रे । तथा येन सत्तायाः समवायसम्बन्धः स्वीक्रियते तेनाप्ययं सम्बन्धः स्वीक्रियत एव । तेनायं सम्बन्धः सर्वजनसिद्धो वृत्तः । अनेन च सम्बन्धविशेषेण सत्तैव घटत्वमिति ।

सम्बन्धार्थो-यथा घटे वर्तते या सत्ता, अत्र घटे भवत्याधारः सत्ता[१] भवत्याधेया; तथा च घटनिष्ठाधारता, सत्तानिष्ठाधेयता । तेन घटाधारतानिरूपिकार्या सत्ताया वर्तते आधेयता तन्निरुपितघटनिष्ठा याऽऽधारता-स एव सम्बन्धः । तेन सम्बन्धेनघटनिष्ठाधारता सम्बन्धेन सत्तैव घटत्वम्, सा पटे नास्ति। पटे तु भिन्नैवाधारता । न च घटनिष्ठाधारतैव पटे कथं नास्तीति वाच्यम् । घटवृत्तित्वविशिष्टा सत्ता पटेऽस्तीति प्रतीति(त्ते)रभावात् । पटादौ साऽऽधारता न स्वीकर्तव्या । एवं पटत्वादिकमपि सत्तैव जातिः ।

अयं प्रघट्टार्थः-सत्तानिष्ठो य आधेयताविशेषो घटनिष्ठाधारतानिरूपकः तन्निरुप्य(ा) या ऽऽधारता घटे तिष्ठति, सैव दण्डजन्यतावच्छेदिका घटत्वशब्दवाच्या घटत्वं जातिः । अतिरिक्तपदार्थकल्पने मानाभावात् । एवं [२]घटपटादिशब्दपुरस्कारेणाधारता विशेषणसत्तैव घटत्वम् ।

ननु यदि सत्तैव घटत्वं तदा सत्ताविशिष्टवद्भूतलमिति ज्ञाने जाते घटाभाववद्भूतलमिति ज्ञानं न स्यात् । घटत्वविशिष्टस्य घटस्य यत्र भूतले ज्ञानं तत्र भूतले घटाभावज्ञानं न भवति । भवन्मते तु [३]सत्तैव घटत्वम् । तथा च सत्ताविशिष्टवद्भूतलमिति ज्ञाने घटाभावज्ञानं न स्यादिति चेन्न । तेन सम्बन्धेन [४]सत्ताविशिष्टं ज्ञानं यदि जातम्, तत्रेष्टापत्तिः । प्रतिबन्धकस्य घटज्ञानस्य सत्त्वाद् यदि समवायसम्बन्धेन सत्ताविशिष्टत्वमापाद्य घटाभाव[५] आपाद्यते, तदा तु घटाभावज्ञानं जायत एवेति सत्तैव घटत्वम् ।

ननु यदि सत्तैव घटत्वं तदा पटादितो व्यावृत्तिः कथं भविष्यति, पटादावपि सत्तायाः वृत्तेरिति चेत्, न । उक्तसम्बन्धेन घटवृत्तित्वविशिष्टा सत्ता पटे नास्तीति तेनैव सम्बन्धेन सत्तयैव पटादितो व्यावृत्तिः[६] ।-

इति सत्तातिरिक्तजातिखण्डनप्रकारः ।

अन्योऽपि प्रकारो यथा-ननु यथा [७]गन्धसमवायिकारणतावच्छेदकत्वेन पृथिवीत्वं जातिः

१. B सत्ताधेया. २. एवं पटादि. ३. B सैव. ४. B -विशिष्टज्ञानं. ५. A पटाभाव. ६. B व्यावृत्तेः. ७. B गन्धे-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सिध्यति, एवं स्नेहसमवाय(यि)कारणतावच्छेदकत्वे जलत्वमपीति । तथाऽनुष्णाशीत-स्पर्शत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वेन पाकजान्यजन्यानुष्णाशीतस्पर्शनिष्ठैकाः जाति समायातु । तथा च पाकजान्यजन्यानुष्णाशीतस्पर्शत्वे [1]कार्यकारणभावः कार्यतावच्छेदकं भवति । पाकजान्यजन्यानुष्णाशीतस्पर्शत्वं तदवच्छिन्नं (नः) भवति जन्यानुष्णाशीतस्पर्शः । तत्समवायिकारणतावच्छेदकत्वेन पृथिवीवायुसाधारणैका जातिरायातु । न च पृथिवीत्यादिना सङ्कर इति। यथा यत्र यत्र पृथिवीत्वं तत्र [तत्र]इयं जातिर्नास्ति । पृथिवीत्वं वर्तते पार्थिवपरमाणौ, तत्रेयं जातिर्न(ास्ति) । इयं च जाति वर्तते वायौ तत्र पृथिवीत्वं नास्ति । न च उक्तयोः जात्योःसङ्करः पार्थिवद्वयणुक इति वाच्यम् । सङ्करेणैतयोर्जात्योर्मध्ये का जाति दूरीकर्तव्या ? पृथिवीत्वं वैषा वेति। एषैवेति चेत् [न]। विनिगमनविरहान्न च पृथिवीत्वजातेरुक्तकार्यकारणभाव एव नियामक इति वाच्यम्। प्रकृतेऽपि जन्यानुष्णाशीतस्पर्शसमवायिकारणतावच्छेदकत्वेन कार्यकारणभावसत्त्वात् । तथा च विनिगमनविरहादुभयोर्न जातित्व् । यदा तूभयोर्जातित्वं स्वीक्रियते तदा सिद्धान्तविरोधः । -इति युक्तया पृथिवीत्वं जातिः खण्डिता । एवमुक्तप्रकारेण कार्यकारणभावं[2] गृहीत्वा जलत्वादिकमपि खण्डनीयामिति दिक् ।

(IX) शब्दप्रमाणे उक्तप्रमाणलक्षणविनियोगः ।

मूले प्रकृते[3] यथा घटसाक्षात्करोमीति प्रतीत्या साक्षात्त्वंजातिरायाति तथा स्वर्गं शाब्दयामीति प्रतीत्या शब्दत्वमपि जातिः । तथा च ज्योतिष्टोमेनेति वाक्ये प्रमाणलक्षणमुक्तं तिष्ठत्येव । लापनं यथा-अनुभवत्वव्यापा जातिर्भवति शाब्दत्वं तदवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति प्रमाकरणत्वं ज्योतिष्टोमेनेति वाक्ये वर्तते ।

(X) शेषप्रमाणत्रयेऽपि विनियोगः ।

एवमनुमितिस्थले-यथा पर्वतो वह्निमानित्यनुमितौ अनुभवत्वव्याप्या जातिरनुमितित्वम् [4]तदवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति प्रमाकरणत्वं परामर्शस्य व्याप्तिज्ञानस्य चास्ति । तेन प्रमात्वं तस्येति । एवमुपमितिस्थलेऽपि योज्यम् ।

चाक्षुषत्वादिति चक्षुषा घटं साक्षात्करोमीति प्रतीत्या चाक्षुषत्वनुभवत्वव्याप्या जातिः । एवं रासभत्वादावपि योज्यम् ।

(XI) प्रमाणलक्षणपरीक्षा ।

धर्मपदोक्ताविति यद्यनुभवत्वव्याप्यधर्मावच्छिन्नेत्याद्युच्यते तदा आलोके [5]प्रकाशेऽति-

---

१. B omits कार्यकारणभावः. २. B omits कार्य. ३. A omits प्रकृते. ४. B omits the reading between तदवच्छिन्न.....प्रमात्वं. ५. B omits प्रकाशे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्याप्तिः । अतिव्याप्तिमेव स्पष्टयति-**आलोकत्वेनेति** आलोको भवति कारणम् । अन्धकारेतरविषयकचाक्षुषसाक्षात्कारो भवति कार्यः । अवान्तरव्यापारस्तु घटाद्यालोकसंयोग एवेति । तथा चानुभवत्वव्याप्यो धर्मो भवति-अन्धकारेतरविषयकचाक्षुषसाक्षात्कारः तदवान्तरव्यापारः घटाद्यालोकसंयोगः आलोकेऽस्तीत्यतिव्याप्तिः । जातिपददाने तु नातिव्याप्तिरित्यर्थ । व्याारपदानुपादान इति तथा च यदि कारणपदार्थमध्यनिविष्टव्यापारपदं न दीयते तदा परामर्शेऽतिव्याप्तिः । तस्य व्यापरवत्त्वाभावात् करणत्वं नास्ति । तदभावात्प्रमाणमपि परामर्शो न भवति । व्याप्ति ज्ञानस्यैव प्रमाणत्वादिति भावः । लिङ्गपरामर्शोऽनुमानमिति च । वक्ष्यमाणाशयस्तु यदनन्तरमविलम्बेन कार्योत्पत्तिः तत्करणमिति [1]मतेन ध्येयम् ।

सदोष इति यदि प्रमेत्यत्र 'प्र' पदं न दीयते तदा चक्षुनिष्ठे दोषे पित्तादौ मतान्तरे तद्विशिष्टे चक्षुषि चातिव्याप्तिरित्यर्थः । अनुभवपदानुपादानेऽऽत्मन्यतिव्याप्तिः । तदेव विवृणोति **सुखत्वेति** सुखत्वं गुणत्वव्याप्या जातिर्भवति । तदवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वमात्मत्वेनेति [-अति]व्याप्तिः स्यात् । अत आह **अनुभवत्वेति समानधिकरणेति नैयत्यमिति** व्याप्यपदमध्ये व्याप्तिभागोऽपि प्रविष्टः । यथाऽनुभवत्वव्याप्यत्वमित्यत्र तत्समानाधिकरणात्यन्ताभाव-प्रतियोगिसामानाधिकरण्यं व्याप्यत्वम् । तथा च व्याप्यगर्भनिविष्टं यन्नैयत्यम् व्यापकत्वमिति यावत्, तदंशं त्यक्त्वा सामानाधिकरण्यभाग एव ग्राह्यः । यथाऽनुभवत्वव्याप्यो धर्मो भवति शाब्दत्वरूपः, शाब्दत्वेऽनुभवत्वव्याप्यत्वमिदं शाब्दत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकानु-भवत्वावच्छिन्नानुभवत्व-समानाधिकरणेत्यादिकः, तथा चानुभवत्वसमानाधिकरणजात्य-वच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति प्रभाकरणत्वमिति प्रमाणत्वम् । व्याप्यपदमध्ये व्यापकांशो व्यर्थः । शाब्दत्व समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकानुभव-त्वावच्छिन्नानुभवत्वार्थो यथा शाब्दत्वं यत्राधिकरणे वर्तते, तत्राधिकरणे वर्तते योऽत्यन्तभावः, शाब्दत्वं वर्तते शब्दज्ञाने जन्ये, तत्र योऽत्यन्ताभावो घटादीनां तस्याभावस्य प्रतियोगितानवच्छेदकं भवत्यनुभवत्वम् । तत्रानुभवत्वस्य[2] विद्यमानत्वाच्च शब्दजन्यज्ञानेऽनुभवत्वस्याभावो नास्ति । यदाऽनुभवस्याभावो नास्ति, तदानुभवत्वप्रतियोग(गि)तानवच्छेदकमेव । यदि शब्दजन्यज्ञानेऽनुभवत्वस्यत्यन्ताभावः स्यात्तदाऽनुभवत्वत्वं प्रतियोगितावच्छेदकं स्यात् । तदवच्छिन्नं भवत्यनुभवत्वम् । तत्सामानाधिकरण्य तदधिकरणाधिकरणत्वमनुभवत्वाधिकरणवृत्तित्वमिति यावत् । इदमेव भवति व्याप्यत्वम् । एतस्मिन् कृत्ये सति गौरवमेव । अनेकपदार्थघटितत्वात् । अनुभवत्वसमानाधिकरणजात्यवच्छिन्ने-त्यादिकरणलाघवमिति व्यापकभागो नैयत्यम् । तदा शाब्दत्वसमानाधिकरणात्य-न्ताभावप्रतियोगितानवच्छेदकानुभवत्वेतिरूपो भागो व्यर्थ इति यावत् ।

---

१. B मतेनेति. २. B -भवस्य.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथैवेति अनुभवत्वसमानाधिकरण[१]जात्यवच्छिन्नेत्यादिकमेव विवाक्षितम् । न तु व्याप्यपदमध्येऽनवच्छेदकान्तो व्याप्यभाग इति भावः । इदमिति ज्ञानभागे स्मृतिभिन्नव्यतिरेकेणापि लक्षणस्योपपन्नत्वात् । तेनानुभवत्वसमानाधिकरणेत्यादि वक्ष्यमाणेनैव चरितार्थत्वात् ।

आत्मनि संस्कारे चोक्तलक्षणातिव्याप्तिमुद्धरति-**न चेति** तथा चात्मनो यद्यप्यात्ममनोयोगरूपव्यापारवत्त्वे सति तद्वति तत्प्रकारकारणत्वं ज्ञानेच्छाजनकत्वं कारणत्वमस्ति, तथाप्यनुभवत्वसमानाधिकरणजात्यवच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वं नास्ति । कथमिति चेत्, अनुभवत्वस्य समानाधि[करणो]यो धर्मः ज्ञानत्वरूपस्तदवच्छिन्ना या कार्यता, तत्प्रतियोगिनि [२]तन्निरूपितकारणताऽऽत्मनि नास्ति । तत्र[३] ज्ञान[४]वृत्तित्वेनात्मकार्यतावच्छेदकत्वाभावात्ज्ञानत्वस्य कार्यतान्यूनवृत्तित्वात् । यथाऽऽत्मनिरूपितकार्यता इच्छायाम्प्यस्ति, तत्र ज्ञानत्वाभावात् तथा च जन्यज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वमप्यात्मनि नास्ति । जन्यज्ञानत्वस्य कार्यतानवच्छेदकत्वात् । यथा दण्डस्य कार्यतावच्छेदकं नीलघटत्वं न भवति । कथमिति चेत्, [५]नीलरूपस्य स्वसामग्र्यैव जन्यत्वात् । जन्यज्ञानत्वं तु ध्वंसप्रतियोगित्वे सति ज्ञानत्वम् ध्वंसप्रतियोगित्वं त्वात्मना न जन्यते । तेन तत्र प्रतियोगितावच्छेदकम् । एवं संस्कारेऽपि नातिव्याप्तिः । संस्कारे यद्यपि व्यापारवत्त्वे सति तद्वति तत्प्रकारककारणत्वं वर्तते स्मृतिजनकत्वात् तथाप्यनुभवत्वसमानाधिकरणजात्यवच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वं नास्ति । संस्कारस्य स्मृतित्वावच्छिन्नं प्रति कारणत्वात् । स्मृतित्वं चानुभवत्वसमानाधिकरणं न भवति । लक्षणे त्वनुभवत्वसमानाधिकरणजात्यवच्छिन्नेत्यादि[६] विवक्षितम् ।

शङ्कते-**न चेति** तथा च लाघवाद् ज्ञानत्वसमानाधिकरणजात्यवच्छिन्नेत्यादिकमेव वाच्यम्, ज्ञानत्वस्य जातित्वेन लाघवादित्याशङ्कार्थः ।

समाधत्ते-**ज्ञानत्ववदिति** नन्वनुभवस्य जातित्वे किं प्रमाणमिति चेत्, कार्यकारणभावः प्रमाणम् । स्मृतित्वेनानुभवत्वेन च कार्यकारणभावः । तथा च स्मृतिजनकत्वावच्छेदकत्वेनानुभवत्वं जातिः । यथा घटजनकत्वावच्छेदेन दण्डत्वं जातिः । यदाऽनुभवत्वस्थाने ज्ञानत्वपदं तदा संस्कारेऽतिव्याप्ति । यतः संस्कारे-व्यापारे उद्बोधरूपवत्त्वे सति तद्वति तत्प्रकारकत्वेत्यादि विशेष्यभागस्तिष्ठति । अथ च द्वितीयभागो ज्ञानत्वसमानाधिकरणजात्यवच्छिन्नकार्यतानिरूपित-कारणताश्रयत्वमप्यस्ति । ज्ञानत्वसमानाधिकरणो यो धर्मः स्मृतित्वरूपस्तदवच्छिन्नकार्यतानिरूपित-कारणताश्रयत्वं संस्कारेऽस्ति । तद्वारणायानुभवत्वपदमिति तेन स्मृतित्वमनुभवत्वसमानाधिकरणं न भवतीति न तत्रातिव्याप्तिरिति प्रमाणलक्षणं पर्यवसन्नम् ।

---

१. B जात्यवच्छेदकमेव. २. A -रूपिता कार. ३. A omits तत्र. ४. A ज्ञानत्वस्येश्वरज्ञानवृत्तिः. ५. A नीलरूपसाम. ६. A -धिकरणेत्यादि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[६] ॥ कारणनिरूपणम् ॥

प्रसङ्गात्कारणलक्षणं[१] विचारयति-**तेनेति** अन्यत्रोपक्षीणत्वमिति अन्यत्र कारणत्वमित्यर्थः । [२]आत्माश्रय इति यस्य लक्षणं क्रियते तस्मिन् लक्षणे तदेव यदि प्रविशति तदाऽऽत्माश्रयः । **अत्राहुरिति उदयनादयः** । **मणिकाराणां** मते तिस्र एवेति भावः ।

(I) प्रासङ्गिकमन्यथासिद्धिनिरूपणम् ।

अन्यत्रेति यथा घटविशेषं प्रति रासभोऽन्यथासिद्धः । सर्वघटान्प्रति तु नियतपदेनैव वारितः । एतद्घटं प्रति तु रासभो नियत एव । एतद्घटनियतत्वं रासभे किमिति चेत्, एतद्घट समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकरासभवत्त्वम् [३]तच्चास्मिन्नासभेऽप्यस्ति । एतद्घटाधिकरणे भूतले यो योऽत्यन्ताभावस्तस्य प्रतियोगितानवच्छेदकं रासभत्वम् । तत्र रासभस्य विद्यमानत्वात् रासभात्यन्ताभावो नास्ति । तथा चोत्पद्यमानघटविशेषं प्रति रासभो नियतपूर्ववृत्तिवृत्तः[४]। [५]अत्रेयमन्यथासिद्धिः । -अन्यत्र-घटान्तरे क्लृप्ता या सामग्री नियतपूर्ववर्तिनी दण्डादिरूपा तयैव कार्यसम्भवे तद्घटरूपकार्यसम्भवे तत्सहभूतत्वं दण्डादिसामग्रीसहभूतत्वं रासभादिकमन्यथासिद्धम् । अन्यथैतद्घटं प्रति रासभोऽपि कारणं स्यात् । तथा च तद्वारणमनयाऽन्यथासिद्धया ।

ननु तत्रापि रासभस्यापि कारणत्वं भवत्विति चेत्, न । गौरवात्तस्य कारणत्वप्रतीतेरभावाच्च । गौरवं तु कार्यतावच्छेदकाक्रान्तेत्यत्र क्लृप्ता या सामग्री तयैव घटविशेषस्थले निर्वाहो यदि सम्भवेत्तदा रासभघटिता सामग्री किमर्थं कल्पनीयेति गौरवम् ।

नन्वनया रीत्या दण्डोऽप्यन्यथासिद्धः, अन्यत्र धटादन्यत्र क्लृप्ता या सामग्रीश्वरादिरूपा तयैव घटादिसम्भवेन तत्सहभूतमीश्वरसमवहितं दण्डादिकमन्यथासिद्धमिति चेत्, न । ईश्वरस्य कार्यमात्रं प्रति कारणत्वात् । तथा दण्डाभावसमये घटस्योत्पत्तिः स्यात् । घटार्थिनो दण्डे प्रवृत्त्यनुपपत्तेश्चान्यथासिद्धि दोषोऽप्रामाणिके एव कारणे सम्भवतीति न दण्डोऽन्यथासिद्धः ।

द्वितीयमाह-**अन्यं प्रतीति** आकाशं घटादिकं प्रत्यन्यथासिद्धम् । येन हि घटादिकं प्रकाश्य कारणत्वं स्वीक्रियते तेनाप्याकाशत्वेन रूपेण कारणत्वं वक्तव्यम् । तथा चाकाशत्वं शब्दसमवायिकारणतावच्छेदकत्वम् । तेन शब्दं प्रति पूर्ववर्तित्वं गृहीत्वैवं(व ?) घटं प्रति पूर्ववर्तिता गृह्यते-इति घटादीन्प्रति आकाशोऽन्यथासिद्धः । ननु द्रव्यत्वेन रूपेण कारणताऽऽकाशस्य सिद्ध्यतु, तथा च घटादीन्प्रत्याकाशं कारणं द्रव्यत्वं च कारणतावच्छेदकमिति चेत्, न । द्रव्यत्वस्य [६]घटकारणतानवच्छेदकत्वात् । घटकारणतावच्छेदकत्वं तु घटकारणतान्यूनातिरिक्तवृत्तित्वम् । द्रव्यत्वं

---

१. B -कारणं विचा. २. B आत्माश्रयत्वमिति. ३. A तद्वत्तस्मिन्. ४. A omits पूर्व. ५. A तत्रे.. ६. B omits घट.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

त्वतिरिक्ते परमाण्वादावप्यस्ति । तेन घटादिकं प्रत्याकाशत्वरूपेणाकाशमन्यथासिद्धमित्यर्थः । तथा चान्यं प्रति घटरूपकार्यादन्यं शब्दं प्रति पूर्ववर्तित्वं गृहीत्वैव यं प्रति घटरूपकार्यं प्रति पूर्ववर्तिता गृह्यत इति शब्देनाकाशं घटं प्रत्यन्यथासिद्धमिति भावः ।

शङ्कते-**नन्विति**-आशङ्कार्थो यथा-तथाऽऽकाशस्य शब्दं प्रति केन रूपेण कारणत्वम्, यदि शब्दस्य समवायिकारणत्वेन रूपेण, तदाऽऽत्माश्रयः । यतः शब्द प्रत्याकाशस्य कारणता पृच्छ्यते, तन्निर्वचने तु शब्दकारणताप्रवेशात् शब्दकारणतायाः पूर्वमज्ञानात् । तथा चानेन रूपेणात्माश्रयः । यदि पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्यत्वेन, तदाऽनेन रूपेण घटं प्रत्यपि कारणता वाच्यैव । तथा च घटादिकं प्रत्यप्यनेन रूपेण घटादिकारणता सिद्धा वेत्याशङ्कार्थः ।

समाधत्ते-**अत एवेति** यतो घटादीन्प्रति यथाश्रुतेऽन्यथासिद्धत्वं न सम्भवति । अत एवास्यान्यथासिद्धे स्थले इयं वक्ष्यमाणान्यथासिद्धिरस्मद्[1] **पितृचरणैर**[2]भिषिक्ता लिखिता । **यथाऽवश्येत्यादि**-अस्यार्थः-अवश्यकल्प्यमानं यन्नियतपूर्ववर्ति, तत एव कार्यसम्भवे कार्योत्पत्तौ सत्यां तत्सहभूतमन्यथासिद्धम् । तथा च शब्दं प्रत्याकाशमन्यथासिद्धं न भवति । शब्दं प्रत्यवश्यं कल्प्यमानं यन्नियतपूर्ववर्ति भेरीदण्डसंयोगादिना ताल्वोष्टपुटव्यापारादिकं वा तन्मध्येऽऽकाशमप्यवश्यमेव कल्प्यमेव । तस्य समवायिकारणत्वात् । घटादिकं प्रति त्वन्यथासिद्धमेव। यतो घटं प्रत्यवश्यं कल्प्यमानं यन्नियतपूर्ववर्तिदण्डादिकं तेनैव घटसम्भवे दण्डादिसहभूताकाशमन्यथासिद्धमित्यर्थः ।

शरीरं प्रति त्वाकाशं नान्यथासिद्धम् । तत्र युक्तिमाह-**तत्राकाशेति** तत्रेति शरीरेऽवश्यं [3]कल्प्यमानमस्त्याकाशम्, यथा पृथिव्यादीनां चतुर्णामवश्यं कल्प्यमानं वर्तते तथाऽऽकाशस्यापीत्यर्थः । शरीरस्य पञ्चभौतिकत्वादिति भावः । अन्यथा शब्दं श्रवणेन्द्रियं न गृह्णीयात् । इन्द्रियस्यापि शरीरावयवत्वेन तद्रूपत्वादिति भावः । **तत्सहभूतत्वेनेति** घटं प्रत्यवश्यं कल्प्यमानं भवति दण्डादिकम्। तत्सहभूतत्वेनाकाशमप्यन्यथासिद्धम् । न चक्रादिकमपि दण्डसहभूतत्वेनान्यथासिद्धमिति वाच्यम् तस्यापि दण्डवदवश्यं कल्प्यमानत्वात् । प्रत्यक्षादिप्रमाणेनापि कार्यकारणभावग्रहात् ।

अन्यं प्रतीत्यादिका या द्वितीया-याऽवश्यं कल्प्यमानेत्यादिकोऽर्थः । अन्यथाऽऽकाशस्य शब्दं प्रत्यपि कारणत्वं न स्यात् । शब्दं प्रत्याकाशस्य शब्दकारणत्वेन रूपेण जनकत्वं वाच्यम् । तथा चात्माश्रयः स्यात् । अष्टद्रव्यातिरिक्तद्रव्यत्वेन रूपेण यदि जनकत्वं स्वीक्रियते, तदाऽनेन रूपेण घटं प्रत्यपि कारणत्वे दोषो नास्तीति घटं प्रति कारणत्ववारणार्थमवश्यंकल्प्येत्यादिकाऽन्यथासिद्धिः । ननु भवतु घटादिकं प्रत्याकाशस्य कारणत्वमिति चेत्, न । प्रामाणिकानां तत्र शब्दं प्रति कारणत्वव्यवहारात्।

---

१. i. e बलभद्र the father of गोवर्धन. २. B चरणेऽभि. ३. A कल्प्यमानत्वम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तृतीयमाह-**यं पुरस्कृत्येति** चं पुरस्कृत्य अग्रे कृत्वा-यथा पटं प्रति तन्तुरूपमन्यथासिद्धम्। तन्तुपुरस्कारेणैव तन्तुरूपस्य पूर्ववर्तिता गृह्यते। यतस्तन्तुरूपस्य तन्तुरूपत्वेन जनकत्वं ग्राह्यम्। जनकत्वग्रहे तन्तोर्ग्रह आवश्यकस्तथा च तन्तुरूपत्वेन कारणत्वं तन्तुत्वेनैव लाघवादावश्यकत्वात्तन्तुत्वेनैव कारणत्वमिति।

ननु रूपत्वेनैव तन्तुरूपस्य कारणत्वमस्तु, तत्र तन्तु प्रवेशादिति चेत्, न। रूपत्वेन यदि कारणता तदा यत्किञ्चिद्रूपसत्त्वेऽपि पटोत्पत्तिः स्यात्, ततस्तन्तुरूपं पटं प्रत्यन्यथासिद्धमेव।

चतुर्थीमाह-**यमादायैवेति** यथा घटं प्रति दण्डस्य पूर्ववर्तिता गृह्यते तथा दण्डत्वमादायैव, यथा दण्डो घटपूर्ववतीति[१]। अत्र विशिष्टबोधे दण्डत्वमपि विषयो भवति। दण्डत्वस्य विशेषणत्वात्। अन्यथा दण्डज्ञानस्य निर्विकल्पकत्वापत्तिः। यतो विशेषणसम्बन्धाविषयकं ज्ञानं निर्विकल्पकमिति लक्षणम्। तथा च दण्डत्वमादायैव दण्डस्य पूर्ववर्तिता गृह्यते-इति दण्डेन घटं प्रति दण्डत्वमन्यथासिद्धम्।

पञ्चमीमाह-**जनकेति** जनकंघटजनकं कुलालं प्रति पूर्ववर्तित्वे गृहीते एव जन्यं घटं प्रति [२]पूर्ववर्तितकुलालपितुर्जनकता गृह्यते [३]इति कुलालपिता कुलालेनान्यथासिद्धः। सा च कुलालपितृत्वेन रूपेणान्यथासद्ध(द्धिः) भवति। न तु कुलालत्वेन। यस्मिन्क्षणे घटं प्रति कुलालपितुर्जनकता कल्प्यते कुलालपितृत्वेन रूपेण तस्मिन्क्षणे कुलालं प्रति कुलालपितुर्जनकतां गृहीत्वा घटं प्रति जनकता गृह्यते-इति कुलालेन कुलालपिता घटं प्रत्यन्यथासिद्धः।

मणिकाराणां मतेन यं पुस्कृकृत्येत्यादिकाया द्वितीयायाऽवश्यकल्प्यमाने त्यादिकायामेवान्तर्भावात्(भावः ?) यथा तन्तुरूपं पटं प्रत्यन्यथासिद्धम्। अवश्यकल्प्यमानो भवति तन्तुः, तत्सहभूतं तन्तुरूपमिति कथं यं पुरस्कृत्येत्यादिकाया एवार्थः। अवश्यकल्प्यमानेत्यादिरेव पञ्चम्याऽपि जनकं प्रतीत्यादिकाया अन्तर्भावोऽन्यं प्रतीत्यादिकाया-मेवान्तर्भावस्तथा च घटान्यं कुलालं प्रति पूर्ववर्तित्वे गृहीते एवेति यं प्रति घटं प्रति पूर्ववर्तिता गृह्यते एवेति पञ्चम्यां द्वितीयायामेवान्तर्भाव इति।

(II) कारणलक्षणे 'नियत्'पद विचारः।

अथ पर्यवसन्नं लक्षणमाह-**एतदन्यथेति** तथा च प्रयोजकं तु काचिदन्यथासिद्धिस्तिष्ठत्येवेति भावः। -यथा कुलालपितुरीति अन्यथा सिद्धत्वे सति नियतपूर्ववर्तित्वमेव प्रयोजकत्वम्। न तु कारणकारणत्वम्। अन्यथाऽदृष्टत्वेन यागोऽप्यन्यथासिद्धः स्यात्।

---

१. B omits इति. २. B पूर्ववर्तिता. ३. B omits the reading between इति.....च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शङ्कते-**पूर्ववर्तित्वमात्रेति** तथा चानन्यथासिद्धत्वे सति पूर्ववर्तित्वमात्रं कारणलक्षणं, वर्तते चेदं घटकारणे दण्डादौ, नियतपदं [1]व्यर्थमित्यर्थः । रासभस्त्यनन्यथासिद्धिपदेनैव वारितः । अवश्यकल्प्यमानेत्यादिनेत्याशङ्कार्थः ।

समाधत्ते-**घटमात्रं प्रतीति**-अयमर्थः-यदि कारणलक्षणे नियतपदं न दीयते तदा घटमात्रं प्रति रासभः कारणं स्यात् । कथमिति चेत्, घटमात्रं प्रत्यनन्यथासिद्धत्वे सति पूर्ववर्तित्वमात्रं वर्तते । कथमिति चेत्, रासभस्य घटपूर्ववर्तित्वं कदाचिद्वर्तते, घटसामान्यं प्रत्यनन्यथासिद्धत्वभागोऽपि वर्तते। [त]था हि, अन्यत्रक्लृप्तनियतपूर्ववर्तित एव कार्यसम्भवे तत्सहभूतमन्यथासिद्धम् । अत्रान्यथासिद्धौ रासभस्य नान्तर्भावः । यतोऽन्यं प्रति घटमात्रान्यं प्रति, घटादिकं प्रति नियमेन क्लृप्ता या नियतपूर्ववर्तिनी सामग्री तन्तुतुर्यादिरूपा तयैव घटमात्रस्य निर्वाहश्चेत्सम्भवति, तदा तत्सहभूतो रासभोऽन्यथासिद्धो भवति [2]अन्यथाऽन्यथासिद्धि नं सम्भवति । इदमेव न सम्भवति । न हि पटसामग्र्या घटो जन्यते । यदि पटसमवायसामग्र्या घटो जन्यते तदा तत्सहभूतो रासभोऽप्यन्यथासिद्धः-इति वक्तुं युज्यते । इदं ब्रह्मणाऽपि वक्तुमशक्यमिति । तथा च रासभो यद्यपि घटविशेषं प्रत्यनन्यथासिद्धिपदेनैव वारितस्तथापि घटसामान्यं प्रति नियतपदव्यतिरेकेणानन्यथासिद्धिपदेन वारयितुमशक्यत्वाद् घटसामान्यं प्रति त्वनन्यथासिद्ध एवेति रासभेऽतिव्याप्तिवारणार्थं नियतपदोपादानमिति दिगर्थः ।

(III) कारणलक्षणपरीक्षा ।

अथ कारणलक्षणे किञ्चिदपि विचार्यते । यथा सिद्धान्ते घटं प्रति दण्डः [3]कारणं भवति। घटनिष्ठकार्यतानिरूपितकारणत्वं दण्डे चेदमनन्यथासिद्धत्वे सति घटनियतपूर्ववर्तित्वं तथा च घटनियतत्वं नाम घटेन सह दण्डस्य व्याप्तिः । घटो भवति व्याप्यः, दण्डो भवति व्यापकः । दण्डनिरूपिता व्याप्ति र्घटे, यथा वह्निनिरूपिता व्याप्तिः स्वकार्ये धूमे । व्यापकत्वं तु व्याप्तिनिरूपकत्वमेव, व्याप्यत्वं व्याप्याश्रयत्वम्, तथा च घटनिरूपितव्यापकत्वं दण्डस्य नास्ति । कथम्[इति]चेत्, घटं प्रति नियतपदार्थाभावात् । कारणत्वं [न ?]वाच्यमिति । दण्डस्य घटं प्रति व्यापकत्वं कथं नास्तीति चेत्, दण्डे घटनिरूपितव्यापकत्वे चेदं घटसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यद्दण्डत्वं तद्वत्तं घटनिरूपितव्यापकत्वं दण्डे वाच्यम् । इदं च दण्डे नास्ति । घटाधिकरणे कपाले योऽत्यन्ताभावः पटादीनां यथा वर्तते तथा दण्डस्यापि कपालेऽत्यन्ताभावस्तिष्ठति। तत्प्रतियोगितावच्छेदकेनैव[4] दण्डत्वं जातम् । न तु तदवच्छेदकम् ।

---

१. A व्यर्थमिति भावः । २. B omits the reading between अन्या.....संभवति. ३. A omits the reading between कारणं.....तथा च. ४. B तातपच्छे दकेनैव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न च संयोगसम्बन्धेन व्यापकत्वं ग्राह्यम्, तथा च संयोगसम्बन्धेन यद्घटस्याधिकरणं चक्रादिकं तद्रूपाधिकरणे चक्रादिरूपेऽधिकरणे योत्यन्ताभावो गुण्त्वादीनां तत्प्रतियोगितानवच्छेदकं दण्डत्वं भवत्वेवेति वाच्यम् । यद्यपि संयोगसम्बन्धेन घटाधिकरणे चक्रे दण्डात्यन्ताभावो नास्ति, तथापि घटाधिकरणे [१]स्थलविशेषे-गृहादौ दण्डात्यन्ताभावस्य विद्यमानत्वात् । कथं दण्डत्वस्यानवच्छेदकत्वम् ? समवायसम्बन्धेन दण्डस्य संयोगसम्बन्धेन घटाधिकरणे चक्रेऽभावाच्चेति संयोगसम्बन्धेनैव दण्डस्याप्यभावो ग्राह्यः । तेन पूर्वोक्तदोषो घटाधिकरणे गृहादावित्यादिरेव दोषः । तथा च दण्डस्य घटं प्रति व्यापकत्वाभावात् नियतत्वं नास्तीति नित्वा भावात्कारणत्वमपि वक्तुं न शक्यते,[२] इति घटं[३] प्रति दण्डस्य कारणत्वं वक्तुमशक्यम्[४] ।

अत्राहुः **प्राचीनाः**-अत्र दण्डघट्यो कार्यकारणभावस्थले कालिक्येव व्याप्तिर्ग्राह्या । यथा यदा घटः तदा तत्पूर्वमवश्यं दण्डः-इतिरूपा । तथा च पूर्वोक्तो दोषो नास्ति । पूर्वोक्तदोषस्तु दैशिकीं व्याप्तिमादायोक्तः । तदपि न, व्यापकव्यापकभावे दैशिकी व्याप्तिस्त्वश्यं वाच्यैव कार्यकारणरूपा[५]।

[६]ननु-यदा घटस्तत्पूर्वमवश्यं दण्डः-इत्यादिरूपा कालिकी व्याप्तिरेव यदि गृह्यते तदा दण्डो यदा वने वर्तते तदाऽ[७]स्मिन्नधिकरणे घटोत्पत्तिः कुतो न जायते, कारणे सति कार्यस्योत्पत्तिसम्भवात्। तथा च दैशिकसम्बन्धेन दण्डघट्योः सामानाधिकरण्यमवश्यमपेक्ष्यते, यथा यदा यत्र घटस्तदा तत्र दण्ड इत्यवश्यं वक्तव्यमिति चेत्, न । अधिकरणान्तरे घटसत्त्वेऽपि दण्डाभावाद् व्यभिचारः ।

न च यत्रोत्पत्तिकालावच्छिन्नो घटस्तत्रावश्यं दण्ड इति वाच्यम् । उत्पत्तिकालेऽपि यदा चक्रे दण्डेन भ्रमिरुत्पादिता, तदनन्तरक्षण एव दैववशात् दण्डनाशो जातः । तदनन्तरं कपालद्वसंयोगो जातस्तदनन्तरं घटोत्पत्तिः, तेन घटोत्पत्तिसमये उत्पत्तिकालावच्छिन्नो घटश्चक्रे तिष्ठति । तत्र दण्डाभावात् व्यभिचारं एवेति । न च समवायसम्बन्धेन यत्र घटस्तत्र दण्डजन्यसंयोगजन्यक्रियाजन्यकपालद्वय संयोगाश्रयत्वसम्बन्धेन दण्ड इति । दण्डजन्यो यो संयोगश्चक्रेण सममभिघाताख्यो नोदनाख्यो वा तज्जन्या या क्रिया चक्रनिष्ठा, तया जन्यो यो कपालद्वसंयोगः, तदाश्रयत्वं-सम्बन्धे कपालेऽनेन सम्बन्धेन-यथा घटः समवायसम्बन्धेन तिष्ठति तथा दण्डोऽपि कपाले तिष्ठतीत्यर्थः । तथा च न व्यभिचार इति वाच्यम् । गौरवादेतादृशसम्बन्धकल्पने प्रमाणाभावाच्चेति । दण्डघट्योः कार्यकारणभावो दुर्निरूप्य इति ।

अत्र **नव्याः पक्षधरशिरोमण्यादयः** [८]समादधिरे-कारणत्वं स्वरूपसम्बन्धविशेषः । अतिरिक्तपदर्था वेति । तथा च घटनिष्ठकार्यतानिरूपितकारणत्वं दण्डादीनां स्वरूपसम्बन्धविशेषः । अथवा

---

१. B omits स्थलविशेषे. २. B omits इति. ३. B प्रतिघटं प्रति. ४. B वक्तुमयुक्तम् । ५. B omits कार्यकारणरूपा. ६. A omits ननु. ७. B -स्मिन्करणे-. ८. B omits समादधिरे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दण्डे दण्डत्वं यथा तिष्ठति तथा घटनिष्ठकार्यतानिरूपितकारणताख्यः पदार्थोऽतिरिक्तो दण्डातिरिक्तः तेन नियतपदवाच्यव्याप्तेरप्रवेशान्नोक्तदोष इति भावः ।

ननु तर्हि अनन्यथासिद्धनियतपूर्ववर्तित्वं किमर्थमुक्तमिति चेत्, व्यञ्जकार्थमेव । यत्रेदं व्यञ्जकं तिष्ठति, तत्रैव कारणताख्योऽतिरिक्तः पदार्थ इति दिक् ।

(IV) कार्यलक्षणम् ।

कार्यलक्षणमपि प्रसङ्गादाह-**अनन्यथासिद्धेति** यथा घटे दण्डकार्यो भवति । अनन्यथासिद्धो भवति दण्डः, तस्मान्नियमेन पश्चाद्भावी भवति घटः । इदमेव दण्डनिष्ठकारणतानिरूपितकार्यत्वं घटनिष्ठस्वरूपसम्बन्धविशेषोऽतिरिक्तपदार्थः वेति । अनन्यथासिद्धपदं रासभनिष्ठकारणतानिरूपित-कार्यताश्रयत्वं घटविशेषस्य वारणाय । नियतपदं तु घटसामान्यरासभनिष्ठकारणतानिरूपितकार्यताश्रयत्वं वारणायेति ।

(V) कार्यानुकृतान्वयव्यतिरेकित्वं कारणत्वमिति मतनिरासः ।

[1]**कार्येमिति**-कार्येणानुकृतौ-अनुपश्चात् कारणात्पश्चात्, कृतौकार्येणानुकृतौदर्शितौ कारणस्यान्वयव्यतिरेककालपूर्वकालौ, यथा दण्डान्वये [2]सति घटान्वयः, दण्डव्यतिरेके घटव्यतिरेक इति । अत्रान्वयव्यतिरेककालस्य कार्यकालापेक्षया पूर्वकालत्वात् । इदमेव कार्यानुकृतशब्देनोच्यते । तथा च यस्य पदार्थस्य कार्यानुकृतान्वयव्यतिरेकित्वं वर्तते, तस्यैव तत्प्रति कारणमित्यर्थः । यथा घटं प्रति दण्डस्येति । अयमत्र भावार्थः-दण्डादिस्थले यथा कुलालेनान्वयव्यतिरेकप्रतिपादकशब्दाभिलाषः क्रियते, दण्डे सति घटः, दण्डाभावे घटाभाव इति ज्ञात्वा घटार्थो दण्डे प्रवर्तते नान्यथेति ।

कदाचिदिति घटसामग्रीविरहकाले रासभव्यतिरेके घटव्यतिरेकसत्त्वाद्रासभस्यापि कारणत्वं स्यादित्युक्तम् । **यदन्वय** इति कदाचित्सामग्रीविरहकाले रासभान्वये घटान्वयदर्शनात् । अत उक्तं **यदव्यतिरेकेति** (क इति) उभयोपादानमिति सर्वथा व्याप्त्यभावादित्ति भावः । तथा च कारणीभूताभावव्यापकीभूताभावप्रतियोगिकत्वं कारणत्वमिति पर्यवसन्नम् । कारणीभूतस्य यो भावः तस्य व्यापकीभूतो योऽभावः तत्प्रतियोगिकत्वम्, यथा[3] यत्र दण्डाभावः दण्डस्य योऽभावः तस्य व्यापकीभूतो योऽभावः यथा यत्र दण्डाभावस्तत्र घटाभाव इति दण्डाभावो व्याप्यो, घटाभावो व्यापकः । [4]**उत्पत्तिकालावच्छेदकसम्बन्धेनेति** यस्मिन्काले घट उत्पद्यते तत्कालसम्बन्धेनेत्यर्थः । इदं तु कारणत्वं रासभे नास्ति । रासभाभावस्य घटाभावो व्यापको न भवति । यत्र रासभाभावस्तत्र

---

१. A कार्येति. २. A omits सति. ३. This प्रतीक is not found in the available त. भा. प्र. ४. Pl. add दण्डस्य योऽभावः, तस्य व्यापकीभूतो योऽभावः, यथा-

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घटाभाव इति नास्तीति कारणत्वं रासभस्य शङ्कते-**नन्विति** तथा च घटसामग्रीकपालादिविरहकाले रासभव्यतिरेके घटव्यतिरेकः, घटसामग्रीकपालादिसमवधानकाले रासभान्वये सति घटान्वयः । तत उभयमपि तिष्ठतीति रासभेऽतिप्यासिरित्यर्थः ।

प्रयुक्त इति अत्र च प्रयुक्तत्वं जन्यत्वं तच्च घटव्यतिरेके नास्ति । घटसामग्रीविरहकाले रासभव्यतिरेके सति घटव्यतिरेको यद्यपि दृश्यते तथा [पि]स व्यतिरेको रासभव्यतिरिक्त प्रयुक्तो न भवति किन्तु दण्डादिसामग्रीविरहप्रयुक्त एवेति रासभाभावेऽपि[१] घटसत्त्वादित्यत आह-**रासभेति** । न च प्रयुक्तत्वं नाम [२]तदुक्तसमयसत्त्वम्, यथा दण्डव्यतिरेकप्रयुक्तो घटाभावो दण्डव्यतिरेकोत्तरकाले घटव्यतिरेकसत्त्वमेव, तत्प्रयुक्तत्वं-तच्च रासभेष्वस्तीति वाच्यम् । प्रत्युक्तत्वस्याजन्यत्वमेव विवक्षितम्। एतदेवाह-**न चेति**

दूषयति-**दण्डेति** दण्डव्यतिरेकजन्यस्तु घटव्यतिरेको नास्ति । व्यतिरेकशब्देन घटप्रागभावस्यैव विवक्षितत्वात्, तस्याजन्यत्वेन दण्डव्यतिरेकजन्यत्वाभावात्, घटानुत्पन्नत्वेन ध्वंसासम्भवादत्यन्ता-भावस्यापि नित्यत्वात्, दण्डाव्यतिरेकाजन्यत्वसम्भवादन्योन्याभावोऽपि नित्य एवेति । दण्डव्यतिरेकजन्यत्वं घटा [३]भावस्य केनापि प्रकारेण न सम्भवतीति न प्रयुक्तत्वं जन्यत्वम्।

यदन्वय इति [य]था दण्डान्वयेन घटान्वयो जन्यते । उत्पत्तिकाले इदमेव प्रयुक्तत्वं वाच्यमऋऋऋऋ। दूषयति-**घटान्वयस्यापीति** घटान्वयशब्देन घटेन सहाद्यक्षणसम्बन्धः । घटोत्पत्तिः प्रथमक्षणः । सः सम्बन्धस्तु दण्डेन न जन्यते । कालस्वरूपत्वेन दण्डाजन्यत्वात् । **स्वरूपद्वयेति** घटलक्षणलक्षणं स्वरूपद्वयं, तन्मध्येसम्बन्धमध्ये क्षणोऽपि प्रविष्ट इति दण्डस्य क्षणरूप-कालाजनकत्वेन दण्डेऽतिव्याप्तिः । प्रयुक्तत्वस्य विवक्षान्तरं शङ्कते-**न चेति** यथा घटादिस्थले सकलनियतपूर्ववर्तिसमवधाने चक्रादिसमवधाने सति दण्डान्वये सति घटान्वय इति विवक्षितम्, तथा चेदं रासभे न गतम् दण्डादिसमवधाने सति यदा दण्डादिसामग्री सर्वाऽपि[४] वर्तते तदा रासभव्यतिरेके घटव्यतिरेको नास्ति । ततो रासभेण गतमत इदमेव प्रयुक्तत्वं वाच्यमित्याशङ्क्यार्थः ।

इदं प्रयुक्तत्वं दूषयति-**दण्डेति** यदा घटस्थले सर्वा दण्डादिसामग्री वर्तते तस्मिन्नेव क्षणे दण्डव्यतिरेके[५] घटव्यतिरेको वाच्यः । इदमेव न सम्भवति । दण्डस्य विद्यमानत्वेन दण्डव्यतिरेकाभावात् । तथा च दण्डेऽव्याप्तिरित्यर्थः । प्रत्युक्तपदस्य विवक्षान्तरमाह-**न चेति** स्वशब्देन यत्र कारणत्वं नेयं तदग्राह्यम्, यथा घटस्थले दण्डः । यथा (दा)दण्डे घटकारणत्वं गृह्यते तदा स्वशब्देन दण्डो ग्राह्यः । तथा च दण्डेतरसकलचक्रादिसामग्री समवधानं सम्बन्धे सतिविद्यमाने

१. B omits अपि. २. B -समयत्वम् यथा. ३. B घटाभावकेनापि. ४. A सर्वा सामग्री वर्तते. ५. B -तिरेको वाच्यः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सतीति[1] दण्डव्यतिरेके घटव्यतिरकस्तेनेदमेव दण्डे कारणत्वम् । इदं तु रासभसाधारणं न भवति । रासभान्तरदण्डादिसकलसामग्री-समवधाने सति रासभव्यतिरेके घटव्यतिरेकाभावात् । इदमपि दूषयति-**दण्ड एवेति** तथा च दण्डेतरो यो दण्डसंयोगादिः सः तत्समवधाने सति दण्डव्यतिरेके घटव्यतिरेको वाच्यः । तत्र दण्डसंयोगस्य सत्त्वेन दण्डव्यतिरेकासम्भवात् । तेन दण्ड एवाव्याप्तित्यर्थः ।

प्रयुक्तस्य विवक्षान्तरमाह न चेति । शब्देन यत्र घटादिस्थले दण्डः स ग्राह्यः । स्वस्य व्याप्यौ[2] दण्डःदण्डसंयोगः, तदितरा चक्रादिसामग्री । तत्समवधाने सति दण्डव्यतिरेके घटव्यतिरेक इति । गच्छति चेदं दण्डे, न गच्छति चेदं रासभे । यतो रासभरासभसंयोगेतरसकलसामग्री समवधाने सति रासभव्यतिरेके घटव्यतिरेकासम्भवात्, रासभरासभसंयोगाभ्यामतिरिक्ता यदा दण्डादिसामग्री वर्तते तदा घटोत्पत्तिर्जायते एवेति न रासभसाधारण्यम् ।

इदमपि दूषयति-**तन्तुरूपेति** तथा च तन्तुरूपमथ तन्तुरूपव्याप्यो यो धर्मस्तन्तु[3]रूपसमवायादिस्ताभ्यामितरा सामग्री तन्तुतूर्यादिरूपा तत्समवधाने सति तन्तुरूपव्यतिरिक्ते पटव्यतिरेकसम्भवात्-तन्तुरूपेऽतिव्याप्तिः [4]ग्रन्थकाराभिप्रायेण तन्तुरूपस्य तन्तुरेव व्याप्यः[5] । कथमिति चेत्, समवायसम्बन्धेन यत्र तन्तुरूपं तत्र तादात्म्यसम्बन्धेन स्वरूपसम्बन्धेन तन्तुरिति । **सामयिकव्याप्त्येति** कालिकव्याप्त्या यदा तन्तुरूपं तदा तन्तुरित्येवं रूपया । तथा च तन्तुरूपम्। अथ च तन्तुरूपव्याप्यो यस्तन्तुस्तदतिरिक्ता या तूर्यादिसामग्री, तत्समवधाने सति, तन्तुरूपव्यतिरेके पटव्यतिरेकात् तन्तुरूपेऽतिव्याप्तिरित्यर्थः ।

ननु पूर्वमुक्तं कालिकसम्बन्धेन तन्तुरूपव्याप्यो भवति तन्तुस्तथा च तन्तुतन्तुरूपयोर्व्याप्तिः। अत्र व्यभिचारं शङ्कयित्वा समाधत्ते-**आद्यक्षण इति** तथा च यदा तन्तुस्तदा तन्तुरूपमिति व्याप्तौ, आद्यक्षणावच्छेदेन व्यभिचारः । तन्तुः वर्तते उत्पत्तिकाले । तदा तन्तुरूपं नास्तीति व्याप्यसत्त्वे व्यापकाभावाद् व्यभिचारः । ततः तन्तोर्व्याप्यत्वं न सम्भवतीति[6] शङ्कयित्वा समाधत्ते-**स्थूलेति** उत्पत्तिक्षणादूर्ध्वं तृतीयक्षणमारभ्य व्याप्तिस्वीकारात् यदा तन्तुस्तदा तन्तुरूपमित्युत्पत्तिक्षणादूर्ध्वं तन्तुस्तिष्ठतीति तृतीयादिक्षणे, तदा तन्तुरूपमपि तिष्ठतीति व्याप्तौ न व्यभिचारः । तथा च स्वस्वव्याप्येतरेत्याद्युक्ते तन्तुरूपेऽतिव्याप्तिस्तदवस्थैवेति । तन्तुरूपे ऽतिव्याप्तिवारणार्थमनन्यथासिद्धपदं देयमित्याह-**न चान्यथेति** तथा चेदं लक्षणं पर्यवसन्नम् । अनन्यथासिद्धत्वे सति स्वस्वव्याप्येतरसकलसमवधाने सति, यदन्वये यदन्वयः, तद्व्यतिरेकं तद्व्यतिरेक इति । तेन तन्तुरूपस्यान्यथासिद्धत्वात्तत्र नातिव्याप्तिः । दूषयति-**अन्वय. भागेति** तथा च

---

१. सति दण्ड.. २. B दण्डः व्याप्यो. ३. B तन्तुसमवायादि.. ४. ग्रन्थकारः गोवर्धनः. ५. B व्याप्यम् . ६. B omits इति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रासभेऽतिव्याप्तिवारणार्थमन्वयभागो दत्तः रासभस्तु अनन्यथासिद्धि(द्ध)पदेनैव वारितः-इत्यन्वयपदं व्यर्थम्। तथा च यद्यनन्यथासिद्धपदं न दीयते तदा तन्तुरूपेऽति व्याप्तिः, यदि दीयते तदाऽन्वय भागो व्यर्थः। उभयथाऽपि लक्षणासम्भव इति विचार्य सिद्धान्तयति-**अत्र ब्रूम** इति लक्षणद्वयमाह **अनन्यथेति** तथा चानन्यथासिद्धत्वे सति यदन्वये यदन्वय इति। यथा घटं प्रति दण्डो भवति कारणम् तत्रास्य योजना-यथा घटं प्रति दण्डो भवत्यनन्यथासिद्धः, अथ च नियमेन दण्डे सति घटोत्पत्तिर्भवतीति दण्डः कारणम्। घटविशेषं प्रति रासभस्य कारणतां वारयि तुमनन्यथासिद्धपदम्। अन्यथा घटविशेषं प्रति नियतपूर्ववर्तित्वेन कारणत्वं स्यात्। नियतपदानुपादाने घटसामान्यं प्रति रासभस्यानन्यथा सिद्धत्वेन कारणत्वं स्यात्। अनन्यथासिद्धत्वं कथमिति चेत्, रासभस्तु (रासभस्य तु) घटसामान्यं प्रत्यन्यत्रक्लृप्तियत[1]पूर्ववर्तित्व एव कार्यसम्भवे तत्सहभूतमन्यथासिद्धमिति। इयमनन्यथासिद्धिर्हि रासभस्य वक्तव्या। इयमनन्यथा सिद्धिर्न सम्भवति रासभे। घट[2]सामान्यदन्यत्र पटादौ नियमेन क्लृप्ता या पूर्ववर्तिनी सामग्री तूर्यादिरूपा, तत एव कार्यसम्भवे तत्सहभूतो [3]अत्र तूर्यादिसहभूतो रासभोऽनन्यथासिद्धो भवतीति पटसामग्र्या घटाजननात्। पटादिसामग्र्या घटश्चेज्जन्येत तदा रासभः तत्सामग्रीसममवहित[4]: सन् अन्यथासिद्धः स्यात्। तथा च रासभो घटसामान्यं प्रति नान्यथासिद्ध इति। यद्यपि घटविशेषं प्रति रासभोऽन्यथासिद्धो भवति, अन्यत्र एतद्घटादन्यत्र पटान्तरे क्लृप्ता या पूर्ववर्तिनी सामग्री दण्डादिरूपा तयैवेतत्घटोत्पत्तिसम्भवे, तत्सहभूतो दण्डादिसहभूतो, रासभोऽन्यथासिद्ध इति। इयं च घटविशेषे एव भवतीति घटसामान्यं प्रति रासभस्य कारणतावारणाय नियतपदोपादानम्। तथा च रासभस्य नियमेन पूर्ववर्तित्वाभावाद् घटसामान्यं प्रति न कारणत्वमिति सिद्धमिति मनसि कृत्वाऽऽह-**अत्रेति**।

द्वितीयमाह-**स्वेतरेति** स्वपदेन कारणताभिमतो यो दण्डादिस्तस्मादितरः। अथ च स्वव्याप्यो यो दण्डादिव्याप्यो दण्डसंयोगः, तदितरा एताभ्यामितरा चक्रादिसामग्री, तत्समवधानेऽनन्यथासिद्धत्वे च सति दण्डव्यतिरेके घटव्यतिरेक इति दण्डस्य घटं प्रति कारणता। स्वेतरेति पदं दण्डेऽव्याप्ति-वारणार्थम्। यतः स्वव्यापेतरस्वव्याप्यशब्देन दण्डसंयोगः, तदितरदण्डादिसामग्रीसमवधाने सति दण्डव्यतिरेकासम्भवादव्याप्तिरत उक्तम्-स्वव्याप्येति अनन्यथासिद्धपदं तु घटविशेषं प्रति रासभेऽति व्याप्तिवारणार्थम्। तत्र तस्यान्यथासिद्धत्वादित्यर्थः। नियतपदं तु घटसामान्यं प्रति रासभेऽतिव्याप्तिवा-रणार्थमिति मनसि कृत्वाऽऽह **अत्रापीति व्यतिरेकेति** यद्व्यतिरेके यद्व्यतिरेक इति लक्षणेऽव्या-प्तिमाहेत्यर्थः।

नित्यत्वादिति ध्वंसाप्रतियोगित्वात्कालिको व्यतिरेको नास्ति। यदा कालाभावस्तदा घटाभाव

---

१. A -पूर्ववर्तिनि. २. A अन्यत्र घटसामान्यत्. ३. A omits the reading between. अत्र....सहभूतो ४. B -हितः। सोऽन्यथा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इति वक्तुमशक्यत्वादित्यर्थः । कालादीनां दैशिको व्यतिरेको व्यापकत्वात् न सम्भवति । व्यापकत्वं नाम सकलमूर्तिसंयोगित्वम् । तथा च यत्र कालाभावस्तत्र घटाभाव इत्यपि वक्तुमशक्य इति मूलग्रन्थार्थः ।

नन्वाकाशादीनामपि दैशिकव्यतिरेकः सम्भवत्येव, विभूनामवृत्तिपदार्थत्वादिति[1] वक्तुं शक्यते इति चेत्, न । व्यतिरेकशब्देनात्र प्रागभावो ग्राह्यः । यथा च यदा कालप्रागभावः, तदा घटप्रागभाव इति न सम्भवतीति मनसि कृत्वा ग्रन्थकारेणा[2]व्याप्त्या दूषितमित्यताशयात् ।

(VI) समवायिकारणलक्षणम् ।

समवायिकारणलक्षणमाह-**स्वसमवेतेति** [3]स्वप्रत्येकमेव लक्षणं ज्ञातव्यम् । स्वस्मिन्समवेतो यः कार्यतारूपस्तत्प्रत्यनन्यथासिद्धत्वे सति, नियतपूर्ववर्तित्वं समवायिकारणमित्यर्थः । यथा घटं प्रति कपालम् । स्वसमवेतपदादाने दण्डादीनां घटादीन्प्रति समवायिकारणत्वं स्यादत आह स्वसमवेतेति । अनन्यथासिद्धपदानुपादाने घटरूपं प्रति [4]घटान्य भिन्नत्वेन रूपेण घटस्य कारणत्वं स्यात् । न च 'तथैवास्तु' इति वाच्यम् । तेन रूपेण घटस्य घटरूपं प्रत्यन्यथासिद्धेः । अवश्यक्लृप्तेत्यादिना घटोऽनन्यथासिद्धः ।

[5]येन रूपेण घटः क्लृप्तः तेनैव कारणत्वम् यतोऽवश्यं क्लृप्तंभवति घटत्वम्, तेनैव रूपेण कारणत्वं चेत्सम्भवति, तदा घटाभिन्नभिन्नत्वेन रूपेण घटरूपं प्रति घटोऽन्यथासिद्धः इति ।

ननु घटो घट भिन्नत्वेन रूपेणान्यथासिद्धो भवति किन्तु तेन रूपेण गौरवात्कारणत्वं नास्तीति चेत्, न । गौरवेण ह्यन्यथासिद्धिरेव संपादनीया अन्यथा तत्र लक्षणसत्त्वेन तेन रूपेणापि तत्समवायिकारणं स्यादिति मनसि कृत्वाऽऽह घटस्येत्यादिना-

(अ) प्रासङ्गिकः समवायविचारः ।

समवायसम्बन्धलक्षणमाह[6]-**ययोर्मध्येति** । तेनायुतसिद्धयोः सम्बन्धः समवाय इति समवायलक्षणम् । मूलेऽ**विनश्यदिति** अविनश्यदित्यस्यायमर्थविनश्यत्ताविरहेत्यर्थः । अत्र शङ्कते-**यत्किञ्चिदिति** तथा च ययोः द्वयोः मध्ये विनश्यताविरहाले एकोऽपराश्रित एवावतिष्ठते, तयोः

---

१. B reads after -दिति-यत्र कालाभावस्तत्रेत्यपि-but it seems redundant, as its meaning is out of context; perhaps a scribal error. २. B ग्रन्थकारेण व्याप्त्या. ३. B omits स्व. ४. B घटानभिन्न. ५. B omits the reading between येन रूपेण.....कारणत्वम्. ६. B समवायसम्बन्धेन लक्षणमाह.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सम्बन्धः समवायः । यथा घटघटत्वयोः, घटघटरूपयोरित्यादि । अत्र विनश्यताविरहशब्देन यत्किञ्चिद्विनश्यत्ताविरहमादाय घटघटरूपयोरपि समवायसम्बन्धो न स्यात्तदानीं पटादीनां विनाशत्त्वात्तादृशो विनाशकालो नास्तीत्येतदेवाह-**नाद्य इति** दूषणार्थं विशदयति-**पटेति** यद्यपि घटरूपस्य पटरूपविनश्यताविरहरूपत्वं वर्तते तथापि समवायिकारणविनाशघटिता भवति कार्यविनश्यत्ता । समवायिकारणनाशत्वेन भावकार्यनाशत्वेन च कार्यकारणभावादतो विनश्यता समवायिकारणनाशघटिता भवति, तदानीं घटरूपस्यापराश्रितत्वं न स्यात् । तथा च यत्किञ्चिन्नाशविरहोऽप्रयोजको घटनाशेऽपि घटरूपे पटनाशविरहस्तिष्ठत्येव । तथा च घटनाशसमयेऽपि घटरूपस्य विनश्यत्ताविरहवत्वेनापराश्रितत्वं स्यादिति प्रकृते च तदभावादित्यर्थः ।

प्रथमकल्पो न सम्भवतीत्यतो द्वितीयकल्पमाशङ्क्य दूषयति-**न द्वितीय इति नित्यसम्बन्धिनोरिति** परमाणुपरमाणुत्वयोरित्यत्र प्रकृतयोः [1]परमाणुपरमाणुत्वरूपयोः सम्बन्धिनोर्विनश्यत्ताविरहो वाच्यः । स च प्रतियोगिन्याः विनश्यत्ताया अप्रसिद्धा तद्विरहोऽप्रसिद्ध इत्यर्थः । तथा च परमाणुपरमाणुत्वयोः समवायो न स्यात् । एवमनन्यत्र जलपरिमाणतद्रूपयोरपीति नेयम् । **न तृतीयेति** यदा घटघटत्वयोः सम्बन्धो भवति, तदानीं सकलविनश्यत्ताविरहो नास्ति । तदानीमपि कस्यचिद्विनाशस्य सत्त्वाद् घटघटत्वयोरपि समवाय सम्बन्धो न स्यात् ।

मध्ये शङ्कते-[2]न **चेति** तथा च यदा द्वयणुकमारभ्य सर्गस्योत्पत्तिर्जायते, तस्मिन्नक्षणे कस्यापि विनाशविरहात् सकलविनश्यत्ताविरहस्तिष्ठत्येव । तेन घटघटत्वादीनां समवायः सिध्यतीत्याशङ्कार्थः ।

दूषयति-**इदानीं तेनेति** यद्यपि सर्गाद्यक्षणे गुणगुण्यादीनां सकलविनश्यत्ताविरहेण समवायः सिध्यति तथापीदानीं सकलविनश्यत्ताविरहासम्भवेन घटघटत्वादीनां समवायसम्बन्धत्वं न स्यात् ।

समाधत्ते-**यौ द्वौ** इति निक(ष्क)र्षमाह यौ द्वौ सम्बन्धाभावकाले भिन्नौ न तिष्ठतस्तयोर्य सम्बन्ध स समवाय इत्यर्थः । यथा घटघटत्वयोः सम्बन्धः भावकाले घटध्वंसकाले घटघटत्वे न तिष्ठतः ।

ननु घटनाशे घटत्वं कुत्र तिष्ठतीति चेत्, [3]न । कालस्य सर्वाधारत्वेन तिष्ठत्येव । स्वरूपसम्बन्धेनेदानीं घटत्वमिति प्रतीयते इति दिक् ।

अग्रे इति समवायग्रन्थे। क्षणमात्रमिति घटघटरूपयोः समवायसम्बन्धो भवत्यविनाशकाले। विनाशकाले तु घटरूपं क्षणमात्रमनाश्रितमेवावतिष्ठति । ननु तत्र किं प्रमाणमिति चेत्, कार्यकारणभाव एव । तथा ह्याश्रयनाशत्वेन गुणनाशकत्वेन च कार्यकारणभावः । यथाऽऽश्रयनाशो भवति कारणम्।

---

१. B omits the reading between परमाणु.....तथा च. २. B न चेत्तथा च. ३. B omits न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गुणनाशो भवति कार्यमिति । तथा चाश्रयनाशानन्तरं गुणनाशो भवति । [१]तत्त्वाश्रयनाशकाले तस्याकारणत्वप्रसङ्गात् । तत आश्रयनाशकाले गुणः क्षणमात्रमनाश्रित एव तिष्ठतीति प्रमाणम् । **अधिकमिति** सान्निध्यपदं व्यर्थम् । कारणपदमपि सामग्रीमध्ये तयोः प्रविष्टत्वादित्यर्थः ।

(ब) **गुणगुणिनोः समानकालिनत्वविचारः** ।

असङ्गतमिति यत्सामान्यकालोत्पत्तिकत्वेना भेदापादानं तदसङ्गतमित्याह । एतदेवाह-**घटरूपादीनामिति** एकस्मिन्क्षणे घटरूपं घटरसश्चोत्पद्य(द्ये) ते । अनयोः समानकालत्वेऽप्यभेदो नास्ति । सामग्र्यभेदस्तु समानकालत्वेनैव । **प्रकृतेऽपीति** तथा च घटघटरूपयोः समानकालोत्पत्तिकत्वेनाभेद उट्टङ्कितः । तत्रानेन प्रतिबन्दी दत्तः । तथाहि यदि समनकालोत्पत्तिकत्वेन घटघटरूपयोः भेदो नाङ्गीक्रियते, तदा घटरूपरसादीनामपि समानकालोत्पत्तिकत्वेन भेदो न स्यादिति।

तत्र पूर्वपक्षिणा समाधीयते-घटरूपरसादीनामपि यद्यपि समानकालोत्पत्तिकत्वं वर्तते, तथाप्यसमवायिकारणभेदेन रूपरसादीनां परस्परं भेदो भविष्यतीत्यपि घटघटरूपयोरित्यत्रापि भेदः स्वीकार्य एव । यथा भवन्मतेऽसमवायिकारणभेदेन रूपरसादीनां परस्परः भेदः तथा घटपट्योरप्यसमवायिकारणभेदेन भेदः स्यादित्याह-**तुल्यत्वादिति**

इदं दूषयति-**फक्किकार्थेति** समानकालोत्पत्तिकत्वेन गुणगुणिनोर्भेदो न स्यादित्यस्यां फक्किकाया अयमर्थः । घट घटरूपयोः समानकालोत्पत्तौ घटस्य यत्समवायिकारणं कपालं तदेव घटरूपस्यापि स्वीकर्तव्यम् । तथा च समवायिकारणाभेदेन घटघटरूपयोरभेदः । न चासमवायिकारणभेदेन भेद इति [कपाल]रूपं प्रति कपालरूपमसमवायिकारणम्, घटरूपं प्रति घटरूपमसमवायिकारणम्, तथा च घटघटरूपयोरसमवायिकारणभेदेन भेद इति वाच्यम् । तथा सति घटं प्रत्यपि घटस्य कारणत्वं समायाति । यथा भवन्मते घटरूपस्यासमवायिकारणं घटरूपम्, [न]कपालरूपम्, तथा घटं प्रत्यपि घटः समवायिकारणं भवतीति ।

पूर्वन्यायेन तदुपरि समादधति-**घटो हीति** अयं पूर्वप्रघट्टकार्थः-घटरूपं प्रति घटो भवति **न्याय**मतेन समवायिकारणम् । तत्र **बौद्धः** शङ्कते ननु यदा घट उत्पद्यते तस्मिन्नेव क्षणे घटरूपमुत्पद्यते, तथैवानुभवात् । क्रमोत्पत्तौ प्रमाणाभावात् । तदुपरि नैयायिकेनोक्तम्-समानकालोत्पत्तौ गुणगुणिनोः समानसामग्रीत्वात् समानसमवायिकारणत्वात्भेदो न स्यात्, एकस्मिन्नेव क्षणे समवायिकारणैकत्वेन कार्य [कारण]यो र्भेदानङ्गीकारात् । यथा एकस्मिन्नेव क्षणे यस्मिन्कपाले घट उत्पद्यते तदा तत्र घटान्तरं [२]नोत्पद्यते इति । तद्वद्यस्मिन् क्षणे कपाले रूपमुत्पद्यते तस्मिमन्नेव क्षणे घटो नोत्पद्यते । यदि घटघटरूपयोरेकदैवोत्पत्तिः स्वीक्रियते तदा उभयोरर्थात् [३]कपालमेव

१. B नन्वाश्र.. २. Though it is नोपपद्यते in both A and B नोत्पद्यते is used to suit the context.
३. B समवायिकपालमेव वृत्तम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समवायिकारणं वृत्तम्। तथा च घटघटरूपयोः समवायिकारणैक्येन भेदो न स्यादिति मूलफक्किकार्थः। तदुपरि **टीकाकारेण** समाधानं कृतम्। यद्यपि समवायिकारणभेदो नास्ति [1]तथाप्यसमवाय(यि)कारण भेदेन भेदः[2]। घटतद्रूपयोरिति भेद एव। तथा च **ग्रन्थकारेण** तयार्भेद उच्यते, तत्र **टीकाकृतोच्यते** कपालरूप[3]घटरूपयोर्भेदो न स्यादित्यर्थः[4]।

कपालरूपस्य समवायिकारणं कपालम्, घटरूपस्यापि समवायिकारणं कपालम्। तथा च समवायिकारैणकत्वेनानयोर्भेदो न स्यादित्यर्थः। अत्र त्वसमवायिकारणभेदो नास्ति। कपालरूपं प्रत्यसमवायिकारणं भवति कपालिकारूपम्। तदेव घटरूपं प्रत्यपीति तेन भेदो वक्तुं न शक्यते। एककालावच्छेदेन यत्र कार्यद्वयस्योत्पत्तिर्जायते तयोर्भेदस्तु समवायिकारणभेदकृत एव। यथा एकक्षणे [5]घटद्वयुत्पन्नौ [6]तयोर्भेदः समवायिकारणभेदात्। प्रकृते घटरूपकपालरूपयोः समवायिकारणस्य कपालस्यैकत्वेन भेदो न स्यादिति **नैयायिकेन** दूषितम्। ततः क्रमेणैव घटघटरूपयोरुत्पत्तिरुचितेति। भ्रान्तः शङ्कते-**नन्विति अन्यथापीति** यथा कपालरूपस्य समवायिकारणत्वं [कपाले], [7]घटे घटरूपस्यैव समवायिकारणत्वं, तथा च समवायिकारणभेदेन कपालरूपघटरूपयोर्भेदः सिध्यतीत्येकस्मिन्नेव क्षणे गुणगुणिनोरुत्पत्तिस्वीकारेऽपि न क्षि(क्ष)तिरित्यर्थः।

इदं दूषयति-तथा च यत्कपालरूपं प्रति कपालरूपस्य समवायिकारणत्वमुक्तमेवं घटरूपं प्रति घटरूपस्यापीति प्रतिबन्दिविधया दूषयति-**एवमिति** यदि घटरूपं प्रति घटरूपं समवायिकारणं स्यात्तदा घटं प्रत्यपि घटः समवायिकारणं स्यात्। तुल्यन्यायात्। यदि तत्र वक्तव्यभेदेन समवायिकारणत्वं न सम्भवति घटस्यैकत्वात्, तदा कपालरूपादिस्थलेऽप्यभेदात् समवायिकारणत्वं न स्यात्। तथा च घटरूपकपालरूपयोः समवायिकारणैकत्वेन भेदः। तयो र्भेदो न स्यादिति दृढं दूषणं जातम्। **अन्यैरिति केशवमिश्रादन्यैरित्यर्थः।**

(क) **चार्वाकमतम्, उदयनकृततत्परिहारश्च**। स्वानुभवपूर्णं पद्यं यथा-

हेतुभूतनिषेधो न स्वानुपारव्या[ख्यो]विधि र्न च।
स्वभाववर्त्मना नैवमवधेर्नियमत्वत्तः॥ [न्या.कु.सु. १.६]

इति कारिका **चार्वाकप्रयुक्ता। कुसुमाञ्जलौऽस्या** अर्थो यथा-इदं विश्वमकस्माद् भवति। कोऽर्थः? एतस्य हेतुः कोऽपि नास्ति। कस्मादपि न भवतीति [8]भूतनिषेधः। अकस्माद् भवति। कोऽर्थः? स्वस्माद् भवति। अकस्माद् भवतीत्यलीकमित्यर्थः। अकस्मादिति स्वभावेनेत्युक्तवन्तं **चार्वाकं** प्रति आचार्याः वदन्ति। इदं सर्वं न। कुतः? अवधेर्नियमत्वत्तः। यथा दण्डावधेरेव

---

१. B तथाप्ययमसम॰. २. B घटः. ३. B -रूपघटयोर्भेदो. ४. B omits -इत्यर्थः. ५. A घटपद्यवु. ६. B अनयो॰. ७. A घटरूपे. ८. B भूतनिषेधकः।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नियमतौ(तो) घट इति ।

[१]**चार्वाकेण** जगतोऽकार्यत्वे उक्ते सति हेतुत्रयं प्रोक्तम्-हेतुभूतनिषेधः (१) स्वानुपाख्यविधिः (२), स्वभाववर्त्मना (३) इति वचनत्रयं चार्वाकेनोक्तम् । 'न'इत्याद्युदयनाचार्यैरुदितम् । त्रयाणां पदानां **चार्वाकोदितानां** निषेधमुक्त्वाऽवधे निर्यमत्व[त्तः]इत्यनेनोत्तरं **दत्तमुदयनाचार्यैः** ।

[ड] बौद्धमतचर्चा ।

प्रथमेति **बौद्धेन** शङ्का कृता ।-यदि प्रथमे क्षणे द्रव्यं निर्गुणमेवोत्पद्यते तदा प्रथमे क्षणे द्रव्यमचाक्षुषं स्यात् । चाक्षुष लौकिकद्रव्यः प्रत्यक्षं प्रत्युद्भूतरूपस्यापि कारणत्वस्वीकारात् । तथा च प्रथमे क्षणे द्रव्यविषयकचाक्षुषप्रत्यक्षं न जायते । द्रव्यप्रत्यक्षं प्रति द्रव्यमपि विषयत्वेन कारणं भवति । तथा च प्रथमे क्षणे उद्भूतरूपाभावा [द्]द्रव्यं चक्षुर्ग्राह्यं न स्यादिति शङ्का न भवति । कुत इति चेत्, येन सगुणद्रव्यमुत्पद्यते इति मन्यते तन्मतेऽपि प्रथमे द्वितीयक्षणद्रव्यविषयकं चाक्षुषप्रत्यक्षं न जायते । द्रव्यप्रत्यक्षं प्रति द्रव्यमपि विषयत्वेन कारणं भवति । तथा च प्रथमे क्षणे द्रव्यसस्ययोत्पत्तिक्षणत्वाद् द्रव्याभावेन कथं तत्प्रत्यक्षम् ? द्वितीयक्षणेऽपि प्रत्यक्षं न भवति सन्निकर्षाभावात् । प्रथमे क्षणे द्रव्यमुत्पद्यते । द्वितीयक्षणे द्रव्येण समं चक्षुरिन्द्रियसन्निकर्षो जायते । तृतीयक्षणे द्रव्यप्रत्यक्षं जायते ।

ननु द्वितीयक्षणे एकद्रव्यप्रत्यक्षं कुतो न जायते इति चेत्, न । सन्निकर्षस्य तदेवोत्पादेन पूर्ववर्तित्वाभावात् । कार्यसमकालिनं तु कारणं न भवति । एतदेवाह-**कारणसमेति** तथा च यस्मिन्नेव क्षणे कारणं उत्प[द्य]ते, तस्मिन्नेव क्षणे कार्यं न उत्पद्यते इति भावः । परिहार इति यथा **बौद्धमते** प्रथमे क्षणे घटश्चक्षुषा न गृह्यते, घटस्य पूर्ववर्तित्वाभावात्-न दूषणं-तथाऽस्माकं मतेऽपि द्वितीय क्षणे चुक्षुषाग्रहणेऽपि न दोषः । सन्निकर्षस्यैव पूर्ववर्तित्वाभावादित्यर्थः ।

यदीति-यदि प्रथमे क्षणे द्रव्यं निर्गुणमेवोत्पद्यते, तदपि प्रथमे क्षणेऽचाक्षुषं द्रव्यं स्यादिति तर्कार्थः तदा सम्भवति यदि एतत्कार्यस्वीकारमतेऽपि प्रथमद्वितीयक्षणे द्रव्यं चक्षुषा गृह्यते । सगुणोत्पत्तिपक्षेऽपि प्रथमद्वितीय क्षणे द्रव्यप्रत्यक्षं न जायते । प्रथमे क्षणे द्रव्यरूपाभावात् । द्वितीयक्षणे सन्निकर्षाभावात् । तथा च तृतीयक्षणे एव द्रव्यविषयकमलौकिकचाक्षुषप्रत्यक्षं जायते । इत्युभयवादिसिद्धये न हि सगुणोत्पत्तिरङ्गीक्रियते । तन्मते प्रथमे क्षणे द्रव्याभावात्, द्वितीय क्षणे सन्निकर्षाभावात् । तृतीय क्षणे एव चाक्षुषप्रत्यक्षम् । तथा **न्यायमते**ऽपि तृतीयक्षण एव तदिति । तथा च प्रथमे क्षणे द्रव्यस्याचाक्षुषत्वमुभयवादि सिद्धमिति । [२]ततो **बौद्धकृता** शङ्काऽनुपपन्नेत्यर्थः ।

अतदुणेति तथा 'बहुधनमानय'-इत्यत्रानयनेन समं पुरुषस्यैवान्वयो न तु द्रव्यस्यापि । तद्वत्

---

१. B omits the reading between चार्वाकेण....रुदितम्. २. B omits ततो.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रकृते द्वितीयक्षणे[१] ऽऽदिर्यस्येत्यतद्गुणसंविज्ञानेन तृतीयक्षण एवं बोध्यते-इत्यर्थः । **प्रथमेति** यत्र गुणप्रागभावो ध्वंसो वा प्रतियोगी वा-इति त्रयाणां मध्ये यत्रैकमपि तिष्ठति, तत्र गुणात्यन्ताभावो न तिष्ठतीति **प्राचीनाः** ।[२]

नव्यमते शिरोमणिमते-गुणध्वंसप्रागभावकालेऽपि गुणात्यन्ताभावोऽप्यस्ति गुणात्यन्ताभावं प्रति प्रतियोगिन एव विरोधात् । न तु ध्वंसप्रागभावयोः प्रमाणाभावात् साधकं च तिष्ठति । उत्पत्तिकालावच्छेदेन घटे रूपं नास्तीति प्रत्या (प्रतीत्या ?) रूपसामान्याभाव एव विषयीक्रियते । तत्र प्रत्यक्षासम्भवेन प्रमाणमनुमानम् । तथाहि उत्पत्तिकालावच्छिन्नो घटो रूपसामान्याभावान्यतरवान् प्रमेयत्वात्, पटवत् । पटे प्रमेयत्वं[३] तिष्ठति । तत्र रूपरूपसामान्याभावान्यतरमध्ये रूपं तिष्ठति । तथा च प्रकृते उत्पत्तिकालावच्छिन्ने घटे रूपासम्भवेन रूपा(प)रूपसामान्यभावान्यतरमध्ये रूपसामान्याभावमादाय सिध्यति । सामान्याभावस्त्वत्यन्ताभाव एव । न च तत्र प्रागभावो वा ध्वंसो वा विषयीभवतीति वाच्यम् । तयोस्तथानुल्लेखात् । तत्र नञ्स्थलेऽन्वयितावच्छेदकावच्छिन्न-प्रतियोगिताकत्वस्य व्युत्पत्तिसिद्धत्वात् । तथा भूतले घटो नास्तीत्यत्रात्यन्ताभावोऽभावे प्रतीयते । यथा घटत्वावच्छिन्नप्रतियोगि[ता]का भावः प्रतीयते घटत्वस्यान्वयितावच्छेदकत्वात्तथोत्पत्तिकालावच्छिन्ने घटे रूपं नास्तीति प्रतीत्या रूपत्वाच्छिन्नप्रतियोगिताकोऽभावः प्रतीयते । रूपत्वस्यैव तत्रान्वयितावच्छेदकत्वात् । न चेयं ध्वंस प्रागभावविषयिण्येवेयं प्रतीतिरिति वाच्यम् । यत्र घटे रक्तं रूपं तिष्ठति, अथ रूपान्तरस्य प्रागभावस्तिष्ठति तत्रापि रक्तं रूपं तिष्ठति । रूपं नास्तीति प्रतीत्यापत्तिः भवन्मते विषयस्य प्रागभावस्य सत्त्वात् । अस्मन्मते तु प्रतियोगिरक्तरूपसत्त्वे रक्तरूपात्यन्ताभावो नास्तीती प्रतीति र्न भवतीति विषयासत्त्वात् । न च[४] रूपप्रागभावज्ञानं प्रत्यपि रूपज्ञानं प्रतिबन्धकमिति वाच्यम् । रूपत्वावच्छिन्नरूपप्रागभावस्य नाङ्गीकारात् । तथा च रक्तं रूपं यद्घटे तिष्ठति, तद्रक्तरूपान्तरप्रागभावस्य प्रतियोग्येव न सम्भवति । उत्पत्स्यमानरूपस्यैव तत्प्रतियोगिकत्वात् । तथा च रक्तरूपवति घटे भवन्मते रक्तं रूपं नास्तीति प्रतीतिः स्यादिति बाधकबलेनोत्पत्तिकालावच्छिन्ने घटे रूपं नास्तीति प्रतीतिर्न प्रागभावविषयिणी न वा ध्वंसविषयिणी किन्तु तदत्यन्ताभावविषयिणीति दिक्।

तथा च **नवीनमते** द्रव्यलक्षणं गुणप्रागभावाधधिकरणत्वमेवेति गुणगुणप्रागभा-वध्वंसान्यतरत्वमिति ।

(VII) असमवायिकारणविचारः ।

असमवायिकारणे समवायिकारणप्रत्यासत्तिं विचारयति । **न तावदिति** तथा च यस्य यत्समवायिकारणं तत्र तत्समवायसम्बन्धेन तिष्ठति । अथ च तत्प्रत्यनन्यथासिद्धत्वे सति नियतपूर्ववर्ति

---

१. B -क्षणादिर्यस्ये.. २. A प्राञ्चाः. ३. B omits प्रमेयत्वं. ४. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भवति, तदसमवायिकारणपदेनोच्यते इति चेत्, तदा पटरूपे जननीये [१]तन्तुरूपे यदसमवायिकारणत्वम्, तदभावात्पटरूपस्य समवायिकारणं भवति पटः, तत्र तन्तुरूपस्यासमवेतत्वादव्याप्तिरित्यर्थः । अव्याप्ति-वारणार्थं विवक्षान्तरमाह **नापीति** पटरूपस्य समवायिकारणं भवति पटः । तत्समवायिकारणं भवति तन्तुः । तत्र तन्तुरूपस्यासमवेतत्वात् न दोष इत्यर्थः । तदा पटसमवायिकारणे तन्तुसंयोगे ज्ञानासमवा-यिकारणेऽऽत्ममनः-संयोगादौ व्याप्तिः । तस्य समवायिकारणसमवायिकारणासमवेत्त्वात् । एतदेव विवृणोति-**पटासमवायिकारणेति** पटस्य [२]समवायिकारणं भवति तन्तुः । तस्य समवायिकारणं भवत्यंशुःतदवयवः । [३]तत्र तन्तुसंयोगस्यासमवेतत्त्वात् इत्यर्थः **नापीति** । क्वचित्तत्समवायिकारणं प्रत्यासन्नं क्वचित्समवायिकारणमवेतत्वमिति चेत्, तदाऽननुगमो दोषःव्यभिचार इत्यर्थः । समवायि-कारणसमवेतत्वव्यतिरेकेणापि समवायिकारणप्रत्यासन्नत्वेनाप्यसमवायिकारण-निर्वाहादिति व्यभिचारः।

अनुगमार्थं लक्षणमाह-**कार्येति** तथा च कारणैकार्थप्रत्यासत्तिकार्यैकार्थ प्रत्यासत्त्योर्लक्ष-णानुगमार्थमियं विवक्षा । कार्यकारणभावरूपो यःसम्बन्धः तस्य निरूपकौ सम्बन्धिनौ, यतः सम्बन्धस्योभयनिरूप्यत्वम् । यथा [४]तंतुपटयोः संयोगः, तन्निरूपकावुभाविति, तथा कार्यकारणभाव रूपो यः सम्बन्धः तस्यापि निरूपकौ द्वौ वक्तव्यौ । यथा तन्तुपटयोः सम्बन्धो भवति कार्यकारणभावरूपस्तन्निरूपकौ तन्तुपटौ । ताभ्यां मध्ये एकतरेण सह यदेकार्थसम[५]वायसम्बन्धेन कारणम् तदसमवायिकारणम्, यथा पटं प्रति तन्तुसंयोगः । तन्तुघटौ कार्यकारणरूपौ । तन्तुपटयोः सम्बन्धो भवति कार्यकारणतारूपः । तस्य सम्बन्धिनौ तन्तुपटौ । तयोर्मध्ये पटेन तन्तुसंयोगस्य कार्येण सहैकार्थ समवायप्रत्यासत्या तन्तुलक्षणेऽर्थे उभयोः तन्तुसंयोगपटयोः समवेतत्वेन तन्तुसंयोगस्य पटं प्रत्यसमवायिकारणमियं कार्यैकार्थप्रत्यासत्तिः ।

एवं कारणैकार्थप्रत्यासतावपि लक्षणं [६]योजनीयम् । यथा [७]पटरूपं प्रति तु तन्तुरूपं भवत्यसमवायिकारणम् । तत्र लक्षणयोजनम् । यथा पटपटरूपयोः सम्बन्धो भवति कार्यकारण भावरूपः । यस्य निरूपकौ पटपटरूपौ । तयोर्मध्ये एकतरेण पटेन कारणेन सह तन्तुरूपस्य एकार्थतन्तुलक्षणे उभयोः पटतन्तुरूपयोः समवेतत्वेन पटरूपं प्रति तन्तुरूपस्य कारणै-कार्थप्रत्यासत्त्याऽसमवायिकारणत्वम् । एकत्र तन्तुलक्षणे पदार्थे पटरूपकारणीभूतपटतन्तुरूपयोः समवेतत्वादेकार्थप्रत्यासत्तिः । तथा च यस्य पदार्थस्य कार्यकारणैकार्थप्रत्यासत्त्या यत्कार्यं प्रति कारणत्वं तत्कार्यं प्रति तस्यासमवायिकारणत्वमिति । तथा चासमवायिकारणतावच्छेदकं तु कार्यकारणैकार्थप्रत्यासत्त्या समवेतत्वम् । अयं धर्मः पटासमवायिकारणे तन्तुसंयोगे, पटरूपा-

---

१. A omits तन्तुरूपे. २. A समवायिकारणसमवायिकारणं. ३. A omits the reading between तत्र.....इत्यर्थः ४. A पटपटयोः. ५. A -समवायिस.. ६. A नेयम्. ७. B पटं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समवायिकारणे तन्तुरूपे च विषये इति नाननुगमः । एतदेवाह-**कार्यकारणभावेति ।**

अदृष्टे सुखनिमित्तकारणेऽतिव्याप्तिं शङ्कते **नन्विति** समायत्ते **तत्रेति** अदृष्टेन समं कार्यस्य सुखरूपस्य निरूप[क]कार्यैकार्थप्रत्यासत्त्या यद्यपि वर्तते तथापि-तेनेति कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्वेन रूपेणादृष्टस्य कारणत्वं नास्ति किन्त्वदृष्टत्वेन रूपेण । ननु तेनैवं रूपेण कारणत्वमदृष्टस्य सुखं प्रति भवत्विति चेत्, तत्राह-**प्रमाणाभावादिति** तथा चादृष्टत्वेनैव रूपेणोक्तरूपापेक्षया कारणत्वेन लाघवमित्यर्थः । अथात्ममनः संयोगे ज्ञानाद्यसमवायिकारणव्याप्तिं शङ्कते **नन्विति लाघवादिति** कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्वेपि तयाऽऽत्ममनोयोगत्वेन कारणत्वेन लाघवम् । तत्रानेकपदार्थघटितत्वे न गौरवमिति भावः । कण्टकमुद्धरति **न चेति** । अयमर्थः-कार्यतावच्छेदकं सुखादिनिष्ठमनित्यभावत्वं कारणतावच्छेदकं च कार्यकारणैकार्थप्रत्यासत्ति समवेतत्वम्। इदं चावश्यं वाच्यमेव । अन्यथाऽऽत्ममनः-संयोगजन्यज्ञानादौ[१] [२]कार्यतावच्छेदकमनित्यमनित्यभावत्वं कारणतावच्छेदकं चात्ममनःसंयोगत्वमिति वक्तव्ये व्यभिचारात् । कथमिति चेत्, आत्म[म]नः-संयोगव्यतिरेकेणापि कार्यतावच्छेदकावच्छिन्नस्यानित्यभावत्वावच्छिन्नस्योत्पत्तिसम्भवाद् व्यभिचारः । तथा ऽऽत्मा[म]नःसंयोगस्य सुखज्ञानादिकं प्रति कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्वेन रूपेण कारणत्वमुचितम् । न चात्ममनः-संयोगत्वेनोक्तव्यभिचारात् । अ(य)त्र कार्यतावच्छेदकमेकं भवति, तत्र च कारणतावच्छेदकमप्येकं भवति । यथा घटत्वं कार्यतावच्छेदकमेकम् कारणतावच्छेदकं च तत्र दण्डनिष्ठमेकमेव दण्डत्वमिति। एवं च तन्तुसंयोगादीनामप्यसमवायिकारणानां तेनैव रूपेण कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्त्वेन रूपेण कारणत्वं योग्यम् । तथा च सुखादिकं प्रत्यात्ममनः-संयोगस्यात्ममनः संयोगत्वेन रूपेण कारणत्वं यदुक्तं तद्दूषितं पूर्वयुक्त्या, किन्तूक्तरूपेण कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्वेन रूपेणेत्याशङ्क्यार्थः ।

अन्यथेति यदि कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्वेन रूपेण जन्यभावत्वावच्छिन्नं प्रत्यसमवायिकारणत्वं न स्वीक्रियते किन्त्वात्ममनःसंयोगत्वादिना, तदाऽनुगमः । कुत्रचिदात्ममनः संयोगः, कुत्रचित्कपालद्वयसंयोगः, कुत्रचित्तन्तुरूपमित्यनुगम इत्याशङ्क्यार्थः ।

इदं दूषयति-**अनित्यभावस्येति** तथा च सुखादिनिष्ठः(ष्ठं) आत्म[म]नः संयोगजन्यतावच्छेदकमनित्यभावत्वं न भवति । तस्योपाधित्वात् । भवति च सुखादिकं तस्य जातित्वात् । तथा च यथाऽदृष्टत्वेन सुखत्वेन च[३] कार्यकारणभावः तथाऽऽत्ममनः संयोगत्वेन सुखवत्त्वेन

---

१. B ज्ञानेनादौ. २. A omits the reading between कार्यता.....-.....कारणतावच्छेदकं. ३. A omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[१]चेत्यात्ममनःसंयोगेऽव्याप्तिस्तदपवस्थैव । यद्यप्यात्ममनःसंयोगस्य कार्येण सुखेन सममेकार्थ-प्रत्यासत्तिर्वततेऽऽत्मन्युभयो समवायात्तथापि तेन रूपेण कार्यकारणैकार्थप्रत्यासत्तिसमवेत त्वेन रूपेण[२] कारणत्वं नागतमिति । तथा चात्ममनः संयोगेऽव्याप्तिः । एतदेवाह **कार्यमात्रेति** यथा घटनिष्ठं घटकार्यतावच्छेदकं घटत्वं तस्य जातित्वात् । न तु कम्बुग्रीवादिकत्वं तस्योपाधित्वात् ।

ननूपाधेरपि कुत्रचिद् कार्यतावच्छेदकत्वं दृश्यते । यथाऽनुष्णाशीतस्पर्शत्वेन कारणता[३], पाकजान्यजन्यानुष्णाशीतस्पर्शत्वेन कार्यतेति । तत्र स्यादित्यत आह-**उपाधाविति** तथा च यत्र कार्यतावच्छेदिका[४] जाति र्न सम्भवति तत्रोपाधेरपि कार्यतावच्छेदकत्वमिति भावः । दूषणान्तरमाह-**किञ्चेति** एतद्रूपं कार्यकारणैकार्थप्रत्यासत्तिसमवेतत्वरूपमदृष्टेऽ[५]प्यस्ति । सुखेन कार्येण सममेकार्थेऽऽत्मन्यदृष्टस्य समवेतत्वात् । ततोऽदृष्टेऽतिव्याप्तिस्तदवस्थैवेति ।

अनेनति अदृष्टत्वेन रूपेणादृष्टस्य कारणता नास्ति । किन्तु कार्यकारणैकार्थप्रत्या-सत्तिसमवेतत्वेन रूपेण । तथा च कार्यकारणैकार्थप्रत्यासति समवेतत्वमितिप्रसक्तेऽदृष्टेऽपि सत्त्वात् । तदसमवायिकारणतावच्छेदकं न सम्भवतीत्यनुगतलक्षणमपि दूषितमिति ।

अत्र प्रकारान्तरेण समाधत्ते-**नन्विति सामान्यत** इति कार्यकारणभावप्रत्यासत्तिसमवेतत्त्वेन रूपेणात्ममनःसंयोगादीनामसमवायिकारणता माऽस्तु किन्त्वात्ममनःसंयोगादिना कारणत्वम् । सुखत्वज्ञानत्वादिना कार्यत्वम् । तथा च विशेषेणैव चोक्तरूपेणात्ममनः संयोगत्वे सुखत्वादिना कार्यकारणभाव इति । अत्र विशेषतः कार्यकारणभावे कार्यकारणैकार्थप्रत्यासत्तिरूपः सम्बन्धः ग्राह्यः । तथा चानेन सम्बन्धेन कार्यकारणैकार्थप्रत्यासतिरूपेण सम्बन्धेनात्ममनः संयोगादीनां सुखादीन्प्रत्यात्ममनः संयोगत्वेन रूपेणासमवायिकारणत्वम् । अदृष्टे [६]तु न तथा । समवायसम्बन्धेनादृष्टस्य चादृष्टत्वेन रूपेण भोगं प्रति कारणत्वम् । न [७]तूक्तसम्बन्धेन । तथा चादृष्टे नातिव्याप्तिरिति सिद्धान्तः ।

तथा च कार्यकारणैकार्थप्रत्यासतिसम्बन्धेन यद् कार्यं प्रति कारणम् तत्कार्य प्रति तदसमवायिकारणम् । यथा घटं प्रति कपालद्वयसंयोगः । तथैव कारणत्वस्वीकारात् । अदृष्टस्य तु समवायिसम्बन्धेनैव भोगं प्रति निमित्तकारणत्वस्वीकारात् । तथा कारणत्वे इति कार्यत्वादिसम्बन्धेनेत्यर्थः ।

इदं दूषयति-**तन्तुसंयोगादीनामिति तथा च तन्तुसंयोगादीनामपि** कार्यकारणै-

---

१. A सुखत्वेनेति न चेत्या॰. २. B omits रूपेण. ३. A कारणत्वं. ४. B -वच्छेदका. ५. B -मदृष्टेऽस्ति । ६. B omits तु. ७. B तूक्तरूपेण.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कार्थप्रत्यासत्तिसम्बन्धेन कारणत्वे प्रमाणं [1]नास्तीति । यथाऽदृष्टस्य समवायसम्बन्धेन भोगं प्रति कारणत्वमुक्तं तथा तन्तुसंयोगादीनामपि[2] पटादिकं प्रति समवायसम्बन्धेन संयोगसम्बन्धेन च कारणत्वम् । यथा दण्डः संयोगसम्बन्धेन[न]घटं प्रति कारणम् । कारणतावच्छेदकं तु दण्डत्वम्, तथा तन्तुसंयोगस्य[3] पटं प्रति कारणता । समवायसम्बन्धेन[4] कारणतावच्छेदकस्तु धर्मः तन्तुसंयोगत्वम् । तथा च तन्तुसंयोगादावव्याप्तिः । तेन तन्तुसंयोगस्य कार्यकारणैकार्थप्रत्यासत्तिरूपेण सम्बन्धेन कारणत्वे प्रमाणाभाव इति सिद्धम् ।

अथानेन सम्बन्धेन तन्तुसंयोगादीनामपि कारणत्वं समर्थयति-**नन्विति** पटश्च तन्तुरूपं च पटतन्तुरूपे पटरूपं प्रत्यवश्यं कारणे इति हेतोः प्रत्यासत्तिः । कार्यकारणैकार्थप्रत्यासत्तिरपि कारणम् । एतदेवाह-**कारणप्रत्यासत्तिरपीति** यथा घटरूपं प्रति घटः कारणं भवति, तथा तत्प्रत्यासत्तिरपि घटसमवेतत्वरूपनिरूपितसमवायो घटे तिष्ठति तस्यापि कारणत्वमित्यर्थः । तथाहि घटं प्रति दण्डो भवति कारणम्, बाधकाभावात् । तत्संयोगोऽपि घटकारणम् । अन्वयव्यतिरेकयोस्तत्र नियामकत्वात् । एतदेवाह **सा चेति** प्रकृते कार्यकारणैकार्थप्रत्यासत्तिरेव सम्बन्धः । अन्या संयोगादिका न सम्भवति । यथा पटरूपं प्रति तन्तुरूपं भवति कारणम् । अथ च तन्तुरूपस्य यः सम्बन्धः पटरूपेण समं कार्यकारणैकार्था(र्थ) प्रत्यासत्तिरूपा(पः) । यथा पटरूपस्य कारणं भवति पटः, अथ च तन्तुरूपम्, अनयोरेव तन्तुषु समवायात् । तथा चायमेव सम्बन्धः [5]कार्यकारणैकार्थप्रत्यासत्तिरूपः पटरूपं प्रति कारणं भवति ।

पर्यवसन्नं लक्षणमाह-**तथा चेति** इदं समवायिकारणे नास्ति । यथा पटरूपं प्रति पटो भवति समवायिकारणम्, तथा पटैकार्थसमवायः पटतन्तुत्वयोः यः एकार्थसमवायः तन्तुषूभयोः सत्त्वात्, सः पटरूपं प्रति कारणं न भवति प्रमाणाभावात् ।

ननु पटरूपेण समं पटस्य य एकार्थसमवायः तत्कारणं भवत्विति चेत्, न । पटेन समं पटरूपस्यैकार्थसमवाय एव नास्ति । तथा च पटं प्रति तन्तुसंयोगः, पटरूपं प्रति तन्तुरूपम्, ज्ञानादिकं प्रत्यात्ममनः संयोगः कार्यैं[कार्थप्रत्यास]त्यादिरूपेणासमवायिकारणमिति सिद्धम् ।

[6]इदं तन्तुसंयोगेऽव्याप्तिं दूषयति-**तथापीति**-भवता पटं प्रति तन्तुसंयोगस्य कार्य-कारणैकार्थप्रत्यासत्तिरूपेण सम्बन्धेन कारणत्वं स्वीकृतम्, एतत्सम्बन्धस्यापि कारणत्वं स्वीकृतम् तच्च न सम्भवति । यद्यप्यनेन सम्बन्धेन तन्तुसंयोगस्य पटं प्रति कारणत्वं सम्भवति

---

१. B नास्ति । २. B repeats here कार्यकारणैकार्थप्रत्यासत्तिसम्बन्धेन कारणत्वे प्रमाणं नास्तीति । Perhaps a scribal mistake. ३. B संयोगस्य तन्तोः पटं. ४. B -स्य पटं प्रति कारणैकार्थ॰. ५. B कार्येति पटरूपं प्रति॰. ३७२ B इदं दूषयति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथाप्येतत्सम्बन्धस्य कारणत्वे प्रमाणं नास्ति । भवता चोक्तं कारणैकार्थप्रत्यासत्तिरपि कारणम् । [१]तत्र यद्यप्यन्वयव्यतिरेकौ प्रमाणं तथापि कार्यैकार्थप्रत्यासत्तेः कारणत्वं वक्तुमशक्यम् । यथा कार्यं पटरूपं पटं प्रति कारणं न भवति तथा पटैकार्थसमवायोऽपि कारणं न भवतीत्यर्थः । तन्तुसंयोगे तु पटलक्षणकार्यैकार्थसमवाय एवेति । अनेन सम्बन्धेन तेषु संयोगो यद्यपि कारणं तथापि कार्यैकार्थ प्रत्यासत्तिरूपसम्बन्धस्य कारणत्वं विवक्षितं नास्ति[२] । विवक्षितं तु भवता यथा यत्पदार्थस्य यत्कार्यं प्रति कार्यकारणैकार्थप्रत्यासत्तिरपि कारणं भवति, तत्कार्यं प्रति तदसमवायिकारणमिति । प्रकृते तु तन्तुसंयोगे इदं नास्ति । तन्तुसंयोगस्य पटं प्रति कार्यैकार्थप्रत्यासत्तिरूपः सम्बन्धः कारणं न भवति। कार्यसम्बन्धस्योक्तरीत्या कारणत्वे प्रमाणाभावात् पूर्ववर्तित्वाच्च । कारणसम्बन्धस्य पूर्ववर्तित्वेन बाधकाभावत्वेन च कारणत्वं[३] कल्प्यते । तथा च तन्तुसंयोगस्य कारणैकार्थप्रत्यासत्त्या कारणत्वमेव नास्ति । वर्तते च कार्यैकार्थप्रत्या सत्त्वात् । ततः कार्यैकार्थप्रत्यास त्तिः । कारणत्वाभावात् । तन्तुसंयोगेऽव्याप्तिः । एतदेवाह तथेत्यादिना । तथा च तन्तुरूपस्यैव कारणैकार्थप्रत्यासत्तिरूपेण सम्बन्धेन पटरूपं प्रत्यसमवायिकारणत्वम् । कुतः ? कारणैकार्थ सम्बन्धस्यापि कारणत्वम् । कुतः ? कारणैकार्थसम्बन्धस्यापि कारणत्वसम्भवात् । न तु तन्तुसंयोगे चेदमस्ति यद्यपि कार्यै-कार्थसमवायसम्बन्धेन तन्तु संयोगोऽपि कारणं भवति, स सम्बन्धः [४]कार्यैकार्थसमवायरूपः कारणं न भवतीति सिद्धम् ।

अव्याप्त्युद्धारार्थं मध्ये शङ्कते-**नन्वति** तथा च भवतु कार्यकारणैकार्थप्रत्यासत्तिरूपेण सम्बन्धेन यत्कारणं तदसमवायिकारणम् । नत्वेतत्सम्बन्धस्यापि कारणत्वं लक्षणे प्रवेशनीयम् । सम्बन्धस्यापि कारणके सम्बन्धिनः कारणत्वमेव न स्यात् । तस्यावच्छेदकत्वात् ।

अन्यथासिद्धेश्चेति यदवच्छेदकं भवति तत्कारणं न भवति । यथा घटं प्रति दण्डत्वम् । अवच्छेदकत्वेन कारणतया तन्तुसंयोगस्य [५]कार्यकारणैकार्थप्रत्यासत्तिरूपः सम्बन्धः यदि कारणम्, तदा तन्तुसंयोगः तत्सम्बन्धस्य भवत्यवच्छेदकः । तेन तन्तुसंयोगस्य कारणत्वं न स्यात् । एवं तन्तुरूपस्यापि कारणं(णत्वं) न स्यात् । तन्तुरूपस्य तादृशसम्बन्धस्य कारणत्वं वाच्ये तन्तुरूपमप्यवच्छेदकं भवति । यथा दण्डी पुरुषः तथा[६] तन्तुरूपसम्बन्ध इति । अयं दण्डो भवति पुरुषस्यावच्छेदकः । विशेषणतया यद् भासते तदेवावच्छेदकमिति । प्रकृते च तन्तुसंयोगस्य कारणत्वे कल्प्यमानविशेषणत्वेन तन्तुसंयोगस्य विशेषणत्वं प्रतीयते इति । अत्र तन्तु संयोगसम्बन्धस्यकारणत्वे विनिगमनाविरहाभावेनावच्छेदकत्वेन तन्तुसंयोगस्यान्यथासिद्धत्वात् ।

---

१. B omits the reading between तत्र.....प्रति कारणं. २. B नास्ति यथा यत्पदा. ३. B कारणं-
४. B omits कार्यैकार्थसमवायरूपः. ५. B कार्यप्र(?)कारणै.. ६. B omits तथा तन्तुरूपसम्बन्ध.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अयमर्थः-यत्र तु[१] विनिगमनविरहो नाम एकत्रानुकूलतर्काभाव[२] इदं वा कारणमिदं वा कारणमिति विनिगमकं यत्र नास्ति [३]तत्रोभयकारणत्वम् । यथा व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानं व्याप्तिज्ञानं प्रति कारणमित्यत्र विनिगमनाविरहेण व्यभिचारज्ञानाभावस्य सहचारज्ञानस्य च कारणत्वम्। अत्र तु व्यभिचारज्ञानाभावसहचारज्ञानस्य वाऽवच्छेदकत्वं कल्पयितुमशक्यत्वादुभयं कारणम् । [४]यत्र च विनिगमकं तिष्ठति तत्रावश्यमेकस्यावच्छेदकमेव कल्प्यते । यथा घटं प्रति दण्डस्य कारणत्वम् । [५]दण्डत्वस्य कारणतावच्छेदकत्वं कल्प्यते, परन्तु तत्रैवं वक्तुं न शक्यते । [६]दण्डत्वस्य कारणत्वं दण्डस्यावच्छेदकत्वम् । दण्ड[७] एव घटार्थिनः प्रवृत्तिदर्शनात् । दण्डे यदि-प्रवृत्तिः, तदा दण्डत्वज्ञानव्यतिरेकेण प्रवृत्तिरिति । तथा च प्रकृते तन्तुसंयोगस्य तादृशसम्बन्धस्यापि कारणत्वे स्वीक्रियमाणे तन्तुसंयोगस्यावच्छेदकत्वेन विनिगमनाविरहाभावेनान्यथासिद्धेश्च कारणत्वं न स्यात् । [८]तस्य कारणत्वं च सर्वजनसिद्धमेव । तेन विनिगमनाविरहनिर्वाहार्थं कार्यकारणैकार्थप्रत्यासत्तिरूप-सम्बन्धवत् तन्तुसंयोगत्वेन तन्तुरूपत्वेन च पटं प्रति पटरूपं प्रति च कारणत्वं वाच्यम् ।

फलितमाह-**तथा चेति तादृशेति** कार्यकारणैकार्थप्रत्यासत्तिलक्षणसमवायित्वं यत्र कारणतावच्छेदकं भवति तदसमवायिकारणम् । तन्तुरूपं पटरूपं प्रति भवत्यसमवायिकारणम् । यथा तस्या(स्य)कार्यकारणैकार्थप्रत्यासत्ति समवायलक्षणसम्बन्धवत्त्वं तन्तुरूपत्वेन कारणत्वेन वाच्ये, तादृशसमवायित्वं भवति कारणतावच्छेदकत्वम् । तद्विशिष्टं भवति तन्तुरूपं-तदसमवायिकारणम् । एवं तन्तुसंयोगस्यापि परं प्रत्यसमवायिकारणत्वमिति । तथा च सम्बन्धवत्त्वान्तमवच्छेदकम् । अयं भावः-यत्र तादृशसम्बन्धवत्त्वपर्यतन्तमवच्छेदकं भवति, तस्यैवासमवायिकारणत्वम् । एवं सर्वत्रेत्याशङ्कार्थः ।

पटेऽतिव्याप्त्या दूषयति-**एवमिति** पटरूपं प्रति पटस्यापि कार्यकारणैकार्थप्रत्यासत्ति-रूपसम्बन्धवत् पटत्वेन कारणत्वं वाच्यम् । इदं चावश्यं वाच्यमेव । अन्यथा यदि पटसम्बन्धकारणम्, तदा घटस्यावच्छेदकत्वेन कारणमेव न स्यादित्यसिद्धिः । ततोऽनेन रूपेण पटरूपं प्रति [९]कारणत्वं वाच्यम् । तथा पटेऽतिव्याप्तिः ।

अतिव्याप्त्युद्धाराय शङ्कते-**नन्विति** तथा च पटे कारणैकार्थप्रत्यासत्तिः तूभयथा न सम्भवति । न वा कार्यैकार्थप्रत्यासत्तिः, न वा कारणैकार्थप्रत्यासत्तिः । प्रथमा नास्तीत्याह-**नेति** -तथा च कार्यं भवति पटरूपम्, कारणं भवति पटः । अनयोरेकार्थसमवायो नास्ति । पटरूपस्य पटे एव समवेतत्वात्।

नापि द्वितीयेत्याह-**कारणेति** कारणं भवति पटः, तेन समं पटस्यैकार्थसमवायो नास्ति कुत इति चेदित्यत आह-**अभेद** इति पटेन समं पटस्याभेदः । तन्निरुपितैकार्थसमवायस्य तत्र

---

१. B omits तु. २. B omits the reading between इदं वा....नास्ति ३. B तथोभय. ४. A न यत्र च. ५. B दण्डस्य. ६. B दण्डस्य. ७. B दण्डस्य A दण्डत्वे. However as प्रवृत्ति takes place in दण्ड, दण्डे is used above. ८. A omits तस्य. ९. B कारणं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पटेऽभावादित्यर्थः । एकार्थसमवायस्य भेद एवाभावादित्याशयः । ततः पटे कार्यकारणैकार्थप्रत्यासत्तिरूपसम्बन्धाभावेन तेन रूपेणाकारणत्वान्न तत्रातिप्रसङ्ग इत्यर्थः । एतदेवाह-**कार्यकारणभावेति** पूर्वोक्तमेव लक्षणं दूषयति-**एवमपीति** कार्यकारणैकार्थप्रत्यासत्तेःकारणत्वस्वीकारेऽपि तन्तुसंयोगेऽव्याप्तिः तदवस्थैव । कथमित्यत आह **कार्येति** तच्चोक्तप्रायमेव । **येनेति**-यया तन्तुसंयोगे कार्येण पटेन सहैकार्थसमवायः-एकार्थ=तन्तुलक्षणैकार्थप्रत्यतासत्तिः तिष्ठति । एतस्यां च कारणत्वे वाच्ये [१]तन्तुसंयोगेऽन्यथासिद्धिः स्यात्, अवच्छेदकत्वेन । स चावच्छेदको न भवति, तादृशप्रतीतेरभावात् । तथा च तन्तुसंयोगे[२] [३]तादृशसम्बन्ध एवावच्छेदकत्वेन वाच्यः । यतः कार्यैकार्थप्रत्यासत्तिरूपसम्बन्धवत्त्वं तन्तुसंयोगवत्त्वेन कारणत्वमिति । इदं तु विशेषणं तादृशसम्बन्धस्य कारणत्वाभावार्थमवच्छेदकत्वं कल्प्यम् । इदं न सम्भवतीत्वाह **न हीति**[४] तथा च तन्तुसंयोगे एव तस्यावच्छेदकत्वादव्याप्तिस्तदवस्थैवेति भावः ।

[५]उक्तरूपसम्बन्धस्यापि कारणत्वानयनार्थं शङ्क्यते **नन्विति** यत्र सहस्रतन्तुकः पटः तत्र संयोगाः बहवः वा कारणमिति विनिगमनाविरहात्सर्वेषां कारणत्वं वाच्यमेवेति । तथा च व्यधिकरणानां संयोगानां कारणत्वासम्भवेन परस्परं तेषां प्रत्यासत्तिसम्बन्धो वाच्य एव । तेषां परस्परमन्यसम्बन्धाभावेनेयमेव[६] कार्यैकार्थप्रत्यासत्ति[७]रूपसमवायस्यैव वाच्यत्वात्, सम्बन्धस्याप्यवश्यं पटं प्रति कारणत्वं वाच्यमेव । सहस्रतन्तुके पटे उत्पद्यमाने प्रथमतन्तुसंयोगस्यापि कारणत्वं द्वितीयादीनामपि । तथा च यथाश्रुतेर्व्यभिचारो भवति । तथाहि यत्र समवायसम्बन्धेन सहस्रतन्तुकः पटस्तत्र समवायसम्बन्धेन प्रथमतन्तुसंयोगः [८]सहस्रतन्तुकः पटस्तिष्ठति तृतीये तन्तौ । तत्र प्रथमतन्तुसंयोगो नास्ति तत्रापि सहस्रन्तुकपटस्योत्पद्यमानत्वाद् व्यभिचारः । यथा कार्यसत्त्वे कारणसत्त्वं व्यभिचारः । तथा च व्यभिचारवारणार्थं कार्यैकार्थसमवायसम्बन्धेन सर्वेषां प्रथमादीनां संयोगानां कारणत्वं वाच्यम् । तेन न व्यभिचारः । यत्र समवायसम्बन्धेन पटस्तत्र कार्यैकार्थसमवायसम्बन्धेन तन्तुसंयोगः, [९]कार्यो भवति पटः । तेन सह तन्तुसंयोगस्यैकार्थतन्तुलक्षणः, तत्र समवायात् । प्रथमतन्तुसंयोगेऽप्यनेन सम्बन्धेन तृतीयादितन्तुषु तिष्ठतीति न दोषः । तेन कार्यकारणैकार्थप्रत्यासत्तिरूपसम्बन्धवत्तन्तुसंयोगत्वेन पटं प्रति कारणत्वं सिद्धमिति । तन्तुरूपस्याप्यनेनैव रूपेण कारणैकार्थप्रत्यासत्तिलक्षणसम्बन्धवत्त्वं तन्तुरूपत्वेन पटरूपं प्रत्यसमवायिकारणत्वं सिद्धमिति ।

अन्येति तन्तुसंयोगतन्तुरूपयोर्संयोगाभावात्समवायस्य चोक्तरीत्या व्यभिचारित्वात्

---

१. A तन्तुसंयोगोऽन्य. २. A -संयोगस्य. ३. B एतादृश. ४. This प्रतीक comes before the previous two प्रतीकs in the available text of त. भा. प्र. ५. B omits उक्तरूप. ६. B सम्बन्धासम्भवेन. ७. B -सत्तिसमवाय.. ८. A यथा सहस्र. ९. B omits the reading between कार्यो....समवायात्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रत्यासत्तित्वं न सम्भवतीति । वक्तु(स्तु)रूप एव सम्बन्धो ग्राह्य इत्यर्थः । एतदेव [1]लक्षणं योजयति **एकार्थेति** प्रथमतन्तुसंयोगतृतीयतन्तुसंयोगयोः कार्यकारणैकार्थप्रत्यासत्तिरूपेण सम्बन्धेन कारणत्वम् । यथा कार्यं भवति पटः, कारणं भवति प्रथमतन्त्वादिसंयोगः । अनयोरेकत्र तन्तौ समवाय इत्यनेन सम्बन्धेन प्रथमतन्तुसंयोगोऽपि द्वितीयादितन्तुषु तेन सम्बन्धेन तिष्ठति । यथा यद्यपि जले वह्निः न प्रतीयते तथापि कालिकसम्बन्धेन जले वह्निसत्त्वं सर्वैः प्रतीयते इति । इदानीं वह्निरिति जन्यमात्रस्य कालोपाधित्वात् । तथा प्रकृतेऽपि प्रथमतन्तुसंयोगो यद्यपि द्वितीयादिषु तन्तुषु [न]प्रतीयते तथाप्यनेन सम्बन्धेन तस्य तत्र सत्त्वेन व्यभिचाराभावान्नदोषः ।

ननु तन्तुसंयोगादिस्थलेऽन्यथाऽनुपपत्त्याऽयं सम्बन्धः [2]स्वीकर्तव्य एव, न तु तन्तुरूपादिस्थलेऽयं सम्बन्धः स्वीकर्तव्य इत्याशङ्कानिवारणार्थमाह-**तथा चेति** यथैकत्र सिद्धोऽर्थोऽन्यत्र कल्प्यत इति न्यायेन कार्यकारणैकार्थप्रत्यासतिरूपसम्बन्धस्य तन्तुसंयोगादिस्थले पटं प्रति कारणत्वं क्लृप्तम्, तथाऽन्यत्र तन्तुरूपादिस्थलेऽपि तस्य कारणत्वं कल्प्यत इत्यर्थः। उक्तलक्षणे कार्यकारणैकार्थप्रत्यासत्तिगर्भे व्याप्तिमाह-**कर्मणीति** तथा च कर्मणा घटादि कर्मणा यदा घटकाशसंयोगो जन्यते तदा घटाकाशसंयोगो भवति कार्यः, तत्र कर्म भवत्यसमवायिकारणम् । तत्रेदं लक्षणं नास्ति । कथमित्याह-**संयोगेति** कर्मणि कार्यैकार्थप्रत्यासत्तेरभावात् तेन रूपेण नासमवायिकारणत्वम् । यथा कार्योभवति संयोगः, स चाकाशे तिष्ठति । तत्र कर्म नास्ति, इति कार्येण सहैकार्थप्रत्यासत्तिर्नास्ति । कारणैकार्थप्रत्यासत्तिरपि नास्ति । कारणं भवति घटनिरूपिताकाशसंयोगं प्रति घटःकर्म । तदधिकरणे घटे घटनिरूपितसंयोगाभावेन कारणैकार्थप्रत्यासत्तिरप्यभावेन लक्षणमव्यापकम् ।

ननु यथाश्रुतमेव मूलोक्तमस्तु-इत्याह **नन्विति** तथा चेदं लक्षणं निमित्तकारणे नास्ति । समवायिकारणप्रत्यासन्नत्वपददानात् । तददाने चातिव्याप्तिरेवेत्याह-**तत्रेति** तथा च समवायिकारणपदस्य कृत्यं कृतमिति भावः । ननु निमित्तकारणस्य समवायिकारणप्रत्यासन्नत्वं कथं नास्तीति चेत्, अदृष्टलक्षणे निमित्तकारणे सुखादिसमवायिकारणात्मनि समवेतत्वात् । तथा च निमित्तकारणेऽपि समवायिकारणं नास्ति । [3]समवायिकारणप्रत्यासन्नत्वसम्भवादित्यतिव्याप्ति[स]मुद्धारार्थं विवक्षान्तरमाह-**तत्रैवेति** यथा घटो घटरूपं प्रति समवायिकारणं भवति, तत्रैव घटरूपे तत्कपालरूपं[अ]समवायिकारणं नियमेन भवति । इदमेव समवायिकारणप्रत्यासन्नपदेन लभ्यते । न एदं निमित्तकारणे । यथा घटध्वंसे निमित्तकारणं भवति घटस्तत्र घटध्वंसे समवायिकारणत्वाभावेऽपि घटस्य कारणत्वम्[4] । तथा च निमित्तकारणस्थले नियमाभावात् ।

---

१. B लक्षणे. २. A स्वीकार्यः । ३. B तत्रापि कारणत्वात् । एतदेवाह तत्रैवेति. ४. B कारणम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

असमवायिकारणस्थले तु [1]समवायिकारणव्यतिरेकेणासमवायिकारणाभावे कार्यानुपपत्तेरित्याह-न चैवं **निमित्तकारणमिति**। इदं दूषयति-**समवायिकारणत्वेति** तथा च यत्र समवायिकारणं कारणं तत्रापि समवायिकारणस्याप्यभेदेन कारणत्वं वर्तते एवेति[2]। तेन समवायिकारणेऽतिव्याप्तिः।

तदुद्धर्तुं शङ्कते **भेदेति** तथा चायमर्थः -यत्र समवायिकारणं कारणं तत्रैव यत्समवायिकारणभिन्नकारणं तदेव समवायिकारणप्रत्यासन्नपदेन विवक्षितमिति समवायिकारणे नातिव्याप्तिरित्यर्थः।

निमित्तकारणेऽतिव्याप्त्या दूषयति या **निमित्तेति** च यत्र भावमात्रनिष्ठकार्यतानिरूपितकारणता तिष्ठति तत्र निमित्तकारणेऽतिव्याप्तिः। यत्र समवायिकारणं कारणं तत्रैव [3]निमित्तकारणस्यापि कारणत्वादित्यर्थः।

निमित्तकारणेऽतिव्याप्तिवारणार्थं विवक्षान्तरमाह-यः **कारणनेति** कारणताविभाजकः उपाधिः। य उपाधिना लक्षणेनासाधारणधर्मेण कारणानां परस्परं निमित्तकारणादीनां विभागो क्रियते, स कारणता विभाजकः उपाधिशब्दनोच्यते। यथा [4]समवायि कारणत्वमसमवायिकारणत्वं निमित्तकारणत्वमिति। तथा चैतन्मध्ये यः कारणताविभाजकोपाधिः समवायिकारणस्य यत्कार्यं तन्निष्ठा या कार्यता, तन्निरुपिता[या]कारणता[5], तन्नियतस्तद्व्याप्यो यो धर्मः, तद्वत्त्वमेवा-समवायिकारणत्वम्। यथा घटं प्रति कपालं भवति[6] समवायिकारणम्, तस्य कार्यं भवति घटः, तन्निष्ठा घटनिष्ठा या कार्यता, तन्निरुपिता या कारणता सा यथा कपाले तिष्ठति तथा कपालसंयोगेऽपि तद्व्याप्यो धर्मो भवत्यसमवायिकारणत्वरूपः, तद्वत्त्वं वर्तते कपालसंयोगस्य। तथा च यत्र यत्रासमवायिकारणत्वं तत्र तत्र समवायिकारणकार्यनिष्ठकार्यतानिरुपित-कारणताव्याप्यधर्मवत्त्वमसमवायिकारणत्वमिति। नेदं गच्छति निमित्तकारणे। तत्र [7]कारणताविभाजकोपाधिर्भवति निमित्तकारणत्वम्। स उपाधिः समवायिकारणकार्यनिष्ठकार्यता-निरूपितकारणतानियतो[8] न भवति व्याप्यो न भवतीति यावत्। यथा घटध्वंसे निमित्तकारणं भवति घटस्तत्र यः उपाधिः वर्तते निमित्तकारणत्वं स उपाधिः समवायिकारण-कार्यनिष्ठकार्यतानिरूपित कारणताव्याप्यो न भवति। धटध्वंसस्य समवायिकारणकार्यत्वादिति। एतदेवाह-न **चैवमिति**।

इदं दूषयति **विभागकोपाधेरेवेति** तथा चासमवायिकारणत्वस्यैव विचार्यमाणत्वात् पूर्वं तज्ज्ञानाभावात् तद्घटितलक्षणं न सम्भवतीति भावः। मध्ये यदुपस्थापितं लक्षणं तदपि दूषयित्वा

---

१. A omits कारण. २. B omits इति. ३. B निमित्तस्यापि कारण॰. ४. B यथा निमित्तकारणत्वम(म्)समवायिकारणत्वमसमवायिकार. ५. B adds या after कारणता,. ६. B omits भवति, ७. B कार्यता॰ ८. B -निष्ठकारणताकारणता (!) नियतो.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पूर्वोक्तं कार्यकारणैकार्थसमवेतत्वादिघटितमुद्दङ्कयति-**नन्विति** तथा च पूर्वं यदुक्तं यत्र कारणैकार्थप्रत्यासत्तिलक्षणसम्बन्धो कारणावच्छेदको भवति, तदवच्छिन्नत्वमसमवायिकारणत्वमिति पर्यवसितम् ।

तत्र यदवच्छिन्नत्वभागमादाय पूर्वपक्षयति त [**दवच्छिन्नकारणत्वमिति**] तेन धर्मेणावच्छिद्यते य कार[ण]ता, तदवच्छिन्नकारणत्वम्, तत्कारणत्वं किं स्वरूपयोग्यं विवक्षितम्, स्वरूपयोग्यत्वं नाम कारणतावच्छेदकधर्मत्वम्, यथा घटं प्रति वनस्थो दण्ड स्वरूपयोग्यो भवति, यथा कारणतावच्छेदकदण्डत्वलक्षणधर्मत्वात्, फलोपधानं वा ? फलोपधानं नाम फलोत्पत्तिनियतम्-यथा घटं प्रति कपालसंयोग इति । कपालसंयोगे विद्यमानेऽवश्यं घटोत्पत्तिसम्भवात् । तथा च प्रकृते पटं प्रति तन्तुसंयोगस्य कार्यकारणैकार्थप्रत्यासत्तिलक्षणसम्बन्धावच्छिन्नतन्तुसंयोगत्वेन यत्कारणत्वम्, तत्स्वरूपयोग्यं, फलोपधानं वेत्याशङ्क्य क्रमेण दूषयति-न **तदवच्छिन्नेति** तथा च यत्र तन्तौ पटः समवेतो नास्ति तत्रापि तन्तौ तन्तुसंयोगस्य वेष्टितसूत्रे[१] पटस्वरूपयोग्यत्वमस्ति । तत्रापि कार्यकारणैकार्थ प्रत्यासत्तिरूपसम्बन्धवत्त्वस्य कारणतावच्छेदकधर्मस्य सत्त्वात्, तत्रासमवायिकारणव्यवहाराभावान्नेदं लक्षणं युक्तम् ।

द्वितीयमाशङ्क्य दूषयति-**फलोपधानमिति** फलोपधानं (?)-तन्तुसंयोगनिष्ठा या कारणता तिष्ठति सा च तन्तुसंयोगत्वेनैवावच्छिद्यते । न तादृशसम्बन्धेन, प्रमाणाभावात्, गौरवाच्चेति । तथा च तन्तुसंयोगेनापि फलोपधानं न सम्भवति । लक्षणं प्रत्यासत्तिगर्भं दूषयति-**समवायिकारणेति** तथा च समवायिकारणे या कारणता तिष्ठति सा च येन धर्मणे तत्समवधानादिनाऽवच्छिद्यते । तथाऽसमवायिकारणनिष्ठा कारणता नावच्छिद्यत इति भावः ।

असमवायिकारणस्य लक्षणान्तरं [२]शङ्कते **नन्विति** कार्यस्य यो नाशस्तस्य यो जनको नाशः, तस्य यत्प्रतियोगी(गि) तदसमवायिकारणम् । सत्यन्तं च समवायिकारणेऽतिव्याप्तिवारणार्थम् । यथा घटो भवति कार्यं तस्य यो ध्वंसः तस्य जनको यो नाशःकपालद्वयसंयोगनाशः, तत्प्रतियोगित्वं कपालद्वयसंयोगस्येति । एवमात्ममनःसंयोगे ध्वंसोऽपि ज्ञानसुखेच्छादीनां नाशे कारणं भवति । तत्प्रतियोगित्वं चात्ममनःसंयोगस्येति ।

इदमपि दूषयति-**द्वित्वेत्यादिना** तथा चापेक्षाबुद्धावतिव्याप्तिः । द्वित्वं भवति कार्यम्, तस्य यो नाशः, तं प्रति जनको भवत्यपेक्षाबुद्धिनाशः । तत्प्रतियोगित्वमपेक्षाबुद्धौ तिष्ठति । सत्यन्तमप्यपेक्षाबुद्धिश्चायमेकोऽयमेकः इति, तदनन्तरं चेमौ द्वाविति सङ्ख्याविशेषो जायते । तन्नाशस्त्वपेक्षाबुद्धिनाशेनैवेत्यात्ममनः संयोगेऽव्याप्तिश्च । कार्यनाशेत्यादि तत्र नास्ति । कार्यं भवति

१. B omits वेष्टितसूत्रे. २. B करोति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

धर्माधर्मरूपम् । तन्नाशजनकीभूतनाशप्रतियोगित्वमात्ममनःसंयोगस्य नास्ति । धर्माधर्मयोः फलेन नाशादात्ममनःसंयोगनाशे विद्यमानेऽपि धर्माधर्मौ तिष्ठत एवेत्यन्योन्याश्रयः ।

स्पष्टयति-**निमित्तकारणेति** तथा च कुत्रचित्समवायिकारणनाशेन कार्यनाशः कुत्रचिदसमवायिकारणनाशेन कार्यनाशः । यद्यसमवायिकारणनाशेनैव कार्यनाश इत्युच्यते, तदा यत्र समवायिकारणनाशेन कार्यनाशस्तत्राव्याप्तिरेव । समवायिकारणनाशेऽप्यव्याप्तिरिति । तथा च व्यभिचारवारणार्थमुभयोरेकेन रूपेण कारणत्वं वाच्यम् । एतदेवाह-**निमित्तेति** तथा च समवायिकारणनाशासमवायिकारणनाशयोः कार्यनाशं प्रति निमित्तकारणेतरनाशेन जनकत्वं वाच्यम् । तेन न व्यभिचारः[१] । एवं विवक्षिते चान्योन्याश्रयः यथातथाऽऽह-[२]**तथाचैतदिति** निमित्तकारणेतरकारणनाशत्वरूपावच्छेदकस्य ज्ञाने जाते कार्यनाशं प्रत्यनेन रूपेण समवायिकारणनाशासमवायिकारणनाशयोः कारण[त्व]ग्रहो भवति । कारणत्वे गृहीते लक्षणज्ञानं, लक्षणज्ञानं च निमित्तकारणताग्रह इति लक्षणान्तरमाह-**नन्विति**-तथा च भावकार्यं कुत्रचिज्जायते कुत्रचिन्नेति । इदमेव क्वचित्कत्वं तस्य नियामकम् । किम् (मर्थम्) ? अन्यस्यासम्भवेनासमवायिकारणत्वमेव । यथा यत्र तन्तुसंयोगस्तिष्ठति, तत्रैव पटो जायते । एवं पटरूपस्थलेऽपीत्यसमवायिकारणत्वं सिद्धमित्याशङ्क्यार्थः ।

दूषयति-**येनेति** येन तन्तुना सह तूरीतन्तुसंयोगो जातस्तत्रैव तन्तौ पटसमवायादुक्तनियामकसत्त्वेन तूरीतन्तुसंयोगेऽतिव्याप्तिः ।

मध्ये समाधत्ते-**तूरीतन्तुसंयोगस्येति** तथा च तुरीतन्तुसंयोगो यथा तन्तुषु तिष्ठति तथा च तूर्यामपि पटोत्पत्तिः स्यादुक्तनियामकसत्त्वात् । तेन तूरीतन्तुसंयोगे नातिव्याप्तिः । यद्यप्यनया विवक्षया तूरीतन्तुसंयोगे नातिव्याप्तिः, तथाप्यात्ममनः-संयोगेऽव्याप्तिमाह-मनः**संयोगस्येति** तथा चात्ममनःसंयोगो मनस्यापि [३]विद्यते । तत्रापि सुखोत्पत्तिः स्यात्, उक्तनियामकसत्त्वात् । तथा चात्ममनःसंयोगे लक्षणाव्याप्तिः । ननु मनोनिरूपितसंयोगस्यैव नियामकत्वेन नाव्याप्तिः । मनोनिरूपितसंयोगस्तु आत्मन्येवास्ति । मनसि चात्मनिरुपितः संयोगः । तथाहि यथाऽऽत्मसंयोगि मन : इति प्रतीति जायते तथा मनः संयोगि मनः इति प्रतीति[र्न]जायते । तेन मनोनिरूपितसंयोगित्वं मनसि नास्तीत्याम:मन संयोगे नाव्याप्तिरिति लक्षणं सुस्थमेव।

मनोलक्षणे दूषणान्तरमाह-**कार्येति** तथा च कार्योत्पत्ताविदमेव नियामकम् । यथा यत्र घटादिप्रागभावस्तिष्ठति, तत्रैव घटोत्पत्तिरित्येव नियामकम् । ननु प्रागुक्तघटे त(तु) नियामकमसमवायिकारणं सिध्यति तथा च पूर्वमुक्तं यत्रासमवायिकारणं तत्रैव भावकार्योत्पत्तिरिति

१. B -चार इति. २. In both A and B it is तथा चैवेति. ३. B वर्तते.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

किमर्थं प्रागभावस्यैव कार्योत्पत्ति नियामकत्वादिति भावः ।

लीलावतीकारमतमाशङ्क्य दूषयति-यत्त्विति तथा चादृष्टभिन्नत्वं सति समवायिकारणप्रत्यासन्नमवधृतामर्थ्यमिति तन्मते लक्षणम् । तद्दूषयति-**तदिति** यथाश्रुतमदृष्टभिन्नत्वे सतीत्यादिकमेव तूरीतन्तुसंयोगेऽतिव्याप्तं यदि च लक्षणेऽदृष्टभिन्नत्वे सति समवायिकारणमात्रप्रत्यासन्नत्वमवधृतेत्यादिकं तदाऽतिव्याप्तिवारणेऽपि, आत्ममनःसंयोगेऽव्याप्तिरेव । आत्ममनः संयोगस्यापि समवायिकारणमात्रप्रत्यासन्नत्वं नास्ति । समवायिकारणातिरिक्तस्यापि विद्यमानत्वात् । तथा च मात्रपदमपि न दातव्यम् । तेन तूरीतन्तुसंयोगेऽतिव्याप्तिस्तदवस्थैवेति । तथा च तूरीतन्तुसंयोगेऽतिव्याप्तिवारणार्थं विवक्षान्तरमाह **निमित्तकारणभिन्नत्वमिति** विधाय [१]दूषयति-**अन्योन्याश्रय** इति निमित्तकारणभिन्नत्वज्ञाने जाते सति, असमवायिकारणत्वज्ञानम्[२], असमवायिकारणत्वज्ञाने सति निमित्तकारणेतरत्वज्ञानमिति ।

नन्वदृष्टस्यापि लक्षणत्वेन तत्रोक्तलक्षणगमनमिष्टमेवेति । ततोऽदृष्टभिन्नत्वपदं न देयमेवेति मनसि कृत्वाऽऽह यद्यपीति-नन्वदृष्टस्यासमवायिकारणत्वेऽदृष्टसमवायिकारणमिति प्रयोगः स्यादिति चेत्, तत्राह-**पूर्वेषामिति** शिष्टानामदृष्टसमवायिकारणमिति प्रयोगो नास्तीत्यदृष्टं न लक्षणमित्याशयः । तथा चादृष्टेऽतिव्याप्तिवारणार्थमदृष्टभिन्नत्वपदं दातव्यमेवेति भावः । **तत्रैवेति** यत्र शिष्टानामसमवायिकारणत्वव्यवहारो वर्तते, तत्रैवासमवायिकारणत्वं प्रतीयते इत्यर्थः ।

नन्वदृष्टभिन्नत्वे सतीदं विशेषणं यथाऽदृष्टवारणार्थं दत्तं तथा ज्ञानत्वे सति, इच्छाभिन्नत्वे सतीत्यादिकमपि नेयम्, यदि वाऽदृष्टलक्ष्यमेवेति चेत्[३] तत्राह **अपसिद्धान्तादिति** तथा चेदं लक्षणमदृष्टादावतिव्याप्त्या दूषितमित्यर्थः । ननु तूरीतन्तुसंयोगस्याप्यसमवायिकारणत्वमिति चेत् तत्राह-**तूरीति** तथा चासमवायिकारणनाशेन कार्यनाश इति नियमात्[४] तूरीतन्तुसंयोगनाशानन्तरं पटनाशः स्यात् । तथा च तूरीतन्तुसंयोगो नासमवायिकारणमित्यर्थः ।

न्यायमते लक्षणदूषणं दत्वा **मीमांसकमतमाह शक्तीति** कार्यजनकीभूतः शक्तिविशेषः पदार्थान्तरमवयवसंयोगस्थानीयोऽसमवायिकारणपदवाच्यः । स च विशेषः कार्यचोन्नेय इति तन्तुसंयोगमात्रे नातिव्याप्तिः ।

बौद्धमतमाह-कुर्वद्रूपत्वमिति यथा कुशूलस्थं बीजं नाङ्कुरात्मकम्, कुर्वद्रूपत्वाभावात् । कूर्वद्रूपत्वं नामाङ्कुरजनकत्वम् । तथा च कुशूलस्थं बीजमङ्कुरजनकं न भवति । तदेव बीजं

---

१. Both in A and B विधाय दूषयति comes before 'निमित्तकारणभिन्नत्वमिति' but as this does not give proper comprehension of the context, this change has been made. २. B कारणज्ञानं. ३. B वेति. ४ B नियमेन.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्षेत्रसम्बन्धेनाङ्कुरजनकमिति चेत्, न । पूर्वबीजस्य नष्टत्वादन्योत्पत्तेः कूर्वद्रूपत्वमेवाङ्कुरजनकजनकत्वमिति । न च प्रत्यभिज्ञानं बाधकमिति वाच्यम् । यथा **न्यायमते** सच्छिद्रे घटे घटान्तरोत्पत्तावपि सोऽयं घट इति प्रत्यभिज्ञा फलबलेन भ्रान्ता । तथाऽत्रापीतिसमर्थनात् । नैयायिकमते लक्षणासम्भवेन किं जातमित्यत आह-**तस्मादिति**-भेदकाभावादिति निमित्तकारणसमवायिकारणाभ्यां[1] भिद्यत इति । तथा च कारणद्वयमेवेत्याह द्वे **एवेति** तथा च त्रिविधं कारणमित्युद्देशानुपपत्तिरिति भावः ।

ननु यदा कारणद्वयमेव तदा यथा दण्डनाशे सति घटनाशो न भवति तथा कपालद्वयसंयोगनाशानन्तरमपि घटनाशो न स्यादिति । तथा च पटेऽप्येवम् । न च तत्र समवायिकारणनाशेनैव घटादिनाश इति वाच्यम् । तथापि परमाणुद्वयसंयोगनाशानन्तरं द्वयणुकनाशो न स्यात् । तत्र च समवायिकारणनाशेन द्वयणुकनाश इति वक्तुमशक्यः(म्) । तथा च द्रव्यनाशेऽसमवायिकारणनाश एव नियामकः । न तु निमित्तकारणनाशः । भवन्मते तु संयोगो निमित्तकारणमेव । तथा च तन्नाशे सति पटनाशो न स्यात्-इत्याशङ्क्य दूषयति[2] **अपेक्षाबुद्धीति** निमित्तकारणम्, तन्नाशादेव बुद्धिनाशः, तथा तन्तुसंयोगलक्षणनिमित्तकारणनाशादेव पटनाश इति नासमवायिकारणम् । ननु यदि प्रत्येकमपेक्षाबुद्धिनाशत्वादिना यदि (?) द्वित्वादिकार्यनाशकता स्वीक्रियते तदाऽनुगम इत्याह-**निमित्तकारणेतरेति**-अनुगतो धर्मस्तु निमित्तकारणेतरनाशत्वं भावजन्यकार्यनाशजनकेऽस्तीत्यनुगतम्[3] । यथा कपालद्वयसंयोगनाशे घटनाशे जनकीभूते निमित्तकारणेतरकारणनाशत्वमनुगतं तिष्ठति यद्यनेन रूपेण कार्यनाशकता न स्वीक्रियते तदानुगम इति भावः । अत्रेष्टापत्तिं करोति-**इष्टत्वादिति** ।

ननु यदि कारणतावच्छेदकमेकमेकम्, तदा व्यभिचारः, यथा भावकार्यनाशत्वेन कार्यतायां तन्तुसंयोगनाशत्वादिना कारणतायां वाच्यायां तन्तुसंयोगनाशव्यतिरेकेणापि कपालद्वयसंयोगनाशादिना भावकार्यनाशाद् व्यभिचार स्फूट एवेति । व्यभिचारमुद्धरति-**अनुगतस्येति**-कार्यनाशेऽनुगतधर्मस्यासम्भवेनाननुगत एव धर्मः स्वीकार्यः । तथा च न व्यभिचारः । यथा नाशकतावच्छेदकमेकं नास्ति, तथा नाश्यतावच्छेदकमेकं नास्ति । व्यभिचारस्तु तदा स्यात् यदा नाशकतावच्छेदकधर्मोऽनेकः स्यादथ च नाशकतावच्छेदकधर्मो एकः स्यात् । न चैवं प्रकृते तेन [न]व्यभिचारः ।

केचिदिति समादधुरिति शेषः । **नानार्थ इति** यत्र च शक्यतावच्छेदकमनेकं शक्तावच्छेदकमेकं तत्रैव नानार्थता । यथा 'हरि' शब्दे । अत्र शक्यतावच्छेदकमिन्द्रत्वकृष्ण-

---

१. Pl. add असमवायिकारणस्य भेदकं किञ्चिन्नास्तीति नासमवायिकारणाभ्यां. २. A निवेशयति. ३. B -नुगमनम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

त्वसूर्यत्वादिकम्, शक्तावच्छेदकत्वं तु [हरि]त्वमेकमेवेति 'हरि'पदस्य नानार्थता । असमवायिकारणस्य शक्यतावच्छेदकं नानावयवसंयोगत्वम्, कुत्रचिदवयवरूपत्वम् कुत्राप्यवयवरूपत्वविभागत्वम्, क्वचिदवयवकर्मत्वमित्याद्यनेकं शक्तितावच्छेदकं चैकमेवासमवायिकारणत्वम् । 'अ'कारोत्तर'श'कारोत्तर'व'कारोत्तराद्युत्तरवर्णत्वम्[१] ।

फलितमाह-**तथा चेति** द्रव्यासमवायिकारणलक्षणमवयवसंयोगत्वम् । गुणासमवायिकारणलक्षणमवयवगुणत्वमेव । **अक्षादिवदिति** यथा अक्षादिपदं नानार्थं भवति, तच्छक्यतावच्छेदकस्यानेकत्वात्तथाऽसमवायिकारणपदस्यापि शक्यतावच्छेदकं नानार्थत्वान्नानार्थत्वम् । **स्वरूपसम्बन्धविशेष इति** यथा पटं प्रति तन्तुद्वयसंयोगोऽसमवायिकारणं भवति तत्र संयोगानतिरिक्तस्तन्तुद्वयसंयोगरूपस्तादात्म्यरूपः स्वरूपसम्बन्धविशेषोऽसमवायिकारणत्वं सम्बन्धान्तरमन्तरेण विशिष्टधीजनकत्वमेव स्वरूपसम्बन्धः । स्वरूपस्य सम्बन्धत्वे प्रमाणमभाव एव । यथा भूतले घटाभावप्रतीतिर्यदा जायते, तदा भूतलेन सममभावस्य स्वरूपसम्बन्ध एव । भूतलाभावयोः तृतीयसम्बन्धासम्भवेन द्वयो : स्वरूपमेव-सम्बन्ध एव । अन्यथा सम्बन्धव्यतिरेकेण विशिष्टप्रतीतिर्न स्यात् । तेन प्रकृते पटं प्रति तन्तुद्वयसंयोगोऽसमवायिकारणम् । असमवायिकारणत्वं तु संयोगस्य[२] स्वरूपमेव। एवं कर्मादिस्वरूपमेवान्यासाधारणधर्मसम्बन्धाभावात् । सम्बन्धान्तरकल्पनेऽनवस्था स्यात्।

अखण्डवत्यसमवायिकारणत्वमखण्डम् । अखण्डो धर्मस्तत्रैव स्वीक्रियते यत्र जातौ किञ्चिद् बाधको भवेत् । यथाऽभावत्वजातावभावे समवायाभावात् । अभावत्वमखण्डं नञः शक्यतावच्छेदकम् । **मणिकारमते** तु नञः शक्यतावच्छेदकं संसर्गाभावत्वमेव । तमन्योन्याभावत्वमेवेति द्वयमेव । अत्र हेतुमाहुः-**सखण्डाविति** यत्समवायिकारणप्रत्यासन्न-मित्यादिरूपस्य सखण्डोपाधेर्निरस्तत्वादिति । जातिभिन्नत्वे सत्यनेकपदार्थवृत्तित्वमखण्डोपाधित्वं अनेकपदार्थघटितधर्मत्वं सखण्डत्वम् । यथा कम्बुग्रीवादिमत्त्वम् । अखण्डोपाधित्वं[३] त्वभावत्वात् ।

नन्वसमवायिकारणं जातिरस्त्विति चेत्, न । संयोगत्वेन सङ्करात् । तथाहि संयोगत्वं घटसंयोगेऽस्ति । तत्रासमवायिकारणत्वं नास्ति । असमवायिकारणत्वं च तन्तुरूपादावस्थिता । [४]तत्र संयोगत्वं नास्ति । उभयं च तन्तुसंयोग्वस्तीति सङ्करात् ।

[५]इति वादे चक्रचूडामणिजितानेकवादिवृन्दवाचनाचार्य **श्रीगुणरत्न**विर[चित]**गोवर्धनी** टिप्पणे-असमवायिकारणप्रकरणम् ।

---

१. Perhaps the word अश्व is implied here. २. B omits संयोगस्य. ३. Pl. add अनेक पदार्थघटितधर्मत्वंसखण्डत्वम् । यथा कम्बुग्रीवादिमत्त्वम् अखण्डोपादित्वं. ४. B omits the reading between तत्र....नास्ति. ५. B इति-असमवायिकारणलक्षणव्याख्या ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(VIII) निमित्तकारणम् ।

निमित्तकारणलक्षणमाह-[1]**यत्कार्येति दण्डादीनामपीति** स्वकीयरूपं प्रति स्वसंयोगादीन्प्रत्यपि समवायिकारणत्वात् । **चक्रेति** भ्रमिशब्देन चक्रिकया संयोगविभागयोरसमवायिकारणं भवति । तथा च यथाश्रुते निमित्तकारणे दण्डादावव्याप्तिरिति मनसि कृत्वाऽऽह-**सामान्यत इति** समवायिकारणासमवायिकारणभिन्नं यत्कारणमिति सामान्येन यदुच्यते तदा त्रयाणां परस्परं भेदो न सिध्येत् । उक्तरीत्या निमित्तकारणस्यापि क्वचित् समवायिकारणत्वादित्यर्थः । इदमिति यत्कार्ये इत्यादिरूपम् । **अभावनिमित्तेति**-अभावशब्देन ध्वंसो ग्राह्यः । अन्यथाऽत्यन्ताभावस्य निमित्ताभावादसङ्गतिः स्यादिति भावः। तथा च ध्वंसस्य यन्निमित्तकारणं घटादिस्तत्र ध्वंसस्य समवायिकारणाद्यप्रसिद्ध्यात्(-सिद्धेः) इत्यभिन्नत्वं वक्तुमशक्यम् । प्रसिद्धस्यैव भेदसम्भवात् । यथा प्रसिद्धस्यैव घटादेः पटे भेद उपपद्यते, न चाप्रसिद्धस्याकाशपुष्पादेरिति तथा प्रकृतेऽपि[2] घटध्वंसनिमित्तकारणं घटध्वंससमवायिकारणासमवायिकारणभिन्नमिति वक्तुमशक्यम् । प्रतियोगिप्रसिद्धेरेवाभावकारणत्वादिति भावः भावनिमित्तेति भावस्यद्यटादेः यत्समवायिकारणासमवायिकारणभिन्नं तदेव भावनिमित्तकारणमिदम् । भावनिमित्तकारणस्यैवेदं लक्षणम्, नेदमभावनिमित्तकारणस्येति । ननु सर्वनिमित्तसाधारणं लक्षणं न जातमिति चेत्, तत्राह-**अभावे त्विति** ध्वंसं प्रति तु यन्निमित्तकारणं घटादिलक्षणम्, तस्य लक्षणं चानन्यथासिद्धनियतपूर्ववर्तित्वमेव । अभावान्नियतपूर्ववर्तित्वमेवेत्यर्थः ।

इदं दूषयति-**अभावकारणेति** तथा चाभावनिमित्तमित्यस्मिन्शब्दे उच्चार्यमाणेऽभाव[3]कारणत्वमित्येव बोधो भवतु । तयोरभेदस्योक्तत्वात् । वस्तुतस्तु अभावनिमित्तमिति वाक्येनाभावकारणकत्वप्रकारके[4] बोधो न जायते । तथाऽननुभवात् । यथा प्रमेयमिति पदेन घटत्वप्रकारको बोधो न भवति किन्तु प्रमेयत्वप्रकारक एवेति, तथा[5] प्रकृतेऽप्यभावनिमित्तपदेनाभावकारणक[6]त्वप्रकारको बोधो न जायते । भवन्मते चैतादृशी प्रतीतिः स्यादेव । यथा घटपदेन कलशत्वप्रकारकोऽपि बोधः, घटकलशयोरभेदात् । समाधत्ते-**प्रकृतकार्येति** प्रकृतं यत्कार्यं ध्वंसरूपम्, तन्निष्ठस्तदधिकरणको यो प्रतियोग्यनुयोगिभावलक्षणः सम्बन्धस्तस्य यावाश्रयौ तयोर्मध्ये एकतरस्य यत्समवायिकारणमसमवायिकारणं च तद्भिन्नत्वं विवक्षितम् । वर्तते चेदं घटध्वंसनिमित्तघटे । यथा प्रकृतकार्यो भवति घटध्वंसरूपस्तत्र घटेन समं सम्बन्धो भवति प्रतियोग्यनुयोगिभावसम्बन्धः । यथा प्रतियोगी घटः, अनुयोगी भवति घटध्वंसः। घटनिरुप्यो हि घटध्वंस इत्यनुयोगित्वं निरुप्यत्वम् । अनयोर्यो सम्बन्धः, स प्रतियोग्यनुयोगिभाव एव । तस्याश्रयो

---

१. A यत्कार्यमित्यादि. २. B omits अपि. ३. B -ऽभावत्वमित्येव. ४. B -प्रकारकबोधो. ५. B तथापि. ६. B कारणत्व..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यथा घटध्वंसो भवति तथा घटोऽपीति सम्बन्धस्योभयवृत्तित्वात् । सम्बन्धाश्रयस्य घटस्य समवायिकारणं भवति कपालम्, असमवायिकारणं भवति कपालद्वयसंयोगः, तद्भिन्नत्वं घटे वर्तते ।

ध्वंसनिमित्तकारणे लक्षणं योजयति-**तच्चेति** तत्रेति घटध्वंसे घटलक्षणप्रतियोगिनः समवायिकारणादिसत्त्वात् [१]कपालतत्संयोगयोः सत्त्वात् तद्भिन्नत्वं घटेऽस्तीति शेषः । दूषयति **तन्नेति** संयोगिन इति तथा च यत्र घटपटयोः संयोगो वृत्तस्तदनन्तरं घटादिक्रियादिना घटपटयोः संयोगनाशः जातः । [२]तस्य नाशस्य निमित्तकारणं यथा[३] संयोगस्तथा संयोगाधिकरणं घटपटावपि । तथा च तत्र संयोगाधिकरणे घटे संयोगध्वंसनिमित्तकारणेऽव्याप्तिः । तथाहि प्रकृते कार्यो भवति घटपटसंयोगध्वंसः । तस्य प्रतियोगी भवति तत्संयोगः, अनुयोगी भवति संयोगध्वंसः । संयोगध्वंसस्याधिकरणमपि घटादिकमनुयोग्येव । तथा चैतेषां घटसंयोगध्वंसः, तदधिकरणानां यो सम्बन्धः सप्रतियोग्यनुयोगिभावलक्षणः । तदाश्रयो भवति घटादिः तद्भिन्नत्वं घटे नास्ति । घटस्य घटपटसंयोगं प्रति समवायिकारणत्वात् । तेन समवायिकारणभिन्नत्वाभावादव्याप्तिः ।

कण्टकमुद्धरति-**न चेति** । तथा च घटपटसंयोगध्वंसं प्रति संयोग एव निमित्तम् । न तु घट इतीष्टापत्तिः। घटस्यापि घटसंयोगध्वंसं प्रति निमित्तकारणतां व्यवस्थापयति घटे संयोगप्रतीत्या घटसंयोगध्वंसं प्रति घटस्याप्यधिकरणत्वेन निमित्तत्वमस्तीत्यर्थः । यथेदानीं घट उत्पन्न इति प्रतीत्या [४]कालस्याधिकरणत्वेन घटं प्रति निमित्तकारणत्वं तथाऽत्रापीति भावः । तथा च घटपटसंयोगध्वंसनिमित्ते घटेऽव्याप्तिः ।

इदं लक्षणं दुष्टम् । तेन समवायिकारणासमवायिकारणभिन्नत्वे सति यत्कारणं तन्निमित्तकारणमिति जन्यभावनिमित्तकारणस्यैवेदं लक्षणम् । अभावनिमित्तस्य तु[५] अभावं प्रत्यनन्यथासिद्धनियतपूर्ववर्तित्वमेवेति, न चाभावनिमित्तकारणत्वयोरभेद इति वाच्यम् । अत्रेष्टापत्त्या समर्थयति-**अभावेति** तथा चानयोरभेदस्वीकारेऽपि दोषो नास्तीत्यर्थः । इदं तु लक्षणं समवायिकारणासमवायिकारणभिन्नत्वे सति कारणत्वमिति लक्षणं-भावनिमित्तस्येवेत्यर्थः ।

[७] मीमांसककृतप्रमाणलक्षणस्य निराकरणम् ।

मीमांसकमत[६]मुद्भाव्य दूषयति-**यत्त्विति** यथाश्रुते तु अनधिगतो योऽर्थः तत्त्वज्ञानाविषयीभूतो योऽर्थः, तस्य यो (यत्) [७]अधिगन्तृज्ञानं करणं तत्प्रमाणम् । तेन च भ्रमकरणे दोषेऽप्येतल्लक्षणस्य सत्त्वादि(द) तिव्याप्तिरित्यन्यथा व्याचष्टे-**अगृहीतेति** तेन[८] यथार्थपददानात्

---

१. B कपालवत्त्वसं॰. २. B तत्राशस्य. ३. B omits यथा. ४. B कालस्याप्यधि॰. ५. B omits तु. ६. B मीमांसकमेवमु॰. ७. B अधिगन्ताज्ञानं. ८. B येन स्वयथार्थ॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]भ्रमकरणे दोषे नातिव्याप्तिरित्यर्थः ।

ननु स्मृतावतिव्याप्तिवारणार्थमगृहीतग्राहित्वमिति चेत्[2], तदापि स्मृतिभिन्नत्वे पदमेव लाघवाद्दातव्यम् । तदपेक्षया लघुत्वादावश्यकत्वाच्च । अगृहीतग्राहितपददानेऽपि स्मृतिभिन्नपदं दातव्यमेव । अन्यथा स्मृतावप्यपगृहीतयथार्थज्ञानत्वं वर्तते । यदा घटोऽयमित्यनुभवो जातस्तदनन्तरं स्वजन्यसंस्काराद्वारा तस्यैव स्मरणं भवति । तस्य चागृहीतयथार्थज्ञानत्वं वर्तत एव ।

ननु [3]पूर्वानुभूतस्यैव स्मरणात्कथमगृहीतग्राहित्वमिति चेत् न । अनुभवाधिकरण-क्षणविशिष्टभिन्न एव पदार्थःस्मृत्यधिकक्षणविशिष्टभिन्न एव पदार्थःइत्यगृहीतयथार्थज्ञानत्वं स्मृतावप्यस्तीति [4]स्मृतिभिन्नत्वपदं दातव्यमेवेत्याह-**स्मृतीति** तेषामिति क्रियादीनां योग्यतया प्रत्यक्षतया तद्गतो यो भेदः-यथा क्रियाविशिष्टक्षणविशिष्टो घटः । तस्य भेदस्तु विभागक्षणविशिष्टे [5]घटेऽस्ति । एवं भेदोऽपि योग्य एव । तथा च मया एकदैवोत्पलशतभिन्नमिति यौगपद्याभिमानो न स्यात् । वस्तुगत्यताऽयमभिमानः क्षणानां सूक्ष्मत्वाज्जायते इत्यभिप्रायः ।

शङ्कते **नन्विति** तथा च प्रकृते [6]भेद एवास्ति । तस्य योग्यतयाऽपि सामग्रीविरहात् इन्द्रियसन्निकर्षाद्यभावात् भेदज्ञानं नास्तीति चेत्, तदा धारावाहिकं यत्ज्ञानं तद् भ्रमरूपं स्यादित्यर्थः । **क्षणस्येति**-तथा च क्षणानामयोग्यत्वं सर्वमतसिद्धम्, तेन पूर्वं यदुक्तं क्रियाक्षणविशिष्टो घटो योग्यस्तस्य भेदोऽपि योग्य इति; तदसत् । क्षणस्यापीन्द्रियत्वात् । तत्क्षणविशिष्टो घटोऽयोग्यस्तद्भेदोऽप्योग्यस्तेन योग्यताभावान्न भ्रम इति भावः ।

[८] ॥ प्रत्यक्षनिरूपणम् ॥

नातिप्रसक्तिरिति तथा चात्मादावानु[भ]वत्वव्याप्येत्यादि प्रमाणलक्षणेनाति-व्याप्तिर्वारितेत्यर्थः । **इन्द्रियत्वेनेति**-नन्विन्द्रियत्वं न जातिः, जलपृथिवीत्वेन सङ्करात्; नाप्युपाधिः, तदनिर्वचनादिति चेत्, न सखण्डोपाधिरेव । जन्यसाक्षात्कारजनकतावच्छेद-कत्वेनेन्द्रियत्वमुपाधिः सिध्यति । तथा चानेन रूपेण यत्ज्ञानं प्रति कारणत्वं साक्षात्कारिणी प्रमेत्युच्यतेऽनुमित्यादौ तु मनसः कारणत्वेऽपि नानेन रूपेण, किन्तु तत्र मनस्त्वेन रूपेण कारणताजन्यज्ञानत्वावच्छिन्नं प्रति तु मनसः कारणत्वात् । **तज्जन्यत्वस्येति** - इन्द्रियत्वेन रूपेणेन्द्रियजन्यत्वस्य विवक्षितत्वादनुमित्यादौ तु मनस्त्वेन रूपेण मनसः कारणतेति न तत्रातिव्याप्तिरिति भावः ।

(I) निर्विकल्पसविकल्पप्रत्यक्षम् ।

सम्बन्धानवगाहीति - यत्र ज्ञाने विशेष्यविशेषणयोः सम्बन्धो न भासते-तन्निर्विकल्पम् ।

---

१. B भ्रमे नातिव्या. २. B यावत्. ३. B -नुभवस्यैव. ४. B omits स्मृति. ५. B घटे एव. ६. B प्रकृतेऽभेद.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथा च यत्र ज्ञाने घटो भासते, घटत्वं च भासते, परं घटत्वनिरुपितः समवायो न भासतेऽयं घट इति ज्ञान एव घटत्वसम्बन्धभानात् ।

ननु घटघटत्वज्ञाने[१] तत्र किं प्रमाणमिति चेत्, भविष्यत्सविकल्पमेव प्रमाणम् । तथाहि विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणम्, यथा भूतले घट इति विशिष्टज्ञानं प्रत्युत्पादकसामग्री । यथा विशेषणज्ञानं घटत्वज्ञानम्, विशेष्यमिन्द्रियसन्निकर्षो घटेन्द्रियसन्निकर्षः, तदुभयासंसर्गाग्रहो विशेषणविशेष्योभयथा संसर्गाग्रहो विशेष्याधिकरणयोरसंसर्गाग्रहश्च विशेष्यं घटाधिकरणं भूतलादिस्तयोरसंसर्गाग्रहो विशिष्टबुद्धिं प्रति कारणमित्यर्थः । असंसर्गशब्देन संसर्गाभाव उच्यते । सम्बन्धाभाव इति यावत् । तस्य सम्बन्धाभावस्याग्रहो[२] नाम ज्ञानाभाव इति । तथा च संसर्गाभावज्ञानाभावो संसर्गाग्रहपदेनोच्यते[३] इत्यर्थः । विशेषणस्य सम्बन्धाभावस्तस्याग्रहो नाम ज्ञानाभाव इति यावत् । तथा च विशेष्यविशेषणोभयसम्बन्धाभावः ज्ञानाभावकारणं[४] पूर्वविशिष्टबोधे विशेषणविशेष्ययोरसंसर्गाग्रहोऽपेक्ष्यते ।

ननु विशेषणज्ञानं यथा विशिष्टबोधे कारणं तथा विशेष्यज्ञानमपि तत्र कारणं भवत्विति चेत्, [न] विशेष्यस्य पूर्वमनुपस्थितत्वात् । यथा 'दण्डी पुरुषः'-इत्यत्र दण्डज्ञानं यथापूर्वं वर्तते, तथा [५]पुरुषज्ञानं नास्ति । कथमिति चेत्, दण्डज्ञानानन्तरं पुरुषेन्द्रियसन्निकर्षो वृत्तः । पुनः सन्निकर्ष[६]क्षण एव [७]पुरुषे दण्डासंसर्गाग्रहस्तदनन्तरं [८]विशिष्टबुद्धिर्जायते । यतः पुरुषेन्द्रियसन्निकर्षाननन्तरं पुरुषज्ञानक्षणे एव विशिष्टबुद्धिसम्भवात् पुरुषज्ञानं न कारणम् ।

ननु विशेषणसन्निकर्षोऽपि तत्र कथं न कारणमिति चेत्, न । प्रमाणाभावात् । विशेषणसन्निकर्षव्यतिरेकेणापि विशिष्टबुद्धेर्जायमानत्वात् । दण्डस्मरणमपि कारणम्, कदाचिदनुभवोऽपि कारणम् कदाचिद्विशेषणसन्निकर्षोऽपि कारणम्, परमावश्यकसन्निकर्षो नास्तीति विशेषणज्ञानमेव कारणम् । ननु संसर्गाग्रहशब्देन संसर्ग एव सम्पन्न इति चेत्, न । 'असंसर्ग' इति न तत्रासम्बन्धाभावो बोध्यते । 'अग्रह' इति च[९] नञा ज्ञानाभावो बोध्यते । तेन प्रकृतोऽर्थः । नञ्-द्वयेन प्रकृतार्थः तत्रैव बोध्यते यत्र प्रथमनञर्थेन समं द्वितीयनञर्थान्वयो भवति । यथा भूतले घटो नास्तीति-प्रथमनञर्थो भवति घटाभावस्तेन समं द्वितीयनञर्थस्याभावलक्षणस्यान्वयात् । प्रकृते च न तथा । अत्र प्रथम नञर्थो भवति सम्बन्धाभावः, द्वितीयनञर्थो भवत्याद्याभावः, तस्य ज्ञानेनैव सममन्वयात् । तेन नात्र प्रकृत्यर्थान्वयः ।

ननु विशेषणज्ञानविशिष्येन्द्रियसन्निकर्षयोरेव कारणत्वमस्त्वति चेत्, न । यदा घटत्वज्ञानं

१. B -भाने. २. B -ग्रहे. ३. B -ग्रह एव नोच्यते. ४. B -द्वितीयलक्षणे. ५. B -ज्ञानमस्ति. ६. B सन्निकर्षेण एव. ७. B विशिष्टपुरुषे. ८. B विशिष्टः जायते. ९. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वर्ततेऽथ च घटेन सममिन्द्रियसन्निकर्षोऽप्यथ च घटे घटत्वासंसर्गाग्रहो-यथाऽत्र घटत्वं नास्तीति । तदनन्तरं घटत्वविशिष्टबुद्धिर्भवतु, विशेषणज्ञानविशेष्येन्द्रिययोः सत्त्वात् । तदनुरोधेन विशेषणासंसर्गाग्रहस्यापि कारणत्वं वक्तव्यम् । प्रतिबन्धकाभावस्य कारणत्वात् । प्रकृते प्रतिबन्धकं च विशेषणासंसर्गाग्रहः । यथा 'भूतले घट' इत्यत्र विशेषणं भवति घटत्वम्, विशेष्यो भवति घटः । घटे हि यदा घटत्वस्यासंसर्गग्रहो भवति-सम्बन्धाभावज्ञानं भवति, तदा घटत्वविशिष्टधी र्न जायते-इत्यसंसर्गस्य प्रतिबन्धकत्वं विशिष्टज्ञानं प्रति । इति तदभावकारणम्, यथा दाहं प्रति मण्यभावः ।

ननु विशेषणज्ञानस्य कारणत्वे किं प्रमाणमिति चेत्, विशिष्टबुद्धिरेव प्रमाणम् । विशेषणज्ञानाभावे तदनुदयात् । न च विशेष[ण]सन्निकर्षव्यतिरेकेणैव विशिष्टज्ञानविलम्ब इति वाच्यम्। एवं च यदा विशेषणेन्द्रियसन्निकर्षविशेष्येन्द्रियसन्निकर्षौ स्तः, तदा समूहालम्बनात्मकमेव ज्ञानं जायते । यथा दण्डपुरुषसंयोग इति, यथा विशिष्टबुद्धौ विशेषणविशेष्यसंसर्गाणां भानं तथाऽत्रापि त्रयाणां भानम् ।

ननु समूहालम्बनविशिष्टज्ञानयोः को भेद इति चेत्, समूहालम्बने च सर्वेषां विशेष्यत्वेन भानम् । विशिष्टबुद्धौ च परस्परं विशेषणविशेष्यत्वेनैव । यथा दण्डी पुरुष इत्यत्र दण्डो विशेषणतया भासते, पुरुषो विशेष्यतया भासते । तयोः सम्बन्धस्तु संसर्गमर्यादया भासते । सम्बन्धोपरिकश्चिद्धर्मः-प्रकारो-न[1] भवतीत्यर्थः । समूहालम्बने तु नैवम् । यथा [2]'दण्डपुरुषसंयोग' इत्यत्र सर्वेषां विशेष्यत्वेनैव भानात् । ततो विशिष्टबुद्धिं प्रति त्रयमावश्यकमिति[3] । तथा च यदि निर्विकल्पं नाङ्गीक्रियते तदा दैववशात् यत्र घटत्वास्मरणे सति घटेन समं सन्निकर्षो वृत्तः । तदनन्तरं निर्विकल्पकं न जायते । भवतां मते तदनन्तरं विशिष्टबुद्धिं र्न स्यात्, पूर्वं घटत्वरूपविशेषज्ञानाभावात् । अस्माकं मते तु घटेन्द्रियसन्निकर्षानन्तरं [4]घटघटत्वयोरेकं निर्विकल्पकं जायते, परं घटत्वसमवायो न भासते । तृतीयक्षणे विशिष्टज्ञानं घटोऽयमिति समवायो न भासते । तद्भाने च सविकल्पकत्वापत्तिः । अयमत्र प्रघट्ट :- घटत्वनिर्विकल्पके घटेन्द्रियसन्निकर्षानन्तरं तृतीयक्षणे विशिष्टज्ञानं घटोऽयमितिरूपं प्रमाणम् । यथा प्रथमक्षणे घटेन्द्रियसन्निकर्षः, द्वितीयक्षणे घटघटत्वयोर्निविकल्पकं तदनन्तरं तृतीयक्षणे विशिष्टज्ञानमेव न स्यात् । पूर्वमनुपस्थितस्य घटत्वरूपस्याप्रकारकत्वात् । तस्य च लक्षणमगृहीतासंसर्गधर्मधर्मि-विषयैकज्ञानत्वम् । विशिष्टज्ञानत्वमेकपदं यदि चोच्यते तदा यत्र स्मरणानुभवात्मकं ज्ञानद्वयं जायते-यथा **गुरुमते**-'इदं रजतम्'-इति ग्रहणस्मरणात्मकं ज्ञानद्वयं रजतत्वस्य स्मरणमिदं त्वस्यानुभव इति। **न्यायमते** त्वेकमेव ज्ञानम् । धर्मधर्मिविषयकपदं चेन्नोच्यते तदा समूहालम्बनेऽतिव्याप्तिः । तत्रापि धर्मिविषयत्वमस्त्येव । सर्वेषां धर्मित्वेन भानात् । तद्वारणाय धर्मेति ।

---

१. B कश्चित्प्रकारे । २. B omits संयोग. ३. B omits इति. ४. B omits the reading between घटघटत्व....घटत्वसमवायो न भासते.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु धर्मिविषयैकैकज्ञानत्वमित्येवास्त्विति चेत्, तदा निर्विकल्पेऽतिव्याप्तिः । तत्रापि घटत्वादेर्विषयात् । निर्विकल्पे यद्यपि घटः स्वरूपसन् भासते, तदपि धर्मत्वेन रूपेण न भासते । तत्सम्बन्धविषयत्वात्[१] । अगृहीतासंसर्गपदं तु समूहालम्बनेऽतिव्याप्तिवारणार्थम् । यथा 'दण्डपुरुषौ' इत्यत्र दण्डो भवति धर्मः, पुरुषो भवति धर्मी, तद्विषयत्वं च समूहालम्बनेऽस्तीति तद्वारणायागृहीतेत्यादीति न गृहीतोऽसंसर्गः । यत्रैतादृशं धर्मधर्मिविषयैकज्ञानं यथा 'दण्डी पुरुषः' इत्यत्र पुरुषे दण्डासंसर्गग्रहो नास्ति । यदा तु दण्डासंसर्गाग्रहस्तदा समूहालम्बनमेव, यथा [२]'दण्डपुरुषौ-'इत्यत्र पुरुषे दण्डो नास्तीति ज्ञाने सत्यपि दण्डपुरुषौ-इति ज्ञानोदयादिति दिक् ।

अनिष्टेति यथा प्रवृत्तिं प्रति इष्टसाधनताज्ञानं कारणं तथा निवृत्तिं प्रत्यनिष्टसाधनमिति उपकरणे यथा सर्पोऽनिष्टसाधनमिति ज्ञानान्निवर्तते [३]इति दिक् ।

(II) सन्निकर्षचतुष्टयम् ।

तद्गतेति पूर्वमुक्तं गुणक्रियाद्रव्यजातिप्रत्यक्षं प्रति संयुक्तसमवायसन्निकर्ष इति । तथा च परिमाणमपि यद्यपि गुणविशेषं तथापि संयुक्तसमवायि(य) सन्निकर्षमात्रेण न गृह्यते । अन्यापि काचनसामग्र्यपेक्ष्यते । सा का ? इत्यत आह-**इन्द्रियावयवैरिति** - यदा घटगतं परिमाणं गृह्यते 'एतावान्घट' इति प्रत्यक्षे घटावयवैः सममिन्द्रियावयवानां संयोगोऽपेक्ष्यते(१)अथ च घटेनेन्द्रियेण च संयोगः (२) अथ च घटावयवैरिन्द्रियावयविना संयोगः (३) इन्द्रियावयवी, घटोऽवयवी, अनयोः संयोगोऽपेक्ष्यते (४) । एतच्चतुष्टयसत्त्वे एवैतावानिति परिमाणग्रहः-नान्यथेति **जीर्णाः** ।

नवीन मते तु गुणसामान्यप्रत्यक्षं प्रति संयुक्तसमवाय एव सन्निकर्षः । न च दूरस्थघटादिपरिमाणं कथं न गृह्यत इति वाच्यम् । तत्र दूरत्वरूपदोषस्यैव प्रतिबन्धकत्वादिति चतुष्टयकल्पने गौरवम् ।

आदिपदेति तथा च परिमाणादित्यत्रादिपदेन दीर्घह्रस्वत्वग्रहणम् । एतै च परिमाणविशेषौ [४]उत्कर्षादिति । यद्यपि [५]गुणपरिमाणप्रत्यक्षं संयुक्तसमवायसन्निकर्षेणैव गृह्यते तथापि तद्गतो त्कर्षादिग्रहणार्थं यथा'ऽयं एतावानेवे'ति ज्ञानार्थसन्निकर्षचतुष्टयमेपेक्ष्यते इत्यर्थः ।

(III) षोढा सन्निकर्षः ।

अत्र सन्निकर्षग्रन्थे [६]किञ्चिद्विचार्यते। - लौकिकसन्निकर्षः षोढेति तत्राद्येन द्रव्यस्य (१)

---

१. B विषयकत्वात् । २. B दण्डौ पुरुषौ ३. B इत्यर्थः । ४. B उक्तार्थत्वादि. ५. A omits गुण. ६. A omits किञ्चिद्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

द्वितीयेन गुणकर्मजात्यादीनां (२) तृतीयेन रूपत्वादीनां (३) चतुर्थेन शब्दस्य (४), पञ्चमेन शब्दत्वादेः (५) षष्ठेनाभावादेर्ग्रहणमिति (६) **न्यायमतम्** ।

ननु घटादिचाक्षुषं प्रति चक्षुर्घटादिसंयोगः कारणं न भवति, व्यभिचारात् । तथाहि यत्र घटे द्वयणुकावच्छेदेन त्र्यणुकावच्छेदेन वा चक्षुःसंयोगोऽस्त्यन्यस्यावृत्तित्वात् [१]तत्रचाक्षुषं प्रत्यक्षं न जायत इति व्यभिचारः । तद्वारणार्थं स्थूलावयवावच्छेदेन घटचक्षुःसंयोगः-कारणस्थौल्यं फलबलकल्प्यम् । यद्द्रव्यचक्षुःसंयोगानन्तरं प्रत्यक्षं जायते तदेव स्थौल्यं ग्राह्यम् । तथा च कार्यकारणभावद्वयं वक्तव्यम् । आत्मनोऽवयवाभावेनैकरूपेण कारणत्वकल्पनानुदयात् । एवं चात्मप्रत्यक्षत्वेन कार्यत्वम् । एवमवयवीद्रव्यप्रत्यक्षे संयुक्तसमवायसन्निकर्ष एव कारणम् । यदि स्थूलावयवावच्छेदेनेन्द्रियसंयोगस्य कारणत्वं स्वीकृत्य एकैव कार्यकारणभावः स्वीकार्यः, तदाऽऽत्मनि व्यभिचारः । तस्य निरवयत्वात् । तद्व्यभिचारवारणार्थं कार्यकारणभावद्वयं वक्तव्यम् । आत्मप्रत्यक्षं प्रति आत्ममनः संयोगः आत्मनः संयोगत्वेन कारणम् । आत्मप्रत्यक्षत्वेन कार्यत्वमित्येकः कार्यकारणभावः । अपरस्त्वात्मभिन्न-द्रव्यप्रत्यक्षत्वेन[२] कार्यत्वम् । इन्द्रियसंयोगत्वेन कारणत्वमित्यपरः । [३]परं चात्मभिन्नद्रव्यप्रत्यक्षत्वेन कार्यत्वम्, न कारणत्वम्, (?) चेन्द्रियसंयोगस्येन्द्रियसंयोगत्वेन रूपेण कार्यकारणभाव इति । न च रूपाद्यनुरोधेन यथा रूपग्रहणार्थं क्लृप्तो यः संयुक्तसमवायसन्निकर्षः तेनैव घटादिग्रहणसम्भवे संयोगस्य सन्निकर्षत्वे किं प्रमाणम्, एवमवयवीद्रव्यप्रत्यक्षे संयुक्तसमवायसन्निकर्ष एव कारणमिति वाच्यम् । यद्यपि घटादिप्रत्यक्षस्थले संयुक्तसमवायस्यैव प्रत्यासत्तित्वमुचितं तथाप्यात्म-विषयकप्रत्यक्षार्थं[४] संयोगः सन्निकर्षः आवश्यक एव । एकत्र क्लृप्तोऽर्थोऽन्यत्र कल्प्यते इति न्यायेन जन्यद्रव्यप्रत्यक्षं प्रत्यपि संयोगस्यैव कारणत्वमिति **मणिकारः** । तदपि मन्दम् । यद्यप्यात्मविषयकप्रत्यक्षं प्रत्यनन्यगत्या मनः संयोगस्य कारणत्वं स्वीक्रियते तथापि जन्यद्रव्यप्रत्यक्षं प्रति[५] संयुक्तसमवायस्यैव कारणत्वमुचितम् । न च विनिगमनाविरहेण यथा संयोगो वा कारणं संयुक्तसमवायो वा कारणमिति रूपेण जन्यद्रव्यप्रत्यक्षं[६] प्रति संयोगस्यैव कारणत्वं संयुक्तसमवायापेक्षया संयोगस्यैव लघुत्वमिति वाच्यम् । रूपादिविषयकप्रत्यक्षस्थले संयुक्तसमवायप्रत्यासत्तिरावश्यकी । तयैव प्रत्यासत्त्या यदि जन्यद्रव्यप्रत्यक्ष[७] निर्वहति, तदा [८]जन्यद्रव्यप्रत्यक्षं प्रति संयोगस्य कारणत्वे प्रमाणाभावात् । न चात्मप्रत्यक्षनिर्वाहार्थं संयोगप्रत्यासत्तिरिति जन्यद्रव्यप्रत्यक्षार्थमपि संयोग एव [९]कारणमेकत्रक्लृप्त इति निर्वाहादिति वाच्यम् । आत्मप्रत्यक्षेऽऽत्मनः तादात्म्यमादाय संयुक्ततादात्म्यस्य प्रत्यासत्तित्वात् । अस्यार्थः-मनः संयुक्तो भवत्यात्मा । तस्य तादात्म्यं तत्स्वरूपम् । तेन मनः-संयुक्तात्मस्वरूपमेव सन्निकर्षः । [९]अस्य सन्निकर्षत्वे किं प्रमाणमिति

---

१. A तत्रचा. २. B -त्वेन तु का. ३. A omits the reading between परं...कार्यकारणभाव इति. ४. B प्रत्यक्षत्वे. ५. B प्रत्यपि. ६. B द्रव्यसाक्षात्कारं प्र०. ७. B जन्यप्रत्यक्षं. ८. B कारणमन्यत्र. ९. B तस्य.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चेत्, अभावादिविषयकप्रत्यक्षार्थमयं सन्निकर्षः [1]स्वीकार्य एव । अन्यथाऽभावप्रत्यक्षं न स्यात् ।

अयमेव विशेषणविशेष्यभावो गीयते । इन्द्रियसम्बद्धतादात्म्यमेव विशेषणविशेष्यभावः । यथा भूतले घटो नास्तीत्यत्र चक्षुषा यदा घटाभावप्रत्यक्षं भवति तदा चक्षुःसंयुक्तभूतलवृत्तिरूपम् भावतादाम्यं सन्निकर्षः । एवं घटे घटत्वसमवाय इति यदा प्रत्यक्षं जायते तदापि चक्षुरिन्द्रियसंयुक्तघटवृत्तित्वरूपं समवायतादात्म्यं सन्निकर्षः । अन्यथा भूतले घटाभाव इति समूहालम्बने परस्परं विशेषणविशेष्याभावात् ज्ञानं न स्यात् । विशेषणविशेष्यभावव्यतिरेकेणाप्यभावप्रत्यक्षसम्भवाद् व्यभिचारः स्यात् । तादात्म्यं च विशेषणविशेष्यभावातिरिक्तपदार्थाभावात् स्वरूपमेव । तथा चात्मविषयकप्रत्यक्षं प्रति मनःसंयुक्तात्मतादात्म्यमेव सन्निकर्षः । किं संयोगेनेति । भवतु वाऽऽत्मप्रत्यक्षत्वं संयोगस्य कार्यतावच्छेदकम् । ननु घटादिप्रत्यक्षस्थले-कार्यकारणभावान्तरकल्पनारूपादिप्रत्यक्षस्थले क्लृप्तकार्यकारणभावकल्प्यनयैवोपपत्तेः, किञ्च [2]स्थौल्यस्यानुगतस्याभावेनैकरूपेण कारणत्वकल्पनानुदयात् । एवं च[3] संयुक्तसमवायप्रत्यासत्तेः कार्यतावच्छेदकं द्रव्यसमवेतत्वं जन्यद्रव्यप्रत्यक्षसाधारणं वक्तव्यम् । तथा च घटप्रत्यक्षे चक्षुरिन्द्रियसंयुक्तं भवति कपालं तत्समवेतो भवति घटः । अतः प्रत्यक्षं द्रव्यसमवेतप्रत्यक्षं भवति द्रव्येकपाले घटसमवायात् । एवं रूपप्रत्यक्षेऽपि संयुक्तसमवाय एव प्रत्यासत्तिः ।

अत्राहुः स्थूलावयवावच्छेदेनेत्यस्य संयोगनिष्ठं वैजात्यतात्पर्यं आत्मघटादिसंयोगसाधारणसंयोगनिष्ठं वैजात्यं जनकतावच्छेदकम् । तथा च-स्थौल्यसंयोगनिष्ठो जातिविशेषः । ततो येनात्ममनःसंयोगविशेषणात्मविषयकं प्रत्यक्षं जायते, तन्निष्ठात्मप्रत्यक्षजनकतावच्छेदकात्ममनः संयोगो तिष्ठति । [4]तथा च जन्यद्रव्यप्रत्यक्षत्वं कार्यतावच्छेदकमिन्द्रियसंयोगत्वरूपं वैजात्यमुक्तरूपं कारणतावच्छेदकमिति । तदपि मन्दम् । यत्र चक्षुःक्रियासमकालमेव कपालस्य घटारम्भक संयोगानुकूलं कर्म। तदनन्तरं चक्षुःक्रियया पूर्वदेशेन समं चक्षुषो विभागो जनितः । तदनन्तरं चक्षुषः पूर्वसंयोगनाशो जातः । तदनन्तरमेकस्मिन्नेव क्षणे चक्षुषा कपालेन समं संयोगः । तस्मिन्नेव क्षण कपालक्रियया घटारम्भकीभूत कपालद्वयसंयोगो वृत्तस्तेन चक्षुरिन्द्रियकपालसंयोगःघटारम्भकीभूतकपालद्वयसंयोगयोरेक एव क्षणः । तदनन्तरं घटोत्पत्तिः । तदनन्तरं घटप्रत्यक्षम् । तन्न स्यात्। घटेन समं तदा संयोगाभावात् घटस्यानुत्पन्नत्वात्।

अस्माकं मते तु तदानीमपि घटप्रत्यक्षं भवत्येव । संयुक्तसमवायसत्त्वात् । चक्षुसंयुक्तं भवति कपालम् । तत्र घटसमवायात् । न च तत्र घटप्रत्यक्षं न भवत्येवेति वाच्यम् । निश्चिताव्यभिचारकं रूपं विहाय सन्दिग्धव्यभिचारकत्वेन रूपेण तत्र कारणत्वकल्पनानुदयादिति दिक् ।

---

१. B स्वीकार्यमेव । २. B स्थौल्यं सानुगत. ३. B omits च. ४. Pl. Read घटेन्द्रियसंयोगोऽपि तिष्ठति। before तथा च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथा चोक्तव्यभिचारादेव संयोगसन्निकर्षः । एवमुक्तरीत्या संयुक्तसमवायस्यापि प्रत्यासत्तित्वं खण्डनीयम् । रूपत्वादिप्रत्यक्षस्थले या क्लृप्ता संयुक्तसमवेतसमवायादिरूपा प्रत्यासत्तिः तयैव द्रव्यादिप्रत्यक्षनिर्वाहात् । तथाहि यदा घटविषयकं प्रत्यक्षं जायते तदा कपालावयवकपालिकया समं चक्षुरिन्द्रियसंयोगो जातः । तदा चक्षुरिन्द्रियसंयुक्ता भवति कपालिका । तत्र समवेतं भवति कपालम्, तत्समवेतो भवति घटः । इति संयुक्तसमवेतसमवाय एव प्रत्यासत्तिः । एवं रूपादि प्रत्यक्षेऽपि [१]चक्षुरिन्द्रियसंयुक्तं भवति कपालम् । तत्समवेतो भवति घटः । तत्र रूपसमवायात् । एवं रूपप्रत्यक्षेऽपि संयुक्तो भवति घटः, तत्र समवेतं रूपम् , तत्र रूपत्वसमवायात् । एवं द्रव्यगुणकर्मजातिप्रत्यक्षे संयुक्ते समवेतसमवाय एव प्रत्यासत्तिः । एवमुक्तरीत्या प्रथमद्वितीयाभावः सिद्धः । समवाय उचित एव सन्निकर्षः [२]श्रोत्रमिन्द्रियं, शब्दोऽर्थः । अनयोः सन्निकर्षः समवाय एव । इति समवेतसमवाय-स्योपयोगः । शब्दत्वप्रत्यक्ष एव नान्येत्रति दिक् ।

ननु संयोगादिसन्निकर्षस्य कारणत्वेऽन्धकारस्थस्य [३]घटचक्षुसंयोगानन्तरं घटप्रत्यक्षं कुतो न भवतीति चेत्, आलोकसंयोगरूपकारणान्तराभावात् । तत्सामग्र्यां कस्यापि सत्त्वात् । न [४]चान्धकारस्य प्रतिबन्धकत्वेन तदभावस्यैव प्रतिबन्धकाभावत्वेनैव कारणत्वमिति वाच्यम् । आलोकाभावा भावत्वापेक्षयाऽऽलोकत्वस्य लघुत्वात् । अन्यथा घटं प्रति दण्डादेरपि दण्डाद्यभावत्वेनैव कारणता स्यात् ।

ननु यदा [५]भस्मत्वाच्छादिना वह्निना सममन्धकारघटसंयोगो वर्तते तदा घटप्रत्यक्षं कुतो न जायतेऽऽलोकसंयोगरूपकारणसत्त्वादिति चेत्, न । प्रमाविशिष्टतेजःसंयोगस्यैव कारणत्वात् । ननु यदा किञ्चिद्देशावच्छेदेनालोकसंयोगोऽपि तत्र घटादिप्रत्यक्षं कथं न स्यादिति चेत्, न । यद्देशे चक्षुरिन्द्रियार्थसंयोगस्तत्र देश एवालोकसंयोगः कारणम् ।

नन्वालोकसंयोगस्य कारणत्वं किं प्रत्यक्षमात्रे वाऽलौकिकप्रत्यक्षमात्रे वा चक्षुर्जन्यलौकिकप्रत्यक्षमात्रे वा ? नाद्यः, सामान्यलक्षणप्रत्यासत्तिजन्यप्रत्यक्षे व्यभिचारात् । आलोकातिरेकेणापि तत्सम्भवात् । [६]नापि द्वितीयः, स्पार्शनप्रत्यक्षे व्यभिचारात् । नापि तृतीयः, घटप्रत्यक्षे व्यभिचारात् । घटत्वेन सहालोकस्य संयोगाभावादिति चेत्, न। चक्षुर्जन्यद्रव्यप्रत्यक्ष एवालोकस्य कारणम् । तथा च यत्र विषयतासम्बन्धेन चक्षुर्जन्यलौकिकप्रत्यक्षं तत्र समवायसम्बन्धेनालोकसंयोगः कारणम् । न चालोकप्रत्यक्षे व्यभिचारः आलोकसंयोगाभावादिति वाच्यम् । आलोकेतरचाक्षुषद्रव्यप्रत्यक्षत्वैव(त्वस्यैव ?) कार्यतावच्छेदकत्वात् । यदि नीलेतरघटत्ववदालोकेतरद्रव्यचाक्षुषप्रत्यक्षत्वं कार्यतावच्छेदकं न भवति, तदाऽऽलोकसंयोगस्य

१. B omits चक्षुरिन्द्रिय. २. B श्रोत्रेन्द्रियशब्दो. ३. B घटसंयोगा.. ४. B चान्धकरालोकस्य. ५. B भस्मत्वादिवह्निना. ६. Pl. add प्रत्यक्षत्वस्य नित्यज्ञानसाधारणता, ईश्वरज्ञाने प्रत्यक्षत्वेऽपि आलोकजन्यत्वाभावात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समवायतादात्म्यान्तरसम्बन्धेन कारणत्वं वाच्यम्। यत्रालोकविषयं प्रत्यक्षं जायते तत्र तादात्म्येन यदा द्रव्यादिप्रत्यक्षं जायते तदा समवायसम्बन्धेन प्रत्यासत्तितावच्छेदकं चान्यतरत्वमेव। न चालोकसंयोगत्वेन कारणता, द्रव्यचाक्षुषप्रत्यक्षत्वेन कार्यता तदा नक्तचरं बिडालोलू[१]कादीनां व्यभिचारमि (रः इ) ति वाच्यम्। तत्रापि तदीयचक्षुनिष्ठालोकनिरूपितालोकसंयोगसत्त्वान्न व्यभिचार इति चेत्, न। [२]यदा तदीयचक्षुर्निसृतालोकसंयोगोऽन्धकारस्थघटेऽस्ति तदाऽन्धकारस्थपुरुषस्यापि घटविषयकप्रत्यक्षापत्तिः। तद्वारणार्थं तदीयचक्षुर्निसृतालोकसंयोगः तदीयप्रत्यक्षं [३]प्रत्येव कारणम्। न चैवं कार्यकारणभावे कल्प्यमाने सहस्रवर्षपर्यन्तं कारणभावो दुर्निरुप्य इति वाच्यम्। [४]बिडालादिप्रत्यक्षेतरचाक्षुषप्रत्यक्षं प्रत्यालोकसंयोगस्य कारणत्वमिति **मैथिलाः**। तदसत्। नीलेतरघटत्ववद्बिडालादिप्रत्यक्षेतरचाक्षुषप्रत्यक्षत्वं कार्यतावच्छेदकं न स्यादिति संक्षेपः।

उक्तग्रन्थे योजनार्थमाभासं ददाति **नन्विति**। एतावतेति अभावग्रहं प्रति संयुक्तविशेषणतैव प्रत्यासत्तिरुक्ता। यथा चक्षुःसंयुक्तं भूतलादि तद्विशेषणतातत्सम्बद्धताऽभावो(वे ?) वर्तते। भूतलाभावयोः सम्बन्धत्वात्। विशेषणपदेन सम्बद्ध एवेति। एवमुक्ते सति दूषणमाहतथा **सतीति पीतेति** यदा पीते रूपे [५]रक्तत्वाभावप्रत्यक्षं जायते-इह पीतरूपे रक्तत्वं नास्तीति। अत्रेन्द्रियसंयुक्तविशेषणताव्यतिरेकेमपि रक्तत्वाभावप्रत्यक्षोदयात्पीतरूपेण समं चक्षुःसंयोगाभावात्। तदुद्धारार्थं विवक्षान्तरं योजयति तदेवमितीति।

पञ्चविधो यो सम्बन्धः संयोगादिरूपः तत्सम्बद्धविशेषणतारूपः सन्निकर्षः अभावग्राह्यो वाच्यः। तथा च भूतले यदा घट्यद्यभावो गृह्यते तदा संयुक्तविशेषणता सन्निकर्षः। [१]यदा तु रूपे कर्मत्वाद्यभावो गृह्यते तदा संयुक्तसमवेतविशेषणतासन्निकर्षः। चक्षुःसंयुक्तघटसमवेतरूपस्य विशेषणतावर्तते कर्मत्वाभावे। (२) यदा तु रूपत्वे घटत्वाद्यभावो गृह्यते तदा संयुक्तसमवेतसमवायविशेषणताप्रत्यासत्तिः, चक्षुसंयुक्तघटसमवेतरूपसमवेतरूपत्वस्य विशेषणता घटत्वाभावे। (३) यदा शब्दे घटत्वाभावो गृह्यते तदा [६]समवेतसमवायसम्बद्धविशेषणताप्रत्यासत्तिः, आकाशलक्षणश्रोत्रेन्द्रियसमवेतसमवायसम्बद्धत्वात् [७]घटत्वाभावस्येति। (४) यदा च शब्दत्वे रूपत्वाभावो गृह्यते तदा समवेतसमवायसम्बद्धतासन्निकर्षः, समवेतो भवति शब्दः तत्समवेतं भवति शब्दत्वं तत्सम्बद्धता वर्तते रूपत्वाभावे-इति (५)।

एवं समवायोऽपीति मूलम् यदा घटे घटत्वसमवायो गृह्यते तदा संयुक्तविशेषणता चक्षुःसंयुक्तघटसम्बद्धत्वात् समवायस्य। (१) यदा [८]रूपे रूपत्वसमवायो गृह्यते तदा संयुक्तसमवेत-

---

१. B -लूकानां. २. A यदि. ३. B. प्रत्येव प्रमाणं कारणम्। ४. B -दिचाक्षुषेतरचाक्षु.. ५. B omits रूपे. ६. A समवेतसम्बन्ध. ७. B घट्यभावस्येति. ८. A रूपेण.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सम्बद्धता; संयुक्तो भवति घटः, तत्समवेतं रूपम्, तत्सम्बद्धता [1]रूपत्वसमवायस्य । (२) एवं समवायग्रहे सन्निकर्षद्वयमेव कारणम् । इदमेव **टीकाकारेण** - षड्वान्यतमपदेन विवक्षितमित्यर्थः ।

॥ इति सन्निकर्षग्रन्थव्याख्या ॥

(IV) बौद्धमते प्रत्यक्षविचारः ।

अर्थजन्यमिति । यद्यपि **बौद्धमते** सविकल्पमपि ज्ञानं वर्तते तथा[पि]तेषां मते निर्विकल्पस्यैव प्रमाणत्वात् न सविकल्पमेव प्रमाणम् । असद्विषयत्वात् सविकल्पस्याप्रामाण्यम्, निर्विकल्पं तु सद्विषयत्वात् प्रमाणम् । तत्र निर्विकल्पके सद्विषयत्वं कुतः इत्यत आह-**प्रत्यक्षमिति** तथा च निर्विकल्पके परमार्थतः [2]सत्ता व्यक्तिः कारणम् । सविकल्पके तु सामान्यस्यापि कारणत्वं **नैयायिकैः** स्वीक्रियते । तच्च नास्ति **बौद्धमते** तस्य शशशृङ्गतुल्यत्वात् । यथा शशशृङ्गविषयकं ज्ञानं(अ)प्रमाणं तथाऽयं घट इत्यपि [3]ज्ञानमप्रमाणम् । घटत्वादेरभावेन तद्विषयकतया तस्याप्रामाण्यम् । सविकल्पकं भ्रमरूपमेव ।

ननु सामान्यं यदि भावरूपं न सम्भवति तदाऽयं घट इत्यत्र घटत्वमपि भासते तत्किमित्यत आह-**अघटव्यावृत्तेरिति** अघटव्यावृत्तिपदेन घटभिन्नान्योन्याभाव गृह्यते । तेन तन्मते घटमात्रे घट भिन्नान्योन्याभावः, तत्राघटव्यावृत्तिरिति । तथा च घट इतरेभ्यो भिद्यते, घटभिन्नान्योन्याभाववत्त्वात्-इति भेदसाधनम् । तथा च सविकल्पके घटत्वस्थानीयघटभिन्नान्योन्याभावविषयत्वात् न प्रत्यक्षत्वम्, सामान्यस्य भावरूपासत्त्वेन । अभावस्य तन्मते तुल्यतयाऽर्थजन्यत्वाभावान्न प्रत्यक्षत्वम् । अर्थजन्यस्यैव प्रत्यक्षत्वादित्याह - **अर्थजन्यमिति स्वलक्षणमिति** ननु **बौद्धा**नां मतेऽप्रमाणम्, तदप्रामाण्यस्वीकारात्, घटमहं जानामीत्यनुव्यवसाय इति चेत्, तस्यापि, सविकल्पकत्वेनाप्रामाण्य-स्वीकारात् । अतः तत्सद्भावे प्रमाणं वदति **स्वलक्षणमिति** । तथा च स्वमेव लक्षणं ज्ञापकं । यस्येति निर्विकल्पकसत्त्वे निर्विकल्पकमेव प्रमाणमित्याशयार्थः ।

अनुगतेति ननु सामान्य विषयकं सविकल्पकं कथं प्रत्यक्षमित्येव वक्तुमुचितं किमर्थमनुगताकार इति चेत्, न । अनुगताकारपदेन सामान्यस्य तुच्छत्वबोधनादन्योन्याभाव एवानुगतो धर्मः । तद्विषयकं ज्ञानमनुगताकारत्वपदेनोच्यते । तन्मतेऽभावपदार्थः तुच्छ एव स्वीकारात् ।

ननु तन्मते किं प्रमाणमित्यत आह-**तन्मत** इति **बौद्धमते** प्रामाणिकं चेदं यद्यस्तु देशकालानुगतं न भवति, अथ क्षणिकं भवति एकदेशस्थायि च भवति तदेव प्रमाणम् । यथा-घटाद्यर्थः प्रामाणिको भवति, तस्य देशकालानुगतत्वं नास्ति । यत्र देशे घटस्तिष्ठति तत्र देशेव्याप्यं न तिष्ठति, यथा 'गृहे घट' इति गृहीत्वाऽवच्छेदेन न तिष्ठति । अतः देशेन सममनुगतोऽव्यापकः । एवं

---

१. B -समवायस्तस्य. २. B सति. ३. B ज्ञानं प्रमाणम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कालेनापि सममव्यापकः स्थूलकालव्यापकत्वाभावात् । घटाद्यर्थः तन्मते क्षणिकोऽपि[1] भवति, एकदेशस्थाय्यपि भवतीति घटरूपोऽर्थः प्रामाणिक इत्यर्थः । घटत्वादिरूपं सामान्यं च[2] न तथा । तस्य देशकालानुगतत्वात्व्यापकत्वात् । देशानुगतत्वं नित्यत्वात् । कालानुगतत्वमक्षणिकत्वमपि, नित्यत्वात् । अनेकदेशवृत्तित्वमपीति[3] सामान्यविषयकं सविकल्पकं न प्रत्यक्षमिति तेषामाशयः ।

न्यायमतेन सविकल्पकस्य प्रत्यक्षत्वं साधयति-प्रथमत इति यथा घट इत्युच्चारेऽन्योन्याभावत्वप्रकारकं ज्ञानं न जायते, जायते च घटत्वप्रकारकं तथा घटत्वस्या [4]भावत्वकल्पने गोरव इति भावः ।

तुष्यतु दुर्जन्यायेनेत्याह-**अभावरूपत्वेऽपीति** अभावोऽपि प्रामाणिकः । तत्र हेतुः-यथा तस्यापि कार्यजनकत्वात् । **देशे इति** देशकालव्यापकत्वं तुच्छत्वे त्वया यः प्रयोजकः उक्तः स च द्वयोः **बौद्धनैयायिकयोः** मते न सिद्धः । नैयायिकमते देशकालानुगतस्याभावस्य तुच्छत्वे साध्येऽप्रयोजकत्वात् अनुकूलतर्काभावादप्रयोजकत्वम् । नैयायिकैः क्षणिकत्वमपि कुत्रापि न स्वीक्रियते इत्यर्थः ।

[व्याख्यातं प्रत्यक्षम् ॥]

[९] ॥ अनुमान-निरूपणम् ॥

(I) अनुमानलक्षणम् ।

इदानीमनुमानं निरूप्यते । **लिङ्गेति** [5]अनुमानस्येदं लक्षणम् । तथा च लिङ्गस्य-साधनस्य परामर्शो ज्ञानं तदनुमानमित्यर्थः । **चरमेति** चरमकारणत्वं नाम व्यापाराभावत्वे सति कारणत्वम् । व्यापाराभावात्कारणत्वं[6] नास्ति । तदभावाच्च प्रमाणत्वाभावः । [7]तदा(द)भावाच्चानुमानत्वाभावः । अत्र हेतुमाह-सामान्याभाव इति प्रमाकरणत्वरूपसामान्याभावेऽनुमितिकरणत्वरूपविशेषेण स्थातुमशक्यत्वादित्यर्थः ।

दोषान्तरमाह **लिङ्गेति** परामर्शपदेन व्याप्तिविषयकं प्रत्यक्ष(पक्ष)धर्मताज्ञानम् । तथाहि 'वह्निव्याप्यधूमवानयम्'-इत्यनुमाने व्याप्तिर्विषयीभूता भवति । व्याप्यत्वं नाम व्याप्तिप्रतियोगिकत्वंव्याप्तिनिरूप्यत्वमिति यावत् । तेनात्र ज्ञाने व्याप्तिः विषयत्वेन भासते, पक्षधर्मताऽपि मतुब् प्रत्ययेन भासते । यथा-'धूमवानयम्' इति । पक्षवृत्तिधूमे वह्निनिरूपिता व्याप्तिः । पर्वतवर्तित्वं च पक्षधर्मतारूपम्-विषयतयाऽनुमानरूपज्ञाने भासते इत्यर्थः ॥

---

१. B -ऽपि न भवति. २. B omits च. ३. This प्रतीक is not found in the available text of त. भा. प्र. ४. B स्याभाव. ५. B -स्य लक्ष. ६. B -करणं. ७. A तद्भावा॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्रातिव्याप्तिमाह **धूमे इति** 'धूमो वह्निव्याप्यालोकः पर्वतवृत्तिरिति' समूहालम्बनेऽतिव्याप्तिः। एतस्यापि व्याप्तिविषयकपक्षधर्मताविषयकज्ञानत्वात् । व्याप्तिं गृहीता धूमे, पक्षधर्मता चालोके इति । एतद्वारणार्थं [1]विवक्षां करोति-**एकस्मिन्निति** तथा चैकत्रधर्मिण्युभयविषयकत्वं विवक्षितं तेन नातिव्याप्तिः । तथाप्युक्तलक्षणे दोषान्तरमाह-**व्यतिरेकीति** यथा-'पृथिवी इतरेभ्यो भिद्यते, पृथिवीत्वात्,', इत्यत्र [2]यत्रेतरभेदाभावः तत्र पृथिवीत्वाभावः, यथा जलम्[3], तथा चायम्-इतरभेदाभावव्याप्यपृथिवीत्वाभावप्रतियोगित्ववर्तीति परामर्शः । [4]अत्राव्याप्तिः । कथम् ? पक्षधर्मं पृथिवीत्वे व्याप्तेरविषयकत्वात् । व्याप्तिस्तु पृथिवीत्वाभावे इतरभेदाभावस्य भासते । तथा चैकत्रधर्मिण्युभयविषयकत्वादव्याप्तिरित्याशङ्क्यार्थः ।

समाधत्ते-एतेषामिति येषां **जीर्णानां** मते लिङ्गपरामर्शोऽनुमानं तेषां मते फलायोगव्यवच्छिन्नं कारणं करणमिति न व्यापारवत्त्वम् । तन्मते निर्व्यापारस्यापि करणत्वात् । अतिव्याप्तिमव्याप्तिं चोद्धरति-**व्यभिचारेति** व्यभिचारज्ञानस्य विरोधी यत्पक्षधर्मताज्ञानं तदेव लिङ्गपरामर्शपदेनोच्यते । तथा च समूहालम्बने व्यभिचारज्ञानविरोधिपक्षधर्मताज्ञानत्वं नास्ति । कथमिति चेत् 'आलोको वह्न्यभाववद्वृत्ति'रिति व्यभिचारज्ञाने सत्यपि धूमो वह्निव्याप्यालोकः पर्वतवृत्तिरिति ज्ञानोदयात् । तथा च व्यभिचारज्ञानविरोधित्वाभावेन समूहालम्बेन नातिव्याप्तिः । व्यतिरेकिण्यव्याप्तिमुद्धरति-**धूमे इति** यथाऽन्वयव्याप्तौ धूमो वह्निव्याप्य इति ज्ञाने विद्यमाने वह्न्यभाववृत्तिर्धूम इति व्यभिचारज्ञानाभावात्। यतो व्याप्यपदमध्ये वह्निसामानाधिकरण्यं धूमे गृहीतं ततो वह्न्यभावसमानाधिकरण्यं ज्ञानं न भवतीति व्यभिचारज्ञानविरोधित्वम् । व्यतिरेकिण्यपि यथा वह्न्यभावव्यापकीभूताभावधूमाभावप्रतियोगि धूमवानयमिति व्यतिरेकी परामर्शे विद्यमाने धूमाभावो वह्न्यभावासमानाधिकरण इति व्यभिचारज्ञानानुदयात् व्यभिचारज्ञानविरोधित्वमुभयोः परामर्शयोरप्यस्तीति[5] । उभयथापीति यदा 'धूमो वह्निव्याप्य' इत्यन्वयपरामर्शे जाते धूमे वह्न्यभावसामानाधिकरण्यं गृहीतुमशक्यम् । अथ च व्यतिरेकिण्यपि वह्न्यभावव्याप्यधूमाभाव इति द्वितीयज्ञाने विद्यमाने धूमो वह्न्यभाववृत्तिरिति ज्ञानानुदयादित्यर्थः ।

भ्रान्तः शङ्कते-**नन्विति** तथा चानुमितिकरणत्वावच्छेदेन लिङ्गपरामर्श इति लक्षणं क्रियते। तेन लक्ष्यतावच्छेदकलक्षणयोर्व्यधिकरणत्वाल्लक्षणं न सम्भवति । लक्ष्यतावच्छेदकमनुमितिकरणत्वमनुमाने तिष्ठति । लिङ्गपरामर्शत्वं च लिङ्गपरामर्शे इति व्यधिकरणता । एतदेवाह अनुमानस्य लक्षणं लिङ्गपरामर्शत्वम् । लक्ष्यतावच्छेदकं चानुमितिकरणत्वम् । उक्तरीत्याऽनयोः सामानाधिकरण्यमित्यर्थः । सामानाधिकरण्यमिति यल्लक्षणं लिङ्गपरामर्शरूपं तदेव लक्ष्यमनुमितिकरणरूपम् । तत्र परामर्शत्वानुनुमितिकरणत्वयोः वृत्तेः सामानाधिकरण्यसत्त्वाच्छङ्काकर्ता भ्रान्त

---

१. B विवक्षान्तरं. २. B यत्र यत्रे. ३. B जलमिति. ४. B अत्रातिव्याप्तिः । ५. B omits इति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः ।

(II) लिङ्गलक्षणम् ।

व्याप्तीति व्याप्तिबलेन व्याप्तिविशिष्टत्वेन यद्गमकं-अर्थज्ञानजनकत्वं तल्लिङ्गमित्यर्थः । लिङ्गलक्षणं पक्षतायामिति व्याप्तिमाशङ्कते-**नन्विति** तथा च व्याप्तिं सहकार(रि)णीं कृत्वा पक्षतयाऽप्यर्थज्ञानंवह्न्यादिज्ञानं जन्यत एवेति **मिश्रमते** पक्षताजन्यत्वे सति परामर्श-जन्यत्वमनुमितिलक्षणम् । सत्यन्तं संशयविपर्ययोत्तरप्रत्यक्षेऽतिव्याप्तिवारणार्थम् । [१]सिषा-धयिषाविरहसहकृतसाधकमानसिषाधयिषाविरहसकृतसिद्ध्यन्योन्याभावः पक्षता । अत्र संशयोत्तरप्रत्यक्षे सिषाधयिषा विरहसहकृतसाधकमानस्य सन्निकर्षस्य सत्त्वान्न पक्षता । यद्यपि सिद्धिभावोऽस्ति तथापि न साधकमानाभाव इति । तथा च यथा लिङ्गस्य धूमादेर्व्याप्तिबलेनार्थगमकत्वं वर्तते तथा पक्षताया अपि व्याप्तिबलेनार्थगमकत्वं वर्तते । धूमपक्षादीनामपि सर्वेषामपि कारणत्वाल्लिङ्गलक्षणं पक्षतायामतिव्याप्तमित्याशङ्क्यार्थः ।

उद्धरति-**व्याप्तिमत** इति तथा च व्याप्तिमत्त्वे सत्यर्थगमकं [२]लिङ्गमिति लिङ्गलक्षणम् । तथा च पक्षतायाः साधकमानाद्यभावरूपायाः प्रतिबन्धकाभावत्वेन कारणत्वं साधकमानाद्यभावे च वह्निनिरूपिता व्याप्तिर्नास्तीति नातिव्याप्तिः । न चेति 'जलं पृथिवीत्ववत्, घटत्वात्'-इत्यत्र घटत्वरूपं लिङ्गस्य व्याप्तिमत्त्वे सति अर्थगमकत्वं वर्तते । तेनातिव्याप्तिरित्यादौ-'ह्रदो वह्निमान्, धूमात्;'-इत्यादौ स्वरूपासिद्धेऽतिव्याप्तिः । **पक्षेति** तथा च तत्र हेतोः पक्षधर्मताभावान्नातिव्याप्तिरित्यर्थः ।

(III) व्याप्तिनिरूपणम् ।

साहचर्येति अत्र नियमपदेनाव्यभिचारित्वमात्रं ग्राह्यम् । तथा चाव्यभिचारित्वे सति यस्य येन समं सहचारस्तत्र तस्य सा व्याप्तिः । यथा यत्र धूमस्तत्र वह्निरित्यं सहचारोऽव्यभिचारविशिष्टो भवतीति वह्निनिरूपिता व्याप्तिः धूमे । अन्यथा नियमपदेनैव व्याप्तिस्वरूपे प्राप्ते सहचारपदं व्यर्थमेव, स्यात् । यद्यव्यभिचारिपदं न दीयते तदा 'धूमवान्, वह्नेरिति व्यभिचारिण्यपि धूमसामानाधिकरण्यरूपसहचारस्य वह्नावपि सत्त्वादतिव्याप्तिः । अत उक्तमव्यभिचारीति । सहचर्यं साध्यसाधनयोः सामानाधिकरण्यम् । तथा च व्यभिचारिभावविशिष्टसाध्यसामानाधिकरण्यरूपा साध्यस्य हेतुनिष्ठापत्तिः । अनेकपदार्थघटितसामानाधिकरण्यरूपः सम्बन्धः, नत्वेक एव पदार्थ इति । गच्छति चेदं लक्षणं 'वह्निमान्, धूमात्'-इत्यत्र । -यथा वह्न्यभाववद्वृत्तित्वे सति वह्निसामानाधिकरण्यं धूमे,-वह्निनिरूपिता व्याप्तिः । न चेदं व्यभिचारिणि गच्छति । तत्र धूमाभाववद्वृत्तित्वे सति साध्यसामानाधिकरण्यं नास्ति। वह्नेः धूमाभाववत्यपि वृत्तिमत्त्वात् । तथा चायं लक्षणार्थः-साध्याभाववद्वृत्तित्वे सति

---

१. B -सहकृतसाधनसिषा.. २. A लिङ्गमिति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

साध्यसामानाधिकरण्यम् । [१]सत्यन्तमात्रोपादानेऽऽकाशेऽतिव्याप्तिः । तद्वारणार्थम् । यथा'ऽयं वह्निमान् आकाशात्,' इत्यत्र स्वरूपासिद्धेऽतिव्याप्तिः । तस्यापि साध्याभाववत्त्यवृत्तित्वात् तस्यावृत्तिपदार्थत्वात् । [२]अत उक्तं साध्यसामानाधिकरण्यपदम् । सत्यन्तं व्यभिचारिण्यतिव्याप्तिवारणायेति ।

ननु नियम एव व्याप्तिः, व्यर्थं साहचर्यपदमिति चेत् न । सिद्धस्य साहचर्यपदस्य [३]गतिश्चिन्तनीयेति न्यायात् । नियमपदेन व्यभिचारमात्रं बोध्यते । साहचर्येण च सामानाधिकरणमात्रम्, उभाभ्यां मिलित्वा व्याप्तिर्बोध्यते । तथा च व्यभिचारः । भावविशिष्टसाध्यसामानाधिकरण्यं व्याप्तिरिति भावः । नियमपदार्थं विचारयति-**नन्विति** स्वशब्देन हेतुः धूमादिः । तत्समानाधिकरणो योऽत्यन्ताभावो घटादीनां तदप्रतियोगि यत्सामानाधिकरण्यं तदधिकरणाधिकरणत्वहेतुनिष्ठा व्याप्तिः । गच्छति चेदं 'वह्निमान् धूमात्' इत्यत्र धूमसमानाधिकरणो योऽत्यन्ताभावो ह्रदत्वादीनां तदप्रतियोगित्वं साध्येवह्नौ, तद्विशिष्ट-अप्रतियोगिविशिष्टस्य वह्नेः सामानाधिकरण्यं वह्न्यधिकरणत्वरूपं[४] धूमे तिष्ठति । न गच्छति चेदं व्यभिचारिणि 'धूमवान् वह्नेः'-इत्यत्र वह्निसमानाधिकरणोऽत्यन्ताभावो यथा द्रव्यत्वादीनां वर्तते तथा धूमस्यापि; तदप्रतियोगी धूमो न भवति । त्तथा तप्तायोगोलके धूमात्यन्ताभावसत्त्वात्प्रतियोगित्वमेव धूमस्येति धूमनिरूपिता वह्निनिष्ठा न व्याप्तिः ।

नन्वत्र स्वपदेन साध्यमेव [५]कथं न स्वीकर्तव्यमिति चेत्, न । व्यभिचारिण्यतिव्याप्तेः । ननु'वह्निमान् धूमात्'-इत्यत्र सद्धहेतावव्याप्ति, धूमसमानाधिकरणो वह्नेरत्यन्ताभावः[६], तथाहि धूमाधिकरणेधूमावयवे वह्नेरत्यन्ताभावसत्त्वेन तदप्रतियोगिभावात् वह्नेरिति चेत्, न । हेतुतावच्छेदकसम्बन्धो न हेत्वधिकरणो ग्राह्यः । प्रकृते तु हेतुतावच्छेदकसम्बन्धो संयोगसम्बन्धः । तेन सम्बन्धेन धूमाधिकरणे महानसादौ वह्नेरत्यन्ताभावो नास्ति । वर्तते च घटादीनाम् । तदप्रतियोगित्वं वह्नावस्तीति नातिव्याप्तिः । येन सम्बन्धेन हेतुः क्रियते सः सम्बन्धो हेतुतावच्छेदक इति । ननु तथापि तत्रैवाव्याप्तिः । कथम् ? संयोगसम्बन्धेन धूमाधिकरणे महानसादौ वह्नेः समवायसम्बन्धेनात्यन्ताभावसत्त्वेन वह्नेः तत्प्रतियोगित्वात्, यद्यपि महानसादौ संयोगसम्बन्धेन वह्निस्तिष्ठति तथापि समवायसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो वह्नेर्धूमाधिकरणे तिष्ठतीति चेत्, न। तर्हि साध्यतावच्छेदकसम्बन्धेन यस्य कस्याप्यभावो हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे ग्राह्यः । प्रकृते तु साध्यतावच्छेदकसम्बन्धो भवति संयोगसम्बन्धः । हेतुतावच्छेदकसम्बन्धोऽपि संयोगसम्बन्धः । **मिश्रैरप्ययमेवार्थो ग्राह्यः** ।

सामानाधिकरण्यं प्रविष्टसम्बन्धपदेनोच्यते । अयमर्थः-यथा ग्राह्यं यत्सामानाधिकरण्यं तत्र प्रविष्टोऽयं सम्बन्धः । तेन सम्बन्धेन हेत्वधिकरणे तेनैव ग्राह्यः, सामानाधिकरण्यप्रविष्टसम्बन्धेनाभावो

१. B असत्यन्त. २. B omits अतः. ३. B repeats गतिश्चिन्तनीया. ४. B -करणरूपं. ५. B तत्कथं. ६. A भावोऽस्तीति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ग्राह्य इति गीयते। प्रकृते तु ग्राह्यं यत्सामानाधिकरण्यं वह्निनिरूपितं-धूमनिष्ठं सामानाधिकरण्यम्, तत्र प्रविष्टो यो सम्बन्धः-संयोगसम्बन्धः। [1]तथा च यत्र संयोगसम्बन्धेन धूमस्तत्र संयोगसम्बन्धेन वह्निरिति। तथा च संयोगसम्बन्धेन धूमाधिकरणे महानसादौ यो योऽत्यन्ताभावस्तदप्रतियतोगित्वं वह्नावस्तीति नातिव्याप्तिरिति।

ननु तथाप्यत्रैव सद्धेतावव्याप्तिः। संयोगसम्बनधेन धूमाधिकरणे महानसादावपि तार्णातार्णोभयवह्न्यभावो वर्तत एव। तथा चोभयत्वावच्छिन्नप्रतियोगिकाभावप्रतियोगित्वाद्वह्नेरव्याप्तिरिति चेत् न। अभावस्य प्रतियोगिव्यधिकरणविशेषितत्वात्। तथा च प्रतियोगिव्यधिकरणहेतुसम्बन्धेन हेत्वधिकरणवृत्तिसाध्यतावच्छेदकसम्बन्धेनात्यन्ताभाव-प्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः। प्रतियोगिवैयधिकरण्यं च प्रतियोग्यधिकरणानधिकरणत्वम्। 'वह्निमान् धूमात्', इत्यत्र धूमाधिकरणे यः तार्णातार्णोभयवह्न्यभावो वर्तते सः प्रतियोगिव्याधिकरणो न भवति। यद्यपि तार्णातार्णोभयत्वं प्रतियोगितावच्छेदकं तथापि प्रतियोगी तु वह्निसामान्य एवैति वह्न्यधिकरणे यो वह्नेरत्यन्ताभावः स तु प्रतियोगिसमानाधिकरण एवेति नाव्याप्तिः।

ननु वा भूतत्वमूर्तत्वोभयवत् मूर्तत्वादित्यत्र व्यभिचारिण्यतिव्याप्तिः कथमिति चेत्, मूर्तत्वसमानाधिकरणप्रतियोगिव्यधिकरणभूतत्वमूर्तत्वोभयाभावो न भवति। मूर्तत्वाधिकरणे मनसि यद्यपि भूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रतियोगिताकाभावो वर्तते तथापि सन् प्रतियोगिव्यधिकरणो मनसि मूर्तत्वरूपप्रतियोगिनः सत्त्वात्। तथा चायं प्रतियोगिसमानाधिकरण एवाभावः। प्रतियोगिव्यधिकरणाभावस्तु मूर्तत्वाधिकरणे मनसि गुणत्वादीनामेव, तदप्रतियोगित्वं च भूतत्वमूर्तत्वोभयं भवति, तत्सामानाधिकरण्यं मूर्तत्वे वरीवर्ति। तता चोक्तं व्यभिचारिण्यतिव्याप्तिरिति चेत्, न। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणस्य विवक्षितत्वात्। उक्तव्यभिचारिणि च यद्यपि मूर्तत्वाधिकरणे मनसि यो वर्तते भूतत्वमूर्तत्वयो उभयाभावः, स प्रतियोगिव्यधिकरणो न भवति मूर्तत्वस्य प्रतियोगिनः त्वत्र सत्त्वात्, तथापि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो भवत्येव। प्रतियोगितावच्छेदकं चोक्तरूपोभयत्वम्। तदवच्छिन्नमुभयं भूतत्वमूर्तत्वरूपम्। तेन सममसमानाधिकरणो भूतत्वमूर्तत्वोभयाभावो भवति। तत्प्रतियोगित्वं चोभस्येति नातिव्याप्तिः।

ननु तथापीदं जलादिद्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्र सद्धेतावव्याप्तिः। यत्र गुणकर्मान्यविशिष्टं सत्त्वं तत्र द्रव्यत्वमस्त्येवेति सद्धेतुः। अव्याप्तिर्यथा-हेत्वधिकरणे गुणादौ यथा घटत्वादीनामत्यन्ताभावो वर्तते, तथा प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि-व्यधिकरणद्रव्यत्वसाध्यात्यन्ताभावोऽपि[2] वर्तते। गुणे[3] यो द्रव्यत्वाभावो वर्तते सः[4]। प्रतियोगितावच्छेदकं यद्द्रव्यत्वं तदवच्छिन्नं भवति द्रव्यम्, तेन समं व्यधिकरणो भवति गुणनिष्ठो द्रव्यत्वाभावः। तत्प्रतियोगित्वं च

१. B repeats this line between तथा च....वह्निरिति। Perhaps a scribal error. २. B द्रव्यरूप॰. ३. B गुण. ४. There might be some word like तथैव after सः in order to complete the reference.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

द्रव्यत्वेऽस्तीत्यत्र द्रव्यत्वाभावप्रतियोगित्वात् द्रव्यत्वस्येत्यतिव्याप्तिरिति चेत्, न । हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वस्य विवक्षितत्वात् । प्रकृते च हेतुतावच्छेदकावच्छिन्नो हेतुर्भवति गुणकर्मान्यत्व-विशिष्टसत्तारूपः । तदधिकरणं च गुणादिकं न भवत्येव । भवति च तदधिकरणं द्रव्यमात्रम् । तत्र द्रव्यमात्रे द्रव्यत्वरूपसाध्याभावो नास्ति । भवति च द्रव्येऽभावो गुणत्वादीनाम् । तदप्रतियोगि भवति द्रव्यत्वम् । तत्सामानाधिकरण्यं च गुणकर्मान्यत्वविशिष्टसत्त्वेऽस्ति । द्रव्यत्वनिरूपिता गुणकर्मान्यत्व-विशिष्टसत्तारूपं(प?)हेतुनिष्ठा व्याप्तिरिति नातिव्याप्तिः ।

ननु तथापि 'वह्निमान धूमात्', इत्यत्रैतावति विवक्षितेऽप्यव्याप्तिः । तथाहि हेतुतावच्छेदक-धूमत्वरूपावच्छिन्नधूमसमानाधिकरणो यः प्रतियोगितावच्छेदि(द)कावच्छिन्न प्रतियोगि-व्यधिकरणः पूर्वक्षणविशिष्टवह्न्यभावो वर्तते । तथा द्वितीयक्षणे पूर्वक्षणविशिष्टो वह्निर्नास्ति । भवति च प्रतियोगितावच्छेदकं [1]पूर्वक्षणविशिष्टवह्नित्वम् । तदवच्छिन्नो भवति च पूर्वक्षणविशिष्टो वह्निः। तेन समं पूर्वक्षणविशिष्टवह्न्यभावो व्यधिकरणो भवति । उत्तरक्षणे पूर्वक्षणविशिष्टवह्नेरसत्त्वात् । तत्प्रतियोगित्वाद्वह्नेरित्यव्याप्तिरिति चेत्, न । हेतुतावच्छेदकावच्छिन्नहेतु-समानाधिकरणप्रतियोगिता-वच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात् यत्राभावप्रतियोगितानवच्छेदकं [2]यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यम् । हेतुतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यनिरूपिता व्याप्तिरित्यर्थः । तेन पूर्वं याऽव्याप्तिर्दत्ता सा न लगति । धूमत्वावच्छिन्नधूमसमानाधिकरणो यो वर्तते प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः पूर्वक्षणवर्तित्वविशिष्टवह्न्याभावः, तस्य प्रतियोगिताच्छेदकं पूर्वक्षणवृत्तित्वविशिष्टवह्नित्वमनवच्छेदकं च साध्यतावच्छेदकं शुद्धं वह्नित्वरूपम् । तदवच्छिन्नो भवति वह्निः । तत्सामानाधिकरण्यं धूमेऽस्तीति नाव्याप्तिः । इत्यलं विस्तरेण । अधिकं **शिरोमणिटिप्पणे** ज्ञेयम् ।

प्रकृतं प्रस्तूयते **स्वसमानाधिकरणेति** अत्र दूषणं यथाश्रुते उद्भावयति-**इदमिति** भवति चायं सद्धेतुः । 'यत्र द्रव्यत्वं तत्र तत्र संयोगः ।'-इयं दैशिकी व्याप्तिः । द्रव्यत्वसमानाधिकरणो यथा गुणत्वादीनामत्यन्ताभावस्तथा संयोगात्यन्ताभावोऽपि वर्तते । संयोगस्याव्याप्यवृत्तित्वात् । तस्य प्रतियोगी भवति संयोगः । ततः स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वाभावादव्याप्तिरित्यर्थः । तथा च 'वृक्षःकपिसंयोगी । एतत्त्वात्' । इत्यत्र सद्धेतावव्याप्तिः । यथा एतत्त्वाधिकरणे वृक्षे कपिसंयोगात्यन्ताभावस्य मूलानवच्छेदेन सत्त्वात् । 'वृक्षः कपिसंयोगी, द्रव्यत्वात् ।' अयं हेत्वाभासः, घटादौ व्यभिचारात् ।

---

१. B -भवति पूर्व॰. २. तत्सा॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वस्तुतः व्याप्तेर्लक्षणान्तरमाह-**साध्यात्यन्ताभावेति** साध्यात्यन्ताभाववान्योपदार्थः तत्रेदंगामित्वं तद्वृत्तित्वं हेतौ व्याप्तिरित्यर्थः । इदं दूषयति-**घट इति** - अत्रभिधेयत्वं साध्यम्, प्रमेयत्वं हेतुः । अभिधेयत्वात्यन्ताभावोऽप्रसिद्ध इति [१]तद्घटितसाध्यात्यन्ताभावगामित्वमप्यप्रसिद्धं स्यादित्यर्थः ।

ननु [२]तथापि 'घटोऽभिधेयः'-इत्यत्राप्यभिधेयत्वाभावः समवायसम्बन्धादिना प्रसिद्ध एवेति चेत्, न । साध्यतावच्छेदकसम्बन्धेन साध्याभावो विवक्षितः । हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्गामित्वं विवक्षितम् । यथा 'घटोऽभिधेयः'-इति । अत्र साध्यतावच्छेदकसम्बन्धो भवति स्वरूपसम्बन्धः, स्वतः स्वरूपसम्बन्धेनाभिधेयत्वाभावस्याप्रसिद्ध्याऽव्याप्तिरित्यर्थः । हेतुतावच्छेदकसम्बन्धविवक्षया तु व्यभिचारिणि नातिव्याप्तिः । यथा 'धूमवान्, वह्नेः'-इत्यत्र साध्यतावच्छेदकसम्बन्धेन संयोगसम्बन्धेन साध्याभाववद्भवत्ययोगोलकम् । तत्र हेतुतावच्छेदकसम्बन्धेन संयोगसम्बन्धेनायोगोलकवृत्तित्वस्य सत्त्वान्नातिव्याप्तिः ।

ननु समवायतया वाच्यत्वाभावो घट एव प्रसिद्ध इति चेत्, न । व्यभिचारात् । तथा हीदं वाच्यम्-'ज्ञेयत्वात्' इत्यत्र समवायतया वाच्यत्वाभावाधिकरणे [३]घटत्वस्य ज्ञेयस्य सत्त्वात् । ननु पारिभाषिकमेवाव्यभिचरितत्वं वक्तव्यम् । यथा यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणाः यद्(द?)व्यभिचारितत्वं व्याप्तिः । यत्पदेन हेतुः-तत्समानाधिकरणाः हेत्वधिकरणकरणाः । साध्यतावच्छेदकावच्छिन्नस्य व्यापकतावच्छेदिका प्रतियोगिता येषामभावानां-तादृशा अभावा ग्राह्याः । तेषां य प्रतियोगी तेन समं सामानाधिकरण्यं हेतोः यथा चेदं गच्छति चेदं (?) 'वह्निमान् धूमात्' अत्र यथा धूमसमानाधिकरणः साध्यवह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावो भवति घटत्वेन वह्न्यभावः । यत्र यत्र वह्नित्वावच्छिन्नो वह्निः तत्र तत्र घटत्वेन वह्न्यभावप्रतियोगी । तथा च वह्निनिष्ठा या प्रतियोगिता साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका [४]जाता । एतादृशाभावस्य प्रतियोगी यो वह्निलक्षणस्तेन समं धूमस्य सामानाधिकरण्यं तिष्ठति । परं धूमसमानाधिकरणो वह्नित्वावच्छिन्नप्रतियोगिताकोऽभावास्तु न सम्भवत्येव । तस्य वह्न्यधिकरणत्वात् । हेत्वधिकरणे पर्वतादौ व्यधिकरणधर्मावच्छिन्न प्रतियोगिताकाभाव एवायास्यति । स च घटत्वादिना वह्न्यभाव इति सद्धेतौ लक्षणं गतम् । न गच्छति चेदं व्यभिचारिणि । यथा 'धूमवान् वह्नेः', इत्यत्र वह्निसमानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्याप्त्यवच्छेदकप्रतियोगिताकाभावानां मध्ये यथा घटत्वेन धूमाभावो भवति तथा धूमत्वावच्छिन्नप्रतियोगिताकाभावोऽपि भवति । तथा यत्र यत्र धूमत्वावच्छिन्नो धूमस्तत्र तत्र धूमत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगी भवति धूमः । तत्सामानाधिकरण्यं हेत्वधिकरणावच्छेदेन वह्नौ नास्ति । अयोगोलके

१. B तदुदितसा॰. २. B तथा 'घटो॰. ३. B घटादौ. ४. B जातिः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

धूमादि[अ]भावात् । धूमसामानाधिकरण्याभावात् व्यभिचारिणि न गच्छति । गच्छति चेदं-'घटोऽभिधेयः, प्रमेयत्वात्', इत्यत्र प्रमेयत्वस्य समानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकप्रतियोगिताको भवति । घटत्वेनाभिधेयत्वाभावे तस्य च यत्र यत्राभिधेयत्वावच्छिन्नमभिधेयत्वं तत्र तत्र घटत्वेनाभिधेयत्वाभावप्रतियोग्यभिधेयत्वमेव । तत्सामानाधिकरण्यं च प्रमेयत्वे तिष्ठतीति तत्रापि व्याप्तिलक्षणगमनम् । व्यधिकरणधर्मावच्छिन्नप्रति-योगिताकाभावमादाय लक्षणसामञ्जस्यमिति भावः ।

ननु 'यत्'पदेन साध्यमेव कथं न ग्राह्यमिति चेत्, न । अङ्गुलिद्वयसंयोगोऽभाववानाकाशा-दित्यत्र साध्यो भवत्यङ्गुलिद्वयसंयोगाभावः । तथा च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताका[१]भावोभवत्यङ्गुलिद्वयसंयोगाभावाभावोऽङ्गुलिद्वयसंयोगरूपः । यत्र यत्राङ्गुलिद्वयसंयोगा-भावत्वावच्छिन्नाङ्गुलिद्वयसंयोगाभावाभाव प्रतियोगीति, एतादृशाभावस्य प्रतियोगी भवत्यङ्गुलिद्वय-संयोगाभावाभावः । तेन समं हेतोराकाशाभावस्य हेत्वधिकरणावच्छेदेन आकाशत्वाधिकरणावच्छेदेन समानाधिकरण्याभावादव्याप्तिः । तदर्थं हेतुपदं कृतम्[२] । तथा च हेतुसमानाधिकरणाकाशाभाव-समानाधिकरणः अङ्गुलिद्वयसंयोगाभावत्वावच्छिन्नप्रतियोगिताकोऽभावो नास्ति । कथम् ? अङ्गुलिद्व-यसंयोगत्वाभावत्वावच्छिन्नप्रतियोगिताकाभावस्याङ्गुलिद्वयसंयोगरूपत्वात् । तथा चैतादृशोऽभावो गुणत्वेन वाच्यत्वाभावो ग्राह्यः । भवति चायं साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदक-प्रतियोगिताकः । यत्र यत्राङ्गुलिद्वयसंयोगाभावत्वावच्छिन्नोऽङ्गुलिद्वयसंयोगाभावस्तत्र तत्र गुणत्वेन वाच्यत्वाभावप्रतियोगी भवति वाच्यत्वम्, तत्सामानाधिकरण्यं हेत्वधिकरणावच्छेदेन समानाधिकरण्यं तिष्ठत्याकाशाभावे इति पूर्वानुमाने नातिव्याप्तिः ।

ननु 'यत्'पदं न दातव्यमेवेति चेत्, न । 'आत्मा, ज्ञानात्' इत्यत्र सद्धेतौ तददानेऽव्याप्तिः। तथाहि हेतुसमानाधिकरणपदत्यागे 'आत्मा, ज्ञानात्' इत्यनुमाने यथाऽऽत्मत्वं साध्यं तथा चात्मावच्छिन्नव्यापकताऽवच्छेदकप्रतियोगिताकाभावः आत्मत्वावच्छिन्नप्रतियोगिताकाभावः । तथाहि 'यत्र यत्रात्मत्वावच्छिन्नात्मत्वं तत्र तत्रात्मत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोग्यात्मत्वरूपं-' तत्सामानाधिकरण्यमात्मत्वाभावविशिष्टहेत्वधिकरणावच्छेदेन ज्ञाने [३]स्वविशिष्टहेत्वसमाना-धिकरणाप्रसिद्धथाऽव्याप्तिः । तद्वारणार्थं-'यत्समानाधिकरणं[४]' पदम् । न च हेतुसमानाधि-करणपददाने[५] 'वह्निमान् धूमात्' इत्यत्राव्याप्तिः, यथा साध्यतावच् छेदकप्रतियोगिताकाभावो वह्नित्वावच्छिन्नप्रतियोगिताकाभावो भवति, यथा 'यत्र यत्र वह्नित्वावच्छिन्नो वह्निः, तत्र तत्र वह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगी वह्निरूपः' तत्सामानाधिकरण्यं [६]वह्न्यभावविशिष्ट-

१. B प्रतियोगिताकोऽभा॰. २. B कृत्य(त्वा ?). ३. B ज्ञाने हेत्वधिकरणा॰. ४. B स्वविशिष्टयत्सामा॰. ५. B पदादाने. ६. omits वह्नि॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

धूमाधिकरणप्रसिद्ध्या वह्न्यभावविशिष्टहेत्वधिकरणावच्छेदेन धूमो वा।ऽस्तीति वाच्यम् । धूमाधिकरणस्यापि कालिकसम्बन्धेन वह्न्यभावाधिकरणत्वात् जन्यमात्रस्य कालोपाधित्वात् । यथा वह्न्यभावेन समं काल[१] एव सम्बन्धः-इदानीं वह्न्यभाव इत्यत्रास्मिन्क्षणे वह्न्यभावः प्रतीयते । तथा च [२]पर्वतादीनामपि क्षणत्वात् पर्वतवतित्वं वह्न्यभावस्य वर्तत एव । तथा च 'वह्निमान् धूमात्'-इत्यत्रैव नाव्याप्तिरिति समाधानम् । तथा च यत्समानाधिकरणात्मा ज्ञानात्, इत्यत्रैवाव्याप्तिरिति ध्येयम्। यत् पदं हेतुतावच्छेदकावच्छिन्नपरं तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादिति [३]सद्धेतौ नातिव्याप्तिः । अन्यथा हेत्वधिकरणे गुणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावो भवति । यथा 'यत्र यत्र द्रव्यत्वावच्छिन्नं द्रव्यत्वं तत्र तत्र द्रव्यत्वत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगि' तत्सामानाधिकरण्यं द्रव्यत्वाभावविशिष्टगुणकर्मान्यत्वविशिष्टसत्ताधिकरणावच्छेदेन नास्तीत्यव्याप्तिरेव स्यात् । तद्वारणार्थं हेतुतावच्छेदकावच्छिन्नपरं 'यत्'-पदं कृतम् । तथा च हेतुतावच्छेदकं गुणकर्मान्यत्वं-तद्विशिष्टं यत्सत्त्वम्, तदधिकरणादिकं गुणादिकं न भवयत्येव । भवति च द्रव्यमेव । तथा च[४] हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणे द्रव्ये साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताको भवति घटत्वेन द्रव्यत्वाभावः । यथा-'यत्र यत्र द्रव्यत्वावच्छिन्नं द्रव्यत्वं तत्र[तत्र]-घटत्वेन द्रव्यत्वाभावप्रतियोगिद्रव्यत्वं रूपं-' तत्सामानाधिकरण्यं हेत्वधिकरणावच्छेदेन गुणकर्मान्यत्वविशिष्टसत्त्वे तिष्ठतीति नातिव्याप्तिः ।

वस्तुतस्तु यदि 'यत्'-पदं हेतुतावच्छेदकावच्छिन्नपरं न क्रियते तदा-'इदमाकाशम्, अष्टद्रव्यातिरिक्तद्रव्यत्वात्,' इत्यत्रैवाव्याप्तिः स्यात् । न पूर्वत्रानुमाने । ननु प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं किमिति चेत्, अत्राहुः-'**वह्निमान धूमादिति** अत्र यो वर्तते घटत्वेन वह्नयभावस्तत्प्रतियोगिता वह्निनिष्ठा । तत्र तादृशावच्छेदकत्वं[६] साध्यमिदं वह्नित्वावच्छिन्नवह्निसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वम् । तथा च वह्नित्वा-वच्छिन्नवह्न्यधिकरणो-घटत्वेन वह्न्यभावप्रतियोगिता या वर्तते वह्नौ, तया प्रतियोगितया-वह्नेरभावो नास्ति । वह्न्यधिकरणे प्रतियोगितावच्छिष्टस्य वह्नेः सत्त्वात् । वर्तते च वह्नि-समानाधिकरणोऽत्यन्तोभावो ह्रदत्वादीनाम् । तस्य प्रतियोगितानवच्छेदिका वह्निनिष्ठा प्रतियोगिता जाता । इदमेव व्यापकतावच्छेदकत्वं तत्र तिष्ठतीति सर्वत्रैव साध्यतावच्छेदावच्छिन्नसाध्यसामानाधि-करणात्यन्ताभाव-प्रतियोगितानवच्छेदकत्वमेव । तादृशसाध्यव्यापकतावच्छेदकत्वं निर्व्यूढमिति दिक् ।

तथा चेदं लक्षणं व्यधिकरणधर्मावच्छिन्नाभावघटितं जातम् । एतन्न संभवति । व्यधिकरणधर्मावच्छिन्नाप्रतियोगिका भावानङ्गीकारात् ।

---

१. B सम्बन्धे and A omits काल एव. २. and ३. B omits च. ४. B -हेतौ. ५. This प्रतीक comes after the six प्रतीकs that follow in the available text of त. भा. प्र. ६. B -त्वमिति वह्नित्वा॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु गोविशिष्टशृंगं नास्तीति प्रतीत्या सिध्यति, अत्र व्यधिकरणो धर्मो भवति शशीयत्वं-तस्य शृंगो (गे)ऽवर्तमानत्वात्-व्यधिकरणत्वं तदवच्छिन्नप्रतियोगिताकाभावः -प्रतीयते इति चेत्, न । एतत्प्रतीतेरसिद्धेः । कथमिति चेत्, शशीयत्वावच्छिन्नंशृंगं बाधितमित्यन्यथा व्याख्येयम् । गवि शशशृङ्गं नास्तीति [१]प्रतीतेः शृङ्गत्वावच्छिन्नाभावविषयत्वात् । तथा च [२]गवाधिकरणकं शृङ्गं शशे[३] नास्तीत्यर्थः । [४]अयं भावः-समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव एव शृङ्गनिष्ठप्रतियोगिता-समानाधिकरणो धर्मो भवति शृङ्गत्वरूपः । तदवच्छिन्नप्रतियोगिताकोऽयमभावः । तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽभावोऽसिद्धः । यतोऽभावः प्रतियोगिनः सत्त्वविरोधि भवति । यथाऽत्राधिकरणे घटेऽस्ति, तत्र तदभावो नास्ति । तयोः परस्परं विरोधात् । तथा प्रकृते यत्राधिकरणे शृङ्गं तिष्ठति तत्र शृङ्गाभावो वक्तुमशक्यः ।

न च शृङ्गाधिकरणे शृङ्गत्वावच्छिन्नप्रतियोगिताकोऽभावो विरुद्धः, न तु शशीयत्वावच्छिन्नप्रतियोगिताकाभावोऽपि तस्य[५] [६]व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वादिति वाच्यम् । यदि घटत्वेन पटो नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोऽतिरिक्तः सिध्यति तदा पटत्वावच्छिन्ने घटे घटत्वं नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्न(न्ना)धिकरणताकोऽप्यभावोऽतिरिक्तः सेत्स्यतीति। यथा घटाधिकरणेऽपि भूतले पटत्वेन घटो नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावः स्वीक्रियते भवता, तथा घटत्वाधिकरणेऽपि[७] घटे पटत्वावच्छिन्ने घटे घटत्वं नास्तीति प्रतीत्या व्यधिकरणो धर्मो भवति पटत्वम् । तेन घटनिष्ठाधिकरणता विच्छिद्यते । अतो व्यधिकरणधर्मावच्छिन्नाधिकरणताकोऽभावोऽतिरिक्तः स्वीकर्तव्य [८]एव, तुल्यन्याययात् ।

न च तत्र पटत्वाभाव एव प्रतीयते इति वाच्यम् । तदा प्रकृतेऽपि तुल्यन्यायेन घटाधिकरणे भूतलादौ पटत्वाभाव एव प्रतीयते । घटाभावस्य तत्रे बाधितत्वात्-[इ]ति व्यधिकरणधर्मावच्छिन्न प्रतियोगिताकाभावः सिद्धयति ।

नन्वभावं प्रति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वं विरोधि, न तु प्रतियोगिमात्रम् । यथा घटाभावं प्रति घटत्वावच्छेदकावच्छिन्नघटसत्त्वमभावविरोधि । यत्र भूतले घटत्वावच्छिन्नो घटस्तिष्ठति तत्र भूतले घटत्वावच्छिन्नप्रतियोगितासंसर्गेण घटाभावो नास्ति । घटवत्यपि भूतले पूर्वक्षणवृत्तित्वविशिष्टघटो नास्ति । अन्यथा विशिष्टाभावोऽतिरिक्तो न सिध्येत् । तथा घटत्वेन पटो नास्तीत्यत्र घटाभावं प्रति प्रतियोगितावच्छेदकं घटत्वं, तदवच्छिन्नो यो पटः, स विरोधी स्वीक्रियते । यत्र भूतले घटत्वावच्छिन्नो पटस्तिष्ठति तत्र भूतले घटत्वेन पटाभावो मा तिष्ठतु । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वस्याभावविरोधत्वात् । अत एव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य

१. B प्रतीयते. २. B गव्याधिक.. ३. B शशे शृङ्गं नास्ती.. ४. B अयं वा भावः- ५. B तस्याव्यधि.. ६. B -धर्मावच्छिन्नः । यदि घटत्वेन. ७. B omits अपि. ८. B omits एव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

केवलान्वयित्वम् । यतो विरोधिनः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनः कुत्राप्यसत्त्वात् । यथा घटत्वेन पटो नास्तीत्यत्र प्रतियोगितावच्छेदकं घटत्वं तदवच्छिन्नो पटः, तस्य चैतादृशपटस्याप्रसिद्ध-त्वात् । यदि चैतादृशः पटः कुत्रचित्तिष्ठेत् तदा तदभावो न तिष्ठेत्तस्मात् घटत्वेन पटाभावः सर्वत्राप्यस्तीति केवलान्वयी व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव इति । तथा च भूतलत्वादिधर्मितावच्छेदकीकृत्य घटत्वांशेऽन्याप्रकारकत्वेन घटत्वेन रूपेण घटाभावज्ञानं प्रति भूतलत्वादिधर्मितावच्छेदकीकृत्य घटत्वेन रूपेण घटज्ञानं प्रतिबन्धकम् । यथा 'भूतले घट' इत्यत्र भूतलत्वं धर्मितावच्छेदकम् । धर्मि च भूतलम् । तत्र घटत्वेन रूपेण घटज्ञानं यदाऽनया रीत्या प्रवृत्तम्, तत्रैव भूतले भूतलत्वं धर्मितावच्छेदकीकृत्य भूतले घटो नास्तीत्यत्र घटत्वांशेऽन्याप्रकारकत्वात् । तथा च भूतले घट इति ज्ञानं भूतले घटो [ना]स्तीति ज्ञानस्य प्रतिबन्धकम् । यदि भूतलत्वादिकं धर्मितावच्छेदकीकृत्येति पदं न वाच्यं तदा 'प्रमेयो घट' इत्येतादृशे ज्ञाने विद्यमानेऽपि भूतले घटो नास्तीति प्रतीत्युदयात् यद्यपि तत्रैव भूतले प्रमेयत्वेन [1]रूपेण घटज्ञानं जातं तथापि भूतलत्वरूपेण भूतले घटज्ञानं जायते । अतो धर्मितावच्छेदकीकृत्येति पददानमिदं प्रतिबन्धकभागे सार्थकम् ।

प्रतिबध्यदेशे अभावदेशे यत्-पदं यदि न दीयते तदा घट[2] इत्येतादृशज्ञाने जायमाने द्रव्येत्वेन रूपेण तस्मिन्नेव भूतले घटाभावप्रतीत्युदयात्-यथा द्रव्ये घटो नास्तीति प्रतीत्युदयात्, तथा च समानप्रकारकत्वेनैव प्रतिबध्यप्रतिबन्धकभाव इति **नवीनाः** । तथा च भूतले घट इति ज्ञानं भूतले घटो नास्तीति ज्ञानं प्रति प्रतिबन्धकम् । न च- भूतले घट इति ज्ञाने सत्यपि घटाभाववदिति ज्ञानापत्तेः समानप्रकारकत्वेनैव प्रतिबध्यप्रतिबन्धकभावस्वीकारात् । अत्र तु समानप्रकारता नास्तीति । भूतले घट इत्यत्र प्रतियोगिदिशि भूतलं भवति प्रकारः, घटो भवति विशेष्यम्; घटाभावो भवति प्रकारः, ततः समानप्रकारता नास्ति, तेनैतादृशं ज्ञानं भवत्येवेति-वाच्यम् । भूतले घट इत्येतादृशज्ञानान्तरं भूतलं घटवदिति ज्ञानं स्वीकर्तव्यमेव । तदनन्तरं भूतलं घटाभाववदिति ज्ञानं न भवत्येव, प्रतिबन्धकस्य सत्त्वात् । अन्यथाऽनुपपत्त्या भूतलं घटवदिति मध्ये ज्ञानं कल्प्यते । तथा च प्रकृते घटत्वेन पटो नास्तीत्यत्र समानप्रकारकत्वेनैव प्रतिबध्यप्रतिबन्धकभावोऽपि वाच्यः । यथाऽन्यत्राभावप्रतीतौ समानप्रकारकत्वेनैव प्रतिबध्यप्रतिबन्धकभावः स्वीक्रियते, तथा व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभावे (वो)ऽपि वाच्यः ।

इदं **नवीन**मतं न संभवति । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे घटत्वेन पटो नास्तीत्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यसत्त्वेन ज्ञानासम्भवात् । प्रतियोगितावच्छेदकं घटत्वम् । तदवच्छिन्नपटाप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिता[3]काभावाप्रसिद्धिः । तथा च 'घटत्वेन पटो नास्ति'-इति प्रतीतौ पटवति पटाभावसत्त्वेन विशेषणत्वेनैव रूपघटत्वस्याभावो

१. B omits रूपेण. २. B घटज्ञाने जायमाने. ३. B -काभावसिद्धिः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विषयीभूतो भवति । यथा 'शिखी विनष्ट' इत्यत्र पुरुषे विद्यमाने शिखाभाव [१]एव कल्प्यते, न तु पुरुषध्वंस इति व्यधिकरण धर्मावच्छिन्नप्रतियोगिताकाभावोऽपि न स्वीकार्य इति सिद्धमिति दिक् ।

अत एवेति यतः साध्यात्यन्ताभाववद्वामित्वं न लक्षणं केवलान्विन्यव्याप्तेः, तथा साध्यवतो योऽन्योन्याभावः तद्वत्त्वगामित्वमवृत्तित्वहेतोरित्यर्थः । यथा 'वह्निमान् धूमात्' इत्यत्र साध्यवान्वह्निमान् तदन्योन्याभाववान् भवति ह्रदः । तदवृत्तित्वं धूमेऽस्ति यथा 'ह्रदो न वह्निमान्' इति केवलान्वयिन्यव्याप्तेः । 'घटोऽभिधेयः, प्रमेयत्वात्'-इत्यत्र साध्यं भवत्यभिधेयत्वं तद्धेतु र्भवति प्रमेयमात्रम्, अभिधेयत्ववदन्योन्याभावोऽप्रसिद्ध इत्यर्थः ।

केवलान्वयिन्यव्याप्तिवारणार्थं लक्षणान्तरमाह-**स्वेति** स्वशब्देन हेतुः, तत्समानाधिकरणः, हेत्वधिकरणे योऽत्यन्ताभावः कीदृशः सः ? प्रतियोगिव्यधिकरणः प्रतियोगिना समं योऽभावो व्यधिकरणी भवति-यत्राधिकरणे प्रतियोगी तिष्ठति तत्र सोऽभावो न तिष्ठतीति यावत् । तस्यात्यन्ताभावस्याप्रतियोगि यत्साध्यं तत्सामानाधिकरण्यं हेतौ व्याप्तिरित्यर्थः । यथा 'वह्निमान् धूमात्' इत्यत्र धूमसमानाधिकरणः प्रतियोग्यसमानाधिकरणो ह्रदत्वाद्यभावः तस्याप्रतियोगि भवति वह्निरूपः (पं) साध्यम् । तेन सामानाधिकरण्यं धूमेऽस्तीति । न गच्छति चेदं 'धूमवान् [२]वह्ने'रित्यत्र वह्निसमानाधिकरणात्यन्ताभावप्रतियोगित्वाद्धूमस्य । गच्छति चेदं केवलान्वयिनि-'घटोऽभिधेयः, प्रमेयत्वात्-' इत्यत्र प्रमेयत्वसमानाधिकरणेऽत्यन्ताभावःप्रतियोगिव्यधिकरणो घटत्वादीनामत्यन्ताभावः, तदप्रतियोगि भवत्यभिधेयत्वम्, तत्सामानाधिकरण्यं प्रमेयत्वेऽस्तीति प्रतियोग्यसमानाधिकरणपदमत्यन्ताभावविशेषणम् । [३]यदा प्रतियोग्यसामनाधिकरण्यपदं न दीयते तदा चायं वृक्षः कपिसंयोगी, एतद्वृक्षत्वात्' इत्यत्र सद्धेतावव्याप्तिः स्यात् । यथा एतद्वृक्षत्वसमानाधिकरणो यथा घटादीनामभावो वर्तते तथा कपिसंयोगस्यापीति तत्प्रतियोगित्वं कपिसंयोगस्य नास्तीति । तथा च कपिसंयोगाभावस्तु प्रतियोगिव्यधिकरणो न भवति । प्रतियोगिव्यधिकरणो हेत्वधिकरणे घटादीनामेव । तदप्रतियोगित्वं कपिसंयोगस्यास्तीति[४] [अ]व्याप्तिः । तेन हेतोरिति । केचित्तु 'घटः संयोगी, द्रव्यत्वात्' इत्यत्र प्रतियोगिव्यधिकरणपददानेऽव्याप्तिः । यथा द्रव्यत्वसमानाधिकरणोऽभावो वर्तते संयोगस्य संयोगोऽपि वर्तते द्रव्यत्वावच्छेदेन संयोगावृत्तेस्तस्याव्याप्यवृत्तित्वादिति । तप्रतियोगित्वं च संयोगस्येत्यव्याप्तिः । तन्न । द्रव्ये संयोगसामान्याभावस्वीकारात् । यद्यपि संयोगविशेषाभावस्तत्तत्संयोगाभावस्तिष्ठति तथापि संयोगसामान्याभावो द्रव्ये नास्तीत्यव्याप्तिः भवतीति ।

वस्तुतस्तु 'वह्निमान् धूमात्'-इत्यत्रैव व्याप्तेः किं प्रसिद्धानुमानेनान्यत्र धावनम् ? तथाहि धूमसमानाधिकरणो वह्नेरप्यत्यन्ताभावस्तिष्ठत्येव । संयोगसम्बन्धेन द्रव्यस्याप्यव्याप्यवृत्तित्वात् ।

---

१. B omits एव. २. A वह्निरित्यत्र. ३. B omits the reading between यदा प्रति०.....न दीयते. ४. A संयोगस्य नास्तीति व्याप्तिः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

धूमाधिकरणे पर्वते किञ्चिद्देशावच्छेदेन वह्न्यभावोऽपि तत्प्रतियोग्येव वह्निरस्ति । लक्षणे तु यथाश्रुतदेशपदं पदत्वं (प्रदत्तं ?) नास्तीति ।

ननु द्रव्यस्य संयोगसम्बन्धेनाव्याप्यवृत्तित्वे किं, प्रमाणमिति चेत्-'नितम्बे हुताशनो, न शिखरे' इति प्रतीतिरेव प्रमाणम् । तथा 'कोणे सन्नहं मध्ये तिष्ठामी'ति प्रतीत्या द्रव्यस्याव्याप्यवृत्तित्वमिति । यदि प्रतीतिबलादपि न द्रव्यस्याव्याप्यवृत्तित्वं तदा तद्बलात् संयोगस्याप्यव्याप्यवृत्तित्वं न सिध्येदिति ।

इदं लक्षणं व्यभिचारिण्यतिव्याप्त्या दूषयति-**अयमिति** वृक्ष इति शेषः । यत्र यत्र सत्त्वं तत्र तत्र संयोगसामान्याभावो नास्ति । द्रव्ये व्यभिचारात् । द्रव्ये कालाकाशादिसंयोगसत्त्वादिति सत्त्वं हेतुर्व्यभिचारी भवति । अत्रातिव्याप्तिं स्पष्टयति-**द्रव्यं इति** सत्त्वसमानाधिकरणः प्रतियोगिव्याधिकरणोऽभावो भवति संयोगसामान्याभावाभावः, '[1]संयोगरूपाभावाभावस्य भावत्वात् सत्त्वाधिकरणे द्रव्ये वर्तते । यथा 'घटः संयोगसामान्या[भावा]भाववान्, सत्त्वात्', इत्यत्र सत्त्वाधिकरणं भवति घटः । तत्रात्यन्ताभावो वर्तते संयोगसामान्याभावस्य संयोगरूपः । तस्य प्रतियोगी भवति संयोगविशेषभावोऽपि पटादिसंयोगाभावोऽपि । तेन समं सामानाधिकरण्यं संयोगसामान्याभावाभावस्य संयोगरूपस्येति ।

तथा च य- सत्त्वसमानाधिकरणः संयोगसामान्याभावाभावरूपः संयोगः, स च यावत्प्रतियोगिव्यधिकरणो न भवति, यथा संयोगसामान्याभावाभावस्य संयोगरूपस्य प्रतियोगिद्वयं भवति संयोगसामान्याभावः, संयोगविशेषाभावश्च । यद्यपि संयोगसामान्याभावेन प्रतियोगिना समं संयोगरूपेणाभावो व्यधिकरणो भवति, तथापि संयोगविशेषाभावेन समं समानाधिकरणो भवति । यत्र द्रव्ये संयोगसामान्याभावाभावः संयोगलक्षणः तिष्ठति, तत्रैव द्रव्ये संयोगविशेषाभावस्तिष्ठति । घटादिसंयोगाभावस्य तत्र[2] सत्त्वात् । तेनायं संयोगसामान्याभावः संयोगरूपो वर्तते । यः सत्त्व हेतुसमानाधिकरण सः प्रतियोगिव्यधिकरणो न भवति । प्रतियोगिव्यधिकरणाभावस्तु गुणत्वादीनामेव । तस्य प्रतियोगी भवति संयोगसामान्यभावः साध्यः । तत्सामानाधिकरण्यं हेतौ तिष्ठतीति । तथा च हेतुसमानाधिकरणाभावस्य यदि यावत्प्रतियोगिप्यधिकरणत्वं विवक्ष्यते तदोक्तानुमाने संयोगसामान्याभावसाधाके [3]सत्त्वे हेतावतिव्याप्तिरिति ।

अयमत्र भावार्थः-सत्त्वसमानाधिकरणो यः संयोगः सामान्याभावाभावः संयोगलक्षणः तस्य प्रतियोगिद्वयं भवति । संयोगसामान्याभावः संयोगत्वावच्छिन्नप्रतियोगिताको भावः यथा-ऽऽकाशे रूपाभावः । अथ च द्वितीयः संयोगविशेषाभावो घटसंयोगाद्यभावः, यथा-घटत्वावच्छिन्न-

१. B omits संयोगरूप and reads अभावाभावस्य. २. B omits तत्र. ३. B सत्त्वहेतावति॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रतियोगिताका भावस्य घटसामान्यं प्रतियोगि, घटविशेषोऽपि नीलघटादिप्रतियोगी, तथा प्रकृतेऽपि यत्र संयोगो द्रव्ये वर्तते तस्य प्रतियोगी संयोगसामान्याभावरूपो यद्यपि नास्ति तथापि[1] यः कश्चित्प्रतियोगी पटसंयोगाभावादिद्रव्ये तिष्ठतीति प्रतियोगिसमानाधिकरण एवैतादृशोऽभावस्तत्र गुणत्वादीनामेव, स च द्रव्ये प्रतियोग्यसमानाधिकरण एव द्रव्ये गुणत्वाभावोऽस्ति । तस्य प्रतियोगिगुणत्वम्, तेन समं गुणत्वाभावस्य सामानाधिकरण्यं नास्तीति । अत एव प्रतियोग्यसमानाधिकरणोऽयमभाव-स्तस्या-प्रतियोगि भवति साध्यम् । तत्सामानाधिकरण्यं हेतावस्तीत्यतिव्याप्तिः । एतद्वारणार्थं यत्किञ्चित्प्रति-योग्यसामानाधिकरण्यं वक्तव्यम् । अतो नातिव्याप्तिः ।

यद्यपि संयोगसामान्याभावाभावो यावत्प्रतियोग्यसमानाधिकरणो न भवति [2]तथापि यत्किञ्चित्प्रतियोग्यसमानाधिकरणो भवति, यत्किञ्चित्प्रतियोगि च संयोगसामान्याभावरूपम्, तेन च समसमानाधिकरणो भवति संयोगरूपः साध्यभावः । तत्प्रतियोग्येव संयोगसामान्याभावरूपं साध्यम् । अतो नातिव्याप्तिः । यावत्प्रतियोग्यसामान्याधिकरण्यं यद्यभावविशेषणं [3]तदोक्तानुमानेऽतिव्याप्तिः ।

यत्किञ्चित्प्रतियोग्यसामानाधिकरण्यविवक्षायां तु दोषमाह-**अयं संयोगविशेषाभाववानिति** अयं सद्धेतुः । यथा यत्र यत्र सत्त्वं तत्र समानाधिकरणः संयोगविशेषाभावाभाव इति व्याप्तेः । अत्र सत्त्वहेतुसमानाधिकरणः संयोगविशेषाभावाभावः संयोगलक्षणो वर्तते । तस्य प्रतियोगिनः भवन्ति घटसंयोगविशेषाः, भावादयः तेषां प्रतियोगी भवति यः कश्चित्घटसंयोगविशेषाभावः तेन समं समानाधिकरणो भवति संयोगविशेषाभावाभावरूपः संयोग इति यावत् । तस्य प्रतियोगी भवति संयोगविशेषाभावः साध्यरूपः । तथा च हेतुसमानाधिकरण-प्रतियोग्यसमानाधिकरणा-त्यन्ताभावप्रतियोगित्वात्, साध्यस्येत्यव्याप्तिरित्यर्थः ।

वस्तुतस्तु 'दण्डीमान्, दण्डसंयोगात्', इत्यत्र सदनुमानेऽव्याप्तिः । तथाहि हेतुसमानाधिकरणोदण्डि(ण्ड)संयोगः समानाधिकरणो वर्तते । दण्डिनोऽत्यन्ताभावो यस्य कस्यापि दण्डिनः सन् यत्किञ्चित्प्रतियोग्यसमानाधिकरणो भवत्येव । दण्ड्य[न्]तस्य तत्राभावात्तस्य दण्डिमत्त्वं साध्यं प्रतियोग्येव, ततो व्याप्तिरिति । यद्येतद्वारणार्थं यावत्प्रतियोग्यसामानाधिकरण्यविवक्षा क्रियते तदा एतद्वारणेऽपि पूर्वोक्तासदनुमानेऽतिव्याप्तिः । अपि च स्वसमानाधिकरण इत्यत्र प्रतियोग्यसमानाधिकरणाभावस्तु प्रसिद्ध एव । 'वह्निमान् धूमात्'-इत्यत्राप्येतादृशो भावः कोऽपि नास्ति । न च ह्रदत्वाद्यभाव एवेति वाच्यम् । तस्यापि प्रतियोगिसमानाधिकरणत्वात् । तथाहि धूमसमानाधिकरणो यो ह्रदत्वाद्यभावः तत्राभावे यो वर्ततेऽऽकाशात्यन्ताभावभेदः, सः तु ह्रदत्वाभावातिरिक्तो न भवति । अभावाधिकरणकाभावप्रतियोगिकाभावस्यातिरिक्तस्यानङ्गीकारात् ।

---

१. B तथा यः. २. B तथापि भवति यत्कि०. ३. B तदुक्तानु०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अस्यार्थो यथाऽभाव एवाधिकरणं[1] यस्याभावस्य-एतादृशो भावः, [2]अथ चाभाव एव प्रतियोगी यस्य सः चाभावोऽधिकरणस्वरूपमेव, न चाभावरूपाधिकरणातिरिक्तः । अयमर्थः-यस्याभावस्याभाव एवाधिकरणम्-अभाव एव प्रतियोगी स चाधिकरणस्वरूपमेव । यथा घटात्यन्ताभावे पटात्यन्ताभावोन्योन्याभावः । न भवतीत्यत्र घटात्यन्ताभावस्वरूपमेव पटात्यन्ताभावान्योन्याभावः । तदतिरिक्ते प्रमाणाभावात् । तथापि प्रकृते ह्रदत्वात्यन्ताभावो यो वर्ततेऽऽकाशात्यन्ताभावान्योन्याभावः, सोऽप्युक्तरीत्या ह्रदत्वात्यन्ताभाव एव । तस्य प्रतियोगिद्वयं ह्रदत्वमाकाशात्यन्ताभावश्च । तथा चाकाशात्यन्ताभावेन प्रतियोगिना समं ह्रदत्वाभावस्य समानाधिकरणादसम्भवः । सर्वत्रोक्तरीत्या प्रति योग्यसमानाधिकरणात्यन्ताभावाप्रसिद्धाऽसम्भव एव । ह्रदत्वाद्यभावस्याप्युक्तरीत्या प्रतियोगिसमानाधिकरण एवेति दिक् । शेषं **शिरोमणिटिप्पणे** ज्ञेयम् ।

पूर्वोक्तदूषणवारणार्थं व्याप्तेर्लक्षणमाह-**साध्यसामानाधिकरण्येति** साध्यस्य यत्सामानाधिकरण्यं हेतौ तस्य यदवच्छेदकं सामानाधिकरण्यात्यन्ताभाववद्वृत्तित्वरूपं तदेव व्याप्तिरित्यर्थः । लक्षणं संयोजयति-**यातीदमिति** प्रसिद्धानुमानं उक्तरूपवह्निसामानाधिकरण्यावच्छेदकं भवति धूमवत्त्वम् । यथा वह्निसामानाधिकरण्यावच्छेदकत्वं तु वह्निसामानाधिकरण्यात्यन्ता-भाववद्वृत्तित्वं, तच्च धूमवत्त्वेऽस्त्येव । यथा वह्निसामानाधिकरण्याभावस्तिष्ठति ह्रदत्वादौ, तद्वृत्तित्वं वर्तते धूमत्वे इत्युक्तसामानाधिकरण्यविशिष्टं धूमत्वं व्याप्तिः ।

[3]व्यभिचारिणीति-'धूमवान् वह्नेः' इत्यत्र धूमसामानाधिकरण्यावच्छेदकत्वं वह्नित्वस्य नास्ति। वह्नित्वस्य च धूमसामानाधिकरण्यात्यन्ताभाववान् योऽयोगोलकीयो वह्निस्तत्र वृत्तित्वात् ।

'वृक्षः संयोगी, द्रव्यत्वात्, 'इत्यत्रापि संयोगसामानाधिकरण्यावच्छेदकं भवति द्रव्यत्वम् । यथा यत्र यत्र द्रव्यत्वं तत्र तत्र संयोगसामानाधिकरण्यमिति । द्रव्यत्वं संयोग-सामानाधिकरण्यावच्छेदं(दकं) । गच्छति चेदं केवलान्वयिन्यपीत्याह-**घट इति** प्रमेय-त्वमभिधेयत्वसामानाधिकरण्यावच्छेदं भवति । अभिधेयत्वसामानाधिकरण्यावच्छेदकत्वं त्वभिधेयत्वसामानाधिकरण्यात्यन्ताभाववद्वृत्तित्वं, तदत्रस्त्येवेति । अभिधेयत्वसामानाधि-करण्यात्यन्ताभावस्तु आकाशादौ प्रसिद्धः । यतः आकाशेऽभिधेयत्वस्यसामानाधिकरण्य नास्ति । यतोऽभिधेयत्वाधिकरणाधिकरणत्वमाकाशे-एवं वक्तु मशक्यमिति । प्रमेयत्वं चाकाशे नास्ति । तस्य च प्रमे[य]त्वावृत्तित्वात् । साध्यसामानाधिकरण्यावच्छेद-कत्वमुदाहरति-[4]**साध्यसामानाधि-करण्यावच्छेदकमिति** साध्यस्य यत्सामानाधिकरण्यं साध्याधिकरणत्वरूपं तस्य यदनधिकरणं तदधिकरणाभिन्नमिति यावत् । तदवृत्तित्वं सामानाधिकरण्यावच्छेदकत्वम् । तथा च

---

१. B -धिकरणे. २. A अथवाऽभाव. ३. B व्यभिचारीति But it is as above in the available text of त.भा.प्र. ४. It is सामाना. in the available text of त.भा.प्र. But both A and B read it as above.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

साध्यसामानाधिकरण्यानधिकरणत्वं तु केवलान्वयिन्यवृत्त्याऽऽकाशादेकमेव प्रसिद्धम् । तत्रावृत्तिपदार्थेऽऽकाशादौ प्रमेयत्वं न वर्तते । तस्य च प्रमेयत्वे एव वर्तमानत्वादभिधेयत्व-सामानाधिकरण्यावच्छेदकत्वम् ।

केवलान्वयिन्यव्याप्तिमाशङ्कते-**नन्विति**[1] 'इदमभिधेयम्, प्रमेयत्वात्-'इत्यत्र यत्प्रमेयं तदभिधेयमित्यत्राव्याप्तिः । तथाहि-अभिधेयसामानाधिकरण्याभाव इत्याकाशे प्रमेयत्वस्य वर्तमानत्वात्। तथा च प्रमेयत्वस्य साध्यसामानाधिकरण्यावच्छेदकत्वं नास्ति । तस्य च साध्यं यदभिधेयं तत्सामानाधिकरण्यानधिकरणं भवत्याकाशम्, तद्वृत्तित्वात् । प्रमेयत्वस्य हेतुतावच्छेदकस्येत्यव्याप्तिमुद्धरति-**वृत्तिमदिति** तथा च वृत्तिमत्प्रमेयत्वंसाध्यसामानाधिकरण्याव-च्छेदकमभिधेयसामानाधिकरण्यानधिकरणेऽाकाशे वृत्तिमत्प्रमेयत्वावृत्तेः वृत्तिमत्पदार्थघटादिके यद्वर्तते प्रमेयत्वम्, तद्वृत्तिमत्प्रमेयत्वम् । इदं चाकाशे नास्ति । वृत्तिमत्त्वविशिष्टं च प्रमेयत्वमाकाशे नास्तीति सिद्धान्तः । यद्यपि हेतुतावच्छेदकं भवति प्रमेयत्वं, तथापि व्याप्त्यवच्छेदकं तु वृत्तिमत्प्रमेयत्वमेव ।

अन्यथाऽनुपपत्त्या कल्प्यते-यत्प्रमेयं तदभिधेयमिति व्याप्त्यवच्छेदकं वृत्तिमत्प्रमेयत्वमेवेति ।

अत्र **पक्षधरमते** दूषणं दीयते-यथाऽननुग्राहकतावच्छेदकमतिरिक्तमपि ग्राह्यतावच्छेदकं यदि स्वीक्रियते तदा 'धूमवान्, वह्नेः' इत्यादि व्यभिचारमात्रेऽतिव्याप्तिर्वारयितुमशक्या । तथाहि 'धूमवान् वह्नेः' इत्यत्रापि ग्राहकतावच्छेदकं भवति वह्नित्वं-ग्राह्यतावच्छेदकं च तदतिरिक्तम् । ग्राहकतावच्छेदकातिरिक्तधूमवद्वृत्ति वह्नित्वम्, यथा 'अभिधेयं प्रमेयात्'-इत्यत्र प्रमेयत्वं साध्यसामानाधिकरण्यावच्छेदकं न भवति । तस्याकाशादावपि सत्त्वेनातिप्रसक्तित्वात् ।

तथा च[3] वह्नित्वमपि धूमसामानाधिकरण्यावच्छेदकं यद्यपि न भवति, तस्य धूमसामानाधिकरण्याभाववत्ययोगोलकीयवह्नावपि सत्त्वात् । ततः धूमसामानाधिकरण्यावच्छेदकं धूमवृत्तित्वं वह्नित्वं वाच्यम् । तथा चानया रीत्या सर्वत्र व्यभिचारिण्यतिव्याप्तिर्बाध्येत इति चेत्, न । तत्र केवलान्वयिनि[4] शिष्टैः तथा स्वीकारात् । व्यभिचारिणि च तथा धूमवद्वृत्ति वह्नित्वस्य सामानाधिकरण्यावच्छेद[5]कत्वेऽपि तथाऽनुभवान्नाति व्याप्तिः । ननु 'यथाश्रुते वृक्षः कपिसंयोगी एतत्त्वात्', इत्यत्राव्याप्तिः, तथाहि साध्यसामानाधिकरण्यावच्छेदकत्वं नाम साध्यसामानाधिकरण्या-त्यन्ताभाववद्वृ[6]त्तित्वं साध्यसामानाधिकरण्यावृत्तित्वं चेत्यन्यदेतत्, उभयथाऽपि पूर्वोक्तानुमानेऽव्याप्तिः[7]। तथाहि, एतत्त्वे संयोगसामानाधिकरण्यावच्छेदकत्वं नास्ति, संयोगस्याव्याप्यवृत्तित्वात् यद्यपि शाखावच्छेदेन कपिसंयोगो वृक्षे विद्यते तथापि मूलावच्छेदेन नास्ति । मूलावच्छेदेनैतद्वृक्षत्वे

---

१. This प्रतीक comes after the next one in त. भा. प्र. २. B -त्यव्याप्तिः । उद्धरति. ३. A omits च. ४. B -न्वयिविशिष्टै. ५. B -च्छेदकेऽपि. ६. B -त्तित्वात्. ७. A -ऽव्याप्तेः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

संयोगसामानाधिकरण्याभाववति एतद्वृक्षत्वस्य सत्त्वादतिव्याप्तिरिति चेत्, न । अत्रापि सा प्रतियोग्यसमानाधिकरणसाध्यसमानाधिकरणसाध्यसामानाधिकरण्याभाववद्वृत्तिरूपमवच्छेदकं हेतुतावच्छेदकस्य ग्राह्यम् । तस्य सामानाधिकरण्याभावस्य प्रतियोगिसमाना (धिकरणत्वादिति) भावः ।

तार्किकप्रमोदार्थं **सार्वभौमीयं** व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावघटित लक्षणमुपदर्शयते । तथाहि वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावाः तद्वत्त्वमित्यर्थः । गच्छति चेदं 'वह्निमान्, धूमात्' इत्यत्र साध्याभावसमुदायाधिकरणं भवति घट्यादिकम्[१] । 'कीदृशः तद्वृत्तित्वाभावो वर्तते पटत्वादौ', स च यथा-साध्यं भवति वह्निः तस्य यो घटत्वादिना रूपेणाभावः एकः[२] । अथ च वह्नित्ववावच्छिन्नप्रतियोगिताकाभावो द्वितीयः । एतयोः द्वयोः समुदायाधिकरणं भवति घट्यादिकम् । '[३]तद्वृत्तित्वाभावो वर्तते पट्यादौ । स च कीदृशः ?' [४]वृत्तिमान् पदार्थो भवति पटत्वादिरूपः । तद्वृत्तिर्भवति साध्याभावसमुदायाधिकरणवृत्तित्वाभावः । तद्वत्त्वं धूमे तिष्ठति । न गच्छति चेदं व्यभिचारिणि धूमवान् वह्नेः-इति । अत्र यथा साध्याभाव समुदायाधिकरणं भवति अयोगोलकं निर्धूमदेशः । निर्धूमदेशे घटत्वेन धूमाभावो वर्तते व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावरूपः । धूमत्वावच्छिन्नप्रतियोगिताकाभावोऽपि वर्तते । तेन साध्याभावसमुदायाधिकरणमयोगोलकं जातम् । तद्वृत्तित्वात् । भावस्तु वृत्तिर्भवति । [५]तत्शब्देनायोगोलकं, तद्वृत्तित्वमयोगोलक[६]वृत्तित्वम् । वृत्तित्वं चायोगोलके प्रसिद्धम् । तदभावस्तु[७] धूमादौ । वृत्तिमति पदार्थवर्तमानत्वे न वृत्तिमद्वृत्ति र्भवति । तद्वत्त्वं वह्निरूपे हेतौ नास्ति । यतः[८] वह्नावयोगोलकवृत्तित्वाभावो नास्तीति । अतःलक्षणागमनम् ।

गच्छति चेदं केवलान्वयिनि । यथा घटोऽभिधेयः प्रमेयत्वात्, इत्यत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव एव ग्राह्यः । समानाधिकरणधर्मा-वच्छिन्नप्रतियोगिता-काभावासम्भवात् केवलान्वयिनि साध्यतावच्छेदकावच्छिन्न-प्रतियोगिताकाभावस्तु अप्रसिद्धः । ततः प्रथमत एव ग्राह्यः । यथा घटत्वेना भिधेयत्वाभावः एकः, द्वितीयो भवति पटत्वेनाभिधेयत्वाभाव इति । एतादृशाभावसमुदायाधिकरणं भवति जगत्, सर्वत्र घटत्वेनाभिधेयत्वाभावस्य केवलान्वयित्वात्[९] । तथा च जगद्वृत्तित्वाभावोऽपि । जगद्वृत्तित्वावच्छिन्नप्रतियोगिताकाभावस्तु वृत्तिमद्वृत्त्यैव भवति । तस्य वृत्तिपदार्थमे(-र्थे ए)व वर्तमानत्वात् । तथा च घटत्वेन रूपेण जगद्वृत्तित्वाभावो ग्राह्यः । स तु वृत्तिमद्वृत्तिर्भवति । घट्यादिरूपवृत्तिमत्पदार्थवर्तमानत्वात्, तस्य तद्वत्त्वं प्रमेयत्वे तिष्ठतीति सुस्थम् ।

---

१. B घट्यधिकरणम् । and omits the reading between कीदृशः....पटत्वादौ. २. B omits एकः. ३. B omits the reading between तद्वृत्तित्वाभावो....कीदृशः ?. ४. B वर्तमान्प. ५. B तत्र शब्देना. ६. B -गोलकः । वृत्ति. ७. B तदभावे तु. ८. B यथा. ९. B केवलान्वयात्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यावृत्तिर्यथा-वृत्तिमद्वृत्तिपदं किमर्थमिति चेत्, व्यभिचारिण्यतिव्याप्तिवारकत्वात् । यथा-'धूमवान्, वह्नेः' इति । अत्र साध्याभावसमुदायाधिकरणं भवति निर्धूमदेशः । [१]निर्धूमवृत्तित्वस्यापि यो घटत्वेन रूपेणाभावः तद्वत्त्वं वह्नौ तिष्ठतीत्यतिव्याप्तिः । तद्वारणार्थं वृत्तिमद्वृतीति पदम् । तथा च निर्धूमवृत्तित्वाभावस्य वृत्तिमद्वृत्तित्वाभावान्नातिव्याप्तिरिति केचित् । [२]तन्न । निर्धूमवृत्तित्वस्यापि वृत्तिमद्वृत्तित्वात् । वृत्तिमान्पदार्थो भवति धूमः । तद्वृत्तित्वं निर्धूमवृत्तित्वाभावे वर्तते । तद्वत्त्वं च वह्नौ नास्तीति व्यभिचारिणि नातिव्याप्तिः ।

वस्तुतस्तु तददाने प्रमये घटत्वादित्यत्राव्याप्तिः । कथमिति चेत्, अत्र साध्यं प्रमेयत्वम्, प्रमेयत्वा भावसमुदायाधिकरणं भवति जगति । यतः प्रमेयत्वेन प्रमेयत्वाभावोऽप्रसिद्ध इति घटत्वेन प्रमेयत्वेन प्रमेयत्वाभावोऽप्रसिद्ध इति घटत्वेन प्रमेयत्वाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे ग्राह्यः । तदधिकरणं भवति जगद्वृत्तित्वम् । जगद्वृत्तित्वावच्छिन्नप्रतियोगिताकाभावस्त्ववृत्तिपदार्थे वर्तते । तद्वत्त्वं च हेतौ घटत्वे नास्तीत्यव्याप्तिवारणार्थं वृत्तिमद्वृत्तिपदम् । तथा जगद्वृत्तित्वावच्छिन्नप्रतियोगिताकाभावस्तु वृत्तिमद्वृत्ति र्न भवति । वृत्तिमद्वृत्तिस्तु घटत्वेन जगद्वृत्तित्वाभाव एव । तद् वत्त्वं घटत्वे तिष्ठतीति नातिव्याप्तिः । यावत् पदादाने च व्यभिचारिण्यव्याप्तिः 'धूमवान् वह्नेः' इत्यत्र साध्याभावसमुदायाधिकरण्यं भवति निर्धूमदेशः । तद्वृत्तित्वाभावो यो वर्तते घटत्वेन रूपेण स वृत्तिमद्वृत्तिरपि भवति तस्य केवलान्वय(यि)त्वात् । तद्वत्त्वं वह्नौ तिष्ठतीत्यतिव्याप्तिः । अतो यावत् पदम् । तदाने तु निर्धूमवृत्तित्वावच्छिन्नप्रतियोगिताकाभावस्यापि सङ्ग्रहो जातः । तेन यद्यपि घटत्वेन निर्धूमवर्तित्वाभावाधिकरणत्वं वह्नौ तिष्ठति तथापि निर्धूमवर्तित्वावच्छिन्नप्रतियोगिकाभावाधिकरणत्वं नास्ति । वह्नौ निर्धूमत्वस्य वर्तमानत्वात् नातिव्याप्तिः ।

समुदायपददाने त्विदं वाच्यं घटत्वादित्यत्राव्याप्तिः । साध्याभावाधिकरणं भवति घटः । साध्यं भवति वाच्यत्वम्[३], तदभावस्तु व्यधिकरणाभावः । यथा गुणत्वेन [४]वाच्यत्वाभावः । तदधिकरणं घटोऽपि भवति तद्वृत्तित्वाभावो यो वर्तते पटादौ, तद्वत्त्वं घटत्वे नास्तीत्यव्याप्तिरिति केचित्, तदपि न। अभावस्य यावत्विशेषणत्वेनैव तत्रातिव्याप्तिवारणात् । तथा च 'वह्निमान् धूमात्' इत्यत्र(त्रा ?) व्याप्तिवारणार्थं समुदायपदम् । यथा साध्याभावाधिकरणं भवति पर्वते, तत्र घटत्वेन वह्निर्नास्तीति व्यधिकरणसाध्याभावोऽस्ति । पर्वतवृत्तित्वाभावस्तु वृत्तिमद्वृत्तिरपि भवति । तद्वत्त्वं धूमे नास्तीति धूमे पर्वतवृत्तित्वस्य सत्त्वात् । तद्वारणार्थं समुदायपदम् । तेन वह्नित्वावच्छिन्नप्रतियोगिताकाभावोऽपि ग्राह्यः । तदधिकरणं पर्वतो न भवत्येव । भवति च तदधिकरणं निर्वह्निःदेशः । तद्वृत्तित्वाभावस्तु धूमे तिष्ठतीति नाव्याप्तिः ।

ननु तथापि 'वह्निमान्, धूमात्'-इत्यत्रैवाव्याप्तिः । साध्याभावसमुदायमध्येऽऽलोकावृत्तित्वावच्छिन्नप्रतियोगिताकाभावोऽपि साध्याभावो भवति । स चालोकमात्रे तिष्ठति ।

१. B निर्धूमत्वस्यापि. २. B तत्र नि.. ३. B प्रमेयत्वम्. ४. B प्रमेयत्वाभावः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तत्सहितसाध्याभावसमुदायाधिकरणं भवत्यालोकः । [१]पुनरालोकावृत्तित्वावच्छिन्नप्रतियोगिताकाभावोऽपि साध्यताभावसमुदायावृत्तित्वाभावो भवति । तद्वत्त्वं च धूमे नास्तीति । तथा च निर्वह्निवृत्तित्वस्यालोकावृत्तित्वेन रूपेण योऽभावो वर्तते स आलोकमात्रे तिष्ठति । यथा घटावृत्तित्वावच्छिन्नप्रतियोगिताकाभावस्तु घटमात्रे तथाऽऽलोकावृत्तित्वप्रतियोगिताकाभावस्त्वालोके तिष्ठतीति । तद्वत्त्वं च धूमे नास्तीत्यव्याप्तिरिति चेत्, न । साध्याभावसमुदायाधिकरणवृत्तित्वाभावस्तु साध्यसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताको ग्राह्यः । तथा च निर्वह्निवृत्तित्वस्य यो वर्ततेऽऽलोकावृत्तित्वावच्छिन्नप्रतियोगिताकाभावः सः साध्याभाव समुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताको न भवति । यत्र यत्र साध्याभावसमुदायाधिकरणवृत्तित्वत्वं तत्र तत्रालोकवृत्तित्वावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगिता नास्ति । साध्याभाव समुदायाधिकरणवृत्तित्वं तिष्ठति [२]निर्वह्निवृत्तित्वे । आलोकावृत्तित्वावच्छिन्नप्रतियोगिता नास्तीत्यमभावो न ग्राह्य एवेति संक्षेपः ।

तथा च **शिरोमणि**स्थं व्याप्तिलक्षणमिदं-व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावघटितम्, यथा साध्याभावसमुदायाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकाः यावन्तोऽभावावृत्तिमद्वृत्तयस्तद्वत्त्वमिति । एतल्लक्षणविचारो **हरिदासटिप्पणा**त् ज्ञेय इति दिक् ।

इति व्याप्तिलक्षणं साध्यसामानाधिकरण्यावच्छेदकं **टीकाकृता** कृतम् ।

इति व्याप्तिलक्षणव्याख्या ॥

(IV) अवच्छेदकत्वस्वरूपम् ।

अत्रावच्छेदकत्वं नाम स्वरूपसम्बन्धविशेषः । तस्य गुरुधर्मेऽभावात्[३], अनेकपदार्थघटितं यद्धेतुतावच्छेदकं तद्गुरुधर्मः । यथाऽयं घटः, कम्बुग्रीवादिमत्त्वात्'-इति हेतुः कृतः । तत्रेदं लक्षणमव्याप्तं स्यात् । साध्यं भवति घटत्वं तत्सामानाधिकरण्यावच्छेदकं च कम्बुग्रीवादिमत्त्वत्त्वं न भवति । तस्य गुरुधर्मत्वात् । यतो गुरुधर्मेऽवच्छेदकस्वरूपसम्बन्धरूपं केनापि न स्वीक्रियते ।

एवं नीलधूमत्वात्-इत्यत्रापि लाघवात् धूमत्वमेवावच्छेदकम् । 'वह्निमान्, धूमप्रागभावात्' इत्यत्राप्यव्याप्तिः स्यात् । [४]गुरुधर्मेऽवच्छेदकत्वाभावात् । अवच्छेदकत्वाभाव एव परिभाषा एवेति नाप्यविच्छित्तिं प्रत्यजनकत्वं-व्यावृत्तिबुद्धिजनकत्वमिति यावत् । जनकत्वं च नियमघटितं नियमस्याव्याप्तित्वादात्माश्रयात् । नापि सामानाधिकरण्यान्यूनवृत्तित्वम् । यथा यत्र साध्यसामानाधिकरण्यं तत्र तत्र स धर्म इति । तथा सत्ता-'द्रव्यं सत्त्वात्'इत्यत्राव्यभिचारिण्यतिव्याप्तिः

१. B -लोकावच्छिन्न. २. B निर्वह्नित्वे । ३. B गुरुधर्मे तावदने.. ४. B गुरुधर्माभावात् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यात्। साध्यसामानाधिकरण्यावच्छेदकत्वं प्रकृते द्रव्यत्वसामानाधिकरण्यान्यूनवृत्तित्वं सत्तात्वे[१]। यथा यत्र यत्र सत्तायां द्रव्यत्वसामानाधिकरण्यं तिष्ठति, साध्यसामानाधिकरण्यापेक्षया न्यूने सत्तात्वं न वर्तते। इत्यव्याप्तिः। नाप्यनतिरिक्तवृत्तित्वं साध्यसामानाधिकरण्याभाववद्वृत्तित्वमिति यावत्-'इदं वाच्यम्। प्रमेयात्'-इत्यत्र साध्यसामानाधिकरण्याभाववत्याकाशे प्रमेयत्वस्य वृत्तेः।

अत्रोच्यते साध्यसामानाधिकरण्याधिकरणभिन्नावृत्तित्वमेव साध्यसामानाधिकरण्यावच्छेदकम्। तथा च 'वाच्यम्, प्रमेयात्'-इत्यत्र साध्यसामानाधिकरण्यावच्छेदकं वृत्तिमत्प्रमेयत्वमेवेत्युक्तमेवेति संक्षेपः।

(V) व्याप्तिज्ञानस्यानुमितिं प्रति कारणता।

अथवाऽनुमितिं प्रति व्याप्तिज्ञानं वा कारणम्। स्वरूपसती व्याप्तिः। स्वरूपमात्रं वा कारणमित्यत्र स्वरूपसत्याः कारणत्वं दूषयति।- **नन्विति** तथा च व्याप्तिज्ञानमेव कारणम्। अन्यथा व्याप्तिसत्त्वे व्याप्तिज्ञानाभावेऽप्यनुमितिः स्यात्। व्याप्तेर्धूम एव सत्त्वादिति भावः।

(VI) लिङ्गपरामर्शनिरूपणम्।

तस्येति लिङ्गस्येत्यर्थः। तृतीयं ज्ञानम्। **व्यभिचारविरोधीति** 'वह्निव्याप्य धूमवान्यम्'-इति ज्ञानं व्यभिचारज्ञानविरोधिपक्षधर्मताज्ञानं भवति। यत एतादृशज्ञाने विद्यमाने वह्न्यभाववृत्तिर्धूम इति व्यभिचारज्ञानानुदयात् पक्षधर्मताज्ञानमात्रं व्यभिचारिण्यप्यस्ति। यथाऽयोगोलकं धूमवत्, वह्निमत्त्वात्-इत्यत्रेत्यर्थः।

तृतीयत्वमिति नन्वेवं प्रथमद्वितीयज्ञाने जाते सत्यनुमिति न स्यात्, तत्र परामर्शाभावात्। भवन्मते तृतीयज्ञानस्यैव परामर्शत्वादिव्यत आह-**व्याप्तीति** तथा द्वितीयज्ञानमपि परामर्शो भवति। तथोच्यते ग्रन्थकारेण व्याप्तीति व्याप्तिसंस्कार इति कोऽर्थः व्याप्तिविषयको यो संस्कारः, तस्य [२]यदुद्बोधकं धूमज्ञानातिरिक्तमदृष्टादिकं तत्सद्भावे यदा धूमेन समं सन्निकर्षो जातस्तदा व्याप्तिधूमयोः [३]युगपदेकदैव स्मरणे जाते सति सन्निकृष्टे पर्वते प्रथममेव लिङ्गपरामर्शो जायते। महानसापेक्षया व्याप्तिज्ञानं प्रथमतो यज्जातं तदपेक्षया पर्वते यद्वह्निव्याप्यधूमवानयमिति ज्ञानं यज्जातं तद् द्वितीयमेवेत्येतदेवाह-**तस्य चेति**

अयमत्र [४]प्रघट्टकार्थ :-यथाश्रुते तृतीयलिङ्गपरामर्शोऽनया रीत्या भवति-यथा प्रथमतो महानसवृत्तिधूमे धूमत्वावच्छेदेन वह्निनिरूपिता धूमनिष्ठा व्याप्तिर्गृहीता। तदनन्तरमात्मनि तज्जन्यो-

---

१. B सत्त्वात् ना[ना]त्वे. २. B यद्बोधकं. ३. B युगपदेव स्मरणे. ४. A प्रघट्टार्थः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्याप्तिविषयकज्ञानजन्यो संस्कारो [१]वृत्तः । तदनन्तरं [२]पर्वते पर्वतवृत्तिधूमेन समं सन्निकर्षो जातः । तदनन्तरं शुद्धधूमज्ञानं जातम् । इदमेव धूमज्ञानं व्याप्तिविषयकसंस्कारोद्बोधकं भवति । धूमज्ञाने व्याप्तिविषयकसंस्कारोद्बोधके सति व्याप्तिविषयकसंस्कारेण व्याप्तिविषय[क]स्मरणं जन्यते । एकतरसम्बन्धिज्ञानं [३]च धूमज्ञानम्, अन्यतरसम्बन्धिज्ञानं च व्यायाप्तिज्ञानम् । यथा हस्तिपकदर्शनानन्तरं हस्तिनः स्मरणं जायते [४]तथा पर्वतवृत्तिधूमदर्शनान्तरं व्याप्तिस्मरणं जायते । जाते च व्याप्तिस्मरणे वह्निव्याप्यधूमवानयमिति लिङ्गपरामर्शरूपं तृतीयं ज्ञानं जायते । तथा च पर्वते प्रथमतो धूमेन्द्रियसन्निकर्षानन्तरं धूमज्ञानं, तदनन्तरं व्याप्तिस्मरणं तदनन्तरं परामर्श इति **प्राचीनन्यायमते** । यदि धूमव्याप्तिधूमयोः पर्वते संस्काररूपोद्बोधकवशादेकदैव यत्र स्मरणं भवति तदनन्तरं परामर्श इति द्वितीयपरामर्श इत्यनुमितिकारणम् ।

इदानीं प्रथमज्ञानस्यापि लिङ्गपरामर्शत्वं स्थापयति-[५]**धूमादिति अत्रपदेति** यत्र धूमपदश्रवणानन्तरं धूमे शक्तिग्रहो जातः । यथाऽयं धूमपदवाच्य इति । तदनन्तरमाप्तवाक्यश्रवणं यथा 'रे बालक, वह्निवाप्यधूमवानयमिति' प्रथमलिङ्गपरामर्शादप्यनुमितिर्जायते । तथा च तृतीयलिङ्गपरामर्शेनैवानुमितिर्जायते इति नियमो नास्तीति भावः ।

ननु भवता लिङ्गपरामर्शस्य तृतीयत्वं व्युत्पादितं तदपि न सम्भवतीत्याह-**नन्विति** तथा च व्याप्तिग्राहकं भवति सहचारदर्शनम् । प्रथमतो महानसे धूमवह्न्योः सहचारदर्शनम्, तदनन्तरं गोष्ठे, तदनन्तरं चत्वरे, तदनन्तरं पर्वते धूमज्ञानम् । तदनन्तरं व्याप्तिस्मरणम् तदनन्तरं लिङ्गपरामर्श इत्यनया प्रणाल्या धूमज्ञानानां बहुत्वमेव तृतीयमित्याशङ्क्यार्थः ।

व्याप्तीति तथा च व्याप्तिग्रहमारभ्य लिङ्गपरामर्शस्य तृतीयत्वमुक्तं न तु सहचारज्ञानमारभ्य । तथा च प्रथमतो महानसादौ व्याप्त्यनुभवः [६]प्रथमः, तदनन्तरं पर्वतवृत्तिधूमदर्शनानन्तरं व्याप्तिस्मरणमिति [द्वितीयं]तदनन्तरं वह्निव्याप्यधूमवानयमिति परामर्श इति तृतीयमित्यर्थः ।

ननु पर्वतवृत्तिधूमज्ञानानन्तरमेव परामर्शः कथं नोत्पद्यते, किमर्थं व्याप्तिस्मरणापेक्षा इति चेत्, न। तत्र व्याप्तिरूपविशेषणज्ञानाभावात् विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वकल्पनात् । प्रकृते तु परामर्शरूपं वह्निव्याप्य धूमवानयमिति-इदं व्याप्तिविशिष्टधूमज्ञानम् । अत्र धूमोपरि व्याप्तेः विशेषणतया भानात् । तेन व्याप्तिस्मरणं विशेषणज्ञानत्वेनावश्यमपेक्ष्यमेव । तद्व्यतिरेकेण तदनुत्पादादिति । नन्वत्र किं व्याप्तिविशिष्टधूमज्ञानं ग्राहकमत आह-**भूयोदर्शनमिति** । ननु भूयोदर्शनशब्देन किमुच्यते ?-भूयस्सु स्थानेषु दर्शनं भूयोदर्शनमिति । भूयसां दर्शनं भूयोदर्शनमिति

१. B वृत्तिः । २. B omits पर्वते and reads पर्वतवृत्तिधूमसन्निकर्षो. ३. A omits च धूमज्ञानम्. ४. B यथा. ५. It is धूमादिपदेति in त. भा. प्र. ६. A omits प्रथमः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वा भूयांसि दर्शनानि-इतिवा ? नाद्यः, 'अयमेतद्रूपवान्, एतद्वशात्'-इति सद्धैतौ व्याप्त्यग्राहपत्तेः, तत्र स्थानानां भूयस्तत्वात् पक्षरूपाधिकरणस्यैकत्वात् । नापि द्वितीयः 'अयमेतद्रूपवान्, इत्यत्रैव व्याप्त्यग्रहापत्तेः । न तृतीयः, व्यभिचारिण्यपि व्याप्तिग्राहपत्तेः । यथा 'धूमवान् वह्निः,' इत्यत्रैकस्मिन्नैवाधिकरणे महानसादौ धूमवह्निसामानाधिकरण्यज्ञानानि धारावाहिकरूपाणि वृत्तानि । तत्रापि भूयोदर्शनसत्त्वात् व्याप्तिग्रहापत्तेरिति पक्षद्वयमुपेक्ष्य तृतीयपक्षे दोषमाह-

नन्विति -'सप्तमो मैत्रीतनयो गर्भस्थो श्यामो भवितुमर्हति, मैत्रीतनयत्वात्,-इत्यत्र श्यामत्वमैत्रीतनयत्वयोः सामानाधिकरण्यग्रहाणां भूयस्त्वात् तदधिकरणानां षण्णां च भूयस्त्वात् व्याप्तिग्रहापत्तेः । तथा चान्वयव्यभिचारो भवति । यथा भूयोदर्शनं वर्तते व्याप्तिग्रहो न जायते । सर्वत्रोक्तव्यभिचारादेव भूयोदर्शनस्य कारणत्वं नास्तीत्यर्थः । तथा चोक्तव्यभिचारात् भूयोदर्शनं[न] व्याप्तिज्ञानमेव(स्य)कारणम् । किन्तु व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानमेव व्याप्तिज्ञाने कारणम् । तज्ज्ञाने सत्येव व्याप्तिग्रहादिति सिद्धान्तरहस्यम् ।

तत्रेति भूयोदर्शनस्य व्याप्तिग्राहकत्वपक्षे यद्दूषणं दत्तं 'स श्यामो मैत्रीतनयत्वात्' इत्यत्र व्याप्तिग्रहापत्तेरितिरूपम्, तस्य विकल्पद्वयं कृत्वा दूषयति-**व्याप्तीति**-यदि तत्र व्याप्तिग्रहस्य प्रमात्वमापद्यते तदा दोषमाह **विषयाभावादिति** विषयोऽत्र श्यामत्वनिरुपिता व्याप्तिः । सा च मैत्रीतनयत्वे नास्ति । ततो च विषयबाधादेव न प्रमेत्यर्थः । यदि भ्रमरूपो व्याप्तिग्रह आपद्यते तदेष्टापत्तिरित्याह-**अन्त्यस्त्विति** ननु व्यभिचारदर्शने विद्यमाने भ्रमरूपं व्याप्तिज्ञानं कुतो न भवतीति चेत् न । कारणाभावात् । कारणमाह-**यदीति** तथा च व्यभिचारज्ञानाभावविशिष्टदोषाभावविशिष्ट-सहचारज्ञानं व्याप्तिप्रमां प्रतिकारणम् । भ्रमं प्रति तु व्यभिचारज्ञानाभावविशिष्टदोषविशिष्टसहचारज्ञानं कारणम् । तथा च प्रकृते यद्येतादृशं ज्ञानं तिष्ठति तदा व्याप्तिज्ञानं भ्रमरूपं स्यादेव कारणसत्त्वात् । एतदेवाह-**व्यभिचारदर्शनेति** तथा च व्यभिचारादर्शनसहकृतं सहचारज्ञानमात्रं तत्र व्याप्तिप्रमा जायते। [१]यत्र दोषविशिष्टं व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानं तत्र व्याप्तिभ्रमः । अत्र हि विषयाभाव एव दोष इति तात्पर्यम् ।

तस्येति शाकाद्यन्नपरिणति भेदस्येत्यर्थः । नन्वत्र किं प्रयोजकत्वमिति चेत्, कारणत्वमेव प्रकृते ग्राह्यम् । यथा नरश्यामत्वं प्रति शाकाद्यन्नपरिणतिभेद एव कारणम् । **प्रयोजकचेति** तथा च प्रयोजकशब्देनोपाधिः परिभाषित इति भावः ।

ननु 'वह्निमान् धूमात्'-इत्यत्रापि कश्चिदुपाधिर्भविष्यतीत्यत आह-**नन्विति** तथा यदि धूमे हेतौ वह्निसाधके[२] 'क्रियते एवं नीलधूमत्वादित्यत्र' [३]कश्चनोपाधिरस्ति, तदा स योग्यो नाम । प्रत्यक्षो

१. B तत्र. २. B omits the reading between क्रियते....त्वादित्यत्र. ३. This portion in A is worn out by insects.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वाऽतीन्द्रियो वा त [था]विकल्प्य दूषयति **मूलकारः-न चेतीति** तथा च द्वितीये पक्षे यो दोषः दत्तः [सः]कल्पयितुमशक्यत्वरूपः । तं [1]व्याचष्टे-**अनुमानेति** तथा च यद्यतीन्द्रियोपाधिः स्वीक्रियते तदाऽनुमानमात्रस्योच्छेदः स्यादित्यर्थः ।

अत्राद्यं तात्पर्यार्थः-यदि प्रसिद्धानुमानेऽतीन्द्रियोपाधिः उद्भाव्यते तदा[2] भवता तत्सद्भावे प्रमाणं वाच्यम् । तत्सदतीन्द्रियसद्भावे प्रत्यक्षं प्रमाणं वक्तुमशक्यम् । उपाधेरतीन्द्रियत्वात् । वक्तव्यं चानुमानम् । तत्राप्यतीन्द्रियोपाधिर्मयोद्भाव्यः एवेति भवताऽप्युपाधेरतीन्द्रियत्वं साधयितुं न शक्यते-इति नातीन्द्रियोपाधिरुद्भाव्यः ।

योग्योपाधिव्यतिरेकेति प्रत्यक्षोपाध्यभावो योग्यानुपलब्ध्या निश्चीयते । - यद्यत्र कश्चिदुपाधिः स्यात् तदोपलभ्येत । नोपलभ्यते, ततो नास्तीति तर्काकाररूपयोग्यानुपलब्धिज्ञातव्य इति **मणिकृन्मतम्** । प्रकृते योग्योपाध्यभावो ग्राह्यस्तथा चाभावज्ञानं प्रति योग्यानुपलब्धेरपि कारणत्वं क्लृप्तं वर्तते । यथा घटाभावज्ञानं प्रति घटस्य योग्यानुपलब्धि कारणं भवति । सा च **मणिकृन्मते** तर्कविशेष एव । यथा घटाभाव ज्ञानस्थलेऽत्र घटश्चेत् स्यात् तदोपलभ्यते, तस्मात् नास्तीति तर्करूपाप्रतियोगिनमारोप्यात्र निषिध्यते । तत्रैवैतादृशी तर्करूपा योग्यानुपलब्धिर्ज्ञातव्या ।

[3]**उदयनाचार्यमते** तु प्रतियोगिव्याप्येतरसकलसदुपलम्भकसमवधाने सति प्रतियोग्यनुपलम्भः । प्रतियोगिनः प्रत्यक्षरूपपक्षज्ञानाभावः प्रतियोग्यनुपलब्धिरेव योग्यानुपलब्धिः ।

अयमर्थः-प्रतियोगी घटादिः । प्रतियोगिव्याप्यश्च घटभूतलादिसंयोगः । यथा यत्र घटसंयोगस्तत्र घट इति । तदितरा या तदुपलम्भिका तस्य घटादेः प्रत्यक्षरूपज्ञानजनिका सकलसामग्रीप्रतियोगिज्ञानरूपा, तत्समवधाने सति प्रतियोगिनो घटादेः योऽनुपलम्भः प्रत्यक्षरूपज्ञानाभावः स एव योग्यानुपलब्धिपदेन गीयते । यथा भूतले घटो नास्तीति अभावप्रत्यक्षे प्रतियोगी भवति घटः, तद्व्याप्यो भवति घटसंयोगः, तदतिरिक्ता घटप्रत्यक्षज्ञानजनिका सामग्री घटत्वज्ञानादिरूपा । तत्समवधाने सति यत्र घटानुपलम्भो घटप्रत्यक्षाभावः तत्र घटाभावप्रत्यक्षं जायते[4] इति योग्यानुपलब्धिर्भवत्यभावज्ञानं प्रति कारणम् ।

अयं भावार्थः-यत्र घटादिज्ञानजनिका सामग्री सर्वा प्रतियोगि[नं]प्रति व्याप्यातिरिक्ताऽस्ति तत्रैवाभावज्ञानं जायते । घटेन्द्रियसन्निकर्षोऽपि घटव्याप्य एव । यत्र च समवायसम्बन्धेन घटेन्द्रियसन्निकर्षः तत्र स्वरूपसम्बन्धेन घट इति घटघटेन्द्रियसन्निकर्षोऽपि सामग्रीः । तदतिरिक्तघटाभावज्ञानेन्द्रियसम्बद्धविशेषणतादिरूपाऽन्यापेक्ष्यते ।

मणिकारमतेनानुपलब्धिलक्षणमाह-अनुपलब्धौ इति **तर्कितेति** या विरोधिता सैव

१.२. This portion in A is worn out by insects. ३. B आचार्यमते. ४. B जातम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

योग्यतेत्यर्थः । यथाऽत्र घटश्चेत्स्यात् तदोपलभ्येत इति तर्कितं घटसत्त्वमापद्यते । तद्विरोधिभाव नोपलभ्यते न दृश्यते । तस्माद् घटो नास्तीत्यर्थः ।

वास्तवमिति नोपलभ्यत इतिरूपो विपर्ययश्च शब्देन तद्विपरीतं तर्कितप्रतियोगिसत्त्वविपरीतं तदभावज्ञानमित्यर्थः । तथा कारणे इति विपर्ययपर्यवसानकरणेऽनुमानम्-यथाऽत्र घटो नास्तीति घटाभावः साध्यः । घटस्यानुपलभ्यमानत्वादित्यर्थः । **प्रत्यक्षेणेति** मूलम्-चक्षुरादिनेत्यर्थः ।

प्राचीनमुत्थाप्य दूषयति **नन्विति** अनुपाधिकत्वमुपाध्यभावो यत्र हेतौ तत्र स[1]व्याप्तिः । इदं दूषयति-**यत्किञ्चिदिति** साध्यव्यापकत्वे सति साधनाव्यापकत्व[2]मुपाधिरिति । तल्लक्षणं-तदभावो व्याप्तिरिति न सङ्गच्छति । अत्र विकल्पद्वयं यथा यत्किञ्चित्साध्यव्यापकसाधनाव्यापकत्वनिषेधो वा क्रियते-साध्यव्यापकसाधनाव्यापकत्वनिषेधो वा क्रियते ?

प्रथमं दूषयति पर्वत इति अत्र प्रसिद्धानुमाने यत्किञ्चित्साध्यव्यापकसाधनाव्यापकरूपो[3] स च को धर्मस्तत्रास्तीति दर्शयति-[4]**गुणव्यापकेति** यत्किञ्चित्साध्यं भवति गुणरूपं तस्य व्यापिका भवति सत्ता, [5]यथा गुणसामानाधिकरण्यात्यन्ताभावप्रतियोगितानवच्छेदकधर्मावच्छिन्ना । इदमेव व्यापकत्वम्, सत्तायां गुणस्येति । अथ च भावरूपहेतोः या कुत्रापि वर्तमानस्याव्यापिका भवतीति भावत्वसामानाधिकरण्यात्यन्ताभावप्रतियोगिनी सत्ता सामान्यादौ सत्ताभावात् । तथा च यत्किञ्चित्-साध्यव्यापकसाधनाव्यापकधर्मः सत्तालक्षणो जातः, स च धर्मो वह्निसाध्यके[6] धूमे हेतौ तिष्ठतीति लक्षणासम्भवः ।

द्वितीयं दूषयति-**प्रकृतेति** धूमानुमाने वह्निः [7]प्रकृतसाध्यं सिध्यतीति यदि वह्निव्यापको धूमाव्यापको धर्मः कोऽपि प्रसिद्धः[8] तदापि प्रतियोगिनो प्रसिद्धत्वात्तदभावो निषेद्धुमशक्य इत्यर्थः । द्वितीयपक्षे प्रतियोगिप्रसिद्धमानेतुं शङ्कते **नन्विति प्रकृतेति** [9]प्रकृतसाध्यव्यापकं यस्य धर्मस्य व्यापकं तद्भिन्नत्वं व्याप्तिः । तिष्ठति चेदं 'वह्निमान् धूमात्' इत्यत्र यथा प्रकृतसाध्यं भवति वह्निः। तस्य व्यापिका भवति वह्निसामग्री । साऽव्यापिका भवति यस्य द्रव्यत्वस्य तद्भिन्नत्वं धूमे वर्तते इति कृत्वा धूमे व्याप्तिः । व्यभिचारिणि चेदं नास्ति । प्रकृतसाध्यो भवति धूमः, तस्य व्यापको भवत्यार्द्रेन्धनसंयोग : । स चार्द्रेन्धनसंयोगोऽव्यापको यस्यायोगोलकीयवह्नेः तद्भिन्नत्वं वह्नौ नास्तीति साध्यव्यापकत्वपदेन विवक्षितमित्यर्थ ।

दूषयति-यथा 'घटोऽभिधेयः, प्रमेयत्वात्' इत्यत्र साध्यमभिधेयत्वम् । तस्य व्यापको धर्मो भवति वाच्यत्वरूपः । स यस्य धर्मस्याव्यापक इति वक्तुं न शक्यते । वाच्यत्वस्य

१. B -त्वमुदाहरति. २. B रूपो धर्मस्तत्रा०. ३. It is गुणत्वव्या० in त.भा.प्र. ४. B omits यथा. ५. B साध्यको. ६. B प्रकृतिसाध्यं. ७. Pl. add तदा तदभावो निषेद्धुमशक्यः, यदि वाऽप्रसिद्धः. ८. B प्रकृतिसा०

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सर्वधर्मव्यापकत्वादेव । तथा चैतादृशधर्माप्रसिद्धा व्याप्तिलक्षणस्याव्याप्तिरिति भावः । **यद्यपि चेति** येषां मते भूयोदर्शनं व्याप्तिग्रहणं[1] प्रति कारणम्, तेषां मते तृतीयज्ञानमपि भूयो दर्शनं भवति । तृतीयस्यापि बहुत्वात् । तन्मते केनचित् दूषणं दत्तम् । सकृद् धूमदर्शनमेव व्याप्तिग्रहं[2] प्रति कारणम् । प्रथमद्वितीययोरविद्यमानत्वात् विद्यमानं यत्तृतीयं ज्ञानेव तदेव कारणमिति **मीमांसकाः** । तत्र भूयोदर्शनकारणत्ववादिना समाधीयते । प्रथमद्वितीयज्ञानाभ्यां संस्कारौ जन्येते, ताभ्यां संस्काराभ्यां तृतीयभूयोदर्शनज्ञानसमये व्याप्तिसामानाधिकरण्यं स्मृतिरूपं ज्ञानं जन्यते । तेन भूयोदर्शनं जन्यत एव । इदं व्याप्तिग्रहरूपं मानसं ज्ञानं जायते । तत्र व्याप्तिग्रहरूपसंस्कारसहितेन मनस्येव जन्यते इति **जीर्णनैयायिकमतं** दूषयति-**तदपिनेति** । व्याप्तिज्ञानस्य संस्कारजन्यत्वेन स्मृतित्वापत्तिः । प्रथमव्याप्तिग्राहस्य **न्यायमते**ऽनुभवत्वात् सहचारविषयकसंस्कारेण व्याप्तिविषयकं स्मरणं कथं न जननीयमिति बोध्यम् । स्मृतिसंस्कारयोः समानविषयत्वेन समानप्रकारकत्वेन वा कार्यकारण भावकल्पनात् । अन्यथा घटविषयकसंस्कारेण पटविषयकं स्मरणं जन्यते । तथा चैतावता ग्रन्थेन **मीमांसक**- मतं यत्सकृद्दर्शनमेव कारणँ तेषां मतेनोपाधिकत्वरूपा व्याप्तिरनुपाधिकत्वं भवत्युपाध्यभावः । स च हेतौ ग्राह्यः । सदुपाध्यभावः हेत्वतिरिक्तो न भवति । तेषां मतेऽधिकरणस्वरूपस्यैवाभावात् । तथा च यदा धूमेन समं सन्निकर्षो जायते, तदनन्तरं धूमज्ञानं जायते, तस्मिन्नेव क्षणे व्याप्तिज्ञानमपि जातमेव । धूमज्ञानस्य व्याप्तित्वात् । तथा च भवन्मते व्याप्तिग्रहं प्रति सकृद्दर्शनमेव कारणम् । [3]तत्तु **नैयायिकेन** दूषितम् । अनौपाधिकस्य व्याप्तित्वे इदं सम्भवति । तदेव न सम्भवति, पूर्वरीत्या दूषितत्वात् । **प्राचीन न्यायमते** [4]व्याप्तिग्रहं प्रति साध्यहेतुसहचारभूयोदर्शनं व्याप्तिग्रहे कारणम्, तदप्युक्तरीत्या **नवीनै**र्दूषितम् । तथा च व्याप्तिग्रहं प्रति सकृद्दर्शनभूयोदर्शनयोः कारणत्वं न सम्भवतीति कारणाभावात् व्याप्तिग्रहो न सम्भवतीति तद्ग्रहाभावत् परामर्शरूपमनुमानं न सम्भवतीत्यनुमानं न प्रमाणमिति **चार्वाकाः** ।

तत्र **नैयायिकः** समाधत्ते-**व्यभिचारादर्शनेनेति** तथा च व्यभिचारादर्शनं व्यभिचार-ज्ञानाभावः । अथ च हेतुसाध्यसहचारदर्शनमेतद्द्वयं व्याप्तिग्रहे कारणम् । **तच्चेति** उक्तरूपव्यभिचार-ज्ञानाभावसहकृतं सहचारदर्शनम् । तच्छङ्कासाधारणंसन्देहसाधारणम् । तत्र च हेतौ या शङ्का जायते-यथाऽयं हेतुः साध्यव्यभिचारी न वेति । उपाधिसन्देहात् व्यभिचारशङ्का भवति । तथा चोपाध्यभावस्य व्यभिचारशङ्कानिवृत्तावुपयोगः तदर्थमपेक्ष्यत इत्यर्थः ।

ननु तर्हि भूयोदर्शनस्य कुत्र चोपयोग इति चेत्, तत्राह-**भूयोदर्शनेति** भूयोदर्शनजन्यो यो संस्कारः तस्यानुकूलतर्के उपयोगः । तेनानुकूलतर्कौ जन्यते । तथा च भूयस्सु स्थानेषु सहचारदर्शनं जातम् । तदनन्तरमनुकूलतर्कावतारो भवति । यथा-यदि निर्वह्निः स्यात् तदा निर्धूमः स्यादिति । ननु

१. B -ग्रहं. २. B -ग्निज्ञानं. ३. A omits तत्तु. ४. B omits the reading between व्याप्तिग्रहं.....तथा च ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तर्कस्य भूयोदर्शनजन्यसंस्कारजन्यत्वे सति स्मृतित्वापत्तिरित्यत आह-**स्मृतित्वेचेति** । तावन्मात्रं संस्कारमात्रं न कारणम् ।

अयं भावः-यत्र ज्ञाने संस्कारोद्बोधकं तिष्ठति तत्र संस्कारमात्रेण यज्ज्ञानमुत्पद्यते तत्रैव स्मृतित्वमिति भावः । तथा च व्यभिचारज्ञानाभावविशिष्टं सहचारज्ञानं कारणं व्याप्तिग्रहे इति सिद्धम् ।

ननु यत्र वह्न्यभाववद्वृत्तिर्घटो वह्निसमानाधिकरणो धूम इति यत्र समूहालम्बनं ज्ञानं जातं तदनन्तरं धूमो वह्निव्याप्य इति वह्निनिरुपितधूमनिष्ठव्याप्तिज्ञानं न स्यात्, प्रतिबन्धकस्य व्यभिचारज्ञानस्य[1] सत्त्वादिति चेत्, न । हेतुनिष्ठस्यैव व्यभिचारज्ञानस्य प्रतिबन्धकत्वात् । प्रकृते व्यभिचारज्ञानं घटे वृत्तधूमे तु नास्तीति न दोषः ।

ननु तथापि द्रव्यत्वं वह्न्यभाववद्वृत्ति वह्निसमानाधिकरणो धूमश्चेति समूहालम्बनात्मकज्ञानान्तरं धूमो वह्निव्याप्य इति वह्निनिरूपित धूमनिष्ठव्याप्तिज्ञानं न स्यात्, द्रव्यत्वेन रूपेण धूमेऽपि व्यभिचारज्ञानसत्त्वादिति चेत्, न । प्रकृतहेतुतावच्छेदकरूपेण [2]प्रकृतहेतौ यद्व्यभिचारज्ञानं तदेव व्याप्तिग्रहे प्रतिबन्धकम् । प्रकृते च हेतुतावच्छेदकं भवति धूमत्वम् । तेन रूपेण व्यभिचार ज्ञानाभावात् 'द्रव्यं वह्न्यभाववद्वृत्ति'-इति ज्ञानं वह्निव्याप्तिज्ञानं प्रतिबन्धकं न भवतीति । तथा च प्रकृते हेतुनिष्ठं यद् वह्न्यभाववद्वृत्तित्वज्ञानं तद् वह्निव्याप्तिज्ञानं प्रति प्रतिबन्धकम् । तदभावःव्यभिचारज्ञानाभावः कारणम् ।

ननु सहचारज्ञानस्य व्याप्तिग्रहे कारणत्वे किं प्रमाणमिति चेत्, अत्र **पक्षधरमिश्राः**-विरुद्धस्थले सहचारभ्रमे व्याप्तिग्रहो दृश्यते । यथे 'यं गौः, अश्वत्वात्'-इत्यत्राश्वत्वं गोत्वसमानाधिकरण इति भ्रमे जातेऽश्वत्वं गोत्वव्याप्यमिति व्याप्तिग्रहो जायते । - अयं भावः-यदा गोत्वाभाववद्वृत्यश्वत्वमिति अथ च गोत्वाश्वत्वसमानाधकरणमश्वत्वमिति तदा व्याप्तिग्रहो न जायते । व्यभिचारज्ञानस्य प्रतिबन्धकस्य सत्त्वात् । यदा तूक्तरूपव्यभिचारज्ञानं नास्ति, अथ चोक्तरूपं सहचारज्ञानमस्ति तदा व्याप्तिग्रहो भ्रमरूपो जायते एवेति सहचारज्ञानस्यापि व्याप्तिग्रहे कारणत्वमिति सङ्क्षेपः ।

व्याप्तिज्ञानस्येति-तथा चान्वयव्यतिरेकाभ्यां व्याप्तिज्ञानमनुमितिं प्रति कारणम् यथा व्याप्तिज्ञानं कारणं तथा पक्षधर्मताज्ञानमप्यनुमितौ कारणम् । तथा च व्याप्तिविषयकंव्याप्तिप्रकारं यत्पक्षधर्मताज्ञानं तदनुमितिं प्रति कारणम् । यथा वह्निव्याप्यधूमवानयमिति धूमोपरि व्याप्तेः प्रकारत्वेन भानात् । यदि व्याप्तिप्रकारकत्वमिति विवक्षा न क्रियते तदा किन्नु व्याप्तिविषयत्वमिति, तदा प्रमेयमिति ज्ञानानन्तरं वह्निमानित्यनुमितिः स्यात् । व्याप्तिविषयकपक्षधर्मताज्ञानसत्त्वात् । प्रमेयमित्यत्रापि व्याप्तेरपि विषयतया भानात् । तेन व्याप्तिप्रकारकं ज्ञानं विवक्षितम् । प्रमेयमिति ज्ञानं च प्रमेयत्वप्रकारकं न

१. B -भिचारिज्ञा०. २. B प्रकृतकृतौ.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्याप्तिप्रकारकमिति । व्याप्तिज्ञानं कारणमिति-उक्तरूपं व्याप्तिज्ञानं कारणम्, परामर्शो व्यापारः, अनुमितिः फलम् । ततोऽनुमितिकरणत्वात् व्याप्तिज्ञानमेवानुमानम् ।

येषां मते फलायोगव्यवच्छिन्नं कारणं करणं तेषां मते परामर्श एवानुमानम् । तस्य व्यापाराभावात् करणत्वमित्यर्थः । **अथेतीति** ननु प्रथमत एव पर्वतवृत्तिधूमज्ञानन्तरं वह्न्यनुमितिः कुतो न जायते-इति चेत्, न । तत्र व्याप्तिज्ञानाभावात् । तथा च न्यायप्रक्रियेयं-पर्वतवृत्तिधूमज्ञानान्तरं व्याप्तिस्मरणं जायते । यथा धूमो वह्निव्याप्य इति धूमज्ञानस्य व्याप्तिविषयकसंस्कारोद्बोधकस्य सत्त्वात् तदनन्तरं व्याप्तिस्मरणानन्तरं वह्निव्याप्यधूमवानयमिति परामर्शो जायते । व्याप्तिस्मरणरूप-विशेषणज्ञानस्य सत्त्वात् । तेन व्याप्तिस्मरणादिरूपकारणाभावात् पर्वतगतमात्रस्य प्रथमधूमज्ञान-मनुमितिजनकं न भवतीति प्रथमधूमज्ञानं तद्व्याप्तिविषयकसंस्कारोद्बोधकम्, तद्व्यतिरेकेण व्याप्तिस्मरणाभावात् । एतदेवाह-[1]**एकसम्बन्धीति** एकसम्बन्धिज्ञानं धूमरूपसम्बन्धिज्ञानं, अपर-सम्बन्धिज्ञानं व्याप्तिरूपसम्बन्धिज्ञानं [2]प्रति कारणम् । यथा हस्तिपकदर्शनानन्तरं हस्तिज्ञानमिति ।

[3]अत्रायं प्रघट्टार्थः-अनुमितिपरामर्शयोः कार्यकारणभावयोः केन रूपेण परामर्शत्वेन कारणत्वम् ? अनुमितित्वेन च कार्यत्वम् यदि, तदा परामर्शत्वं किं जातिर्वा उपाधिर्वा ? नाद्यः, चाक्षुषत्वादिना जातिसङ्करात् । यत्र चाक्षुषत्वं तत्र तत्र परामर्शत्वं नास्ति । घटोऽयमिति ज्ञाने [4]वा चाक्षुषत्वे परामर्शत्वाभावात् । परामर्शत्वं च परामर्शे । तत्र चाक्षुषत्वाभावात् । उभयं चाक्षुषपरामर्शेऽस्ति । यथा वह्निव्याप्यधूमवानयमिति चाक्षुषपरामर्शे ।

ननु चाक्षुषत्वव्याप्यैव सा जातिः स्यादिति चेत्, न । त्वाचपरामर्शादिनाऽनुमिति र्न स्यात् । त्वाच परामर्शे चाक्षुषत्वव्याप्यजात्यभावात् । न च मानसत्वव्याप्यैव सा जातिरस्तु, इति **मैथिलाः** मानसज्ञाननिष्ठा जातिरित्यर्थः इति वाच्यम् । त्वाचत्वव्याप्यैव सा जाति[र]स्तु । तया सह विनिगमनाविरहात् । न चोभयत्वं त्वाचत्वव्याप्या मानसत्वव्याप्या चेति वाच्यम् । तथा चोभयोर्मध्येऽन्यतरपरामर्शेनानुमिति न स्यात् । विनिगमनाविरहेनोभयोरपि कारणत्वं वाच्यम् । तथा सति यत्र त्वाचपरामर्शो विद्यते तत्र चैकतरमानसपरामर्शो भावानुमिति र्न स्यादिति भावः । तथा सति परामर्शत्व किं वाच्यम् ? न चारवण्डोपाधिरिति वाच्यम् । **नैयायिकमते**ऽखण्डोपाधेरनङ्गीकारात् । न च सखण्डोपाधिरेवाऽस्तु इति [वाच्यम्]यथा व्याप्तिपक्षधर्मत्वप्रकारत्वे सति व्याप्तिपक्ष-धर्मत्वाभावप्रकारत्वं सखण्डोपाधिः । यथा वह्निव्याप्यधूमवानयमित्यत्र व्याप्तिः पक्षधर्मता च प्रकारो भवति । भवति च व्याप्तिपक्षधर्मत्वाभावो प्रकारः ।

ननु व्याप्तिपक्षधर्मताभावप्रकारकत्वं किमर्थमिति चेत्, सत्यन्तमात्रग्रहणे पर्वतो

१. This प्रतीक is found before the previous one in त.भा.प्र. २. B तत्प्रति. ३. B omits अत्रायं. ४ B omits वा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वह्निव्याप्यधूमवान्[१] न वेति सन्देहानन्तरमपि वह्न्यनुमितिः स्यात् । अत्रापि व्याप्तिपक्षधर्मत्व-प्रकारकत्वात् । तद्वारणार्थं व्याप्तिपक्षधर्मत्वाभावप्रकारकत्वमुक्तम्[२] । सन्देहे च व्याप्तिपक्षधर्मताभावाप्रकारत्वाद्वानुमितिः । तत्र सन्देहे व्याप्तिपक्षधर्मत्वाभावोऽपि प्रकारोऽस्तीति । ननु सत्यन्तं विशेषणदलं किमर्थमिति चेत्, तथा च 'पर्वतो घटवान्' -इति ज्ञानान्तरं वह्न्य[नु]मितिः स्यात् । तत्रापि व्याप्तिपक्षधर्मत्वाभावाप्रकारकत्वं वर्तते । अत्र [३]घटवानित्यत्र व्याप्त्यभावोऽपि प्रकारो न भवति । पक्षधर्मत्वाभावोऽपि प्रकारो नास्ति । ततः उक्तरूपो विशिष्टः सखण्डोपाधिर्वक्तव्य इति चेत्, न । व्याप्तेः पक्षधर्मतायाश्चैकस्याभावात् । धूमादिनिष्ठव्याप्तीनामेकत्वात्, निरूप्यनिरूपकनानात्वात् पक्षधर्मतायाश्चैकस्याभावात् तदघटितधर्मेण रूपेणानुमितित्वावच्छिन्नं प्रति कारणत्वकल्पनानुदयात् ।

अत्र **नव्याः** अतीतानागतवर्तमानपरामर्शनिष्ठ एकोऽनुगतो धर्मोऽनुमितिकारणतावच्छेदको वाच्य इति । स चायं धर्मः-यथा एतत्क्षणपूर्वकालत्वाभावविशिष्टैतत्क्षणपूर्वकालोत्तर-कालवत्त्वाभावाभावत्वमेव परामर्शत्वम् । एतद्व्याख्यावर्तमानकालक्षणपूर्वकालवत्त्वं वृत्तपरामर्शे-ऽऽधेयताविशेषं सम्बन्धेन तिष्ठति । तस्य योऽभावः, तद्विशिष्टो यो वर्तमानक्षणपर्वकालोत्तर-कालत्वाभावः । तदभावस्तु परामर्शमात्रे तिष्ठति

अयमत्र भावः-यथैतद्घटत्वाभावविशिष्ट एतद्घटेतरघटत्वाभावाभावो घटमात्रे तिष्ठति तथा वर्तमानक्षणपूर्वकालवत्त्वाभावविशिष्टवर्तमानक्षणे पूर्वकालोत्तरकालवत्त्वाभावाभावः परामर्शमात्रे तिष्ठति । अयमेव परामर्शत्वधर्मोऽनुमितिकारणतावच्छेदक इत्यर्थः ।

(VII) स्वार्थानुमानम् ।

वाक्याप्रयुक्त इति तथा च स्वार्थानुमानं वाक्येन यदप्रयुक्तं भवति प्रत्यक्षमात्रं लिङ्गज्ञानमित्यर्थः । **सहचारेति** अयं भावः-महानसे वह्निसामानाधिकरण्यज्ञानानन्तरं वह्निनिरूपितधूमनिष्ठा व्याप्तिः प्रत्यक्षेण चक्षुरादिना गृह्यते । तदनन्तरं पर्वतसमीपं गतः । तत्र धूमो दृष्टः । धूमदर्शनानन्तरं धूमाग्नयोः यो स्वाभाविकः सम्बन्धः पूर्वं गृहीतोऽस्ति तमवधारयतीति व्याख्याने मूलविशिष्टपदमात्रेणार्थबोधो न [४]भवति । तदर्थं विशिष्टपदं व्याख्यातम् । सहचारेणेत्यादि । ततो नानुपलब्धिः ।

(अ) सामान्यलक्षण प्रत्यासत्ति ।

ननु व्याप्तिर्ग्रहीतुं प्रत्यक्षेण न शक्यते, अतीतानागतधूमादिनिष्ठा व्याप्तिः, सन्निकर्षव्यतिरेकेण गृह्यते [इति]चेत्, न । तत्रालौकिकीसामान्यलक्षणप्रत्यासत्तिस्तिष्ठति । तथा च सामान्यमेव लक्षणं

---

१. B धूमवानयमिति सन्देहा॰. २. B -कत्वम् । तत्र. ३. B घटवान् यत्र. ४. A भवतीति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्वरूपं यस्याः सा, तथा च [१]सामान्यज्ञानं वा सन्निकर्षः । सा च प्रत्यासत्ति तत्रैव भवति । तदाश्रयेण येन[२]-केनचित्समं लौकिकसन्निकर्षस्तिष्ठति । यथा धूमादिस्थले महानसे यदा वह्निनिरूपित धूमनिष्ठा व्याप्ति गृह्यते चक्षुषा तदा धूमवत्त्वेन रूपेण यावतां धूमवतामुपस्थितिर्जाता, वह्निमत्त्वरूपेण यावतां वह्निमतामुपस्थितिर्जाता[३] वह्नित्वेन वा रूपेण यावतां धूमवतामुपस्थितिर्जाता तथा चासन्निकृष्टादि यावद्धर्मज्ञानमपेक्ष्यते तत्सामान्यलक्षणप्रत्यासत्त्यैव भवति । तत्र सन्निकर्षान्तराभावात् । ततो व्याप्तिप्रत्यक्षं प्रति सामान्यलक्षणप्रत्यासत्त्यैव भवति [इति]सिद्धान्तः ।

ननु सामान्यलक्षणप्रत्यासत्तिसद्भावे किं प्रमाणमिति चेत्, न । ज्ञानेच्छाकृतीनां क्रमेण कारणत्वम् । ज्ञाने [ने ?]च्छा जन्यते, इच्छया च प्रकृतिः (कृतिः ?) । तथा चेच्छाऽसिद्धविषयिणी जायते, यथा-पाको मे भवत्विति सिद्धपाकस्य ज्ञानं वर्तते । तत्रेच्छा न जायते, तस्य सिद्धत्वात् सिद्धे चेच्छाविरहात् । तथा च यस्य [४]पाकस्यालौकिकसन्निकर्षाभावेन ज्ञानासम्भवेनासिद्धे पाके इच्छैव न स्यात् । तथा चासिद्धपाकज्ञानार्थं पाकत्वरूपा सामान्यलक्षणा स्वीक्रियते, अज्ञाते पाके इच्छाविरहात् । ततो भविष्यत्पाकेन समं सन्निकर्षान्तराभावात् पाकत्वमेव सन्निकर्षः । एवं कृतावपि [५]कृतित्वेन रूपेणागामिनी या कृतिः तस्यां अपि ज्ञानं कृतित्वरूपसामान्यलक्षणया भविष्यतीति केचित्, तन्न। पाकत्वप्रकारिकेच्छां प्रति पाकत्वप्रकारकं ज्ञानमेव कारणम् । तथा च पाकत्वप्रकारकं ज्ञानं सिद्धपाकविषयकं जातम् । यथा पाक इति-एतज्ज्ञानानन्तरं पाको मे भवत्वित्याकारिकेच्छा पाकत्वप्रकारकाऽसिद्धविषयिणी जायते । ज्ञानेच्छयोः सामानप्रकारकत्वेनैव कार्यकारणभावकल्पनात्, आवश्यकत्वात् । न तु समानविषयत्वेनापि ।

अयमत्र प्रघट्टः-प्रसिद्धपाकज्ञानार्थं भवता सामान्यलक्षणा प्रत्यासत्तिः स्वीकर्तव्या । अन्यथा पाके इच्छा एव न स्यात् । तस्यां पाकज्ञानसाध्यत्वात् । यस्य पाकस्य ज्ञानं वर्तते स तु सिद्ध एव। सिद्धे चेच्छा विरहादिति । अत्र दूषणं यथा-पाकत्वप्रकारकेच्छां प्रति पाकत्वप्रकारं ज्ञानं कारणं न तु समानविषयकमा कोऽर्थः ? यद्विषयकं ज्ञानं तद्विषयिणी एवेच्छेति न[६] । गौरवात् । तथा पाकत्वप्रकारकं ज्ञानं सिद्धपाकविषयत्वं जातम् । तदनन्तरमपि सिद्धे पाके इच्छा जायते ।

ननु ज्ञानेच्छयोः समानप्रकारकत्वेनैव कार्यकारणभावो न समानविषयत्वेनापि तदाऽति प्रसङ्गः । यथा घटत्वप्रकारत्वज्ञानान्तरं घटत्वप्रकारिका पटविषयिणीच्छा भवतु, समानप्रकारकत्वेनैव ज्ञानेच्छयोः कार्यकारणभावकल्पनात् । भवता समानविषयत्वं क्लृप्तं नास्ति । तद्वारणार्थं समानविषयत्वमपि कार्यकारणभावे निवेशनीयम् । तथा च समानप्रकारकत्वे सति समानविषयत्वेन ज्ञानेच्छयोः कार्यकारणभावो वाच्यः । तथा चासिद्धपाकज्ञानार्थं सा मा स्वीकर्तव्येति चेत् न ।

१. A सामान्यसामान्यज्ञानं. २. B omits येन. ३. Pl. add अथ च धूमत्वनिरूपणेन यावतां धूमानामुपस्थिति-र्जाता. ४. B पाकेऽलौ. ५. B कृतकत्वेन. ६. B omits न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समानप्रकारकत्वेनैव कार्यकारणभावकल्पनात् । न चोक्तातिप्रसङ्गः । यद्धर्मप्रकारकं ज्ञानं जातं तद्धर्माश्रये यत्र कुत्रचिदिच्छा जायते, ततः घटत्वप्रकारकं ज्ञानानन्तरं पटे इच्छा न जायते तद्धर्माश्रयत्वाभावादिति सामान्यलक्षणा न स्वीकर्तव्या । केचित्तु तत्स्वीकारे सन्निकृष्टधूमे व्याप्तिसन्देहो न स्यात् । सन्निकृष्टधूमेन समं वह्निसामानाधिकरण्यं गृहीतमेव । धूमो वह्निव्याप्यो न वेति सन्देहस्तु सर्वजनसिद्ध एवेति । अयं च सन्निकृष्टधूमे न जायते, जायते चासन्निकृष्टधूमे । असन्निकृष्टधूमज्ञानार्थं सा मा स्वीकर्तव्या । सन्देहं प्रति धर्मज्ञानस्य कारणत्वादिति ।

तदसत् । सन्देहं प्रति तन्मते धर्मिज्ञानस्य कारणत्वाभावात् । सन्निकृष्ट एव धूमे वह्निव्याप्यत्वस्य सन्देहात् । न च सन्निकृष्टधूमे वह्निव्याप्यत्वं प्रत्यक्षेण गृहीतमिति कथं तत्सन्देह इति वाच्यम्। सन्निकृष्टे धूमे किमेतद्वह्निव्याप्यत्वं वा गृहीतं वह्नित्वावच्छिन्नवह्निव्याप्यत्वं वा गृहीतम् । यद्येतद्वह्निव्याप्यत्वं गृहीतं तदैतद्वह्निव्याप्यत्वविषयकसन्देहोऽपि न जायते । यदि द्वितीयः पक्षः तदा वह्नित्वव्यवच्छिन्नवह्निव्याप्यत्वज्ञानानन्तरं सन्देह एव न जायते । जायते च यदा वह्नित्वावच्छिन्नवह्निव्याप्यत्वं न गृहीतमिति । तथा चायं सन्निकृष्टे धूमे यद्यप्येतद्वह्निव्याप्यत्वग्रहानन्तरं एतद्वह्निव्याप्यत्वसन्देहो[1] भविष्यत्येव । सन्निकृष्टे धूमे वह्नित्वावच्छिन्नवह्निव्याप्यत्वाग्रहात् । तथा च व्याप्यत्वसन्देहार्थमपि सामान्यलक्षणा स्वीकर्तव्येति भावः । ननु सामान्याभावज्ञानार्थं सा स्वीकर्तव्या, यथा भूतले घटो नास्तीति, अत्र घटत्वावच्छिन्नप्रतियोगिताकाभावो बुध्यते, तदभावस्य प्रतियोगिनः भवन्त्यतीतानगतवर्तमानाः घटाः, तेषां ज्ञानं प्रकारान्तरेण न सम्भवति, तैः सह सन्निकर्षाभावात्, सामान्यमेव प्रत्यासत्तिरिति चेत्, न । अभावज्ञानं प्रति प्रतियोगितावच्छेदकावच्छिन्नं यत्र किञ्चित्प्रतियोगिज्ञानं कारणत्वम्, लाघवात् । न च यावत्प्रतियोगिज्ञानं गौरवात् । घटत्वप्रकारकं ज्ञानमपेक्ष्यतेऽतीतानागतज्ञानापेक्षणात् ।

वस्तुतस्तु अभावज्ञानं प्रति प्रतियोगिज्ञानस्य कारणत्वमेव नास्ति, व्यभिचारात् । यत्राभावस्येदंत्वेन रूपेणाभावे प्रत्यक्षता भवति तत्र प्रतियोगिज्ञानं विनाऽप्यभावज्ञानम् । यथेदं तमोदर्शने इदंत्वेन रूपेण ज्ञाने तमसि भावत्वाभावत्वसन्देहात् । अत एवेदंत्वेन रूपेणोपस्थिते [2]तमसि भावत्वाभावत्वसन्देहो जायते । भवन्मतेऽप्यभावत्वसामान्यलक्षणप्रत्यासत्त्या प्रतियोगिज्ञानव्यतिरेकेणापि अभावमात्रप्रत्यक्षत्वात् ।

न च [3]प्रतियोगिविशेषिताभावज्ञानं प्रति प्रतियोगिज्ञानं कारणम्, यथा घटो नास्तीति प्रतियोगिविशेषिताभावज्ञानं भवतीति वाच्यम् । इदं तु [4]विशिष्टवैशिष्ट्यं बोधं प्रति विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणम् । न तु प्रतियोगिज्ञानादिकम् यथा नील-

१. Pl. add न भवति, तथापि वह्नित्वावच्छिन्नवह्निव्याप्यत्वसन्देहो. २. A omits तमसि. ३. B -योगिज्ञानविशे.. ४. विशिष्टवैशिष्ट्यबोधान्नातिरिच्यते । तथा च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घटवद्भूतलनीलरूपविशिष्टो यो घटस्तस्य वैशिष्ट्यं भूतल(ले) भासते। अत्र च विशेषणं भवति घटः, तन्निष्ठा या विशेषणता तस्यावच्छेदकं भवति नीलरूपमिति तत्प्रकारकं ज्ञानं कारणम्। तथा च विशिष्टवैशिष्ट्येन बोधत्वेन विशेषणतावच्छेदकप्रकारकज्ञानत्वेन भिन्न एव कार्यकारणभावः। अयं त्वभावज्ञानं प्रति प्रतियोगिज्ञानकारणतावादिनाऽपि स्वीक्रियते। तथा च प्रतियोगिविशेषिताभावज्ञानं प्रत्यपि प्रतियोगिज्ञानस्य कारणत्वं नास्ति। न च प्रतियोगिज्ञानं विना [१]यदाऽभावेन सममिन्द्रिय सम्बद्ध विशेषणता वर्तते तदा नेति बुद्धिर्भवतु। न चैवं कस्यापीति वाच्यम्। इन्द्रियसम्बद्धविशेषणतायाः प्रतियोगिविशेषिताभावज्ञानत्वस्य कार्यतावच्छेदकत्वकल्पनात्। यथा भूतले घटो नास्तीति, अत्रेन्द्रियसम्बद्धविशेषणतासमत्वे प्रतियोगी भवति घटः। तद्विशेषिताभावज्ञानं कारणमिति तेन नेति बुद्धिर्न भवति। तथा च सामान्येति। लक्षणा सामान्याभावप्रतियोगिज्ञानार्थमपि न सिध्यति।

[२]**पक्षधरमिश्रास्तु** यावत्तेजः संसर्गाभावः तम इति अन्धकाररूपाभावकूटप्रत्यक्षं प्रति तेजोरूपप्रतियोगिज्ञानं कारणम्। तथा च यस्य तेजसाऽन्धसो वृत्तः प्रागभावो वा तिष्ठतीति, यस्य [३]तेजस्तत्प्रतियोगिज्ञानमपि कारणम्, तज्ज्ञानं च सामान्यलक्षणाव्यतिरेकेण, अतः सा स्वीकर्तव्या। तन्मन्दम्। तेजः सामान्याभावस्यैवान्धकारत्वात्। किमर्थमन्धकारत्वं तेजोभा[व]कूटस्य। तथा चोक्तरीत्यासामान्याभावज्ञानं प्रति यत्किञ्चित्प्रतियोगिज्ञानं कारणम्। तथा च वर्तमानतेजोज्ञानमेव कारणमिति न सामान्यलक्षणासिद्धिः।

वस्तुतस्तु घटप्रागभावप्रत्यक्षार्थं सा स्वीकर्तव्या। तथाहि यथेह कपाले घटप्रागभावे एतज्ज्ञानं प्रति अनागतघटज्ञानं कारणं नातीतवर्तमानघटज्ञानम्। अतीतवर्तमानयोः प्रागभावप्रतियोगित्वाभावेन घटाभावप्रत्यक्षं प्रति कारणत्वं [४]भ्रमः। प्रागभावप्रतियोगी त्वनागत एव घट इति तज्ज्ञानं च [५]न सामान्यलक्षणप्रत्यासत्तिव्यतिरेकेण तत्प्रत्यक्षे घटत्वमेव सन्निकर्ष इति।

(ब) ज्ञानलक्षणा प्रत्यासत्तिः।

अलौकिक प्रसङ्गात् [६]ज्ञानलक्षणा। यथा-'सुरभि चन्दनम्' इत्यत्र सौरभ्यस्य ज्ञानं जायते। [७]ज्ञानलक्षणप्रत्यासत्त्या पूर्वं घ्राणेन यस्मिञ्चन्दनखण्डे चन्दनखण्डत्वावच्छेदेन [८]वा सौरभं गृहीतं तस्मिन्नेव चन्दनखण्डे चन्दनखण्डत्वावच्छिन्ने वा 'सुरभि चन्दनम्'-इति कालान्तरे चक्षुरादिना गृह्यते, तदा चाक्षुषः सुरभिगन्धेन समं, ज्ञानरूपा प्रत्यासत्तिः सा तु सौरभलक्षणधर्मस्यैव। [९]न चैवं सुरभित्वरूपसामान्यलक्षणयैव [१०]प्रत्यक्षं भवत्विति वाच्यम्। सा सामान्यलक्षणा धर्मिणः प्रत्यासत्तिः। यथा घटत्वरूपो धर्मो घटस्य धर्मिणः प्रत्यासत्तिः, ज्ञानलक्षणा च धर्मस्यैव। यथेन्द्रियान्तरेण

---

१. B योऽभावेन. २. B मिश्रास्तु. ३. B तेजस्त्व. ४. भ्रमः, कः ? प्राग०. ५. B omits न. ६. B -लक्षणम्। यथा. ७ B. -लक्षणे यथा. ८. A omits वा. ९. B तथैव. १०. B प्रत्यासत्तित्वं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घ्राणादिना यद्गृहीतं [1]सौरभादिकं तदिन्द्रियान्तरेण चक्षुरादिना गृह्यते, तदा ज्ञानलक्षणप्रत्यासत्त्यैव ।

(क) योगजधर्मलक्षणा प्रत्यासत्तिः ।

योगजधर्मलक्षणा प्रत्यासत्तिस्तु ईश्वरसाक्षात्कारार्थं स्वीक्रियते । ईश्वरेण समं सन्निकर्षान्तराभावात्, योगजधर्म एव सन्निकर्षः । तथा च [2]योगाभ्यासं कृत्वा जातो यो धर्मः आत्मनि संस्कारविशेषः स एव योगजधर्म इत्युच्यते । यदा योगीनामीश्वरविषयकनिर्विकल्परूपसाक्षात्कारो जायते तदेश्वरेण समं योगजधर्म एव सन्निकर्ष इति दिक् ।

(VIII) परार्थानुमानम् ॥

वाक्येति वाक्येन प्रयुक्तो वाक्यजन्यो यः परामर्शः तत्परार्थानुमानम् । यथा किञ्चित्प्रति केनचिदुक्तं पञ्चाङ्गविशिष्टं पर्वतो वह्निमानित्यादिरूपमनुमानं-कथा वादः । तथा च [3]वादिना सह पञ्चावयवप्रयोगनियमः क्रियते, उभाभ्यां पञ्चावयवप्रयोगः कर्तव्य एवेति, तदानीमेकतरेण न्यूनावयवकरण[मि]तरस्य निग्रहस्थानमायातीत्यर्थः । **अतथाभूतवादीति** तथा च पञ्चावयव-प्रयोगान्तरेण परामर्शोत्पत्तिरेव न स्यादित्यादि दूषणमलग्नमेव । [4]अत एवाह-**आप्तेति** वह्निव्याप्यधूमवानयमित्यादि लक्षणा[णमा ?]प्तवाक्यादित्यर्थः ।

अनाप्त इति [5]आभासे उक्तं-शब्देनैव साध्यस्य वह्नेः बोधो भवतु, किमर्थमनुमानम् ? तथा च शाब्दी प्रमाऽनुमितिरिति । तदुपर्युच्यते-**अनाप्त इति** । न हि वह्निसम्बन्धप्रतिपादकवाक्याभावात् [6]तद्बोधतात्पर्येणोच्चारितः यो शब्दो वह्निव्याप्यधूमवानित्यादि वाक्यमनाप्तोक्तमेव मतुबर्थस्य धूमेन सममन्वयान्न वह्निसममित्यर्थः । यथा घटशब्दोच्चारानन्तरं पटबोधः न भवति, यथा-वह्नि व्याप्यो यो धूमस्तद्वानयमिति शब्दोच्चारानन्तरं धूमवत्त्वस्यैव बोधो न वह्नि(ह्ने)रिति अनाप्तोक्तत्वमिति[7] भावः ।

(VX) हेतुत्रयनिरूपणम् ॥

व्यापकनिवृत्तिमिति यत्र व्यापकनिवृत्तिरभावस्तत्र व्याप्यस्य साऽपि निवृत्तिरत्यन्ताभावः । यथा धूमस्य व्यापको भवति वह्निः, संयोगसम्बन्धेन यत्र वह्न्यभावो वर्तते, तत्र संयोगसम्बन्धेनैव धूमाभावरूप व्यापकस्यावश्यं भावात् । तता चान्वयव्याप्तौ यद्व्यापकं वह्निरूपं तस्य योऽभावः, स च व्यतिरेकव्याप्यो भवति । अन्वयव्याप्तौ यद्व्याप्यं धूमरूपं तदभावो व्यतिरेकव्याप्तौ व्यापको भवति। तथ च वह्न्यभावव्यापकत्वं धूमाभावस्य चेदं वह्न्यभावसमानाधिकरणात्यन्ताभाव-प्रतियोगितानवच्छेदकधूमाभावत्वम् । यथा यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति व्यतिरेकव्याप्तिः।

---

१. B सौरभ्यादि०. २. A भ्यासेन कृ०. ३. A यथा. ४. A omits अत एवाह. ५. B अभासे. ६. B तथोद्बोध०. ७. B अन्याऽऽप्तोक्त०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तस्मादिति मूलम् [1]अन्वयव्याप्यव्यापकाभावादित्यर्थः । **तदेतन्निष्ठेति मूलम्** । तदेव व्यापकं यद्[2] व्याप्यं विहायापि तिष्ठति । यथा धूमं [3]विहायाप्ययोगोलके वह्निस्तिष्ठति । धूमस्तु वह्निं विहाय न तिष्ठति ।

यच्छब्देति यत्र यच्छब्देति-यत् प्रथमत उच्चार्यते तस्यैव व्याप्यत्वम् । यथा यत्र धूमस्तत्र वह्निरिति, तच्छब्देन पश्चादुच्चार्यते तस्य व्यापकत्वम् । प्राथम्यं नाम प्रथमत उच्चारणम् । अन्यथा तत्र वह्निर्यत्र धूम इत्युच्चारेऽपि व्यापकाव्यापकभावप्रतीतिः [4]स्यात् । न चेष्टापत्तिः । शिष्टानां तथाऽनाचारात् । यथा पर्वतो वह्निमानित्येवानुमितिः पर्वतविशेष्यिका स्वीक्रियते । न तु पर्वते वह्निरित्यनुमितिरिति ।

अन्यथेति मूलम् व्यतिरेकव्याप्तावित्यर्थः । **आधिक्येति** यदुभाभ्यां वादिभ्यां नियमत्वे क्लृप्तो भवति परस्परमन्वयव्याप्तिरेवोच्चारणीया, तदा व्यतिरेकव्याप्त्युच्चारेऽऽधिक्यं नाम निग्रहस्थानं भवतीत्यर्थः । अन्वयव्याप्त्यैव चरितार्थत्वेन व्यतिरेकव्याप्तिनिरूपणेऽऽधिक्यं नाम निग्रहस्थानसम्भवादिति भावः । यदा तूभयवादिभ्यां व्यतिरेकव्याप्ति[5]प्रदर्शनस्यैव नियमः कृतः, तदा [6]व्यतिरेकव्याप्तिरेव प्रयुज्या, नान्वयव्याप्तिरित्याह-**व्यतिरेक्यपीति** इदं **त्विति** यदा वादिभ्यां पञ्चावयवप्रयोगसङ्केतकृतः भवेत्तदाऽन्वयव्याप्तिः प्रयोज्या । यदि सामान्यतो व्याप्तिमात्रं प्रदर्शनीयमिति सङ्केतः कृतस्तदा व्यतिरेक व्याप्तिरपि प्रदर्शनीयेति भावः ।

नन्विति यद्यन्वयमात्रेणैवसामानाधिकरण्यमात्रेणैवान्वयिता तदा व्यतिरेकोऽपि हेतुर्न स्यात् । यथा केवलव्यतिरेकीहेतुर्भवति-'पृथिवी इतरेभ्यो भिद्यते, पृथिवीत्वात्'-इति [7]एतस्याप्यन्वयित्वमेव, पक्षे साध्येनेतरभेदेन समं हेतोः पृथिवीत्वस्य सामानाधिकरण्यादित्यर्थः । तथा चान्वयित्वे सपक्षहेतुसाध्ययोः सामानाधिकरण्यं प्रयोजकम्, न तु पक्ष इत्याशङ्क्यार्थः ।

[8]व्यतिरेकमात्रं दर्शयति-**जीवदिति** ज्ञानावच्छेदकं शरीरमित्यर्थः । **सात्मकत्वमिति** । [9]ननु सात्मकं किमात्मसंयोगित्वं चेत्, तदाऽसाधारण्यं स्यादित्यत्राह-ज्ञानसमानाधिकरण-ज्ञानकारणीभूतसंयोगाश्रवत्वकार्यत्वम् । अस्यार्थो-यथा ज्ञानसमानाधिकरणश्चासौ ज्ञानकारणी भूतश्चासौ संयोगः शरीरात्मसंयोगः । तदाश्रयत्वे सति कार्यत्वम् । ज्ञानसमानाधिकरणो नाम-ज्ञानाधिकरणे वर्तमानः-ज्ञानजनकीभूतो नाम ज्ञानकारणमपि भवति । एतादृशो यो संयोगः शरीरात्मसंयोगः तदाश्रयत्वे सति कार्यत्वमित्यर्थः कार्यत्वमित्युक्ते घटादावतिव्याप्तिः, अत उक्तं संयोगाश्रयत्वेति । तथापि तत्रैवातिव्याप्तिः, अत उक्तं ज्ञानकारणीभूतेति । तथा च घटस्य यद्यपि संयोगाश्रयत्वे सति

---

१. B अन्वयव्याप्तिव्यापकभा॰. २. A omits व्याप्यं. ३. B विहायायो॰. ४. A स्यादिष्टा॰. ५. B -प्तिपदस्य तस्यैव. ६. B omits व्यतिरेक. ७. B -न्वयत्व॰. ८. B व्यतिरेकी जीवदिति. ९. B omits the reading between ननु.....स्यादित्यत्राह.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कार्यत्वं वर्तते तथापि ज्ञानकारिणीभूतसंयोगाश्रयत्वं नास्ति । तथापि त्वगिन्द्रियेऽतिव्याप्तिः, तस्यापि ज्ञानकारणीभूतत्वग्मनःसंयोगाश्रयत्वे सति कार्यत्वात् । तत उक्तं–ज्ञानसमानाधिकरणेति पदम् । ज्ञानं चात्मनि, त्वगमनःसंयोगस्त्वचि मनसि च । तत्र ज्ञानाभावात् सामानाधिकरण्यत्वं नास्तीति । ज्ञानसमानाधिकरणस्तु शरीरात्मसंयोग एव । यद्यपि मरणावस्थायामपि शरीरात्मसंयोगो वर्तते, [1]आत्मना नित्यत्वव्यापकत्वाभ्यां तथापि [2]सः न ज्ञानजनकीभूतादृष्टविशेषो नास्तीति ।

अथवा भोगसमवायिकारणतातिरिक्ते भोगाधारत्वं सात्मकत्वम् । भोगस्य समवायिकारण-मात्मा, तदतिरिक्तो भोगाधारो भवति शरीरं तदाधारत्वम् । **पक्ष एवेति** यत्रापि करणे साध्यं निश्चितं नास्ति, स एव पक्षपदेन गीयते । **अन्यतेति** यदि च साध्यत्वेनैव पक्षता तदा पक्षस्यापि सपक्षत्वादिति विरोधः स्यात् । कुत्रचित्पक्षोऽपि सपक्षोऽस्तीति विरोधः स्यादित्यर्थः ।

नन्व[3]न्वयिनी व्यतिरेकिणी चानुमित्योः को भेदः, इत्यत आह **अन्वयिनीति** 'पर्वतो वह्निमान्' इत्येवानुमितिः । व्यतिरेकिणी तु वह्न्यभावाभाववानिति भेद इत्यर्थः । **अन्यस्येति** पर्वतो (ते)वह्निः, पर्वते वह्न्यभावाभाव इत्यादीनामप्रमाणिकत्वमित्यर्थः । ननु व्यतिरेकित्वं किमिति–अत आह– **व्यतिरेकित्वमिति** तथा च 'पृथिवी इतरेभ्यो भिद्यते, पृथिवीत्वात्'–इत्यत्रेतरभेदरूपसाध्यस्य विपक्षो भवति जलादिः, ततो व्यावृत्तिर्वर्तते पृथिवीत्वस्य, तेन पृथिवीत्वं व्यतिरेकी हेतुः ।

ननु व्यतिरेकमात्रेणाभावो यस्य वर्तते इति, एतावन्मात्रेण व्यतिरेकित्वमिति; तथा[4] सति केवलान्वयिनि[5] व्यतिरेकित्वं स्यादित्यत आह **अयमिति** 'अयं[6] घटः आकाशात्यन्ताभाववान्, कालात्यन्ता भावात्;–इत्यत्राकाशात्यन्ताभावो भवति साध्यः, कालात्यन्ताभावो भवति हेतुः । यत्र यत्र कालात्यन्ताभावस्तत्र तत्राकाशात्यन्ताभावः । कालाकाशात्यन्ताभावयोः सर्वत्र वर्तमानत्वात् केवलान्वयित्वम् । यदि व्यतिरेकित्वमात्रेण व्यतिरेकित्वमुच्यते तदा कालाकाशयोरपि व्यतिरेकः प्रसिद्धः वर्तते । आकशात्यन्ताभावव्यतिरेकस्याकाशस्वरूपात् कालात्यन्ताभावस्य व्यतिरेकस्य कालत्वात् । तथा च केवलान्वयिन्यपि व्यतिरेकः प्रसिद्धः एव । न चात्यन्ताभावप्रतियोगित्वं केवलान्वयित्वमिति केवलान्वयिलक्षणं दुष्टं जातम्, आकाशात्यन्ताभावस्याकाशात्य-न्ताभावप्रतियोगित्वात् आकाशरूपात्यन्ताभावस्य प्रतियोगी भवत्याकाशाभावस्तथाचाकाशात्यन्ता भावस्यात्यन्ताभावप्रतियोगित्वेन केवलान्वयित्वेऽव्याप्तिरिति वाच्यम् । वृत्तिमदत्यन्ताभावाप्रति-योगित्वस्यैव केवलान्वयित्वात् । वृत्तिमान् योऽत्यन्ताभावस्तदप्रतियोगित्वम् । तथा [7]चाकाशात्यन्ता

---

१. B आत्मानात्मत्वव्यापकत्वाभ्यां. २. B omits सः न. ३. B नन्वयेन व्यतिरेकेण चानु॰. ४. B तथा च सति–. ५. A केवलान्वयिनः. ६. B अयं प्रघट्टः. ७. B –त्यन्ताभावस्तु.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भावाभावस्तु आकाशस्वरूप एव । स च वृत्तिमान् भवतीति [१]आकाशात्यन्ताभावः केवलान्वयी । एवं कालात्यन्ताभावोऽपि केवलान्वयी परमाकाशं केवलान्वयि न भवति । आकाशस्य वृत्तिमान् योऽत्यन्ताभावस्तत्प्रतियोगित्वमेव वर्ततेऽऽकाशस्येति नाकाशं केवलान्वयि सर्वत्राकाशाभाव एव तिष्ठति, आकाशं [२]च न कुत्रापि [३]तिष्ठतीति आकाशं केवलव्यतिरेकी धर्म(र्मि)इति । तथा यदि व्यतिरेकिधर्मत्वेनैव व्यतिरेकित्वमुच्यते तदा पूर्वोक्तानुमानस्यापि व्यतिरेकित्वं स्यादिति ।

अन्यथा व्याचष्टे-विपक्षव्यतिरेकितया व्यतिरेकित्वमुक्तार्थत्वात् । तथा चाकाशात्यन्ताभावस्य विपक्षो भवति-आकाशम् । ततो व्यावृत्तिराकाशात्यन्ताभावस्य नास्ति । तत्राप्याकाशेऽऽकाशात्यन्ताभावस्य वर्तमानत्वात् । तेनान्वयित्वमेवोक्तानुमानस्येति भावः ।

वेलव्यतिरेकी हेतुर्यथा-'पृथिवी इतरेभ्यो भिद्यते, पृथिवीत्वात्, यत्रेतरभेदाभावः तत(त्र) पृथिवीत्वाभावः, यथा जलं, तथा चायम्-इतरभेदव्याप्यपृथिवीत्ववती । तस्मादितरभेदव्याप्य-पृथिवीत्वात् तथा चेतरभेदाभावाभाववतीत्यनुमितिः ।

ननु पृथिवीतरभेद- कुत्र प्रसिद्ध इति चेत्, [४]घटादावेव तत्प्रसिद्धिः । न च तदाऽन्वयित्वापत्तिरिति वाच्यम् । पक्षातिरिक्ते हेतुसाध्ययोः यदि सामानाधिकरण्यं गृहीतं भवति तदेवान्वयित्वम् । अत्र तु पक्षतावच्छेदकाश्रये घटादौ पृथिवीत्वे साध्यसामानाधिकरण्यग्रहान्नान्वयित्वम्। तथा च घटस्यापि पृथिवीत्वात् पक्षातिरिक्ते साध्यसामानाधिकरण्यग्रहाभावात् नान्वयित्वम् । न च यदि पक्षतावच्छेदकाश्रये साध्यसिद्धिर्जाता, तदा सिद्धसाधनेमेवेति वाच्यम् । अनुमित्युद्देशस्तु पक्षतावच्छेदकावच्छेदेनात्र कृतोऽस्ति । तथा च पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सा साध्यसिद्धिर्विरोधिनी । न पक्षतावच्छेदकासामानाधिकरण्येनापि साध्यसिद्धिर्विरोधिनी । तथा च यद्यपि घटादौ पक्षतावच्छेदकं यद् पृथिवीत्वं तत्सामानाधिकरण्यं नेतरभेदरूपसाध्यसिद्धिर्वर्तते, तथापि सा न विरोधिनी । यतः पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदेन साध्यसिद्धेर्विरोधित्वात् । प्रकृते तु यद्यपि पृथिवीत्वसामानाधिकरण्येनेतरभेदरूप साध्यसिद्धिर्जातास्ति तथापीतरभेदरूपसाध्यसिद्धिः पृथिवीत्वावच्छेदेन न जाताऽस्तीति । सैव जाता चेत्, [५]तदा विरोधिनी भवति । प्रकृते च सा नास्तीति न सिद्धसाधनम् ।

तथा चायमर्थः-पक्षतावच्छेदकसामानाधिकरण्येनानुमितिश्च यदुद्देश्या भवति तदा तदनुमितिः पक्षतावच्छेदकावच्छेदेनैव जायते । कदाचित् पक्षतावच्छेदकसामानाधिकरण्येनानुमिति र्जायते, कदाचित्, पक्षतावच्छेदकावच्छेदेनानुमिति र्जायते । प्रकृते च पक्षतावच्छेदकावच्छेदेनैवेति न सिद्धसाधनमिति जातम् । न च घटादौ साध्यस्य प्रसिद्धत्वे[त]दन्वयिता भवत्विति वाच्यम् । घटस्यापि

१. A आकाशाभावः. २. B omits च. ३. B omits इति. ४. B घटाभावै(व ए?)व. ५. B तद्विरो॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पक्षान्तःपातित्वात्, पक्षतारिक्ते साध्यप्रसिद्धेरन्वयिता भवतीति ।

ननु व्यतिरेकिणि साध्याभावः कुत्र प्रसिद्धः कथं [१]साध्याभावस्य साधनाभावव्याप्यत्वं तदा सम्भवति यदा कस्मिंश्चिदधिकरणे साध्याभावः प्रसिद्धो भवति । अत्र साध्यं भवति पृथिवीतरभेदः, तदभावः कुत्रपि प्रसिद्धो नास्ति । इतरपदेन जलादिकं ग्राह्यम् । भेदपदेन तदन्योन्याभावः । तदभावः कुत्रापि प्रसिद्धो नास्ति । न पृथिवीतरभेदाभावो जलादौ प्रसिद्धः, इतरभेदस्य पृथिवीमात्रे स्थितित्वादिति वाच्यम् । जलादावपीतरभेदस्य वर्तमानत्वात् । तदभावोऽप्रसिद्ध इति-यथा 'पृथिवीतरो भवति वायुः, तद्भेदो वर्तते जले,' अथ च पृथिवीतरद्भवति जलम्, तद्भेदो वर्तते वायौ, इति सर्वत्र परस्परमितरभेदः बोध्यः । तथा चेतरभेदे जलादौ विद्यमाने कथं तदभावः न प्रसिद्धः इति न चेतरत्वावच्छिन्नभेदाभावो[२] वाच्यः यतः पृथिवीतरत्वावच्छिन्नं जलादि सर्वं भवति, तद्भेदस्तु न जलादौ, वर्तते च तद्भेदः पृथिव्यामेव, तदभावो जलादौ प्रसिद्ध एवेति वाच्यम् । जलादावपि इतरत्वावच्छिन्नभेदस्य सत्त्वात् । तथाहि जलं न पृथिवीतरद् यावदिति प्रतीत्या इतरभेदो जलादाप्यस्ति । तथा चेतरत्वावच्छिन्नस्यैकस्याप्रसिद्धया तद्भेदोऽप्यसिद्धः । तदभेदाप्रसिद्धया तदभावोऽप्यसिद्धः । [३]इति चेत् न । अत्र भेदकूटस्यैव साध्यत्वात् । तथाहि यदा जलत्वावच्छिन्नप्रतियोगिकभेदस्तेजस्त्वावच्छिन्नप्रतियोगिकभेदः[४] भेदः । एवं वायुत्वावच्छिन्नप्रतियोगिकभेदादीनां पृथिव्यां प्रसिद्धत्वात् । पुनस्तद्भेदाभावानामप्यनयैव रीत्या प्रत्येकं जलादौ प्रसिद्धिः । यथा जलत्वावच्छिन्नप्रतियोगिताकान्योन्याभावात्यन्ताभावो जले यथा जलत्वावच्छिन्नप्रतियोगिताकान्योन्याभावो भवति पृथिव्याम् । तस्यान्योन्याभावात्यन्ताभावो जलत्वरूपस्तिष्ठति जले । एवं तेजस्त्वप्रतियोगिकान्योन्याभावात्यन्ताभावस्तिष्ठति तेजसि । एवमन्यत्रापि । तथा चानया रीत्या इतरभेदोऽपि प्रसिद्धः । तदभावोऽपि प्रसिद्धः । पूर्वोक्तरीत्येतिध्येयम् । तथा च [५]साध्यप्रसिद्धिर्भवतु मा भवतु वा, व्यतिरेकिण्यप्रसिद्धसाध्यके एवानुमितिर्जायते । परं साध्याभाव प्रसिद्धिरवश्यमपेक्षणीयेति सा दर्शिता ।

ननु व्यतिरेकव्याप्तिज्ञानं कथमनुमितिकरणं, व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यैवानुमितिकरणत्वात्, तच्च तत्र नास्ति, यथा व्याप्तिरभावनिष्ठा, यथे[त्रे]तरभेदाभावस्तत्र पृथिवीत्वनिष्ठा तथा च व्याप्तिः प्रदर्शिता पृथिवीत्वाभावे, पक्षधर्मता च पृथिवीत्वे, व्याप्तिरूपं विशेषणं पृथिवीत्वरूपे विशेष्ये न वर्तते इति व्यधिकरणत्वात् व्याप्तिवैशिष्ट्यं व्याप्तिप्रकारकत्वं[६] पक्षधर्मतायां नास्तीति चेत्, न । व्यतिरेकिणि व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत **इत्याचार्याः** ।

अयमर्थः-व्यतिरेकसहचारेण साध्यसाधनयोरभावसहचारेणान्वयव्याप्तिरेव गृह्यते । यदभावयोः सहचारः गृहीतः तत्प्रतियोगिरूपभावयोरेव व्याप्तिः गृह्यते नान्ययोः । यथा यत्रेतरभेदा

---

१. B साध्यते । भावस्य. २. B भेदस्य भावो. ३. B -ऽपि सिद्धः । ४. B -गिकभेदेऽप्यसिद्धः । तद्भेदाप्रसिद्ध्या, एवं ५. B -ध्यसि. ६. B -प्रकारत्वं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भावःपृथिवीतरभेदाभावः तत्र पृथिवीत्वाभाव इति सहचारज्ञानानन्तरं पृथिवीत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानच्छेदकेतरभेदत्वावच्छिन्नेतरभेदसामानाधिकरण्यरूपाऽन्वयव्याप्तिः[१] पृथिवीत्वनिष्ठा व्यतिरेकसहचारेण गृह्यत इत्यर्थः । तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञान-सत्त्वेनान्वयव्याप्तिसत्त्वेन व्यतिरेकिण्यपि न लक्षणस्यानुपपत्तिः।

वस्तुतस्तु व्यतिरेकसहचारेण व्यतिरेकव्याप्तिग्रहणेऽपि न दोषः । साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा या व्यतिरेकव्याप्तिः, पक्षधर्मे सत्त्वात्, तथा च पक्षधर्मतायां व्याप्तिवैशिष्ट्यमस्तीति नानुपपत्तिर्लक्षणस्य । यथा 'पृथिवी इतरेभ्योभिद्यते, पृथिवीत्वात्,' इत्यत्र व्यतिरेकिणि साध्याभावो भवति पृथिवीतरभेदाभावः, तत्प्रतियोगित्वं पृथिवीत्वे पक्षधर्मे तिष्ठति, ततो नानुपपत्तिः । तथा च पृथिवीतरभेदव्याप्यं, इतरभेदाभावव्यापकीभूताभावप्रतियोगित्वात्, अन्वयव्यतिरेकिवत्[१] यत्रेतरभेदाभावव्यापकीभूताभावप्रतियोगित्वं वर्तते तत्र पृथिवीतरभेदो वर्तते । यथाऽन्वयव्यतिरेकिणि धूमे हेताविति। व्यतिरेकव्याप्तिरपि पक्षधर्मोपरिप्रकारत्व[२] इति सिद्धम् ।

रूपचतुष्टयमेवेति तथा च व्यतिरेकिणि सपक्षे सत्त्वं नास्ति, तस्य सपक्षाभावात् । केवलान्वयिनि तु विपक्षाद् व्यावृत्तिर्नास्ति, तस्य विपक्षाभावात् । तथाप्यनयोः चतुष्टयमेवाङ्गमधिकस्यानुपयोगादित्यर्थः । पञ्चाङ्गयां त्वन्वयव्यतिरेकिण्येवोपयोग इति भावः ।

(X) पक्षतालक्षणम् ।

पक्षतां विचारयति-**नन्विति** तथा च यत्र साध्यं निश्चितं चक्षुरादिना तत्रैव पुनरप्यनुमित्सया तर्करसिकेन साध्यमनुमीयते । तत्रेदं [३]पक्षतालक्षणमव्याप्तम्, साध्यमचक्षुरादिना निश्चयेन सन्देहाभावात् । तथा च मूलकृदुक्तं सन्दिग्धसाध्यधर्मी पक्षः [इति]। धर्मपदस्यानुपयोगात् वैयर्थ्यं, लाघवात् धर्मी एव संदिग्धसाध्यो ग्राह्यः । ननु कथं[४] निश्चितेऽनुमानमिति चेत्, चक्षुरादिना निश्चितेऽपि पदानुमानेनानिश्चिते तर्करसिकाणामनुमानेन ज्ञान(तु)मिच्छा जायते । तथा चानुमित्सयैव तत्राप्यनुमान भयतीव्यर्थः । इच्छाघटिता सामग्री बलवतीति भावः । अनुमानाधिगतेऽपि शब्दादीच्छा-सम्भवाच्छब्देऽपि प्रमाणम् । तत्र तथा चानुमित्साघटिते पक्षतालक्षणं करोति-**अनुमित्साविरहेति**-अनुमित्सा अनुमातुमिच्छा । तस्यां विरहोऽत्र संसर्गाभावः । तद्विशिष्टा या सिद्धिः [५]प्रत्यक्षादिज्ञानं तदभावः पक्षतेत्यर्थः । तथा चायं विशिष्टाभावो ग्राह्यः । विशेषणं भवति सिषाधयिषाविरहोऽनुमित्साविरह[६] इति यावत् । विशेष्यं भवति सिद्धिः, तदभावो विशिष्टाभावःपक्षताऽभावपदार्थकः[७], तस्या प्रतिबन्धकाभावत्वेन [८]कारणत्वम् । प्रतिबन्धिका भवति सिषाधयिषाविरहविशिष्टा सिद्धिः । अनुमितौ तदभावः । प्रतिबन्धकाभावत्वेन

---

१. B -तर भिन्नं भेदत्वा. २. B प्रकार इति. ३. B omits पक्षता. ४. B inserts after कथं निश्चयेन .....मूलकृदुक्तं but it is a mere repetition of the previous sentence. ५. B प्रतिपक्षादि. ६. B -विरहादिति. ७. B -पदार्थः । ८. B कारणम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कारणम् । तथा च पक्षताऽनुमितौ स्वातन्त्र्येण कारणम् ।

यद्यपि **प्राचीनैः** पक्षस्यैव लक्षणं कृतमस्ति तथापि पक्षपदेन पक्षता ग्राह्या । पक्षज्ञानमनुमितौ कारणम् । न तु पक्षतायाः ज्ञानं कारणम् । पक्षतायाः स्वरूपसत्या एवानुमितिकारणत्वात् ।

विशिष्टभावः त्रिधा कारणं भवति-एको विशेषणाभावप्रयुक्तः (१) द्वितीयो भवति विशेष्याभावप्रयुक्तः, (२) तृतीयो भवत्युभयाभावप्रयुक्तः (३) । तथाहि विशेष्यरूपा सिद्धिर्वर्ततेऽथवाऽनुमित्याऽपि वर्तते । तत्र विशेषणाभावप्रयुक्तो विशिष्टाभावस्तिष्ठति । विशेषणं भवत्यनुमित्साविरहः । तदभावो भवत्यनुमित्सा । तता चानुमित्साऽथ च सिद्धिरित्युभयं यत्र तिष्ठति तत्रानुमित्साविरहविशिष्टसिद्ध्यभावो वर्तते । यत्र सिद्धिर्वर्तते वह्निमानेतादृशी तत्र यद्यनुमित्साजाताऽनुमानमेव वह्निज्ञानं भवत्वित्यनुमित्सा । तदानीमनुमित्साविरहविशिष्टसिद्ध्यभावो वर्तते । अयं च विशेषणाभावप्रयुक्तो विशिष्टाभावो वर्तते । अनुमित्साविरहरूपं [१]यद्विशेषणं तदभावो भवत्यनुमित्सा । तद्विशिष्टा सिद्धिर्यत्र वर्तते यत्र यद्यपि विशेष्यं सिद्धिरूपं तिष्ठति तथाप्यनुमित्साविरहरूपविशेषणविशिष्टं सिद्धिरूपं विशेष्यं नास्तीति । (१) [२]इयमेवैकपक्षता । विशेष्याभावप्रयुक्तो विशिष्टाभावः-यथा यत्र चानुमित्साविरहो वर्तते-इत्येवं रूपं विशेषणं वर्तते, अथ च सिद्धिर्नास्तीति विशेष्यं नास्ति, [३]तत्र विशेष्याभावप्रयुक्तो विशिष्टाभावः [४]इयमपि विशेष्याभावप्रयुक्तविशिष्टाभावरूपा पक्षता (२) । उभयाभावप्रयुक्तो विशिष्टाभावो यथा यत्रानुमित्साऽपि वर्तते इति विशेषणाभावोऽस्ति यत्र च सिद्ध्यभावोऽपि विशेष्यो भावरूपोऽस्ति तत्रोभयाभावः(व)प्रयुक्ते विशिष्टाभावस्तिष्ठति, तत्रापि पक्षता (३) । एतादृशधर्मविशिष्टो यो धर्मी, सः पक्षः, पक्षतायाः पक्षधर्मत्वात् । एतदेवाहअनुमित्साविरहेत्यादि ।

ननु विशिष्टाभावस्य विशेषणाभावविशेष्याभावातिरिक्तत्वे किं प्रमाणमिति चेत्, प्रतीतिरेव । यथेह गृहे दण्डी नास्तीति प्रतीति हि यत्र दण्डो वर्ततेऽथ च पुरुषो नास्ति तत्रापि दण्डी नास्तीति प्रतीति र्जायते । यत्र पुरुषो वर्ततेऽथ च दण्डो नास्ति तत्रापीयमेव प्रतीतिः । यत्र चोभयं नास्ति तत्राप्येतादृश्येव प्रतीतिरिति तथा चानुगतधर्मव्यतिरेकेणेयं प्रतीतिरनुपपन्ना भवतीति विशिष्टाभावत्वरूपोऽनुगतो धर्मः स्वीकर्तव्य एवेति[५] । अन्यथा यत्र दण्डविशिष्टो पुरुषो वर्तते तत्रापि दण्डी नास्तीति प्रतीतिः स्यात् । यद्यपि दण्डः हस्ते वर्तते तथापि भूतले नास्तीति दण्डाभावविषयिणी दण्डी नास्तीति प्रतीति श्चेद्भवति, तदा यत्र दण्डविशिष्टो पुरुषो वर्तते तत्राप्येतादृशी प्रतीति र्भवतु । अस्मिन्नये तु न भवति । दण्डविशिष्टो भवति पुरुषः । तस्य भूतले वर्तमानत्वात् । ततो विशिष्टाभावस्तु तदुभयाभ्यामतिरिक्त एवेति दिक् ।

---

१. B omits यद्. २. This be more suitable after इयमेवैकपक्षता. ३. B omits तत्र. ४. B -भावो यथा इयमपि. ५. A एव ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(XI) विपक्षलक्षणम् ।

निश्चितसाध्याभाववान् विपक्षः-इत्युक्ते यत्राव्याप्तवृत्तिसाध्यं भवति संयोगविभागादिकं तदधिकरणीभूतो यः पक्षस्तस्यापि[1] विपक्षत्वं स्यादत उक्तं **व्याप्यवृत्तीति** साध्यविशेषणम् । तथा च[2] व्याप्यवृत्ति यत्साध्यं तस्य योऽत्यन्ताभावस्तद्वान् यः स विपक्ष इत्युच्यते । यथा 'इदं द्रव्यम् गुणवत्त्वात्' इत्यत्र द्रव्यत्वे साध्ये विपक्षो भवति गुणादिः, व्याप्यवृत्तिसाध्यं भवति द्रव्यत्वम्, द्रव्यत्व-समानाधिकरणात्यन्ताभावप्रतियोगित्वात् । तस्य व्याप्यवृत्तित्वं द्रव्यत्वाधिकरणे, द्रव्यत्वात्यन्ताभावो नास्ति । भवति च गुणत्वादीनां, तद्प्रतियोगित्वात् । द्रव्यत्वस्य व्याप्यवृत्तित्वं संयोगस्य च संयोगसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् । यतः संयोगाधिकरणे वृक्षे संयोगात्य-न्ताभावोऽपि तिष्ठति । तत्प्रतियोगित्वं संयोगे वर्तते इति तेन संयोगरूपसाध्यस्याव्याप्यवृत्तित्वमित्यर्थः । ननु 'पर्वतो वह्निमान्'-इत्यादौ वह्नेरप्यव्याप्यवृत्तित्वमस्त्येव, किञ्चिद्देशावच्छेदेन [3]तदभाव इति चेत्, न । **प्राचीनमते** द्रव्यस्याव्याप्यवृत्तित्वं [4]पर्वते वह्निरिति प्रतीतेः न च बाधात् सा प्रतीतिर्भ्रान्ता यतो नितम्बे हुताशनो न शिखरे इति वाच्यम् । नितम्बादि र्भवति तदवयवः । तथा च पर्वतावयवे वह्निर्नास्ति किन्तु पर्वते वह्निरस्त्येव ।

शिरोमणिमते संयोगसम्बन्धेन द्रव्यमव्याप्यवृत्तिरेव । तथा च प्रतियोग्यसममानाधि-करणसाध्यात्यन्ताभाववान् विपक्ष इति प्रतियोग्यसमानाधिकरणो यः साध्यात्यन्ताभावः, तद्वानिति । तथा च यत्र संयोगसाध्यो भवति तत्रापि यद्यपि द्रव्येऽपि संयोगसामान्याभावो वर्तते तथापि सः प्रतियतोग्यसमानाधिकरणो न भवति द्रव्ये संयोगस्यापि वर्तमानत्वात् । प्रतियोग्यसमानाधिकरणो यो[5] संयोगात्यन्ताभावः वर्तते गुणादौ स एव संयोगे साध्ये विपक्षो गुणादिके । **विपक्ष** इति एवं वह्नौ साध्येऽपि पर्वते यो वह्न्यभावो वर्तते किञ्चिद्देशावच्छेदेन स प्रतियोग्यसमानाधिकरणो न भवति तत्प्रतियोगिनो वह्नेरपि सत्त्वात् । [6]तत्र च प्रतियोग्यसमानाधिकरणो वह्नेरभावो ह्रद इति । [पक्ष] सपक्षविपक्षा इति ।

॥ हेत्वाभासाः ॥

(I) व्याप्यत्वासिद्धः ।

सहचाराभावादिति व्याप्तिग्राहकं यत्प्रमाणम्, तत्रास्ति । सहचारो भवति व्याप्तिग्राहकः प्रमाणं, तदभावादित्यर्थः ।

[अ] उपाधिस्वरूपम्

[7]**व्यभिचारादित्यर्थ इति** उपाधिसद्भावे चावश्यं व्यभिचार इत्यर्थः । सत्त्वे इति 'दृष्टान्ते[8]

---

१. B Repeats तस्यापि. २. A omits च. ३. Pl. add वह्नि र्वतते, किञ्चिदेशावच्छेदेन. ४. B वर्तते । वह्नि. ५. B अयं. ६. B तथा ७. It is अव्य in त.भा.प्र. ८. B दृष्टान्तेन.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घनरूपे हेतुसाध्यसामानाधिकरण्यं नास्ति । स[त्त्वं]भवति हेतुः, क्षणिकत्वं साध्यम् । अनयोः सामानाधिकरण्यग्राहकं प्रमाणं नास्ति । दृष्टान्ते घने क्षणिकत्वसत्त्वयोः सहचारो नास्तीति भावः ।

क्वचिदिति यदि चायमपि सोपाधिकत्वेनैव हेत्वाभासोऽङ्गीक्रियते, तदा क्षणिकत्वं च कुत्रापि प्रसिद्धं चेद्भवति तदा तत्रोपाधिर्वक्तुं युज्यते । उपाधेः साध्यव्यापकत्वात् । यदि च साध्यं क्षणिकं कुत्रचित्प्रसिद्धं भवेत् तदा तेन सह व्यापकत्ववं सिध्येत् । अयं दृष्टान्तः उभयवादिसद्धः न भवति। उभयवादिसिद्धस्तु चरमशब्दो भवति । स च यथा यो शब्द- उत्पन्नः तद्व्यवहितोत्तरक्षणे प्रलयकालो वृत्तस्तत्र जन्यमात्रस्य ध्वंसो भवति । ततो द्वितीयक्षण एव तस्य नाशात् । क्षणिकत्वमिति यदि द्वितीयक्षणे शब्दस्तिष्ठेत् तदा प्रलयत्वानुपपत्तिरिति केनचिद्व्याख्यातमुपाधिवादमवतारयति ।

साध्यव्यापक इतीति साध्यस्य योधर्मो व्यापको भवति, साधनस्य चाव्यापको भवति धर्मस्तत्र साधने उपाधिः । यथा 'धूमवान् वह्नेः'-रित्यत्रार्द्रेन्धनम्, आर्द्रेन्धनप्रभववह्निमत्त्वं चोपाधिः [1]वा। साध्यं भवति धूमः । तद्व्यापकत्वं धूमसमानाधिकरणत्यन्ताभावाप्रतियोगित्वरूपमार्द्रेन्धनेऽऽर्द्रेन्धनप्रभववह्निमत्त्वेवा तिष्ठति । साधनाव्यापकत्वं च वह्निसमानाधिकरणात्यन्ताभावप्रतियोतोगित्वरूपं तिष्ठति । एतादृशो धर्मः 'वह्निमान् धूमात्'-इत्यत्र कोऽपि नास्त्येव ।

नन्वार्द्रेन्धनेऽपीदं लक्षणं न गच्छति । साध्यव्यापकत्वाभावात् । तथाहि धूमसमानाधिकरणोऽत्यन्ताभावोऽऽर्द्रेन्धनस्यापि वर्तते । धूमावयवे यथा धूमाधिकरणं भवति धूमावयवस्तत्रावयवेऽऽर्द्रेन्धनस्याप्यत्यन्ताभावोऽ(व)रूपे च तदर्थम् । अत्रापि साध्यतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणोऽत्यन्ताभावो ग्राह्यः । तथा च साध्यतावच्छेदकसंयोगसम्बधेन धूमाधिकरणं धूमो न भवति । भवति च तथाऽधिकरणं महानसादिकम् । तत्रार्द्रेन्धनात्यन्ताभावो नास्ति। अत्यन्ताभावो वर्तते गुणत्वादीनाम् । तदप्रतियोगित्वं चार्द्रेन्धनस्यास्तीति । न च संयोगसम्बन्धेन धूमाधिकरणे महानसे समवायसम्बन्धेनार्द्रेन्धनात्यन्ताभावो वर्तते, तत्प्रतियोगित्वमार्द्रेन्धन[2]स्याप्यस्तीत्यव्याप्तिरिति वाच्यम् ।

[3]साध्यतावच्छेदकसम्बन्धेनायं च व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावो **न्यायमते** स्वीक्रियते । परं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको ना (न) स्वीक्रियते । [तत्सम्]बन्धेन साध्याधिकरणे साध्यतावच्छेदकसम्बन्धेनैव यस्य कस्यचिदत्यन्ताभावः, तदप्रतियोगित्वमुपाधौ साध्यव्यापकत्वं वाच्यम् । तथा च[4] संयोगसम्बन्धेन साध्यतावच्छेदकसम्बन्धेन धूमाधिकरणे महानसादौ य साध्यतावच्छेदकसम्बन्धेनात्यन्ताभावो वर्तते गुणत्वादीनां तदप्रतियोगित्व-

---

१. B omits वा. २. B -स्यास्ती. ३. B omits the reading between साध्यताव..... .....साध्याधिकरणे ४. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मार्द्रेन्धनेऽस्तीति नाव्याप्तिरार्द्रेन्धने । एवं हेतुदिश्यपि हेतुतावच्छेदकसम्बन्धेनैव हेत्वधिकरणे हेतुतावच्छेदकसम्बन्धेन योऽत्यन्ताभावस्तत्प्रतियोगित्वं साधनाव्यापकत्वरूपं ग्राह्यमिति ।

ननु तथापि '[1]द्रव्यं सत्त्वात्'-इत्युपाधिर्भवति संयोगः । यथा यत्र यत्र द्रव्यत्वं तत्र तत्र संयोगः, यत्र यत्र सत्त्वं तत्र तत्र संयोगो नास्ति । गुणे व्यभिचारादिति । अत्रोक्तलक्षणेऽव्याप्तिर्यथा-अत्र साध्यं भवति द्रव्यत्वं [2]तद्व्यापकत्वं संयोगे चेदं साध्यतावच्छेदकसम्बन्धेन=समवायसम्बन्धेन [3]द्रव्यत्वाधिकरणे घटादौ साध्यतावच्छेदकसम्बन्धेन समवायसम्बन्धेनैव योऽत्यन्ताभावो गुणत्वादीनां तदप्रतियोगित्वं संयोगे वाच्यम् । तत्तु संयोगरूपोपाधौ न सम्भवति । तथाहि साध्यतावच्छेदक-सम्बन्धेन=समवायसम्बन्धेन द्रव्यत्वाधिकरणे द्रव्ये साध्यताऽवच्छेदकसम्बन्धेन समवायसम्बनधेन संयोगात्यन्ताभावस्यापि वर्तमानत्वात् संयोगस्याव्याप्यवृत्तित्वात् संयोगस्य साध्यसमानाधिकरणात्य-न्ताभावप्रतियोगित्वं नास्तीत्यव्याप्तिः । तद्वारणार्थमभावे विशेषणं प्रतियोगिव्यधिकरणं दातव्यम् । तथा च द्रव्यत्वाधिकरणे द्रव्ये यः संयोगात्यन्ताभावो वर्तते स प्रतियोगिव्यधिकरणो न भवति । स तु प्रतियोगिसमानाधिकरण एव । तथा च द्रव्ये प्रतियोगित्वव्यधिकरणोऽत्यन्ताभावो गुणत्वादीनामेव तदप्रतियोगित्वं संयोगे तिष्ठत्येवेति संयोगस्योपाधौ नाव्याप्तिः ।

तथा चेदं लक्षणं जातम्-साध्यतावच्छेदकसम्बन्धेन=साध्यसमानाधिकरणसाध्यता-वच्छेदकसम्बन्धेन प्रतियोग्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वे सति हेतुतावच्छेदकसम्बन्धेन हेतुसमानाधिकरणहेतुतावच्छेदकसम्बन्धेनात्यन्ताभावप्रतियोगित्वरूपं लक्षणमुपाधेः पर्यवसन्नम् । अर्थस्तु पूर्वं कृत एव ।

अत्र लक्षणेऽव्याप्तिं शङ्कते-**नन्विति साधनेति** साधनावच्छिन्नसाध्यव्यापको यः उपाधिः, अथ च पक्षधर्मावच्छिन्नसाध्यव्यापको यः उपाधिः तत्रेदं लक्षणमव्याप्तम् । आद्यो यथा-'सः श्यामः, मैत्रीतनयत्वात्'-इत्यत्रोपाधिर्भवति शाकपाकजत्वम् । स च शुद्धसाध्यव्यापको न भवति । शुद्धं साध्यं भवति श्यामत्वम् । [4]तद्व्यापकत्वं शाकपाकत्वरूपोपाधौ नास्ति । तथाहि यत्र [यत्र]श्यामत्वम्, तत्र तत्र शाकपाकजत्वं नास्ति । श्यामत्वं वर्तते काके, अंगारादौ च, तत्र शाकपाकजत्वं नास्ति । शुद्धसाध्यव्यापकत्वाभावात् । अयं साधनावच्छिन्नसाधव्यापकः उपाधिः । साधनं भवति मैत्रीतनयत्वम्, तदवच्छिन्नं यत्साध्यं श्यामत्वरूपं तद्व्यापकत्वमुपाधौ वर्तते । तथा च स[5] यत्र यत्र मैत्रीतनयत्वावच्छिन्नत्वं मैत्रीतनयत्वाधिकरणे श्यामत्वं तत्र तत्र शाकपाकजत्वम् । यत्र यत्र मैत्रीतनयत्वं तत्र तत्र शाकपाकज[त्वं]नास्ति । गौरमैत्रीतनये व्यभिचारात् । अतः शाकपाकजत्वरूपोपाधौ साध्यव्यापकत्वे सति साधनाव्यापकत्वाभावादव्याप्तिः ।

---

१. B omits द्रव्यं. २. B तथा व्या. ३. B repeats the reading between द्रव्यताधिकरणे.... .....सम्बन्धेन. ४. A तथा पाकत्वं (!). ५. B omits स.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न चाव्याप्तिवारणार्थं साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिरिति वाच्यम्। तथापि पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधावव्याप्तिः । तथाहि 'वायुः प्रत्यक्षः, उद्भूतस्पर्शाश्रयत्वात्'-इत्यत्रोद्भूतरूपत्वमुपाधिः । अयं च शुद्धसाध्यव्यापको न भवति । शुद्धं साध्यं भवति प्रत्यक्षत्वं, तद्व्यापकत्वमुद्भूतरूपत्वे नास्ति । तथाहि यत्र यत्र प्रत्यक्षत्वं तत्र तत्रोद्भूतरूपत्वं नास्ति । आत्मादौ व्यभिचारात् । आत्मनि मानसप्रत्यक्षत्वं वर्तते । तत्रोद्भूतरूपवत्त्वं नास्ति । उद्भूतत्वं च रूपे प्रत्यक्षत्वकारणतावच्छेदको जातिविशेषः । तेन रूपत्वव्यापका विजातिरूपनिष्ठा तिष्ठतीति ।

साधनाव्यापकत्वं- यथा यत्र यत्र प्रत्यक्षस्पर्शान्वयत्वं तत्र तत्रोद्भूतरूपत्वं नास्ति । वायौ व्यभिचारात् । हेतुव्यापकत्वव्यभिचार उपाधौ न तु साध्यव्यापकत्वव्यभिचारो[1] हेतावुच्यते । तेन न पक्षे-पक्षतुल्ये व्यभिचारो दोषायेत्यलग्नकं वेदितव्यम् । तथा चायं पक्षधर्मावच्छिन्नसाध्य-व्यापकोपाधिः । तथाहि पक्षधर्मो भवति वह्निः । द्रव्यत्वं तदवच्छिन्नं यत्साध्यं प्रत्यक्षत्वं तस्य व्यापको भवत्युद्भूतरूपवत्त्वलक्षणोपाधिः । तथा च यत्र यत्र वह्निद्रव्यत्वावच्छिन्नं प्रत्यक्षत्वं तत्र तत्रोद्भूतरूपवत्त्वम् । यत्र यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र तत्र रूपवत्त्वं नास्तीति साधनाव्यापकोऽय-मुपाधिर्भवति । अत्रोपाधौ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वरूपं लक्षणमव्याप्तम्।

शुद्धसाध्यव्यापकः उपाधिर्वा । आर्द्रेन्धनादावव्याप्तेश्च । यदि च पक्षधर्मा-वच्छिन्नसाध्यव्या-पकत्वे सति साधनाव्याकत्वमुपाधिलक्षणम्, तदा साधनावच्छिन्नसाध्य-व्यापकोपाधौ शुद्धसाध्यव्याकोपाधौ वाऽऽर्द्रेन्धनादावव्याप्तेश्चेत्युपाधिलक्षणयोः परस्परमव्याप्तिवारणार्थं काचन विवक्षा कर्तव्या । तद्वारणार्थं यत्किञ्चित्साध्यव्यापकत्वे सति साधनाव्यपकत्वमिति । तथा च यत्किञ्चितपदं साधनावच्छिन्नसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिसाधारण्यपरम् । तथा च यत्र मैत्रीतनयत्वावच्छिन्नं श्यामत्वं अथ च बहिर्द्रव्यत्वावच्छिन्नं प्रत्यक्षं तत्र शाकपाकजत्वम् अथ च तत्रानुद्भूतरूपवत्त्वं चेति क्रमेण ज्ञेयम् । एवमुक्तोऽपि 'वह्निमान् धूमात्'-इत्यत्रापि व्यजनवत्त्वमुपाधिः स्यात् । तस्यापि यत्किञ्चित्साध्यं भवति महानसीयो वह्निः, तद्व्यापकत्वं व्यजनवत्त्वं लक्ष्यविशेषवत्त्वं, तस्य धूमाव्यापकत्वं पर्वतीयधूमव्यापकताभावात् ।

ननु साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकत्वं विवक्षितं येन[2] वह्नेर्व्य[3]जनत्वं व्यापकं न स्यात्। अस्यार्थः[4] साध्यतावच्छेदकं[5] भवति च वाह्नित्वं तदवच्छिन्नं भवति वह्निमात्रम् तद्व्यापकत्वं व्यजनत्वे नास्ति । व्यजनवत्त्वस्य पार्वतीयवह्निव्यापकत्वाभावात् । इदं विवक्षितं नास्ति । यदीह विवक्ष्यते तदा साधनावच्छिन्नसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्यव्यापकयोरव्याप्तिः । तद्वारणार्थ

---

१. B -कत्वस्य व्य. २. B यथा न वह्ने. ३. The both of the Mss read व्यञ्जन it has been changed as व्यजन (=a fan) to suit the proper context. ४. B अयमर्थः. ५. B -वच्छेदेकः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यत्किञ्चित् साध्यव्यापकत्वं विवक्ष्यते-इत्येव मनसि कृत्वाऽऽह-**न चेति** ।

तथा च यत्किञ्चित् साध्यव्यापकत्वे सति साधनाव्यापकत्वं यदि विवक्ष्यते तदा वह्निमान् धूमात्-इत्यत्र सद्धेतावपि व्यजनवत्त्वमुपाधिः स्यादित्याशङ्कार्थः । अत्रातिव्याप्तिवारणार्थं साधनावच्छिन्नादि साधारण्यार्थं च विवक्षां करोति-**यद्धर्मेति** यद्धर्मावच्छिन्नस्य साध्यस्य यो व्यापकः स एव धर्मः, तद्धर्मावच्छिन्नसाधनस्य यदव्यापकः स धर्मः [1]तद्धेतावुपाधिः । यथा 'सः श्यामः, मैत्रीतनयत्वात्' इत्यत्र शाकपाकजत्वम्, यथा यत्पदेन मैत्रीतनयत्वं तथा च यत्र यत्र मैत्रीतनयत्वावच्छिन्नं श्यामत्वं, तत्र तत्र शाकपाकजत्वं । यत्र यत्र मैत्रीतनयत्वावच्छिन्नं मैत्रीतन्यत्वम्-अभेदेऽप्यवच्छेदकस्वीकारात्-तत्र तत्र शाकपाकजत्वं नास्तीत्युपाधिः । एवं पक्षधर्मावच्छिन्नं साध्यव्यापकोपाधावपि लक्षणं तिष्ठति । यथा वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोपाधिः । पक्षधर्मावच्छिन्नसाध्यव्यापको(कं) भवत्युद्भूतरूपवत्त्वम् । यथा पक्षधर्मो भवति बहिर्द्रव्यत्वं तदवच्छिन्नं यत्साध्यम्, यत्र यत्र बहिर्द्रव्यत्वावच्छिन्नत्वं प्रत्यक्षं तत्र तत्रोद्भूतरूपवत्त्वम्; यत्र यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षस्पर्शाश्रयत्वम्, तत्र तत्रोद्भूतरूपवत्त्वं नास्ति। यथा वायौ शुद्धसाध्यव्यापकोपाधावपि गच्छति । धूमवान् वह्नेः, इत्यत्रोपाधिर्भवत्यार्द्रेन्धनम्,; आर्द्रेन्धनप्रभववह्निर्वा [2]भवति चायम् । यद्धर्मपदेनात्र द्रव्यत्वं पृथिवीत्वं ग्राह्यम् । तथा च यत्र यत्र द्रव्यत्वावच्छिन्नो धूमस्तत्र तत्रार्द्रेन्धनम्; यत्र यत्र द्रव्यत्वावच्छिन्नो वह्निस्तत्र तत्रार्द्रेन्धनं नास्ति, अयोगलोके [तस्य]अभावात् ।

इदं साधारण्यमितिव्याप्तिवारणार्थं-यतो व्यजनवत्त्वोपाधौ यद्धर्मावच्छिन्न इत्यत्र यत्पदेन महानसीयत्वं ग्राह्यम् । यथा च यत्र यत्र महानसीयत्वावच्छिन्नो वह्निः, तत्र [तत्र]व्यजनत्वमस्ति । यत्र यत्र महानसीयत्वावच्छिन्नो धूमस्तत्र तत्र व्यजनवत्त्वं तिष्ठत्येव । तथा चास्य साधनाव्यापकत्वमेवेत्यर्थः । एवमतिव्याप्तिर्निरस्ता ।

ननु तथापि पक्षेतरत्वमुपाधिः स्यात्, तथाहि 'वह्निमान् धूमात्'-इत्यत्र पर्वतेतरत्वमुपाधिर्यथा-यत्र यत्र द्रव्यत्वावच्छिन्नो [3]वह्निस्तत्र तत्र पर्वतेतरत्वम्, यत्र[4] यत्र द्रव्यत्वावच्छिन्नो धूमस्तत्र तत्र पर्वतेतरत्वं नास्ति, पर्वते धूमस्याविद्यमानत्वादिति चेत्, न । व्यतिरेकित्वस्यासाधारण्यात् । तथाहि 'पर्वतोवह्न्यभाववान्-पक्षेतरत्वाभावादित्य'नुमानेऽसाधारण्यं जातम् । पक्षमात्रवृत्तिरसाधारणः । पक्षेतरत्वाभावस्तु पर्वतेतरत्वाभावः । स च पर्वतमात्रे तिष्ठति । अस्य सपक्षाभावात् । उपाधिश्च स एव भवति यद् व्यतिरेकेण साध्याभाव साधयितुं शक्यते, यथा धूमवान्, वह्नेः, इत्यत्रार्द्रेन्धनप्रभववह्निर्भवत्युपाधिः । तथा चार्द्रेन्धनप्रभववह्न्यभावे[5] धूमाभावः साधयितुं शक्यते ।

---

१. A तत्र हेतावु. २. B omits वा and reads भवतीति वाच्यम् । ३. B omits वह्निः. ४. A omits यत्र यत्र. ५. B -न्यभावो.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यथाऽयोगोलकःधूमाभाववत् (वान्), आर्द्रेन्धनप्रभववह्नयभावात् । यथा ह्रदः । तथा चार्द्रेन्धन-प्रभववह्निव्यतिरेकेण धूमाभावः साधयितुं शक्य इति। धूमवान् वह्निरित्यत्रार्द्रेन्धनप्रभव-वह्निर्भवत्युपाधिः । केचित्तु यद्व्यतिरेकेण साध्यव्यभिचारः साधयितुं शक्यते स उपाधिः यथा 'धूमवान् वह्नेः' इत्यत्र वह्निः धूमव्यभिचारी, आर्द्रेन्धनप्रभववह्निव्यभिचारित्वात् । यत्र यत्रार्द्रेन्धनप्रभववह्निव्यभिचारित्वं तिष्ठति, तत्र तत्र धूमव्यभिचारित्वम्, यथा ह्रदत्वे इति ।

पक्षेतरव्यभिचारेण साध्यव्यभिचारः साधयितुं न शक्यते । यथा धूमो वह्निव्यभिचारी, पर्वतेतरत्वव्यभिचारित्वादित्ययं हेतुर्व्यभिचारी । पर्वतेतरत्वं व्यभिचारित्वं वर्तते । पर्वतीयवह्नौ पर्वतेतरव्यभिचारा(रि)त्वं नाम पर्वतेतरात्यन्ताभाववद्वृत्तित्वम् । इदं च पर्वतीयवह्नौ तिष्ठति । पर्वतेतरात्यन्ताभाववान् भवति पर्वतः । तद्वृत्तित्वं पर्वतीयवह्नौ तिष्ठतीति । तत्र वह्निव्यभिचारित्वं नास्तीति न सः उपाधिः । बाधोन्नीतः । पक्षेतरोऽप्युपाधिरेव । तथाहि 'वह्निरनुष्णः कृतकत्वाद्' इत्यत्रोपाधिर्भवति वह्नीतरत्वम् । तथा च वह्नीतरत्वव्यतिरेकानुष्णत्वाभावः साधयितुं शक्यते । यथा 'वह्निरुष्णः वह्नीतरत्वाभावात् । यत्र यत्र वह्नीतरत्वाभावः तत्र तत्रोष्णत्वम्, यथा वह्नाविति । वह्नीतरत्वव्यतिरेकेणानुष्णत्वाभावः उष्णत्वरूपः साधयितुं शक्यते । एवं वह्नीतरत्वव्यभिचारेणा-नुष्णत्वव्यभिचारः साधयितुं शक्यते । यथा कृतकत्वहेतुरनुष्णत्वव्यभिचारी वह्नीतरत्वव्यभिचारित्वात्। यत्र यत्र वह्नीतरत्वव्यभिचारित्वं तत्र तत्रानुष्णत्वव्यभिचारित्वं वर्तते । यथा वह्नित्वे इति । उपाधि-व्यभिचारेण साध्यव्यभिचारः साधयितुं शक्यते इति बाधोन्नीतः पक्षेतरत्वमप्युपाधिर्भवतीति दिक् ।

उपाधेर्दूषकताबीजकत्वं सत्प्रतिपक्षोत्थापकत्वं व्यभिचारोन्नायकत्वं व्याप्तिविरहोन्नायकं वा ? नाद्यः, सत्प्रतिपक्षे उपाध्युद्भासनं न स्यात् । तथाहि यद्युपाधिना सत्प्रतिपक्षः कर्तव्यः, यथामूलानुमानं 'शब्दोऽनित्यः, कृतकत्वात् ।' द्वितीयः सत्प्रतिपक्षः यथा 'शब्दो नित्यः, व्योमैकगुणत्वात्', इत्यत्र स्थापनानुमाने ध्वंसवत्त्वमुपाधिः । भवति चायं साध्यव्यापकत्वे सति साधनाव्यापकः । यथा यत्र यत्रानित्यत्वं तत्र तत्र ध्वंसत्वम् । यत्र यत्र कृतकत्वं तत्र तत्र ध्वंसत्वं नास्ति, ध्वंसे व्यभिचारात् । अत्रानुमानेऽयमुपाधिः । अनेनोपाधिना यदि सत्प्रतिपक्ष एव कर्तव्यः तदोपाधेः [१]पूर्वमेव सत्प्रतिपक्षस्य विद्यमानत्वात्, सत्प्रतिपक्षान्तरोत्थापने व्यर्थता स्यात् ।

अयमत्र भावः-मूलानुमानं भवति 'शब्दोऽनित्यः कृतकत्वाद्'-इति, [२]एतस्योपरि प्रतिपक्षो भवति नित्यत्वसाधकमनुमान्-यथा 'शब्दो नित्यः व्योमैकगुणत्वात्' इति द्वितीयम् । अनयमोर्मध्ये प्रथमानुमानं दुष्टम् । तत्रोपाधेर्विद्यमानत्वात्[३] । उपाधिरुक्त एव । यदि उपाधिना सत्प्रतिपक्षः कर्तव्यः-तथाहि 'शब्दो नित्यः, ध्वंसत्वाभावात्' इति । इदमप्युपाध्यभावेन शब्दे [४]यदि

१. B पूर्वमेव स्यात्, पक्षस्य विद्य.. २. B एतस्य विपक्षो भ.. ३. B वर्तमानत्वात् । ४. B omits यदि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[१]साध्याभावरूपनित्यत्वमनुमेयं तच्च द्वितीयानुमानेन व्योमैकगुणत्वरूपेणानुमितिसत्प्रतिपक्षोत्थापनं व्यर्थमेव स्यादिति न द्वितीयः ।

यदि व्यभिचारोन्नायकत्वेनोपाधेर्दूषकता, तदा दोषः । यथा'धूमवान् वह्नेः'-इत्यत्रार्द्रेन्धन प्रभववह्निव्यभिचारेण धूमव्यभिचारो वह्निः साधनीयः । तदा[२] यथा भवता साध्यव्यापकोपाधिव्यभिचारेण साधनस्य साध्यव्यभिचारः साध्यते तथा साध्यव्याप्यके हेत्वव्यापकत्वेन हेतुना साध्याव्यापकत्व-मुपाधिनिष्ठं साधनीयम् । यथा उपाधिः साध्याव्यापकः साध्यव्याप्याव्यापकत्वात् । यत्र यत्र साध्यव्याप्या-व्यापकत्वं तिष्ठति तत्र तत्र साध्याव्यापकत्वं तिष्ठति । यथा 'वह्निमान् धूमात्' इत्यत्र साध्यव्याप्यो भवति धूमः, तद्व्यापकत्वं तिष्ठति पर्वतादौ । यथा यत्र[यत्र]वह्निव्याप्यो धूमस्तत्र तत्र पर्वतत्वं नास्ति, महानसे व्यभिचारात् । तस्य साध्याव्यापकत्वमपि तिष्ठति । एवं चोपाधावपि । 'धूमवान् वह्नेः'-इत्यत्रोपाधि र्भवत्यार्द्रेन्धनप्रभववह्निः । तत्र धूमव्याप्यवह्निव्यापकत्वहेतुना धूमाव्यापकत्वं साधनीयम् । यथाऽऽर्द्रेन्ध-नप्रभवो वह्निः धूमव्यापकः धूमव्याप्यवह्नयव्यापकत्वात् । तथा चार्द्रेन्धनप्रभववह्नेः साध्याव्यापकत्वे-नोपाधिमत्त्वमेव स्यादिति । उपाधेस्तु साध्याव्यापकत्वनियमात् ।

नापि तृतीयः । यदि व्याप्तिविरहोन्नायकत्वेनोपाधेर्दूषकत्वं यथा वह्नि र्हेतुः धूमाव्याप्यः धूमाव्यापकार्द्रेन्धनप्रभववह्नयव्यापकत्वादिति व्याप्तिविरहोन्नायकत्वं[३] दोषः । अत्र यथा धूमव्यापका-र्द्र[४]न्धनप्रभववह्नयव्याप[५]कत्वेन हेतुना धूमाव्यापकत्वं वह्नौ साधितं तथा वह्नयव्यापकत्वेन हेतुनाऽऽर्द्रेन्धनप्रभववह्न्यव्याप्यत्वमपि साधनीयम् । यथा धूम आर्द्रेन्धनप्रभववह्न्यव्याप्यः वह्न्यव्यापकत्वादित्यनुमानेनोपाध्यव्याप्यत्वं साध्यस्य धूमस्य साधयितुं शक्यते । तेन व्याप्तिविरहोन्ना-यकत्वेनोपाधेर्दूषकत्वं नास्ति ।

अत्र **मणिकारः** । सत्प्रतिपक्षोन्नायकत्वेनैव दूषकत्वम् । न च सत्प्रतिपक्षे सत्प्रतिपक्षान्तरं न स्यादिति वाच्यम् । सत्प्रतिपक्षेऽपि सत्प्रतिपक्षोपष्टंभकतया सत्प्रतिपक्षसम्भवे क्षतिः न स्यादिति संक्षेपः ।

॥ इत्यनुमानग्रन्थव्याख्या ॥

॥ उपमानम् ॥

अथोपमानग्रन्थव्याख्या । उपमानस्य लक्षणमाह **अतिदेशेति** अतिदेशवाक्यार्थस्य यत्स्मरणं तत्सहकृतं तद्द्वारा यत्तोसादृश्यविशिष्टपिण्डविषयकं ज्ञानं तदुपमानमित्यन्वयः । यथा केनचिन्नागरिकेण आरण्यकः पुरुषः पृष्टः 'कीदृग् गवय' इति तदाऽऽरण्यकेनोक्तं 'गोसदृशो गवय' इति-

१. B -भावनित्य.. २. B तथा यदा यथा. ३. B -कत्वः. ४. B -न्धनसंयोगप्रभव. ५. B -व्याप्यहेतुना.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इदमेवातिदेशवाक्यम् । तज्ज्ञातव्यमित्यतिदेशवाचकम् । अनेन जनितो यो बोधस्तेन प्रष्टुरात्मनि गोसादृश्यविशिष्टगवयविषयकसंस्कारो जनितः । पुनः प्रष्टा कालान्तरे वनं गतः । तत्र गोसादृश्यविशिष्टो पिण्डो गवययरूपो जनितो दृष्टः । तदनन्तरमतिदेशवाक्यार्थस्य पूर्वं श्रुतस्य वाक्यस्य स्मरणं जातम्- 'गोसदृशो गवय' इति । तदनन्तरं पुरोवर्ति[1]पिण्डेन सममतिदेशवाकयार्थस्याभेदबुद्धिर्जाता । यथा गोसदृशो गवयभिन्नोऽयमिति । तदनन्तरमयमेव गवयपदवाच्य इत्युपमितिर्गवयपदशक्तिविषयिणी। तस्याः कारणमुपमानम् । पुरोवर्तिसादृश्यविशिष्टपिण्डज्ञानमुपमानं उपमितिरुक्तरूपा फलमिति न्यायपद्धतिः ।

अत्र दूषणद्वयमाह-**नन्विति** तथा चातिदेशवाक्यार्थस्मरणसहकृतमिति पदं गोपदं च लक्षणवाक्ये व्यर्थम् । सादृश्यविशिष्टपिण्डज्ञानमुपमानमित्येतावन्मात्रस्य चरितार्थत्वात् । गोपदे दत्ते उपमानान्तरेऽव्याप्तिश्च । यथा यत्रातिदेशवाक्ये 'चित्रकसदृशो व्याघ्रः' इत्य[2]तिदेशवाक्ये गोपदाभावात् । तज्जन्यसंस्कारः, तेन कालान्तरे पुरोवर्तिचित्रकसादृश्यविशिष्टव्याघ्ररूपपिण्डदर्शनानन्तरं जननीयं [3]यत्स्मरणं तद्विशिष्टं यत्पुरोवर्तिव्याघ्ररूपपिण्डज्ञानं तद्भवत्युपमानम्, तस्योपमितिकरणत्वात् । अत्रोपमाने लक्षणमिदमव्याप्तम् । गोपदाभावात् । तत्रातिदेशेति व्यर्थम् । यथा [4]यदि अतिदेशेति पदमुपमानकुक्षौ दातव्यं तदाऽनुमितिकरणे परामर्शे व्याप्तिस्मरणसहकृतपरामर्शोऽनुमान-मित्येवानुमानस्यापि लक्षणं कर्तुं [5]युक्तम् । तत्र व्याप्तिज्ञानस्य कारणत्वेऽपि तत्पदं लक्षणे न दातव्यमेव, गौरवात् । तथा प्रकृतेऽतिदेशवाक्यार्थस्मरणं यद्युपमानेऽपेक्ष्यते तथापि न दातव्यमेव द्वारप्रतिपादकं वाक्यं लक्षणवाक्ये कुत्रापि निवेशितं न दृश्यते । तथा चेह सहकृतान्तभागो व्यर्थः ।

कण्टकमुद्धरति-**न चेति** तथा च लक्षणमित्येव सादृशयविशिष्टपिण्डज्ञानम्, इदं दूषयति- **वैधर्म्येति** । यदि सादृश्यं प्रतिपिण्डविशिष्टज्ञानमुपमानमुपपद्यते तदा वैधर्म्योपमानेऽव्याप्तिः । यथा केन चिदुक्तं कीदृगुष्ट्र इति प्रश्नानन्तरं प्रलम्बौष्ठः कण्टकाशीति प्रत्युत्तरं दत्तम् । अत्र वाक्ये सादृश्यप्रतिपादकवाक्याभावात् वैधर्म्योपमानत्वम् । अनेन वाक्येन श्रोतुर्यज्ज्ञानं जातं तेन ज्ञानेना[6]त्मनि तद्विषयार्थकः संस्कारो जातः । तेन संस्कारेण प्रल्बौष्ठकण्टकाशित्वविशिष्टपिण्डदर्शनानन्तरं पूर्ववाक्यार्थस्मरणं जननीयम् । [7]तद् द्वाराऽयमुष्ट्रपदवाच्य इत्युपमितिर्जायते । तत्कारणं भवतिप्रलम्बौष्ठकण्टकाशित्वविशिष्टपुरोवर्तिपिण्डज्ञानमुपमानम् । अत्र वैधर्म्योपमाने सादृश्यविशिष्ट-पिण्डज्ञानमिति लक्षणमव्याप्तमित्यर्थः ।

सादृश्यवैधर्म्योपमानसाधारण्यार्थं लक्षणान्तरं करोति-**अनवगतेति** अनवगता=अज्ञाता या

---

१. B -वर्तिनि. २. B omits इति. ३. B तत्स्म. ४. B omits यदि. ५. A युक्तं यद्युच्यते तत्र. ६. B -नात्मना ७. A omits तद्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सङ्गतिरर्थरूपा, तस्या या संज्ञा तत्प्रतिपादकं पदम्, तेन समभिव्याहृतं=सहोच्चारितं यद्वाक्यम्, तस्य योऽर्थः, तस्यार्थस्य संज्ञिनि संज्ञाप्रतिपाद्येऽर्थे यदनुसन्धानं ज्ञानं तदुपमानमित्यर्थः । वर्तते चेदं लक्षणं सादृश्यविशिष्टपिण्डज्ञाने । यथा 'गोसदृशो गवय' इत्यत्रानवगता सङ्गतिर्भवति गवयरूपे[१]ऽर्थे । तस्य या संज्ञा गवय इति पदरूपा, तत्सहकृतं यद्वाक्यं-तेन सहोच्चारितं यद्वाक्यं गोसदृशो गवय इतिरूपम्, तस्य योऽर्थो वाच्यो गवयरूपः, तस्य यत्संज्ञिनि गवये यदनुसन्धानं ज्ञानम्, तदुपमानम् ।

उपमानमिति अयं [२]गवयपद वाच्य इति सङ्केतग्रह इत्येवं वैधर्म्योपमानेऽपि-यथा प्रलम्बौष्ठः कण्टकाशीत्यत्रानवगतोऽर्थः भवत्युष्ट्ररूपः । तस्य या संज्ञा उष्ट्रपदरूपा तत्समभिव्याहतं यद्वाक्यं प्रलम्बौष्टः कण्टकाशी उष्ट्रः इति वाक्यं तस्य योऽर्थः तस्य संज्ञिनि उष्ट्रेऽनुसन्धानं यज्ज्ञानमय-मुष्ट्रपदवाच्य इतिरूपं तद्वैधर्म्योपमानमित्यर्थः ।

अनष्टेति संस्कारनाशस्तु यदि कालेन रोगेण वा जातस्तदोपमानं न भवतीति भावः । यथा विद्याविषयकः संस्कारोऽभ्यासाभावविशिष्टसंस्कारेण नाश्यते तद्वत् जन्मान्तरानुभूत विषयकसंस्कारनाशात् । [३]**यथाश्रुतमिति** यदि संस्कारमात्रं कारणम्, तदा ध्वस्तसंस्कारोऽपि स्मरणं जनयेत् । तद्द्वारा उपमितिरपि जन्यते इत्यर्थः ।

वैधर्म्योपमानं स्पष्टयति **कीदृगित्यादि**

[इति]-उपमानग्रन्थ व्याख्या ॥

॥ शब्दप्रमाण ॥

(I) शब्दलक्षणम् ।

[४]प्रमाणशब्दस्य लक्षणमाह-**आप्तवाक्यमिति** आप्तेन पुरुषेण ताल्वोष्ठपुटव्यापारेण यदुच्चारितं वाक्यं तच्छब्दप्रमाणमित्यर्थः । अत्राप्तवाक्यं शब्द इति वाक्येन शब्दस्य वा लक्षणं क्रियते शब्दप्रमाणस्य वा लक्षणं क्रियते ? यदि आद्यः पक्षस्तादाऽनाप्तवाक्यस्यापि शब्दत्वात्, तदा वाक्येऽव्याप्तिः । तत्र प्रोच्चारित्वाभावात् । यदि द्वितीयः पक्षस्तदाऽत्र[५] लक्षणे [६]प्रमाणप्रतिपादकपदाभावात् प्रामाण्यं शब्दस्य केन पदेन बोधनीयम् ? तथा चात्र लक्षणे प्रमाणपदं देयमेव । तथा चाप्तवाक्यं [७]शब्दप्रमाणमित्यर्थः ।

---

१. B -रूपोऽर्थो. २. B गवयपद इति सङ्केत. ३. A यथा श्रुते इति; It is यथाश्रुतिं in त.भा.प्र. ४. गुणरत्न has used प्रमाणशब्द throughout in the discussion of this section. However शब्दप्रमाण could have been a better reading. ५. B omits अत्र. ६. B प्रमाप्रति. ७. B शब्दः प्रमाणमि..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अग्रिमेति-आकाङ्क्षा इत्यादिना ग्रन्थेन यदग्रे उक्तं तदनुसारेणैव लक्षणं प्रमा[ण]शब्द-स्यैतादृशं पर्यवसन्नम् । यथाऽऽप्तेत्यादिः । आप्तजन्यत्वं [१]पदानां विशेषणम् । तत आप्तजन्यानि यान्याकाशादिपदानि, तेषां समूहः प्रमाणशब्द इति । आप्तजन्येति विशेषणम् प्रमाणानाप्त-वाक्येऽति-व्याप्तिवारणार्थम् । आकांक्षादिमत्पदं च निराकांक्षादिवाक्येऽति व्याप्तिवारणार्थम् समूहपदं चैकपदेऽति-व्याप्तिवारणार्थम् । एकपदेन वाक्यार्थो जनयितुं न शक्यते । यथा घटमानयेत्युक्ते वाक्यार्थो भवति घटकर्मकानय[न]क्रियारूपः । अयं तु घट इति पदेन बोधयितुं न शक्यते । एकपदेऽऽकाङ्क्षादि विरहात् ।

इदं लक्षणं विकल्प्य दूषणार्थं भूमिकां रचयति-**तत्राप्तेति** [२]तत्राग्रिमप्रकारेणाप्तलक्षणं ग्रन्थकृता कृतम् । यथाऽनुभूतार्थोपदेष्टा पुरुष आप्त इति । तत्रोपदेष्टत्वं नाम यदि [३]पदप्रयोक्तृत्वं पदोच्चारकत्वं तदा संवादिशुकबालादिवाक्येऽव्याप्तिर्भवति । तत्र वस्तुगत्या यत्र भूतले [४]घटो वर्तते तत्रैव भूतले शुकादिनोक्तं घटवद्भूतलमिति वाक्यं संवादिवाक्यम् । यद्वाक्यं तदर्थविषयकमुच्चार्यते तदर्थसत्त्वे संवादः । तत इदं वाक्यं भवति प्रमाणम् । यद्यपि शुकस्य यथानुभूतार्थोपदेष्टत्वं न सम्भवति तथाप्येतादृशोपदेष्टा ईश्वर एव । तेन संवादिशुकबालादिवाक्यस्थलेऽऽप्त ईश्वर एव, यद्याप्तलक्षणं [५]यथाभूतार्थस्योपदेष्टत्वम् ।

अत्र लक्षणे यो वर्तते उपदेष्टृत्वभागः, तदर्थः शुकबालादिज्ञानार्थवत्त्वे सति ताल्वोष्ठपुटव्यापारे शब्दकर्तृकत्वम् । तदा शुकबालादिवाक्येऽव्याप्तिरेव । ईश्वरस्य ताल्वोष्ठपुटव्यापाराभावात्प्रयोक्तृत्वं न सम्भवति । **अथेति** यदि प्रयोक्तृत्वं नाम शब्दजनकत्वं तदा दूषणमाह-**वैयर्थ्यमिति** आप्तपदं व्यर्थम् । आप्तपदं तु विसंवाद्यनाप्तवाक्येऽति[६]व्याप्तिवारणार्थं दत्तमस्ति । तत्रातिव्याप्तिस्तु [७]योग्यतापदेनैव वारिता । विसंवादि वाक्यं तु घटाभाववति भूतले केनचिदुच्चारितं घटवद् [८]भूतलमिति प्रतीत्यप्रमाणं वाक्यं भवति। एतद्वाक्यार्थो घटसंसर्गरूपः [९]तत्पदाभावादप्रमाणम् । एतद्वारणं च योग्यतापदेनैव जातम् । योग्यता भवति प्रकृतवाक्यार्थबोधरूपा । प्रकृतवाक्यं घटवद् भूतलमिति । तदर्थो भवति घटभूतलसंसर्गरूपस्तस्य बाधान्न योग्यता । अत एव **मिश्रादिभिः** योग्यतालक्षणं कृतम् ।-एक पदार्थेऽपरपदार्थः निष्ठात्यन्ताभावप्रतियोगित्वम् । एतदर्थो यथा-यत्र भूतले वस्तुगत्या घटो वर्तते तत्रैव भूतले घटसत्त्वाभिप्रायेण वाक्यमुच्चरितं घटवद् भूतलमिति । अत्रैकपदार्थो भवति घटः, तत्र घटेऽ[१०]परपदार्थो भवति भूतलम् । तन्निष्ठःतत्र वर्तमानो योऽत्यन्ताभावो पटादीनां तदप्रतियोगित्वं घटस्यास्तीति । इदं योग्यतालक्षणं विसंवादिवाक्यस्थले नास्ति । योग्यताभावादेवातिव्याप्तिर्न भवतीति व्यर्थमाप्तपदं विसंवादिवाक्येऽतिव्याप्तिवारणार्थम् । योग्यतापदेनैवातिव्याप्तिवारणात् ।

---

१. B पदविशेषणम् । २. B तं तं प्रत्यग्रिम-. ३. B पदप्रयोजकत्वं. ४. B omits घटो. ५. B यथा भूतलेऽर्थस्यो-. ६. A ऽतिवारणार्थं. ७. A योग्यपदेनैव. ८. B मिति तत्प्रमा-. ९. A तदभावाद. १०. B घटेऽपदार्थो.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उक्तलक्षणे एव दूषणान्तरमाह **आकाङ्क्षेति** । आकाङ्क्षापदं च निराकाङ्क्षे वाक्येऽतिव्याप्तिवारणार्थं दत्तमस्ति । निराकाङ्क्षा तु अहो विमलं जलं, नद्यां कच्छे महिषश्चरतीति वाक्यम् । अत्र जलपदस्य नद्यां सममन्वयबोधो [१]भवतीतीच्छयामुच्चारितमिदं वाक्यम् । नद्याः कच्छेन सममन्नवयबोधे जननीये कच्छपदं निराकाङ्क्षम् नदीपदस्य[२] जलेन सममन्वयस्य जातत्वात् । तथा चेदं वाक्यमन्वयानुभावकत्वान्निराकाङ्क्षम् । अनेन वाक्येन कच्छेन समं नद्या अन्वयबोधो न भवति । एतादृशवाक्यस्य प्रामाण्यं वारयितुं साकाङ्क्षं पदं दत्तम् ।

इदं विकल्प्य दूषयति-**तदिति** तत्साकाङ्क्ष्यं द्विविधं भवति । **विसंवादीति** विसंवादिवाक्ये उक्तरीत्या योग्यतापदेनैवातिव्याप्तिर्वारिता । द्वितीयमपि द्विविधम् शाब्दबोधे एकं स्वरूपयोग्यमपरं च तथाभूतं स्वरूपायोग्यम् । एतयोर्मध्येऽहो विमलमित्यादिवाक्यं नद्यां जलेन सममन्वयतात्पर्येणोक्तमपि कच्छेनापि सममन्वयसम्भवात् स्वरूपयोग्यमेव । तथा च किमर्थमिदं वारणीयम् ? एतद्वारणार्थं साकाङ्क्षपदं न दातव्यमेव । [३]एतद् द्वितीयं तु स्वरूपायोग्यं निराकाङ्क्षम् । तत्गौरश्च पुरुषो हस्तीति वाक्यं निराकाङ्क्षम् । गोपदस्याश्वेन सममाकाङ्क्षा नास्ति । एवमन्यस्यान्येन सममाकाङ्क्षा नास्ति । अत्रातिव्याप्तिर्योग्यतापदेनैव वारिता ।

योग्यतामाह-**अर्थाबाधस्येति** प्रकृतवाक्यार्थाबाधो योग्यता । अत्र तु प्रकृतवाक्यार्थ एव नास्ति । गोरश्वेन समं संसर्गस्य प्रकृतवाक्यावाच्यत्वात् । गोरश्वेन समं यः संसर्गः सोऽनेन वाक्येन न प्रतिपाद्यते । तथा चात्र प्रकृतवाक्यार्थाबाधरूपा योग्यता नास्ति । तद्विरहादेव । एतन्निराकाङ्क्षावाक्येऽव्याप्तिवारणं योग्यतापदेनैव [४]जातम् । किमर्थं [५]तद्वारणार्थं साकाङ्क्षपदम् ?

एतदेवाह-**स्वरूपायोग्ये** इति गौरश्च इत्यादिवाक्यं स्वरूपायोग्यम् । यतो गोरश्वेन सममभेदान्वयो कदाचिदपि न भवति । अत इदं स्वरूपायोग्यम् । स्वरूपयोग्यं च पूर्वमुक्तमहो-विमलमित्यादि । अतः साकाङ्क्षपदं व्यर्थम् । योग्यतापदेनैव निराकाङ्क्षवारणात् ।

ननु निराकाङ्क्षं यद्वाक्यं भवति तत्र योग्यं वाऽयोग्यं वेति नोच्यते, किन्तु येन वाक्येनावश्यं फलं शाब्दबोधरूपं जन्यते तदेवात्र प्रमाणशाब्दस्य लक्ष्यम्, तथा चाहो विमलजलमित्यादि वाक्यं कच्छेन समं नद्यां बोधाजननान्न लक्ष्यम् । पूर्वं तूक्तं स्वरूपयोग्यत्वादिदमपि लक्ष्यम्, तथा चाहो विमलमित्यादि वाक्यं फलोपहितं न भवतीति न लक्ष्यम्, तथैव तद्वारणार्थं अवश्यं साकाङ्क्षपदं दातव्यमिति चेत्, न । योग्यताकुक्षौ फलोपधानविशेषणमपि देयम् । तथा च फलोपधानत्वे सति प्रकृतवाक्यार्थाबाधो योग्यता । सत्यन्तमहो विमलमित्यादि स्वरूपयोग्यनिराकाङ्क्षवाक्येऽतिव्याप्तिवारणार्थम् । तथा च योग्यतापदेनैव निराकाङ्क्षवाक्येऽतिव्याप्तिर्वारिता । व्यर्थं साकाङ्क्षपदम् ।

१. B भवत्विती. २. B पदेन. ३. B omits एतद्. ४. B omits जातम्. ५. B omits तद्वारणार्थं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवमासत्तिपदमपि व्यर्थमित्यत आह **एवमिति**-आसत्तिपदं चासन्नेऽतिव्याप्तिवारणार्थम् । यथा घटमानयेत्यत्र 'घ'-कारोच्चारणानन्तरं प्रहारनन्तरं 'ट'कारोच्चारणे शाब्दबोधो न भवति । आसत्तिविरहात् । तद्वारणार्थमासत्तिपदमवश्यं दातव्यमिति **ग्रन्थकृद**भिप्रायः । तदपि न । तत्रापि योग्यताविरहादेव न शाब्दबोधः । तत्र फलोपहितत्वे सति प्रकृतवाक्यार्थाबाधरूपा योग्यता नास्ति । अनेन विलम्बितेन वाक्येन शाब्दबोधरूपं फलमवश्यं जन्यत इति नास्ति । तथा च फलोपहितत्वाभावात् तत्र योग्यतैव नास्ति । तेन योग्यताभावादेव न तत्रातिव्याप्तिः । तथा च योग्यतापदेनैव नासन्नवाक्येऽतिव्याप्तिर्वारिता । व्यर्थं तत्रातिव्याप्तिवारणार्थमासत्तिपदमित्यर्थः ।

केनचित् प्रमाणशाब्दस्य लक्षणं कृतं **पदसमूह इति** । तदपि नेत्याह **यत्रैकेति** । यत्रैकपदस्यार्थद्वयं तयोः परस्परं यत्रान्वयबोधो वृत्तः, [१]तत्प्रतिपादकं पदं प्रमाणं भवति, भवतां मते तत्र समूहाभावात् तत्प्रमाणं न स्यात् ।

यथाख्यातेति आख्यातपदार्थद्वयं भवति-कृतिरेकोऽपरो वर्तमानकालादिश्च । तथा च पचतीति वाक्ये लिङ्गेऽर्थद्वयम् । कृतिः, वर्तमानकालश्च । अनयोः परस्परमन्वयबोधात् । यथा वर्तमानकालस्य कृत्या सममन्वयः । यथा वर्तमानकालीना कृतिः, तदनन्तरं पाकानुकूलवर्तमानकालीनकृतिमान् देवदत्त इति शाब्दबोधः देवदत्तः पचतीत्यादिवाक्यस्थले । तथा च पदसमूहाः प्रमाणशाब्द इति लक्षणं न सम्यगित्यर्थ।

प्राक्तनं लक्षणं दूषयित्वा प्रमाणशाब्दस्य लक्षणान्तरं करोति-**योग्यतावदिति** योग्यताविशिष्टं शाब्दत्वमेव प्रमाणशाब्दस्य लक्षणम् । [२]तेनायोग्येऽग्निना सिञ्चेदित्ययोग्ये[३]ऽतिव्याप्तिर्न भवति । तत्र [४]योग्यताविरहात् । निराकाङ्क्षे गौरश्व इत्यादिकानासन्ने च विलम्बोच्चारितेनातिव्याप्तिः । तत्र योग्यतायाः अभावात् । योग्यता तु फलोपहितत्वे सति प्रकृतवाक्यार्थ[1]बाधरूपा । तथा च निराकाङ्क्षेऽहो विमलमित्यादिवाक्ये फलोपहितपदेनातिव्याप्तिर्वारिता । अत्रासन्ने प्रकृते वाक्यार्थाबाध-पदेनैवातिव्याप्तिर्वारिता । एकपदार्थावच्छेदके तु अपरपदार्थनिष्ठात्यन्ताभाव-प्रतियोगितानवच्छेदकरूपा योग्यतैव बोध्येति दिक् ।

मणिकारोऽप्याह-प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमिति । अस्यार्थः-प्रयोगशब्देन शब्दोच्चारणं, तस्यं हेतुभूतं यदर्थतत्त्वज्ञानं पदार्थयथार्थ ज्ञानं, तज्जन्योपायः शब्दः प्रमाणशाब्द इत्यर्थः । अयं भावः-अर्थज्ञानव्यतिरेकेण शब्दोच्चारणं न सम्भवति । यद्यपि शुकबालादिवाक्यस्थलेऽर्थतत्त्वज्ञाना-भावेऽपि शाब्दः प्रयोगः सम्भवति तथापि तत्रेश्वरीयार्थतत्त्वज्ञानं ग्राह्यम् । विसंवादिवाक्ये शुकादिवाक्ये च तदाऽर्थ विषययीभूतमीश्वरस्यापि तत्त्वज्ञानं नास्ति । ईश्वरस्य

१. B तत्र प्रति॰. २. B तेनायोग्यता । अग्निना. ३. A -त्ययोगेऽति. ४. B omits the reading between योग्यताविरहात्....अभावात् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भ्रमाभावात् । [1]तज्जन्यत्वं तत्र नास्तीति विसंवादिवाक्यं न प्रमाणमिति ।

नूनम् (ननु ?) आदौ लक्षणं शब्दस्य क्रियते प्रमाणशाब्दस्य वा ? यदि शब्दमात्रस्य तदा विसंवादो वाक्ये नास्ति, यदि प्रमाणमात्रस्य-प्रमाणस्य-लक्षणं तदा प्रत्यक्षादावव्याप्तिमिति चेत्-न । शब्दपदं काकाक्षगोलकन्यायेन देहलीदीपन्यायेन[2] चोभयत्र[3] योजनीयमिति । तथा च प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः शाब्दप्रमाणमित्यर्थः । [4]भूतान्तानुपादानेऽग्निना सिञ्चेदित्ययोग्यवाक्येऽतिव्याप्तिः स्यात् । अत उक्तं प्रयोगहेतुभूतेति । अग्निसेकरूपविषयकं यद्यपि तत्त्वज्ञानं न भवति तथापि वाक्यान्तरतत्त्वज्ञानमादायातिव्याप्ति ग्राह्या । यथा घटमानयेत्यत्र वाक्यार्थो भवति घटकर्मकानयनरूपं (पः) । तद्विषयक तत्त्वज्ञानम्[5] ईश्वरे । तज्जन्यत्वमग्निना सिञ्चेदिति वाक्येऽपि तिष्ठति । [6]तस्य कार्यमात्रं प्रति जनकत्वात् । ततोऽग्निना सिञ्चेदित्यत्र वाक्येऽप्यर्थतत्त्वज्ञानजन्यत्वमस्त्येवेति । तद्वारणाय भूतान्तम् । यद्यपि तद्दानेऽप्यतिव्याप्तिवारणं भवति ईश्वरज्ञानस्याप्ययोग्य प्रयोगहेतुभूतत्वात्, तथापि प्रयोगहेतुभूतार्थतत्त्वज्ञानत्वेन रूपेण [7]तन्निरूपितजन्यत्वं विवक्षितम् । ईश्वरज्ञानस्य तु न प्रयोगहेतुभूतार्थतत्त्वज्ञानत्वेन रूपेण जनकत्वं किन्त्वपरोक्षज्ञानत्वेन रूपेण । तथा चायोग्ये वाक्ये नातिव्याप्तिः ।

यदवच्छेदेनेति यथाश्रुतं तु **टीकाकारेण** दूषितं समाधानं करोति **यदवच्छेदेनेति** । यदवच्छेदेन यत्कालावच्छेदेन येन सम्बन्धेन संयोगादिसम्बन्धेन यत्र भूतलादौ सम्बन्धो घटादिः तद्विरुद्धरुम्बन्धेन संयोगादिना तेन कालावच्छेदेन तत्र भूतलादौ तदुपदेष्टा घटोपदेष्टाऽऽप्त इत्यर्थः ।

एतेनेति [8]निरस्तमित्यन्तेनान्वयः । यथाश्रुतं मूलोक्तं दूषयति-यथाभूतत्वमिति यथाभूतस्य विद्यमानत्वे दोषमाह-**तदेति** यो घटः पूर्वं श्याम आसीत्तदनन्तरमग्निसंयोगादिना रक्तो [9]घटो वृत्तः, तदनन्तरं [10]रक्तदशायां पूर्वकालतात्पर्यकेण केनचिदाप्तेन यः श्यामोऽयमित्येतादृशः शब्दप्रयोगः कृतः, तस्याप्रामाण्यं स्यात् । श्यामत्वस्य विद्यमानत्वाभावाद्वर्तते इदं प्रमाणम् । पूर्वकालावच्छेदेनायं घटः श्यामो भवत्येव । तथा च श्यामत्वाविशिष्टे तद्घटप्रतिपादकं यद्वाक्यं तत्प्रमाणमेव । पूर्वकालावच्छेदेन येन सम्बन्धेन समवायसम्बनधेन यत्र घटे श्यामत्वं तत्र पूर्वकालावच्छेदेन श्यामत्वसम्बद्धं तद्विशिष्टम् । पूर्वकालविरुद्धो भवत्येतत्कालः । तदनवच्छेदेन समवायसम्बन्धेन श्यामत्वस्य तत्रोपदेष्टा यः पुरुषः स आप्त इत्यर्थः । इदानीं श्यामोऽयमित्याप्तवाक्यं प्रमाणमेव । श्यामत्वकालविरुद्धकालावच्छेदकस्येदानीमित्यस्य वर्तमानकालस्य भावात् । तथा च तत्र श्यामत्वं विद्यमानं नास्ति । तदैतादृशशब्दप्रयोक्ता **मूलकारमते**ऽनाप्तः स्यात् । अतोऽस्मदुक्तया कदाचिदिति

---

१. B सः तज्ज.. २. B omits देहलीदीपन्यायेन. ३. B reads वा in place of चोभयत्र. ४. B भूतान्तोपाधिदाने. ५. A ज्ञानमीश्वरीयमिदं जन्यत्वम्. ६. A तत्का. ७. B तन्निरूपेण तन्नि. ८. B -स्तमत्यन्तेना.. ९. B omits घटो. १०. B रक्तदशायां.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मूलोद्धारं करोति । विद्यमानत्वमपि यदा कदाचिदपेक्षितम् । तथा च यो घट पूर्वं श्याम आसीत् तथाप्येतत्कालावच्छेदेन श्यामत्वं नास्ति, तथापि पूर्वकालावच्छेदेन श्यामत्वस्य वर्तमानत्वात् तत्प्रतिपादकं वाक्यं प्रमाणमेव । तत्प्रयोक्ता चाप्त एवेति समाहितम् ।

इदं दूषयति-**इदानीमिति** यः पूर्वं श्याम आसीत् तस्मिन्नेव घटे रक्तादशायामिदानीं श्याम इत्येतस्य वाक्यस्य प्रामाण्यापत्तिः । तत्प्रतिपाद्येऽर्थे श्यामत्वस्य यदाकदाचित्सत्त्वात् । तथा च यदा कदाचिदपि विद्यमानता नापेक्षिता ।

विद्यमानतार्थवादी शङ्कते-न चेति यदनवच्छेदेन यत्कालावच्छेदेन स्वप्रतिपाद्यपदार्थसत्त्वं तत्कालावच्छेदेन तत्प्रमाणमेव पूर्वकालावच्छेदेन तत्प्रमाणमेव । पूर्वकालावच्छेदेन तत्प्रतिपादकं वाक्यं, प्रमाणम् । तथा च रक्तादशायां श्यामोऽयमित्युच्चारितं वाक्यं एतत्कालावच्छेदेन यद्यपि प्रमाणं न भवति तथापि पूर्वकालावच्छेदेन तत्प्रमाणमेव । पूर्वकालावच्छेदेन श्यामत्वरूपपदार्थस्य सत्त्वात् । तथा च तत्पदार्थस्य पूर्वकालावच्छेदेन विद्यमानत्वात् प्रमाणमेव तद्वाक्यमिति शङ्कार्थः । एतावन्मात्रकृते दोषमाह-**अवच्छेदमात्रेति** तथा च यदि सम्बन्धविवक्षा न क्रियते तदा संयुक्तसमवायसम्बन्धेन गन्धस्य विद्यमानत्वेन समवायसम्बन्धतात्पर्येण यः शब्दप्रयोगो जले गन्ध इति कृतस्तस्यापि प्रामाण्यं स्याज्जले संयुक्तसमवायसम्बन्धेन गन्धस्य विद्यमानत्वात् । तथा च यत्कालावच्छेदेन जले गन्धो वर्तते तत्कालावच्छेदेनैव गन्धसत्त्वप्रतिपादकं वाक्यमुच्चारितं तदेव प्रमाणं स्यात् । न चेदं प्रमाणं समवायसम्बन्धाभिप्रायेण जले गन्ध इति वाक्यं यदोच्चारितं तत्प्रमाणमेवेति वाच्यम् । [१]तत्र जले [२]समवायसम्बन्धेन गन्धाभावादिति । अतस्तद्वाक्यमप्रमाणम् । भवन्मते तु प्रमाणमेव स्यात् । भवता समवायसम्बन्धेन विवक्षा न कृता । अस्माभिस्तु पूर्वलक्षणे[३] सम्बन्धविवक्षा कृतैवास्ति । तथा जले गन्ध इति यदा समवायसम्बन्धाभिप्रायेण तदा वाक्यमुच्चारितं तदाऽप्रमाणम् । यदा तु संयुक्तसमवायसम्बन्धाभिप्रायेण [४]तदा तु प्रमाणमेव । तथा च प्रकृतेन लक्षणेन ययो घटः पूर्वं श्यामः आसीत् तत्र रक्तादशायामिदानीं श्यामोऽयमिति वाक्यम् । अथ च समवायसम्बन्धाभिप्रायेण 'जले गन्ध' इत्युच्चारितं वाक्यम्, अनयोरप्रामाण्येन प्रामाण्यलक्षणं वारितमित्यर्थः ।

एकत्रेति अग्निना सिञ्चेदिति वाक्ये योग्यता नास्ति । गौरश्व इत्यत्राकाङ्क्षाविरहात् । यद्यपि प्राधान्येन गवादीनामुपस्थितिरभेदरूपे च तथापि गवा भिन्नोऽश्वः इत्याद्यभेदबोधाभिप्रायेणोच्चारितं गौरश्व इति वाक्यमाकाङ्क्षाविरहादप्रमाणमित्यर्थः ।

(II) आकाङ्क्षाविचारः ।

इदानीमाकाङ्क्षा विचार्यते । **नन्विति** तथा च पदानां परस्परमन्वयो नास्ति ।

---

१. B अत्र. २. B समवायादिसम्बन्धविवक्षा गन्धा. ३. B पूर्वलक्षण सम्बन्ध. ४. B omits the reading between तदा.....भिप्रायेण.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्वयबोधजनकत्वं यद्यपि पदानां वर्तते तथापि पदनिष्ठान्वयरूपाऽऽकाङ्क्षा नास्ति । अन्वयस्य पदार्थधर्मत्वात् । तत पदेऽप्याकाङ्क्षा नास्तीत्याशङ्क्यार्थः । **आकाङ्क्षितत्वादिति** तथा च [पञ्च]फलादीनां तीरादावन्वितत्वेनसम्बनधत्वेन[१] पदार्थानामेव साकाङ्क्षत्वम् । यदा पञ्चफलानि सन्तीत्यादि वाक्यमुच्चारितं तदाधाररूपतीरविषयिण्याकाङ्क्षा जायते-पञ्चफलानि कुत्र सन्तीतिरूपा ततोऽर्थानामेव साकाङ्क्षत्वं सिद्धम् ।

[२]**योग्यतयेति** पदानि तु योग्यतयैव गतार्थानि । यानि हि पदानि योग्यानि भवन्ति तान्येवार्थबोधं जनयन्ति । न च तदर्थं साकाङ्क्ष्यमपि पदानामपेक्ष्यते । निराकाङ्क्षाणि यानि पदानि-अहो विमलमित्यादीनि, तेषां योग्यताभावादेव नार्थबोधकत्वम् । न चैवं सर्वत्र योग्यतयैव निर्वाहे किमर्थमाकाङ्क्षासत्ता[३]ऽपेक्ष्यते इति वाच्यम् । शाब्दबोधोऽन्वयव्यतिरेकाभ्यां तयोर्ज्ञानं कारणम् । परं साकाङ्क्षादिघटितलक्षणं न कर्तव्यम् । योग्यताघटितं चावश्यं कर्तव्यमेव । अयोग्येन शाब्दबोधाजननात् । एतावताग्रन्थेन पदानां साकाङ्क्षत्वं निराकृतम् ।

इदानीं पदानामपि साकाङ्क्षत्वव्युत्पादनार्थं प्रकारमाह-**साकाङ्क्षेति**-साकाङ्क्षां ये पदार्थाः तत्प्रतिपादकं वाक्यमपि साकाङ्क्षमित्यर्थः । **जिज्ञासेति** केनचिदाकाङ्क्षालक्षणं कृतमस्ति । जिज्ञासा एवाकाङ्क्षा । तत्र दोषमाह **आत्मेति** तथा च जिज्ञासाया इच्छात्वेनात्मा एव साकाङ्क्षः स्यात् । इच्छाया आत्मधर्मत्वात् । नार्थाः न वा पदानि । इच्छाया पदार्थधर्माभावादित्यर्थः ।

ननु तर्हि अर्थेषु साकाङ्क्षत्वं किं नाम् ? आकाङ्क्षाया आत्ममात्रवृत्तित्वेन तेषु पदार्थेषु आकाङ्क्षाभावेन पदार्थाः साकाङ्क्षा इति व्यवहार एव न स्यात् । स्यादित्यत आह-**स्वेतरेति** स्वशब्देनैको घटादिपदार्थो ग्राह्यः । तदितरे च ये पदार्था या आनयादयः तेषां तद्विषयिणी या जिज्ञासा तदनुकूला उपस्थितिः । ज्ञानमिच्छाकारणीभूतं तद्विषयत्वमप्यर्थेषु वर्तते । अर्थानां ज्ञानव्यतिरेकेण जिज्ञासानुदयात् । तथा च जिज्ञासायाः पूर्वमर्थज्ञानमपेक्ष्यते एव । तद्धर्ममादायैवार्था साकाङ्क्षा इत्युच्यते ।

नन्वर्थानामेव यदि साकाङ्क्षत्वं तदा पदानि साकाङ्क्षाणीति व्यवहारः कथं[४] जायते इत्यत आह **लक्षणयेति** । अत्र का लक्षणा[५] ? तां स्पष्टयति । - साकाङ्क्षार्थप्रतिपादकत्वरूपो यो सम्बन्धः पदेषु स एव लक्षणेत्यर्थः । इयमजहत्स्वार्थैव पूर्वप्रकारेण नोक्तं **मूलकारेण** । अर्थानां मुख्यं साकाङ्क्षत्वं पदानां च लाक्षणिकम् । इदानीमग्रिमप्रकरणेनोच्यते । आत्मन एव मुख्यं साकाङ्क्षत्वं पदपदार्थानां तु तद्गौणमेवाह-**सम्प्रतीति** ।

---

१. B omits सम्बन्धत्वेन. २. B योग्यतेति. ३. B सतीत्यपेक्ष्यते. ४. B कथं न जा॰. ५. B अथ लक्षणां स्पष्टयति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जिज्ञासाया: आकाङ्क्षत्वं दूषयति-**शाब्दबोध** इति । यदा वाक्येन शाब्दबोधो जन्यते तदा जिज्ञासयैवेति नियमो नास्ति । यस्य जिज्ञासाऽस्ति तस्यापि शाब्दबोधोदयात् । यथा कस्यचित् पञ्चफलानि सन्तीति वाक्यश्रवणानन्तरं जाता कुत्रेतिरूपा तदा वक्रोक्तं नदीतीर इति । तदनन्तरं यथा जिज्ञासो: शाब्दबोधो भवति, तथा तन्निकटवर्तिनोऽजिज्ञासा(सो:)ऽपि भवतीति । तथा च जिज्ञा(सा)त्वं नाकाङ्क्षा भवति चेयम् । **परस्परेति** तथा च पदानां शाब्दबोधे जननीये परस्परं या सहकारिता, सैवाकाङ्क्षा । सहकारित्वं स्वेतरपदजन्यजनकत्वमेव पदनिष्ठम् । निराकाङ्क्षे गौरश्व इत्यादौ योग्यताविरहात् परस्परं सहकारिता नास्ति । परस्परं सहकारिता तत्रैव भवति यत्र योग्यता भवेत् ।

(III) योग्यता ।

योग्यतामाह - **अबाधितान्वयत्वमिति** तथा च प्रकृतवाक्यार्थाबाधरूपा योग्यता । सा च मुख्यतयाऽर्थेष्वेव तिष्ठति, न पदेषु । पदेषु च तद्व्यवहारो लाक्षणिक एवेत्यत आह-**उपचारादिति** पदेषु[1] योग्यतामाह-[2]**एवमिति** योग्य-वाक्यार्थप्रतिपादकत्वेनैव पदेषु योग्यताव्यवहार इत्यर्थ: ।

(IV) आसत्ति: ।

आसत्तिमाह-**सन्निहितत्वमिति** [3]पदनिष्ठाऽऽसत्तिरानीयते-**अन्वयेति** अन्वय प्रतियोगिन: ये पदार्था: यथा घटमानयेति, अत्रान्वयो भवति घटकर्मकानयनरूप: तत्प्रतियोगिनस्तन्निरूपका भवन्ति घटकर्मत्वानयनरूपा: अर्था: । तदुपस्थापकानि यानि पदानि-घट-अम्, आङ्-नी धातुरूपाणि सन्ति, तेषां मध्येऽन्वयविरोधिपदार्थ:, पदार्थप्रतिपादकपदाव्यवधानेन यदुच्चारणंअविलम्बेनोच्चारणं तदेव [3]सन्निहितत्वम् । अव्यवधानपदं तु घटपुरुषसंयोग: । घटं वाऽऽनयेति श्रवणानन्तरं घटकर्मकेऽऽनयनमिति शाब्दबोधो न भवति, तत्रासत्तेरभावात् । ननु काव्यादौ व्यवधाने कथमन्वयबोध: इति चेत्, न । आवृत्त्या दूरस्थपदं तदव्यवहितोत्तरं यदापद्यते तदनन्तरं बोधो भवति नान्यथेति हार्दम् ।

(V) पदानां समूहालम्बनत्वम् ।

एकज्ञानेति तथा च सकलपदानामनुभूतानां समूहालम्बनात्मकं यत्स्मरणं तद्विषयत्वमेव पदानां [4]समूह इति । अन्यथा पदानां समूहो न भवत्येव । तेषामाशुतरविनाशित्वादित्यर्थ:[5] । एकज्ञानविषयत्वमपि शङ्कते-**नन्विति** । तथा च घटमानयेति वाक्ये यदा 'मा'-कारूपवर्णस्योत्पत्तिर्जायते तदा घटरूपप्रथमयो[6]र्नाशात्, तदानीं [7]नाशसमये घटाकाररूपयोर्लौकिकं प्रत्यक्षं कथं भवति ? [8]अत्र हेतुमाह-**विषयस्येति** । 'घ'कार'ट'कार रूपयोरभावात् । लौकिकप्रत्यक्षे

१. It seems that some such प्रतीक might have been here though not found in both A and B. २. B पदनिष्ठा. ३. B सन्निकर्षत्वम् । ४. B समूहा:. ५. B नाशत्वादि:. ६. B -यो र्न स्यात्. ७. B नाम स. ८. B तत्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विषयस्यापि कारणत्वात् ।

(VI) शब्दस्यानित्यत्वनिरूपणम् ।

नन्वनेकवर्णविषयकमपि समूहालम्बनात्मकं ज्ञानं सम्भवत्येव, शब्दस्य नित्यत्वादिति चेत्, न । शब्दस्य नित्यत्वे प्रमाणाभावात् । नन्वनुमानमेव प्रमाणम्-तथाहि शब्दो नित्यः, व्योमैकगुणत्वात् परिमाणवत् । यदि वा शब्दो न [१]ध्वंसप्रतियोगी, श्रोत्रग्राह्यत्वात्, शब्दत्ववत्[२] । यदि वा शब्दो नित्यः विशेषगुणान्तरासमानाधिकरणत्वे सत्येकपदार्थमात्रवृत्तिगुणत्वात्, कालपरिमाणवत् । यदि वा शब्दो नित्यः, पृथिवीतर[३]नित्यभूतविशेषगुणत्वात्, यथाऽपाकजत्वे सति नित्यैकसमवेतत्वात्, [४]जलपरमाणुरूपवत् । [५]यद्वाऽव्यापकव्यासज्यवृत्तित्वे सत्यनात्मकगुणत्वात्, कालपरिमाणवत्। विपक्षे बाधकं तु प्रत्यभिज्ञेति तृतीयहेतुव्याख्या । यथा विशेषगुणान्तरेणासमानाधिकरणत्वे सति एकपदार्थमात्र[६] गुणत्वात् कालमात्र वृत्ति र्यो गुणसत्त्वादित्यर्थः । सुखादौ गुणान्तरेण ज्ञानादिना समानाधिकरणत्वात् शब्दस्य च विशेषगुणान्तरेण समानाधिकरण्यं नास्तीत्यर्थः । '[७]**पृथिवीतरेति**-पृथिवीतरत् यन्नित्यभूतं तस्य यो विशेषगुणसत्त्वात् पृथिवीतरपदादाने पृथिवीपरमाणुरूपे व्यभिचारस्तत्र नित्यभूतविशेषगुणत्वरूपहेतुरस्ति । नित्यत्वरूपसाध्याभावाद् व्यभिचारः । तद्वारणार्थं पृथिवीतरपदम्। तथा च [८]जलपरमाणुरूपादौ पृथिवीतरनित्यभूतविशेषगुणत्वं वर्तते नित्यत्वमपीति व्याप्तिः । अपाकजत्वे इति सत्यन्तं पृथिवीपरमाणुनिष्ठरूपादौ व्यभिचारवारणार्थम् । अव्यासज्येति सत्यन्तं घटाकाशनिरूपितद्वित्वे व्यभिचार वारणार्थं तस्यानित्यत्वात् । तत्र नित्यैकसमवेतत्वं वर्तते । परं नित्यत्वरूपं साध्यं नास्ति । अतः सत्यन्तमुक्तद्वित्वस्य व्यासज्यवृत्तित्वम् । तच्च स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम् । स्वाश्रयो भवति घटः, आकाशं च । तथा च[९] घटे केवलेऽऽकाशे च नास्ति, उभयोरेव सत्त्वात् । पर्याप्तिसाख्यसम्बन्धेनोभयत्र[१०] तिष्ठतीति पूर्वपक्षः ।

(ii) तत्र शब्दस्यानित्यत्वम् ।

[११]**अनुमानेति**-यथा शब्दोऽनित्यः, सत्त्वे सत्युत्पत्तिमत्त्वात् । [(१)]अस्मादादिबहिरिन्द्रिय-ग्राह्यत्वे सति जातिमत्त्वात् । (२) अस्मदादिप्रत्यक्षगुणत्वात् । (३) अव्याप्यवृत्तित्वात् । (४) अत्र हेतौ[१२] न चेश्वरज्ञाने व्यभिचारः । घटादावीश्वरज्ञानाभावात् । ईश्वरात्मन्यपि ज्ञानं व्याप्य न तिष्ठति । तस्य व्याप्यत्वे[१३] प्रमाणाभावात् । अव्याप्यवृत्तित्वे चानुमानं प्रमाणम् । तथाहि-ईश्वरज्ञानमव्याप्यवृत्ति,

---

१. B -प्रतियोगिनित्ययोगी. २. B इष्टत्ववत्. ३. B omits नित्य. ४. B जलपरिमाणवत्. ५. B यद्वाऽव्यासज्य. ६. B omits the reading between गुणत्वात्....कालमात्र. ७. This is not a प्रतीक. but is a word of गुण's own sentence. pl. see line no. 7 of this page. ८. B जलपरिमाणादौ. ९. B omits च. १०. B -नोभयत्वं. ११. A reads a footnote here - संयोगस्यानित्यत्वात्। १२. B omits हेतौ. १३. B व्याप्यत्वप्रमाणा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञानत्वाद्, अस्मदादिज्ञानवदिति वाच्यम् । ईश्वरज्ञानस्य नित्यत्वेनाव्याप्यवृत्तिप्रयोजककारणाभावात् । अस्मदादिज्ञानमव्याप्यवृत्ति भवति, [1]तत्प्रयोजकशरीररूपकारण[2]सत्त्वात् । शरीरावच्छेदेनैव ज्ञानोत्पत्तिः । ईश्वरज्ञानं च न तथा । तस्य शरीराभावात् । तथा च तत्रापि हेतोरप्यसत्त्वेन न व्यभिचारः । प्रथमानुमाने सत्यन्तं ध्वंसे व्यभिचारवारणाय । (१) [3]सत्यन्तं द्वितीयानुमाने परि(र)माणौ व्यभिचारवारणार्थम्, बहिरिन्द्रियग्राह्यय इति । तथापि योगिबहिरिन्द्रियग्राह्यत्वे सति तत्रैव जातिमत्त्वमस्तीति व्यभिचारवारणार्थमस्मदादिपदम् । (२) । तृतीयनुमानेऽस्मदादिपदं योगिप्रत्यक्षगुणत्वं जलादि-परमाणुरूपेऽस्ति । तत्र साध्यसत्त्वेन व्यभिचारवारणार्थम् । [(३)]। यस्य मतेऽऽत्मन एकत्वमपि प्रत्यक्षं, तन्मते विशेषगुणत्वादित्यपि हेतुः व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात् (१), अनात्मप्रत्यक्षगुणत्वाद्वा (२), बहिरिन्द्रियव्यवस्थाहेतु-गुणत्वाद्वा (३) भूतप्रत्यक्षगुणत्वाद्वा (४), उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्वाद्वा (५)-इत्यादि हेतवः।

न च सर्वेष्वनुमानेषु साधनावच्छिन्नस्य पक्षधर्मावच्छिन्नस्य वा साध्यव्यापकः स्पर्शवत्समवेत्त्वमुपाधिः । [4]तथाहि उपाधियोजनं यत्र यत्र सत्त्वे सति उत्पत्तिमत्त्वावच्छिन्नमनित्यत्वं तत्र [तत्र]स्पर्शवत्समवेतत्वमस्ति । यथा घटः । घटे सत्त्वे सत्युत्पत्तिमत्त्वावच्छिन्नमनित्यत्वं वर्तते । तत्र च स्पर्शवत् भवति कपालम् । [5]तत्र समवेतत्वं वर्तते । [6]+सर्वत्र वर्णात्मकशब्दपक्षीकरणे व्योमगुणेष्वनित्येषु ध्वनिषु साध्याव्यापकत्वात् । -इति साधनावच्छिन्नसाध्यव्यापकत्वम्+ (१) पक्षधर्मो भवति जन्यत्वम् । तथा च [7]जन्यत्वावच्छिन्नमनित्यत्वम्, तत्र (२) स्पर्शवत्समवेतत्वम्, यथा घटः ।

प्रथमहेतौ 'व्यापकसमवेत' इति पदं जलपरमाणुरूपे व्यभिचारवारणार्थम् (१) । द्वितीयेऽनात्मेति पदं आत्मैकत्वे व्यभिचारवारणार्थम् (२) । यदुच्यतेऽऽत्मैकत्वं विशेषगुणपदेनैव वारितं तदेश्वरज्ञाने व्यभिचारवारणार्थमनात्मेति पदम् । बहिरिन्द्रियेति पदं हेतुत्वे सति गुणत्वमीश्वरज्ञाने नास्ति, तत्र व्यभिचारवारणार्थम् । (३) उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्त[8]पदं जलपरमाणुरूपादौ व्यभिचारवारणार्थम् । शब्दे च प्रवृत्तिनिमित्तमुत्कर्षापकर्षरूपा जातिस्तिष्ठति शब्दत्वव्याप्या । यद्वशात् तारत्वमन्दत्वादिप्रतीतिरिति, सा जातिर्जलपरमाणुरूपादौ नास्ति ।

उपाधिनिरासः-**यथा सर्वत्रेति**-सर्वेषु हेतुषु यः दत्ता (त्तः) उपाधिः स्पर्शवत्समेवतत्वरूपः तस्योपाधित्वं न सम्भवति । तस्य साध्याव्यापकत्वात् । तथाहि सर्वत्र वर्णात्मकः शब्दः पक्षीकृतः, व्योमगुणेष्वनित्येषु नित्येषु [च]ध्वनिषु साध्यमनित्यत्वं वर्तते । तत्र स्पर्शवत्समवेतत्वं नास्ति,

१. B तत्प्रयोजकं. २. B -कारणत्वात्. ३. Though found in both A and B सत्यन्तं seems to be redundant here. ४. A + ६ B reads the sentence between + -+before तथाहि. ५. B तत्स. ७. B जन्यतात्वाव. ८. B निमित्त एव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

निःस्पर्शसमवेतत्वात्तस्य । तस्मात् शब्दोऽनित्य एव ।

(VII) प्रत्यभिज्ञया शब्दग्रहणम् ।

अनुकूलतर्कोऽप्यस्ति । कोलाहलो न [श]ब्द इति प्रतीतिः । न च नित्यत्वसाधनेऽपि प्रत्यभिज्ञारूपोऽनुकूलतर्कोऽस्ति [१]यथा सोऽयं 'ग' कार इति वाच्यम् । सोऽयं 'ग' कार इति प्रतीतिस्तु तज्जातीयो 'ग' कार इत्यालम्बते । यथा सेयं दीपकलिकेत्यत्र तज्जातीयदीपकलिकेति कल्प्यते तथा प्रकृतेऽपि ।

पूर्वपूर्वेति । यत्र पूर्वपूर्ववर्णानां नाशो जातस्तत्र तद्विषयकः संस्कारः स्मरणं, वर्णानां प्रत्यासत्तिः । **चरमेति** श्रवणेन्द्रियेण यदा चरमवर्णविषयकं प्रत्यक्षं जन्यते तदा श्रवणेन्द्रियं समवायः वर्णानां यत्प्रत्यक्षं सन्निकर्षः चरमविषयकं प्रत्यक्षं फलम् । ध्वस्त जायते तत्र स्मरणं वा संस्कारः (वा) प्रत्यासत्तिरित्यर्थः । **एवं चेति** तथा च वाक्यविषयकं यज्ज्ञानं तल्लौकिकमलौकिकं च भवति । [२]यदंशे स्मरणं सन्निकर्षः तदंशे लौकिकप्रत्यासत्त्यजन्यत्वे[३] सत्यलौकिकप्रत्यासत्तिजन्यत्वम् । चरमवर्ण[४]ज्ञानांशे तु लौकिकप्रत्यासत्तिविद्यमानत्वेन लौकिकमेव ज्ञेयम् । तथा चेदमनेकवर्णविषयकं समूहालम्बनात्मकं ज्ञानं [५]लौकिकालौकिकप्रत्यासत्तिजन्यं भवतीति सिद्धम् ।

इदमिति यदुपनीतं, ज्ञानविशेषणत्वेन ये जाताः । कोऽर्थः ? येषां स्मरण जातं तत्र तु स्मरणमेव प्रत्यासत्तिः । यत्र च चरमवर्णानुभवे चरमवर्णो विशेषत्वेन जातस्तत्र [६]समवाय एव प्रत्यासत्तिरित्ययं पूर्वोक्तपन्थानः समीचीनः । कथं चरमवर्णानुभवानन्तरं सर्वेषां वर्णानां स्मरणमेव बोध्यम् । सर्वैः वर्णैः समं संस्कारः स्मरणं वा प्रत्यासत्तिः । चरमवर्णस्यानुभवानन्तरं नष्टत्वात् । तथा चानेकवर्णविषयकमलौकिकमेव समूहालम्बनात्मकं ज्ञानमुत्पद्यते ।

अथानया परिपाट्या यावत्पदप्रत्यक्षं जायते तस्य च किं प्रयोजनमिति चेत्, इदमेव-येन पुरुषेण शक्तिरर्थपदयोर्वाच्यवाचकभावरूपा-अस्माच्छब्दादयमर्थ बोधव्यो इतीश्वरेच्छारूपा [७]येन गृहीता तस्य पुरुषस्य कालान्तरे पदोच्चारानन्तरं श्रोतुः पदप्रत्यक्षं जायते । पदस्मरणेन पदार्थस्मृतिर्जन्यते । पदार्थस्मृत्या पदार्थानां परस्परमन्वयो वाक्यार्थरूपः तद्बोधो जन्यते, इदमेव पदज्ञानस्य प्रयोजनम् । पदज्ञानव्यतिरेकेण वाक्यार्थज्ञानानुदयात् । यथा चैत्रेण मैत्रं प्रत्युक्तं घटमानयेतिवाक्यं मैत्रस्य 'घ' कारादीनां वर्णानामेकदा सर्वेषामनुभवासम्भवात् । प्रथमतः प्रत्येकं घ-कारादि विषयकानुभवावृत्तास्तैरनुभवैः प्रत्येकं [८]स्व विषयकाः संस्कारा उत्पादिताः । तैः संस्कारैः कालान्तरे उद्बोधकविशेषं तत्पदव्यक्त्यादिकं प्राप्यतावतां 'घ' कारादिवर्णानां स्मरणं जन्यते। तेन

---

१. B omits यथा. २. B यद्देशे. ३. B -प्रत्यासत्त्या ज॰. ४. B वर्णांशे. ५. B लौकिकप्रत्या॰. ६. B समवायि. ७. B omits येन. ८. B स्वविषयाः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्मरणेन घटकर्मत्वादिरूपपदार्थस्मृतिः जन्यते । पदार्थस्मरणानन्तर पदार्थानां परस्परं योऽन्वयो घटकर्मकानयनक्रियारूपः स एव वाक्यार्थ इति [१]मीयते स च वाक्यार्थः पदार्थस्मृत्या जन्यते । तथा च पदज्ञानं करणम् । पदार्थस्मरणमवान्तरव्यापारः । वाक्यार्थज्ञानं फलम् । तता च पदज्ञानस्य व्यापारखत्त्वेन का(क)रणत्वं--शाब्दीप्रमाकरणत्वम् । तथा च शब्दप्रमाणस्येदमेव लक्षणं बोध्यम् । यथा शाब्दप्रमितिकरणं शब्दप्रमाणम् । न तु पदज्ञानमेव । न च [२]ज्ञायमाने पदे नष्टे पदस्थले ज्ञायमानं पदं नास्ति, परं पदज्ञानमस्त्येव । ननु पदज्ञानस्य प्रमाणत्वे पदस्य शब्दरूपस्य प्रामाण्यं नागतमिति चेत्, न । पदज्ञानविषयत्वेन पदस्याप्रामाण्यं शब्दः प्रमाणमिति व्यवहारेण [३]प्रमाणरूपं पदज्ञानविषयत्वेन शब्दस्य प्रामाण्यं कल्प्यते इति ।

एतत्सर्वं मनसिकृत्व(त्वा) **टीकाकृत्क्रमेणाह नन्विति-द्वयमिति** । लौकिकसन्निकर्षजन्यत्वं चरमवर्णविषयकज्ञानं प्रत्यलौकिकसन्निकर्षजन्यत्वं च ध्वस्तवर्णविषयकं[४] ज्ञानं प्रति स्मरणं सन्निकर्षः । इदं द्वयमयुक्तम् । **पूर्वन्यायेनेति** । तथा च यत्र बहवो वर्णास्तिष्ठन्ति तेषामनुभवरूपं समूहालम्बनात्मकं ज्ञानं न सम्भवति । तेषां च 'घ' कारादीनां प्रत्येकं नाशात्तदनुभवासम्भव इति **पूर्वन्यायः** । घटमानये त्यादिस्थले यदा श्रवणेन्द्रियेण एता वर्णा गृह्यन्ते तदा तैः सार्धं श्रोत्रस्य लौकिकसन्निकर्षो नास्ति । तेषां ध्वंसत्वात् । ततो लौकिकसन्निकर्षाभावात् कथं तेषां ग्रह इत्यर्थः।

उत्तरयति-**तावदिति** 'घ'कारादीना यद्यप्येकदानुभवः समूहालम्बनात्मको न भवति तथापि तेषां प्रत्येकं योज्यतेऽनुभवः । तैः प्रत्येकं जन्याः ये संस्काराः तैः कालान्तरे उद्बोधकवशात् समूहालम्बनात्मकं स्मरणं जन्यते । ततो वर्णस्मरणानन्तरं पदार्थज्ञानं, तदनन्तरं वाक्यार्थज्ञानं जायते, [५]इयमेव च शाब्दी प्रमा।

[६]**उपनयेति** तथा च सर्ववर्णविषयक ज्ञाने उपनीताः वर्णा विशेषणत्वेन भासन्ते । तच्च मानसज्ञानमनुव्यवसायात्मकं, तदनन्तरं पदार्थज्ञानं ततो वाक्यार्थज्ञानमिति वा ।

ननु ध्वस्तवर्णानां सर्वेषामेकदा समूहालम्बनात्मकं स्मरणमपि न सम्भवति, एकदैव सर्ववर्णानां समूहालम्बनात्मकानुभवाभावात्, अनुभवस्मरणयोः कार्यकारणभावस्तु समानप्रकारकत्वे समानविषयत्वेन रूपेण । तथा च यत्र घटमात्रविषयकानुभवेन घटविषयकः संस्कारो जनितस्तत्र कालान्तरेणैव संस्कारेण घटमात्रविषयं स्मरणं जन्यते । यत्र तु घटपटादिविषयकः समूहालम्बनात्मकानुभवेन संस्कारो जनितस्तत्र तेन[७] संस्कारेण कालान्तरे उद्बोधविशेषं प्राप्य समूहालम्बनात्मकमेव [८]स्मरणं जन्यते । प्रकृते तु समूहालम्बनात्मकोऽनुभव एकदा जात एव न

१. B omits मीयते. २. B ज्ञायमानं पदं. ३. B प्रमाणरूपपद. ४. B विषयकज्ञानं. ५. B एवं च. ६. It is उपनयेनेति in त. भा. प्र. ७. B omits तेन. ८. B स्मरणमेव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पुनस्तेन संस्कारद्वारा समूहालम्बनात्मकं स्मरणं कथं न जन्यते इति चेत्, न । प्रत्येकवर्णानुभव संस्कारेणापि यत्र सर्वेषां वर्णानामेकदैव स्मरणसामग्री मिलिता, तन्महिम्ना एकदैव तावद्वर्णविषयकं समूहालम्बनात्मकं स्मरणं जायते एव । तेन वाक्यार्थज्ञानमिति ।

ननु स्मृतिं प्रत्यनुभवस्य कारणत्वे किं प्रमाणम्, लाघवादनुभवध्वंस एव कारणम्, भवता तु मध्ये संस्कारः कल्पनीयः, इदमेव भवन्मते एव गौरवम् । भावककल्पनापेक्षयाऽभावस्य गुरुत्वान्मतेऽनुभवत्वेन कारणता, संस्कारद्वारा स्मृतित्वेन कार्यता । तदपि न अनुभवत्वस्य शाब्दानुमानिकादिसाधारणस्यैकस्याभावात् । अनुभवत्वं तु न जातिः । प्रमाणाभावात् ।

न च कार्यकारणभाव एव प्रमाणं स्मृतित्वावच्छिन्नकार्यतानिरुपितकारणतावच्छेदकत्वे-नानुभवत्वं जातिरूपम्, स प्रत्यक्षशाब्दादिसाधारणं सिध्यतीति वाच्यम् । साक्षात्कार-ज्ञानातिरिक्तानुमानादि-ज्ञानेऽनुभवत्वं नास्त्येव, प्रमाणाभावात् । यदि शब्दादिज्ञानेऽप्यनु-भवत्वं तिष्ठति [१]तदा स्वर्गमिति शब्देन यज्जातं ज्ञानं तत्रापि भवन्मतेऽनुभवत्व विद्यमानत्वात् स्वर्गमनुभवामीति प्रत्ययः स्यात् । स्वर्गं शाब्दयामीत्यादिप्रतीतिः, न त्वनुभवामीति प्रतीतिः कस्यापीति । अथ च यत्र क्षणे सुखमुत्पन्नं तस्मिन्नेव क्षणे दुःख विषयकमानुमानिकं ज्ञानं [२]वृत्तम्। तदनन्तरं सुखावस्थितिः । दुःखक्षणे दुःखमनुभवामीति प्रत्ययः स्यात् । न चेयं प्रतीतेर्वैपरीत्यात् । तथा सुखमनुभवामि दुःखमनुभवामीति तथा चैतद् बाधकबलादनुभवत्वमनुमानादिसाधारणं वक्तुमशक्यम् ।

पूर्वोक्तकार्यकारणभावः **मिश्रोक्ते** प्रमाणं नास्ति । तथा चानुभवत्वं साक्षात्त्वमेव घटत्वकलशत्वादिवदिति **शिरोमणयः** ।

न च साक्षात्वानुभवत्वयोः ऐक्यमपि प्रमाणाभावादिति वाच्यम् । तत्रानुव्यवसायस्य प्रमाणत्वात् । यत्र भूतलादौ घटादिविषयकः साक्षात्कारो जायते तत्र घटं साक्षात्करोमीति प्रतितिः । तथा घटमनुभवामीत्यपि प्रतीतिः । तदा साक्षात्त्वानुभवत्वयोरन्यूनातिरिक्तवृत्तित्वेनाभेद एवेति कुम्भत्वघटत्वयोरिति । तथा चानुभवत्वस्य शाब्दादिज्ञानमेव वृत्तित्वेन न्यूनवृत्तित्वेन व्यभिचारादनुभावत्वावच्छिन्नकारणतानिरुपित-कार्यताश्रयत्वं स्मृतौ नास्त्येवेति ।

अथ ज्ञानेन स्मृतित्वेन च कार्यकारणभावो वाच्यः । ज्ञानत्वस्य च शब्दादिसाधारणत्वात् । तदपि न । तथा सति सन्देहात्मकज्ञानेनापि स्मरणं जन्यते । तज्जन्यते च सामग्र्यभावात् । तथाविधे संस्कारो नास्ति । कथमिति चेत्, सन्देहात्मकज्ञानेन संस्कारजननात् । निश्चयत्वेन संस्कारवत्वेन च कार्यकारणभावात् । न च यत्फलं प्रति कारणं तदेव द्वारं प्रत्यपि, तथा च स्मरणरूपफलं प्रति[३] ज्ञानत्वेन

---

१. B तथा. २. B वृत्तिः. ३. B omits the reading between ज्ञानत्वेन.....रूपेण यदि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रूपेण यदि ज्ञानस्य कारणत्वं तदा संस्काररूपद्वारं प्रत्यपि ज्ञानत्वेन रूपेण कारणत्वमिति वाच्यम् । तथा नियमे प्रमाणाभावात् । यथा घटत्वावच्छिन्नं प्रति दण्डस्य दण्डत्वेन रूपेण कारणत्वं, भ्रमिरूपद्वारं प्रति तु कोमलदण्डव्यावृत्तरु पदृढदण्डत्वेन रूपेण कारणताङ्गीकारात्, कोमलदण्डेन भ्रम्यजननात् । यथा तदजनने कोमलदण्डस्य प्रत्यक्षं प्रमाणं तथा स्मरणं प्रति यज्ज्ञानत्वेन रूपेण ज्ञानं कारणम्, तत्संस्काररूपद्वारं प्रति सन्देहरूपज्ञानव्यावृत्ति निश्चयत्वेन रूपेण कारणम् । तथा च सन्देहात्मकज्ञानेन संस्कारो न जन्यते संस्काररूपसामग्र्यभावात् सन्देहरूपा स्मृति न जन्यते ।

यद्यपि **सुन्दलोपाध्यायमते** सन्देहरूपाऽपि स्मृतिः सम्भवत्येव, तथापि तद्दूषणं हेत्वाभासग्रन्थे सत्प्रतिपक्षावसरे बोध्यमिति दिक् ।

अपि च यदि ज्ञानत्वेन स्मृतित्वेन कार्यकारणभावस्तदा निर्विकल्पकेनापि स्मरणं जन्येत । समानप्रकारत्वेनैव कार्यकारणभावः । निर्विकल्पकस्य च निष्प्रकारकत्वात् । तथा च स्मृतिं प्रति ज्ञानस्य ज्ञानत्वेन रूपेणापि कारणत्वविरहात् । तावत्वर्णविषयकं स्मरणं कथं सिध्येत्, कारणाभावेन स्मरणासम्भवात् ।

न च निश्चयत्वेन स्मृतित्वेन च कार्यकारणभावः । तथा सति सन्देहानन्तरं स्मरणं कल्पयितुं न शक्यते । तत्र निश्चयत्वाभावात् । निर्विकल्पकस्थलेऽपि[१] स्मरणं न जायते । निर्विकल्पके निश्चयत्वाभावात् । निश्चयत्वं घटकत्वादिप्रकारकत्वे सति घट्यभावाप्रकारकत्वं निर्विकल्पकस्य निष्प्रकारत्वादिति वाच्यम् । निश्चयत्वस्याप्येकस्याभावात् । निश्चयत्वेन स्मृतित्वेन य कार्यकारणभावो वक्तुमशक्यः[२] ।

अत्र **नवीनाः** समादधुः । ज्ञानत्वेन स्मृतित्वेन कार्यकारण[३]भावः । न च पूर्वोक्तदोषः । एकत्र सन्देहस्थले संस्काराभावादेव स्मृति र्न जायते । अन्यत्र निर्विकल्पकस्थलेऽपि संस्काराभावादेव । संस्कारस्तु निश्चयात्मकज्ञानेनैव जन्यते इति सङ्क्षेपः । विस्तरस्तु **शिरोमणिप्रकाशे** बोध्यः ।

(VIII) चार्वाकमतनिरासः ।

अत्र **चार्वाकः** शङ्कते (ते) । – प्रत्यक्षातिरिक्तं प्रमाणं नास्त्येव । सर्वत्र प्रत्यक्षेणैवन्द्रियेण विषयस्य बोधसम्भवात् । तथा हि यत्र हि पर्वतादिस्थले वह्नेरनुमिति र्जायते तत्रापि चक्षुरादिना वह्नेर्ज्ञानं सम्भवत्येव । न च वह्निना समं सन्निकर्षाभावेन कथं वह्निविषयकं प्रत्यक्षमिति वाच्यम् । [४]तत्रालौकिकसन्निकर्षस्य सामान्यलक्षणसन्निकर्षस्य विद्यमानत्वात् । तथाहि पर्वतीयवह्नेर्ज्ञानं विशेषणज्ञानार्थं भवताऽपि स्वीकार्यमेव । तत्र भवन्मतेऽनुमानात्पूर्वसन्निकर्षाभावेन वह्नेर्ज्ञानं कथं

---

१. B omits अपि. २. B -मशक्य इति । ३. B -कारणभावेन च पूर्वो. ४. B अत्रा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भविष्यति ? [अतः]सामान्यलक्षणैव प्रत्यासत्तिर्वाच्या ।

तथा च धूमवत्त्वेन रूपेण महानसस्थले धूमाधिकरणे वह्निर्गृहीतः । तथा च वह्निना समं चक्षुरिन्द्रियस्य सन्निकर्षः । चक्षुरिन्द्रियसन्निकृष्टधूमाधिकरणवृत्तित्वमेव सन्निकर्षः । ततोऽनेन सन्निकर्षेण पर्वतीयवह्नेर्विषयकं प्रत्यक्षमेव सम्भवति, किमर्थमनुमानम् । एवमतीन्द्रियस्थलेऽपि भवन्मतेऽपि सामान्यलक्षणारूपसन्निकर्षसत्त्वात् प्रत्यक्षमेव सम्भवति । मन्मते तु अतीन्द्रिय-पदार्थस्याभावादेव नानुमानम् । एवं शब्दस्थलेऽपि श्रोत्रेण शब्दविषयकप्रत्यक्षद्वारा पद-विषयकप्रत्यक्षद्वारा वाक्यार्थसंसर्गरूपं प्रत्यक्षज्ञानमेव सम्भवति । **न्यायमते** तु गौरवम् । यथा प्रथमतो वर्णोत्पत्तिः, तदनन्तरं श्रोत्रेन्द्रियस्य वर्णै : समं [१]समवायरूपः सन्निकर्षः । तदनन्तरं श्रोत्रेण तावत् वर्णविषयकाणि प्रत्यक्षाणि । तैः प्रत्यक्षैस्तावत् वर्णविषयकसंस्कारो जन्यते । तदनन्तरं संस्कारैः कालान्तरैः पदस्मरणं कर्तव्यम् । तेन स्मरणेन पदार्थस्मृतिः कर्तव्या । तदनन्तरं पदार्थस्मृत्या पदार्थानां परस्परं संसर्गबोधो जन्यते । अ(इ)यमेव शाब्दीप्रमा फलम्, पदज्ञानं करणम्, पदार्थस्मृतिस्तु अवान्तरव्यापारेति । अत्र दूषणम्-ज्ञानलक्षणप्रत्यासत्त्यैव वाक्यार्थबोधसम्भवात् । तथाहि यथा पूर्वघटादिपदशक्तिग्रहार्थं घटादिज्ञानं यत्ख्यातं चक्षुरादिना, तदनन्तरं तेन ज्ञानेन संस्कारो जनितः । पुनः कालान्तरे तेनैव संस्कारेण वाक्यरूपमुद्बोधकं प्राप्य घटादि पदार्थस्मरणं क्रियते । तथा घटकर्मकानयनक्रियादिरूपैः पदार्थैः सह श्रवणेन्द्रियस्य मनसो वा स्मरणरूपज्ञानलक्षणा प्रत्यासत्तिः । तया सन्निकृष्टानां घटादीनां परस्परमन्वयबोधो जायते । [२]एतच्चक्षुरिन्द्रियमनसोः [३]फलम्, पदार्थस्मरणमवान्तरव्यापारेति प्रत्यक्षमेव प्रमाणम् ।

तदपि मन्दम् । वह्निमनुमिनोमीति प्रत्ययेनानुमितित्वजातिः सिध्यति । सा तु [४]साक्षात्काररूपज्ञानव्यावृत्त्या तत्र साक्षात्करोमीति प्रत्ययो न भवत्येव । वर्तते च वह्निमनुमिनोमि, न[५] साक्षात्करोमीति प्रत्ययात् । शाब्दस्थलेऽपि घटादीनां संसर्गः, शाब्दयामीति प्रत्ययात् न प्रत्यक्षत्वम् । प्रतीतिबलाद्भेदः ।

(IX) शक्तिः ।

शक्तिर्न्यायमते विशिष्टेश्वरेच्छैव । यथाऽस्माच्छब्दादयमर्थो बोधव्य इतिरूपा । तद्ग्रहोऽपि शाब्दबोधं प्रति कारणं [६]भवति । वाच्यवाचकसम्बन्धग्रहव्यतिरेकेण शाब्दबोधानुदयात् । लक्षणा तु [७]स्वशक्यसम्बन्ध एव संयोगादिः । यथा चक्षुरिन्द्रियेण घटादिविषयं ज्ञानं जन्यते तदा घटचक्षुसंयोगमपेक्ष्यैव जन्यते तथा शब्देन घटादिविषयकं ज्ञानं जन्यते । तदा घटेन समं शब्दस्य

---

१. B समवायसन्नि. २. B तच्चक्षु॰. ३. B फले. ४. B रूपज्ञानवृत्तिः । तत्र. ५. Pl. add शाब्दस्थलेऽपि घटादीनां संसर्गः, शाब्दयामीति प्रत्ययात्- ६. B omits भवति. ७. B स्वरूपसम्बन्धशक्य एव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शक्तिरेव सन्निकर्षः । तेन सम्बन्धेन वाच्यतासम्बन्धेन शब्दो [1]घटे तिष्ठति, वाचकतासम्बन्धेन घटो घटपदे तिष्ठति ।

(X) शब्दप्रमाणे लक्षणाविचारः ।

एवं लक्षणाऽपि वृत्तिर्बोध्या । यदा गङ्गापदेनाहत्य साक्षादेव तीरस्य बोधो [2]न जन्यते । तत्र तीरेण समं शक्तिरूपसम्बन्धासम्भवात् स्वशक्यसंयोगित्वरूपसम्बन्धो वाच्यः । सैव लक्षणा । यथा गङ्गापदं स्वशक्यसंयोगित्वसम्बन्धेन तीरे तिष्ठति, गङ्गापदवत्तीरमिति प्रतीतेः तथा च गङ्गायां घोष इति वाक्यश्रवणानन्तरं गङ्गापदेन स्वशक्य संयोगित्वसम्बन्धेनाहत्य तीरस्योपस्थितिः कृता । घोषपदेन घोषस्य वाच्यतासम्बन्धेनोपस्थितिः कृता । सप्तम्या चाधिकरणस्योपस्थितिः कृता । तदनन्तरं तीराधिकरणको घोष इति लक्षणया बोधो भवतीति **नवीनाः** ।

नवीनमते लक्षणासम्बन्धेनाहत्य पदार्थस्मृतिर्जन्यते । न च तत्र स्वशक्यबाधप्रतिसन्धानमपि सहकारीति वाच्यम् । प्रमाणाभावात् । **प्राचीनास्तु** वाक्यश्रवणानन्तरं स्वशक्यबाधप्रतिसन्धानं भवति । तदनन्तरं लक्षणया पदार्थान्तरस्य स्मरणं भवति । तदनन्तरं वाक्यार्थबोधः । यथा गङ्गायां घोष इत्यत्र गङ्गापदेन शक्तिसम्बन्धेन प्रवाहस्य प्रथमत उपस्थितिर्जन्यते । ततो घोषस्य प्रवाहेन सममन्वयबाधकज्ञाने जातिलक्षणया तीरस्योपस्थितिर्गङ्गापदेन जाता तदनन्तरं तीरेण समं घोषान्वयबोधो भवतीति ।

ननु गङ्गापदस्य तीरे स्वशक्यसंयोगरूपा लक्षणा । सा तु तीरे सम्भवति तथापि तीरत्वेन नास्ति । तीरत्वेन समं संयोगाभावात् । तथा च तीरत्वबोधकपदाभावात् तीरत्वप्रकारकः तीरबोध एव न सम्भवति । न च येन रूपेण [3]पदार्थे यस्य पदस्य लक्षणा गृहीता तेनैव रूपेण तस्य पदार्थस्य तेन पदेन तस्य च रूपेण बोधो जन्यते, यथा गङ्गापदस्य तीरत्वेन रूपेण तीरे प्रवाहसंयोगरूपा लक्षणा गृहीता पुनः कालान्तरे गङ्गापदेन संयोगसम्बन्धेन[4] तीरत्वेन रूपेण तीरस्योपस्थितिः क्रियते, तथा च तीरत्वेन समं लक्षणा किमर्थमपेक्ष्यते इति वाच्यम् । एवं [5]सति घटादिपदादीनां घटत्वाद्यंशे शक्तिर्न [6]स्यात् । तथा च घटपदस्य घटत्वेन रूपेण घटे शक्तिर्गृहीता । पुनः कालान्तरे संस्कारद्वारा घटपदेन घटत्वेन रूपेण घटस्य स्मरणं जन्यते । ततो घटत्वाद्यंशे शक्ति[7]र्नापेक्ष्यते । यदुच्यते घटपदस्य घटत्वेन रूपेण[8] घटत्वांशे शक्तिर्नास्ति तदा घटत्वस्य बोध एव न स्यात् । [9]तदा प्रकृतेऽपि समानम् । यदि गङ्गापदस्य तीरत्वांशे लक्षणा नास्ति तदा तीरत्व बोध एव न स्यात् ।

---

१. B घटेति वाचकता. २. B omits न. ३. B पदार्थस्य. ४. A सम्बन्धे तीर. ५. A एवं च सति. ६. B reads after स्यात्-न च तीरत्वेन समं संयुक्तसमवायलक्षणा तिष्ठत्वेवेति-It is an unwanted repetition. Pl. see note 1 of page 138. ७. B शक्ति र्न स्यात्. ८. B रूपेण घटे श. ९. B omits तदा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]न च तीरत्वेन समं संयुक्तसमवायलक्षणा तिष्ठत्येवेति वाच्यम् । संयुक्तसमवायस्य तीरेण सममसम्भवात् । न च तीरेण समं संयोगरूपा लक्षणा, तीरत्वेन समं संयुक्तसमवायलक्षणेति वाच्यम् । शब्देनैकदैव वृत्तिद्वयेन शाब्दबोधाजननात् । अन्यथा प्रवाहस्य पर्वतादिनाऽपि समं सम्बन्धस्य विद्यमानत्वात्तेनापि सम्बन्धेन गङ्गापदेन पर्वतादीनांपि ज्ञानं जन्येत् । तस्मात्तीरत्वबोधार्थं [2]काचनान्या लक्षणा कल्पनीया, न संयोगादिरूपा । तीरत्वसंयोगाभावात् ।

ततः तीरत्वसाधारणा लक्षणाऽ**तीवनवीनमते** । यथा गङ्गापदस्य [3]तीरे तीरत्वे च लक्षणाप्रवाहतीरे इति समूहालम्बनात्मकज्ञानविषयत्वरूपा । अयं सम्बन्धस्तीरे तीरत्वे च समान इत्युभयत्र लक्षणा । सा च **मणिकारमते** [4]द्विविधैव । एका सामान्यरूपा, एका निरुढिलक्षणा ।

आद्या यथा-स्वशक्यबाधप्रतिसन्धानोत्तरभावशाब्दबाधविषयिता निरूपितविषयताशालि-ज्ञानजनकत्वरूपा । -यथा गङ्गायां घोषः, मञ्चाः क्रोशन्ति-इत्यादिका । अयमर्थः-स्वशक्ये यो बाधस्तस्य यत्प्रतिसन्धानं तदुत्तरं यः भावीयः शाब्दबोधः 'तीरे[5] घोषः' इत्येवंरूपः, तन्निरुपिता या विषयता तीरेऽस्ति, तन्निरूपिता या विषयता ज्ञाननिष्ठा, तच्छालि यज्ज्ञानं तज्जनकत्वरूपः सम्बन्धविशेषः शक्येन समं संयोगरूप इति ।

द्वितीया यथा-शक्तितुल्यक्षणा । यथा[6] स्वशक्यबाधप्रतिसन्धानोत्तरभाविशाब्दबोध-विषयताऽतिरिक्तवृत्तिस्वशक्यसम्बन्धो निरुढिलक्षणेति **प्राञ्चः** । यथा 'धूमाद्' इत्यत्राहत्य [7]प्रतिज्ञार्थे वह्नौ [8]धूमज्ञानजन्यं ज्ञानविषयत्वम् । वह्निज्ञाने वा धूमज्ञानजन्यत्वं बुध्यते ।

ननु स्वशक्यबाधोऽपि तत्र सहकारी, अतो निरूढिलक्षणा शक्तितुल्यैवेति गीयते, । तथा[9] च धूमादिति पञ्चम्यर्थो(र्थं)हेतुत्वं धूमे न सम्भवति । कुत इति चेत्, वह्निमानित्यत्र प्रतिज्ञार्थो भवति वह्निः । तत्र धूमादित्यं हेतुः वह्नि समं नान्वेति । धूमहेतुको वह्निरिति शाब्दबोधानुदयात् । तस्मादत्र पञ्चम्या ज्ञाने लक्षणा । तथा च धूमज्ञानजन्यज्ञानविषयो वह्निः । अथवा धूमज्ञानजन्यं वह्निज्ञानमिति शाब्दबोधः । अत्र तु पञ्चम्याऽऽहत्यैव धूमज्ञानं जन्यते । यद्यप्यत्रोक्तरीत्या बाधो वर्तते तथापि तस्य ज्ञानं नापेक्ष्यते । आहत्यैव तज्ज्ञानजननात् सामान्यायां चेतरबाधोऽपि सहकारीति विवेकः । यथा गङ्गायां घोषः इत्यत्र प्रथमतः प्रवाहबोध तदनन्तरं तत्र बाधज्ञानं तदनन्तरं तीराधारताबोधः, ततः शाब्दबोधः इति बाधसहकारितेति रीति र्निरुढायां नास्ति । अत्र बाधज्ञान[10]सहकारिता नास्ति । परं मुख्यार्थबाध एव लक्षणा भवति । जहत् स्वार्थाजहत्स्वार्थयोरन्तर्भावः सामान्यायामेवेति [11]ज्ञेयम् ।

---

१. A Please see note no. 6 on page 137. २. B काचन लक्षणा. ३. B omits तीरे. ४. B द्विविधा। ५. B तीरघोषः. ६. B यथा लक्षणं यथा स्व.. ७. B प्रतिज्ञातेऽर्थे. ८. B -ज्ञानजन्यज्ञानविषयत्वम् । ९. B यथा. १०. B सहकारता. ११. B omits ज्ञेयम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यथा 'गङ्गायां[घोषः]' इति जहत्स्वार्था । 'काकेभ्यो दधि रक्ष्यताम् 'इत्यजहत्स्वार्था । अत्र बाधसहकार्याद्यायामेवान्तर्भावः ।

वस्तुतस्तु सावच्छिन्नार्थसम्बन्धतावच्छेदकयद्रूपातिरिक्तावच्छेदविषयता-निरूपित-विषयताशालिबोधजनकत्वनियतसमभिव्याहारविशेषविशिष्टतद्रूपवत् पदम्, तस्मिन्नर्थे निरूढिलाक्षणिकं तद्रूपावच्छिन्नं तत्स्वार्थं-सम्बन्धो निरुढिलक्षणेति निष्कर्षः ।

अस्यार्थः-यथा स्वपदेन शक्यतावच्छेदकं तदवच्छिन्नो योऽर्थः, तत्सम्बन्धितावच्छेदकं यद्रूपं तदतिरिक्तो यो धर्मस्तेनानवच्छेद्या या विषयता, तन्निरुपिता या विषयता, तच्छाली यो बोधस्तज्जनकत्वनियतो व्याप्यो यः समव्यवहारविशेषः, तेन विशिष्टो यः शब्दरूपस्तद्रूपवत्पदं तस्मिन्नर्थे निरुढिलाक्षणिकं भवति । तद्रूपावच्छिन्नो यस्तत्स्वार्थसम्बन्धः, सा निरूढिलक्षणेति[1] गीयते। यथा धूमादित्यत्र पञ्चमीसमभिव्याहार विशिष्टधूमत्वेन धूमज्ञानत्वातिरिक्तानवच्छेद्या या च विषयता, तन्निरूपिता या [2]विषयिता, तच्छाली यो बोधस्तज्जनकत्वनियतत्वात् पञ्चम्या ।

अयमर्थः-धूमपदेन धूमज्ञाने निरूढिलक्षणा । गङ्गाघटपदादौ त्वेवं समभिव्याहारः कोऽपि नास्ति । तद्विशिष्टत्वेन गङ्गापदादेः प्रतिनियतताद्दशबोधमात्रजनकत्वात् । तथा च निरूढिल-क्षणायामितरबाधः सहकारी न भवति सामान्यामितरबाधः सहकारीति भेदः । इति **मणिकाराणां** मते लक्षणाद्वयमेवेति दिक्।

(XI) शब्दप्रमाणलक्षणविचारः ।

अथ चेदं लक्षणं विचार्यते । शब्दस्तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थके सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम् । अस्यार्थो यथा शब्दोऽथ च शब्दोपजीवि यत्प्रमाणमनुमानविशेषः शब्दजन्यं यल्लिङ्गज्ञानात्मकं तदरिक्तं यत्प्रमाणं प्रत्यक्षं तज्जन्या या प्रमीतिः, तद्विषयार्थकत्वे सति, एतादृशी या प्रत्यक्षरूपा प्रमीतिस्तन्निरूपिता विषयता यस्य शब्दस्यार्थे नास्ति, तत्त्वे सति शब्दजन्यं यद्वाक्यार्थज्ञानं तज्जन्यत्वे सति प्रमाकरणशब्दत्वम् ।

(XII) प्रसङ्गात् वेदलक्षणम् ।

[3]वेदत्वं-यथा स्वर्गकामो यजेतेत्यत्रेदं वाक्यं भवति वेदः । अत्रेदं लक्षणं योज्यते-यथा शब्दः शब्दोपजीवि[4] प्रमाणम् । तदरिक्तं च यत्प्रमाणं प्रत्यक्षं, तज्जन्या या प्रमितिः एतावता शब्दानुमानाति-रिक्तं प्रत्यक्षं प्रमाणं, तज्जन्याप्रत्यक्षमात्रजन्या या प्रमितिः तद्विषयार्थकत्वं स्वर्गकाम इति वाक्यस्यास्ति । तद्वाक्यार्थस्य शब्दस्य प्रत्यक्षजन्यप्रमित्यविषयकरणादिति विशेषणदलं तिष्ठति

---

१. B omits इति. २. B विषयता. ३. B देवत्वं (?). ४. B -पजीवत्प्रमाणम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वेदवाक्ये । अथ च विशेष्यदलमप्यस्ति । यथा शब्दजन्यं यद्वाक्यार्थज्ञानं[१] घटमानयेत्यादि-स्थलेऽस्मदादिवाक्यार्थज्ञानं तदजन्यत्वं वर्ततेऽस्मिन्वाक्ये । इदं च वाक्यमीश्वरज्ञानजन्यम् । तत् ईश्वरज्ञानशब्दजन्यन्वाक्यार्थज्ञानं [२]न भवति । तस्य नित्यत्वात् । अथ च तत्र प्रमाणशब्दत्वमप्यस्ति।

अयं भावः - यस्य वाक्यस्यार्थः प्रत्यक्षजन्यप्रमितिविषयो न भवतिन, अथ च शब्दजन्यं यद्वाक्यार्थज्ञानमस्मदादिवाक्यार्थज्ञानम्, तज्जन्यं यद्वाक्यं प्रमाणवाक्यं स्वर्गकाम इत्यादिरूपमित्यर्थः। यद्यपि वेदार्थः [३]शब्दजन्यप्रमितिविषयो भवति तथापि प्रत्यक्षजन्यप्रमितिविषयो न भवति । स एव प्रमाणशब्द वेद इत्यर्थः । सत्यन्तं लौकिकवाक्येऽतिव्याप्तिवारणार्थम्, विशेष्यदलं शब्द-जन्यवाक्यार्थज्ञानाजन्यत्वे सति प्रमाणशब्दत्वं तत्र वर्तत एव । यथा घटमानयेति लौकिकवाक्ये प्रामाण्यमस्ति । घटमानयेति वाक्यस्य प्रत्यक्षजन्यप्रमितिविषयत्वात् घटादिकमपि प्रत्यक्षेण गृहीतुं [४]शक्यत एवेति । शब्दस्तदुपजीविप्रमाणातिरिक्तपदसम्भववारणार्थम् । तथा सति लक्षणं वेदेऽपि न गच्छति । वेदे प्रमाणजन्यप्रमित्यविषयार्थकत्वं नास्ति । प्रमाणं भवति शब्दस्तदजन्यं यज्ज्ञानं तदविषयार्थकत्वं वेदरूपवाक्यार्थे नास्ति । तत्र वाक्यजन्यज्ञानविषयत्वस्य[५] सत्त्वात् । तदाऽसम्भव एव स्यात्, कुत्रापि लक्षणागमनात् । तथा च प्रत्यक्षप्रमाणजन्यप्रमित्यविषयार्थकत्वं वेदे पर्यवसन्नम् । वेदार्थस्य [६]प्रत्यक्षप्रमाणजन्यप्रमित्यविषयार्थत्वात् स्वर्गादेः प्रत्यक्षजन्यज्ञानविषयत्वाभावात् । चरमप्रमाणं पदं चायोग्ये वाक्येऽतिव्याप्तिवारणार्थम् । यथा वह्निना सिञ्चेदित्ययोग्यवाक्यम् । शब्दस्तदुप-जीविप्रमाणातिरिक्तप्रमाणाजन्यप्रमित्यविषयार्थकत्वे सति शब्दज न्यवाक्यार्थज्ञानाजन्य-शब्दत्वं वर्तते ! परं तस्याप्रमाणत्वात् प्रमाणातिरिक्तमात्रस्य प्रमाणत्वासम्भवादित्यसम्भववारणार्थं शब्दः-शब्दोपजीविपदम् ।

ननु शब्दोपजीवि प्रमाणे (णमि)त्यादिकमेव वाच्यं किमर्थं शब्दत्वे वर्तते पदमिति चेत्, न। तदा वेदरूपवाक्येऽव्याप्तिः । शब्दोपजीवियत्प्रमाणमनुमानं तदतिरिक्तं यत्प्रमाणं शब्दरूपं तज्जन्या या प्रमितिः तदविषयार्थत्वं वेदरूपवाक्यार्थे नास्ति । अतः शब्दपदं दत्तम् । तथा च शब्द-शब्दोपजीविप्रमाणातिरिक्तत्वं शब्दस्य नास्त्येवेति नातिव्याप्ति । वेदे तु [७]परमास्तश्रीमहेश्वरेणत्यस्य प्रसङ्गात् वेदलक्षणं दर्शितम् ।

॥ इति शब्दप्रमाणं व्याख्यातम् ॥

---

१. B reads here न भवति, तस्य नित्यत्वात् । अथ च तत्र प्रमाणं-a mere repetition without context.
२. A The line is repeated. Please see note १. ३. B जन्यानुमानजननमतिविषयो. ४. B शक्य एव।.
५. A omits ज्ञान. ६. B -मितिविष. ७. B श्रीपरमास्तम.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[१३] ॥ अर्थापत्तिविचारः ॥

अनुपपत्तिरिति दिवसे येन न भुज्यते तस्य रात्रिभोजनव्यतिरेकेण पीनत्वं न सम्भवतीत्यनुपपत्तिः । पीनत्वं रात्रि भोजनमाक्षित्यर्थः ।

ननु रात्रिभोजनमनुमेयमेवेति चेत्, न । व्यधिकरणत्वादिति । व्यधिकरत्वम्, यथा गोत्वाश्वत्वयोः । अनुमानं यथा-'देवदत्तः, रात्रौ भुङ्क्ते, दिवाऽभुञ्जानत्वे सति पीनत्वात्।' पीनत्वं च विशिष्टत्वं हेतुः शरीरे सर्वत्र वर्तते । [१]रात्रिभोजनं तु वर्तते कण्ठावच्छेदेनेति वैयधिकरण्यम् । तथा [२]पक्षधर्मताविरहमपि दर्शयति-**देवदत्तेति** देवदत्तस्तु जीवविशेषः, तस्य पीनत्वाभावात् पक्षधर्मता नास्तीत्यर्थः । देवदत्तस्य शरीरमिति प्रतीतेर्देवदत्तशरीरयोर्भेदादिति भावः ।

अत्रेति अयमिति तथा च[३] पीनत्वरात्रिभोजनयोः सामानाधिकरण्यं तिष्ठति । रात्रिभोजनं तिष्ठति कण्ठावच्छेदेन शरीरे पीनत्वमपि सर्वावयवच्छेदेनेति सामानाधिकरण्यं पक्षधर्मता चास्ति । देवदत्तपदेन लक्षणया शरीरमेव पक्षीकृतमित्यर्थः **क्लृप्तेनैवेति** अनुमानेनैव रात्रिभोजनज्ञानं चेत् सम्भवति तदाऽर्थापत्तेः प्रमाणान्तरं किमर्थं कल्पनीयमित्यर्थः । तथा च यद्यप्यर्थापत्तिरपि पृथक् प्रमाणं स्वीक्रियते तदा रात्रिभोजनमर्थापयामीत्यनुव्यवसायः स्यात् । अनुमिनोमीति[न] स्यात् । प्रत्युत जायतेऽनुमिनोमीति । तथा [४]चार्थापत्तेर्प्रमाणाभाव इति दिक् ।

[इत्यर्थापत्तित्तिनिरासः ।]

[१४] अनुपलब्धिप्रमाणान्तरविचारः ।

अनुपलब्धेरिति तथा चाभावज्ञानं प्रत्युपलब्धेः योग्यानुपलब्धेः कारणत्वमुभयसिद्धम् । **नैयायिकमीमांसको**भयसिद्धम् । तथा च योग्यानुपलब्धेरेवाभावग्राहकत्वेनैव प्रमाणत्वं स्वीकर्तव्यम्। तथा हि यदा भूतले घटो नास्तीत्यभावविषयिणी चक्षुषा प्रतीति र्जायते तदाऽभावेन समं चक्षुषः कोऽपि सन्निकर्षो विशेष्यविशेषणभावरूपो वाच्यः । तथा च सम्बन्धान्तरकल्पने गौरवम् । लाघवं च योग्यानुपलब्धेः प्रमाणत्वस्वीकारे ।

अत्र सम्बन्धो न कल्प्यते । यथा 'भूतले घटो नास्ति' एतादृश घटाभावज्ञानं प्रति योग्यः भवति घटः । तस्य याऽनुपलब्धिः-प्रत्यक्षज्ञानाभावः, स एव स्वतन्त्रप्रमाणम् । तस्य कारणत्वम्भावज्ञानं प्रत्युभयवादिसिद्धमेव । तथा चानुपलब्धिरेव प्रमाणम्, अभावज्ञानं फलं निर्व्यापारत्वमेव ।

---

१. B omits the reading रात्रिभोजनं तु वर्तते. २. B पक्षताविर॰. ३. B omits च. ४. B तथाऽर्था.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्र तु फलायोगव्यवच्छिन्नं करणमित्यभिप्रायेण यदाऽभावज्ञानार्थमिन्द्रियं करणं तदेन्द्रियेणासम्बद्धस्य ज्ञानं न[१] जन्यते इत्यभावेन सममिन्द्रियस्य सन्निकर्षो वाच्यः सर्वेन्द्रिय-सम्बद्धविशेषणतारूपः । तत्कल्पने गौरवमित्यर्थः[२] ।

तथा च [३]करणत्वमुभाभ्यां स्वीक्रियते । मया त्वनुपलब्धेः । करणत्वेन प्रामाण्यं [४]स्वीकृतमिति **भाट्टाः** नन्वभावग्रहेऽनुपलब्धेः प्रमाणत्वेऽन्धस्याप्यभावप्रत्यक्षं भवतु, योग्यानुपलब्धे सत्त्वादित्यत आह-**योग्यानुपलब्धिरिति** [५]तस्या सहकारित्वमुभयवादिसिद्धम् । तथा च **भाट्टमते** प्रामाण्यकल्पनेइन्द्रियप्रामाण्यकल्पने गौरवम् । योग्यानुपलब्धेरेव प्रामाण्यत्वम् ।

योग्यानुपलब्धिमाह-[६]**तर्कितेति** [७]तर्कित यद् योऽस्य प्रतियोगिनः सत्त्वं तद्विरोधितामात्रं योग्यानुपलब्धिः । यथाऽत्र यदि[८] घटः स्यात् तदोपलभ्येत । नोपलभ्यते न [९]दृश्यते, तस्मान्नास्ति इति प्रमाणेनैवाभावो गृह्यते । किमर्थमभावग्रहणे चक्षुषः प्रमाणत्वम् ?

अत्र योग्यपदं त्वतीन्द्रियपदार्थाभावेऽति प्रसक्तिवारणार्थम् । अन्यथा स्तम्भो पिशाचो न भवतीत्यत्र पिशाचान्योन्याभावः स्तम्भनिष्ठः प्रत्यक्षः स्यात् । अत्रापि [१०]तादृशतर्कस्य वक्तुं शक्यत्वात् । यथाऽयं स्तम्भः पिशाचो यदि स्यात् तदोपलभ्येत, नोपलभ्यते, तस्मान्नास्तीत्यनुपलब्धिः तिष्ठति । परं योग्यानुपलब्धिर्नास्ति । पिशाचस्यायोग्यत्वात् ।

तथा चायमतीन्द्रियप्रतियोगिकोऽभावोऽप्रत्यक्षः । एवमाकाशात्यन्ताभावादीनामतीन्द्रियस्य प्रतियोगिकत्वात् [अ]प्रत्यक्षत्वम् । ततो योग्याऽनुपलब्ध्याऽभावो गृह्यते । तथा च योग्य-प्रतियोगिकोऽभावो योग्य इति ।

इयं तु तर्कितप्रतियोगिसत्त्वविरोधिताऽनुपलब्धिः **मणिकार मतेऽस्ति** । **आचार्यमते** त्वनेकप्रतियोगीत्यादिकल्पने गौरवमिति ज्ञेयम् । तथा च **भाट्टेनापि** अनुपलब्धिमात्रेणाभावो गृह्यते इति नोच्यते । अन्धस्याप्यभावग्राहप्रसङ्गादिति । तत्र चक्षुषोऽपि तत्र सहकारिता वाच्यैवेति लाघवेनेन्द्रियस्य प्रमाणत्वमेव वाच्यमिति सिद्धम् ।

अत्र पूर्वपक्षयति-**नन्विति** तथा चाभावग्रहे इन्द्रियस्य प्रमाणत्वे सन्निकर्षकल्पने गौरवमित्यर्थः । **शरीरे इति** विज्ञानकारणत्वं वर्तते शरीरे, तत्र वस्तुप्राप्यप्रकाशत्वं नास्ति । यदा घटादिविषयकं ज्ञानमुत्पद्यते तदा शरीरस्य कारणत्वमन्वयव्यतिरेकाभ्यामस्ति । शरीरे व्यतिरेकेणाज्ञानानुत्पत्तेरिति । परं वस्तुप्राप्यप्रकाशत्वं नास्ति । घटादीनां समं शरीरेण समं

---

१. B omits न. २. B omits इत्यर्थः. ३. A कर्मत्वमुभा. ४. B omits स्वीकृतमिति भाट्टाः. ५. B omits the reading between तस्याः.....सिद्धम्. ६. It is तर्कत्वमिति in both A and B but is as above in त. भा. प्र. ७. B तर्कितं संयोगस्य प्रति. ८. A omits यदि. ९. B omits न दृश्यते. १०. B एतादृश..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सम्बन्धाभावाद् व्यभिचारः । -हेत्वर्थः **यद्वेति** चक्षुः श्रोत्रे इत्यनुमाने इन्द्रियत्वादयं हेतुः । चक्षुं श्रोत्रे इति पक्षः । वस्तु प्राप्यप्रकाशकत्वं साध्यम् । तथा च यत्र यत्रेन्द्रियत्वं तत्र तत्र वस्तुप्राप्यप्रकाशकत्वम्। [१]अत्र मनसि व्यभिचारवारणार्थमिन्द्रियत्वे हेतोः बहिर्पदं विशेषणं देयम् । तथा च बहिरिन्द्रियत्वाद् इति हेतुः । तेन मनसि हेतुरपि नास्तीति भावः ।

सम्पातयातमिति अर्थादायातमित्यर्थः । तथा चक्षुरिन्द्रियादिना [२]घटाद्यभावविषयकं प्रत्यक्षं जन्यते तदा घटाद्यभावेन समं चक्षुरादि विशेषणविशेष्यभाव एव सम्बन्धः । असम्बद्धस्येन्द्रियेण ज्ञानाजननात् । यथेह भूतले घटो नास्तीति अभावप्रत्यक्षं चाक्षुषं भवति । इन्द्रियसम्बद्धे भूतलेऽभावस्य विशेष्यत्वात्, भूतलस्य विशेषणत्वात् । तत इन्द्रियेण सम्बद्धं यद् भूतलवृत्तिमत्त्वमेवाभावेन समं सन्निकर्षः । चक्षुः संयुक्तभूतलवृत्तित्वमेव सम्बन्धः । भूतले वृत्तित्वं चात्रातिरिक्तः पदार्थो [न]भवति, किन्त्वभावरूपमेव । अयमेव विशेषणविशेष्यभावः सम्बन्धत्वेन गीयते ।

इदं **मूलकारो** दूषयति-**न च विशेषण विशेष्यभावस्तथेति** तथा एकोऽयं न भवति, उभयाश्रितो न भवति सम्बन्धाभ्यामतिरिक्तो न भवति-इति न सम्बन्ध इत्यन्वयः । **भिन्नत्वाभावादिति** तथा च विशेषणविशेष्यभावो न सम्बन्धः । सम्बन्धिभ्यां भिन्नत्वाभावात् । एवमुभयाश्रिततत्वाभावात्, एकत्वाभावाच्च । घटपट्योभयादिवत् ।

द्रव्यादीति यथा घटाभाववद्भूतलमित्यत्र घटाभावो भवति विशेषणम् । तत्र विशेषणत्वं नाम अभावस्वरूपमेव । न च तत्राभावे द्रव्याद्यन्यतमत्वमेव [इति]वाच्यम् । तत्राभावे द्रव्याद्यन्यतमत्वस्यातिरिक्तस्याभावात् । तथा च विशेषणत्वं च विशेष्यत्वं चाभावस्य स्वरूपसम्बन्धः । यथा यदा घटाभाववद्भूतलमिति प्रत्यक्षं जायते तदा[३] घटाभावो भवति विशेषणम्, भूतलं भवति विशेष्यम् । [४]यदा च भूतले घटो नास्तीति प्रत्यक्षं जायते तदा घटाभावो विशेष्यो, भूतलं भवति विशेषणम् । -प्रथमपक्षे भूतलाधिकरणको घटप्रतियोगिकोऽभावः । तथाऽधिकरणत्वोपरि भूतलं विशेषणत्वेन भासते । यदा च भूतलमिति प्रथमान्तं तदाऽभावनिष्ठाधेयतानिरूपकाधारतावद् भूतलमित्यत्राधेयतोपर्यभावो विशेषणत्वेन भासते इति प्रतीतिभेदः । ज्ञानस्योभयत्र[५] प्रकारत्वं कृतं वैलक्षण्यमिति विशेष्यो ज्ञेयः । प्रकारत्वं भासमानवैशिष्ट्यप्रतियोगित्वम् । वैशिष्ट्यं नाम सम्बन्धः । तन्निरूपकत्वं विशेषणनिरूपितं वैशिष्ट्यं विशेषो भासते । यतो विशेषणज्ञाने प्रथमतो विशिष्टबोधो भासते । ततस्तन्निरूपितं वैशिष्ट्यं विशेष्ये भासते इति द्रव्यादीति । अभावे द्रव्याद्यन्यतमत्वं पदार्थान्तरं न वर्तते । ततस्तत्र यदि पदार्थान्तरं कल्प्यते तदा गौरवमेव दोष इत्यर्थः ।

---

१. B तत्र. २. B omits the reading between घटाद्यभाव....जन्यते. ३. B न तदा. ४. B omits the reading between यदा च....भवति विशेषणम् । ५. B -स्योभयप्रका..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नन्वभावे विशेषणत्वधर्मोऽतिरिक्तः सिध्यतीयत्याह-**स्वरूपमेवेति** तथा च विशेषणत्वमभावस्य स्वरूपमेवेत्यर्थः । आदि[1]पदाद्विशेष्यत्वमपि स्वरूपमेव ज्ञेयम् । ननु यदि विशेषणं तत्स्वरूपमेव, अभावयोः तदा वैलक्षण्यभेद केन कर्तव्यः ? विशेषणं यदि ताभ्यामतिरिक्तं वस्तु भवति तदाऽन्यतः तेन व्यावृत्तिः कर्तव्या । न चैवमस्ति । तथा च वैलक्षण्यमभावाभावस्वरूपेण भिन्नेनैव कर्तव्यम् । भावस्थले तु भावस्वरूपमेव सामान्यकारं भासते, अभावस्थले तु अभावस्य स्वरूपमेव सामान्याकारमेव व्यावृत्तिः कर्तव्येत्यर्थः । **एवमिति** यदि विशेषणविशेष्यभावसम्बन्धो न भवति तदा व्याप्यव्यापकभावादयोरपि सम्बन्धा न स्युः इत्याक्षेप इत्यर्थः ।

नन्विति तथा चाभावस्थलादौ यदि कश्चन सम्बन्धोऽतिरिक्तो न स्वीक्रियते तदाऽभावादिविशिष्टबुद्धिरेव न स्यात् । ततोऽतिरिक्तः कश्चित्सम्बन्धः विशिष्टबुद्धिजनकः स्वीकर्तव्य एव । अभावे तु सम्बन्धान्तरासम्भवेन द्रव्याद्यन्यतमत्वमेव सम्बन्ध उपाधिरूपः । द्रव्यादिसप्तान्यतमत्वमभावे वर्तते । स च [स्व]रूपसम्बन्धो भवतु अतिरिक्तो वेत्यन्यदेतत्, तेनैव [वि]शिष्टबुद्धिर्जन्यते धर्मिभ्यामित्यभावभूतलाभ्यामतिरिक्तो भवत्येव स धर्मः । यतो योग्यताया अभावविशिष्टबुद्धिजनकत्वयोग्यतारूपस्य धर्मस्य योग्य[2]पदार्थोऽभावभूतलादिरूप इत्यर्थः ।

नन्वभावे द्रव्याद्यन्यतमत्वं पूर्वदूषितम्, इदानीं कथं तत्समर्थनीयमित्यत आह **न[चाभा]वेति**[3] तथा चाभावेऽपि द्रव्याद्यन्यतमस्योपाधेः सम्भवात् । एतदेवाह-**द्विविधमिति** यद्यप्यभावे गतिर्न सम्भवति तथाप्युपाधिरूपं सामान्यं सम्भवत्येव । एतावताऽभावनिष्ठो विशिष्टबुद्धिजननयोग्यो द्रव्याद्यन्यतमरूप उपाधिरस्तीति विशेषणविशेष्यभाव एवायमित्यर्थः ।

एवमिति तथा च व्यापकत्वं व्याप्तिनिरूपकत्वं व्याप्यत्वं च व्याप्त्याश्रयत्वमिति व्याप्यव्यापकसम्बन्धोऽप्यतिरिक्त एवेत्याह **नापीति** तथा च यदि स[4] सम्बन्धोऽतिरिक्तः एको भवति तदोभयाश्रितत्वं तस्य स्यात् । न चैवमसाधारण्यं विनेति । तथा चोभयनिष्ठोऽसाधारणरूप एको धर्मो नागतः । विशेष्यभावो विशेष्यत्वं विशेषणभावो भवति विशेषणत्वम् । तच्च परस्परं विशेष्य विशेषणे च नास्त्येवेत्यसाधारण्यं नास्तीत्यर्थः । ननु विशेषणविशेष्यभावस्य सम्बन्धत्वेन तर्हि कथं प्रतीतिरित्यत आह **उभयेति** उभयविषयकं यत्समूहालम्बनात्मकं ज्ञानं यदा भूतलघटाभावाविति रूपं तद्विषयत्वेनोपचारेण सम्बन्धत्वप्रतीतिरूपपादनीया । न तु वस्तुगत्या सम्बन्धत्वमिति भावः ।

प्रत्यासत्तेरिति तथा च यत्र घटो वर्तते तत्राप्यभावस्य कश्चिदतिरिक्तो सम्बन्धो नास्ति । यत्र घटो न वर्तते तत्राप्यभावस्यातिरिक्तः सम्बन्धो नास्ति । तेन यथा घटाभाववति भूतले घटो नास्तीति प्रतीतिर्जायते तथा घटवत्यपि भूतले नास्तीति प्रतीतिः स्यात् । सम्बन्धाभावस्योभयत्र तुल्यत्वादिति।

---

१. B आदिशब्दाद्वि. २. B पदार्थेऽपि अभा. ३. It is नचाभावेति in त.भा.प्र. and as it suits the context it is preferred. ४. B न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अतिप्रसक्तिवारणार्थमवश्यं भूतलेन [१]समं कश्चित्सम्बन्धो वाच्यः । प्रत्यासत्तिपदेन[२] सम्बन्ध एव-विशेषणविशेष्यभाव एव । तथा च यत्र भूतले घटो वर्तते, तेन भूतलेन सममभावस्य विशेषणविशेष्यभावः । सम्बन्धाभावेन न तथापि प्रतीतिः । यत्र घटो नास्ति तत्र तेन भूतलेन सममभावस्य विशेषणविशेष्यभावसम्बन्धसत्त्वेन भूतले घटाभावप्रतीति र्जायते इत्यर्थः । तत उक्तरूपा प्रत्यासत्तिरावश्यकीति तत्कल्पने गौरवं नास्तीति भावः । ननु यथा भूतले घट इति प्रतीत्या संयोगरूपोऽतिरिक्तः सम्बन्धः [३]सिध्यति तथा भूतले घटो नास्तीति प्रतीत्याऽभावस्यापि भूतलेन सममतिरिक्तो कोऽपि सम्बन्ध आयास्यति । अतिप्रसङ्गभङ्गार्थ स स्वीकर्तव्य एव । तथा च सिद्धान्तभङ्ग[४] इत्यत आह-**वस्तुतस्त्विति विशेषतापीति** [५]**नैयायिकेनेन्द्रियसावद्धविशेषण**-तारूपः सम्बन्धोऽभावेन समं स्वीक्रियते । इन्द्रियसम्बद्धं च भूतलादिकम्, तत्र विशेषणंभवत्यभावः । यथा घटाभाववद्भूतलमिति । भूतलमिन्द्रियसम्बद्धं विशेष्यम्, तत्राभावस्य विशेषणत्वात् । अन्यथा घटाभाववद्भूतलमिति विशिष्टबुद्धिरेव न स्यात् । यत्र च ज्ञाने सः विशेषण विशेष्यसम्बन्धो न भासते तत्र तस्य विशिष्टज्ञानानङ्गीकारात् । यथा घटघटत्वयोः निर्विकल्पकत्वम् तत्र [६]घटसम्बन्धस्याभानमिति निर्विकल्पकस्य विशिष्टबुद्धित्वम् तथा प्रकृतेऽपीति । **एवमिति** अनया च युक्त्या पूर्वोक्त्या सम्बन्धकल्पनाऽऽवश्यकी तथा च चक्षुषोऽभावेन सममिन्द्रियसम्बन्धविशेषणतारूपः सम्बन्धस्तयाऽपि वाच्य एव । अन्यथा घटाभाववद्भूतलमिति प्रतीतेर्विशिष्टज्ञानत्वमेव न स्यात् । अतिप्रसङ्गभङ्गार्थं स स्वीकर्तव्य एव ।

न प्रमाणान्तरकल्प्नयेति योग्यानुपलब्धेः प्रमाणान्तरत्वं[७] न कल्पनीयमित्यर्थः **अनुपलब्ध्येति** तव मतेऽपि योग्यानुपलब्ध्याऽपि कुत्रचिदभावो गृह्यते कुत्रचिन्नेति तत्र किञ्चिन्नियामकं वक्तव्यम् । तत्र च भवतामपीन्द्रियसम्बद्धविशेषणतारूपः सम्बन्धो वाच्य एव । तथा चोभयमते सः[८] सम्बन्धोऽऽवश्यको भवति । न तत्कल्पने गौरवमिति योग्यानुपलब्धिर्नप्रमाणमित्यर्थः ।

इत्यभावग्रन्थव्याख्या ॥

[१५] ॥ प्रामाण्यवादः ॥

प्रामाणस्येति - प्रामाण्यं प्रसङ्गाद्विचारयति । प्रमाणं निरूपितम् । तन्निष्ठो धर्मः प्रामाण्यम्। तत्स्वतो वा ग्राह्यं परतो वेति । परतस्त्वं **न्यायमते** इत्यर्थः ।

विप्रतिपत्तिरिति विरुद्धार्थद्वयप्रतिपादकं वाक्यं विप्रतिपत्तिः । यथा ज्ञानप्रामाण्यं

---

१. B सह. २. B शब्देन. ३. B repeats the reading between सिद्ध्यति.....स्वीकर्तव्य after भङ्ग. ४, ५. नैयायिकमते इन्द्रि.. ६. B घटस्याभा. ७. B प्रमाणान्तरं. ८. B omits सः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तदप्रामाण्याग्राहकं यावत् ज्ञानग्राहकसामग्रीग्राह्यं न वा ? अत्र विधिकोटिः **मीमांसकानाम्**, यावत् ज्ञानग्राहकसामग्रीग्राह्यत्वरूपा प्रतियोगिनी भावरूपा । **नैयायिकेस्तु** ज्ञाननिष्ठप्रामाण्ये तदभावः साध्यत इति निषेधकोटिः । तथा च ज्ञाननिष्ठं यत्प्रामाण्यं सः पक्षः तद्वतितत्प्रकाररूपः, तत्र यावत्ज्ञानग्राहकसामग्रीग्राह्यत्वरूपं साध्यं स्वाश्रयग्राहकग्राह्यत्वात् [१]तृतीया विप्रतिपत्तिः । यत्र[यत्र]स्वाश्रयग्राह्यत्वं तत्र तत्र ज्ञानग्राहकसामग्रीग्राह्यत्वमस्ति, यथा ज्ञानत्वे स्वशब्देन प्रामाण्यं तस्याश्रयीभूतं यज्ज्ञानं तस्य ग्राहिका या सामग्री अनुव्यवसायादिरूपा तद्ग्राह्यत्वं वर्तते ज्ञानत्वे । [२]तत्राप्रामाण्याग्राहके यावद् ज्ञानग्राहकसामग्रीग्राह्यत्वमपि साध्यमस्ति । अथवा हेतुर्यथा [३]तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यत्वात् । यदा वा द्वितीया विप्रतिपत्तिः क्रियते साध्यं तदा प्रथमा विप्रतिपत्तिर्हेतुः क्रियते ।

अथ व्याख्या-ज्ञानगतं प्रामाण्यं ज्ञानप्रामाण्यम् । ज्ञानपददाने प्रामाण्यमात्रपक्षीकरणे चक्षुरादिनिष्ठे प्रामाण्ये बाधः स्यात् । तत्र यावत् ज्ञानग्राहकसामग्रीग्राह्यत्वरूपस्य [४]साध्यस्याभावात् । ज्ञानग्राहकसामग्र्याऽनुव्यवसायरूपया चक्षुरादिनिष्टं यत्प्रामाण्यं तत्र गृह्यते । ज्ञानविषयकज्ञानेन चक्षुर्निष्ठप्रामाण्यस्यातीन्द्रियस्य ग्रहितुमशक्यत्वात् । तद्वारणार्थं ज्ञानपदं देयम् । तथा च ज्ञाननिष्ठं यत्प्रामाण्यं सः पक्षः, तत्र पक्षे तदप्रामाण्येति तत्पदेन प्रामाण्याश्रयीभूतं ज्ञानं ग्राह्यम् । तथा च प्रामाण्याश्रयीभूतज्ञानाप्रामाण्यग्राहिका यावती ज्ञानग्राहिका सामग्री तद्ग्राह्यत्वं ज्ञाननिष्ठ प्रामाण्ये तिष्ठति । तथा चेन्द्रियनिष्ठप्रामाण्ये तदसत्त्वेऽपि न क्षि(क्ष)तिरिति । तस्य पक्षताभावात् पक्षे च साध्यसत्त्वं बाधः । इन्द्रयनिष्ठप्रामाण्यस्यतु पक्षत्वमेव नास्तीति न बाध इति चेत्, न । तथापि ज्ञानपदे दत्तेऽपि बाध तदवस्थ एव स्यात् । ज्ञायतेऽनेनेति व्युत्पत्त्या करणसाधारणं ज्ञानपदं जातं तन्निष्ठप्रामाण्ये पुनर्बाधः ।

पक्षधरमते ज्ञप्तिरेव ज्ञानं तन्निष्ठं यत्प्रामाण्यं सः पक्षः । तथा च तन्निष्ठप्रामाण्ये न बाधः । तस्यापक्षत्वात् । तदपि न वाक्यार्थप्रमाकरणं भवति पदज्ञानं तन्निष्ठम् । यत्प्रमाकरणत्वरूपं प्रामाण्यं तदपि पक्ष एव । तस्यापि ज्ञाने निष्ठत्वात् । तत्र तदप्रामाण्यग्राहकसामग्रीग्राह्यत्वरूपसाध्यासत्त्वेन बाधस्तदवस्थ एव । तथा च ज्ञानपदे दत्तेऽपि बाधो जात एव । तेन प्रामाण्यपदेन तद्वति तत्प्रकारत्वरूपं ग्राह्यम् । तथा चेदमिच्छासाधारणं जातम् । तत्रेच्छावत्तयानिष्ठप्रामाण्ये ज्ञानग्राहकसामग्री-ग्राह्यत्वाभावाद्बाध एव । तस्येच्छाग्राहकसामग्रीग्राह्यत्वात् । तद्वारणार्थं पक्षे ज्ञानपदम् ।

वस्तुतस्तु ज्ञानप्रामाण्यपदेन ज्ञानत्वविशिष्टं प्रामाण्यं प्राप्यते । तथा च तद्वति तत्प्रकारकज्ञानत्वं फलितार्थः । एतावानर्थो ज्ञानपदोपसन्धानेनैव प्राप्यते । साध्ये ज्ञानपदस्य स्वाश्रयत्वमात्रमर्थः । तथा

---

१. A omits तृतीया विप्रतिपत्तिः. २. A omits यत्र. ३. B यज्ज्ञान. ४. B साधनस्या॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

च प्रामाण्याश्रयत्वात्तद्ग्राहकग्राह्यत्वमेतादृशप्रामाण्याश्रयीभूतं च[1] । अर्थात् ज्ञानमेवायास्यति । तथा च तद्ग्राहिका यावती सामग्री तद्ग्राह्यत्वं प्रामाण्ये तिष्ठत्येवेति न बाधः । अज्ञायमानप्रामाण्ये बाधवारणाय ज्ञानपदं ज्ञायमानपरमित्यपि कश्चित् ।

अयमर्थः-यस्य ज्ञानस्य प्रामाण्यं केनचिदज्ञातं नास्ति, तत्र यावद् ज्ञानग्राहकसामग्री ग्राह्यत्वं नास्तीति बाधवारणाय ज्ञानपदम् । अथ प्रामाण्यग्रहप्रक्रिया[2] यथा तत्र ज्ञानं घटोऽयमितिरूपं तन्निष्ठं यत्प्रामाण्यं घटत्ववति घटत्वप्रकारकत्वरूपं स पक्षः, तत्र साध्यं तादृशप्रामाण्याश्रयीभूतं यज्ज्ञानं घटोऽयमितिरूपं तस्य यदप्रामाण्यं घटत्वाभाववति घटत्वप्रकारकत्वरूपं तस्यग्राहिका यावती ज्ञानग्राहिका सामग्री तदग्राहित्वम् ।

गुरुमते ज्ञानग्राहिका सामग्री ज्ञानमेव स्वप्रकाशरूपम् । **मिश्रमते** ज्ञानग्राहिका सामग्री अनुव्यव साय एव । **भाट्टमते** ज्ञाततालिङ्गकानुमितिरेव तथा च **गुरुमते** घटोऽयमिति ज्ञानेनैव ज्ञानं, ज्ञानत्वं ज्ञाननिष्ठं च प्रामाण्यं गृह्यते । ग्रहविषयीभूतं प्रामाण्यम् । तथा च तन्मते स्वाश्रयज्ञानविषयत्वं प्रामाण्ये तिष्ठतीत्यर्थः । **मिश्रमते** पूर्वं घटोऽयमिति ज्ञानमुत्पद्यते व्यवसायः, तदनन्तरं घटमहं जानामीत्यनुव्यवसायः । तेन तस्य ज्ञानस्य प्रामाण्यं गृह्यते । **भाट्टमते** तु ज्ञाततालिङ्गकानुमित्या प्रामाण्यं गृह्यते । यथा ज्ञातोऽयं घट इति घटत्वमिति घटत्वप्रका रकत्वनिरुपितविषयताश्रयत्वाद घटस्य। तथा च प्रथमतो ज्ञानं घटोऽयमिति जातम् । तदनन्तरं ज्ञातोऽयं घटः इति प्रतिज्ञा । तदनन्तरं ज्ञाततासाधनार्थं हेतुप्रयोगः । यथा घटत्ववति घटत्वप्रकारकत्वनिरुपितविषयताश्रयत्वादिति हेतुः । तेषां मते लिङ्गोपहितलैङ्गिकभानं वर्तते । यथा धूमाद् वह्निमान् इत्यनुमितिः । तथा प्रकृतेऽपि घटत्ववति घटत्वप्रकारकत्वनिरुपितविषयताश्रयोऽयं घटो ज्ञाततात्रय इत्यनुमित्या घटविषयकज्ञाननिष्ठं यद् घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यम् । तद् गृह्यते इति स्वतस्त्वम्।

तदभावस्तु **नैयायिकेन** साध्यते । साध्ये व्यावृत्तिर्यथा तदप्रामाण्ये (ण्यमि) ति । तत्र ज्ञाने यदप्रामाण्यं-प्रामाण्यविरोधि । विरोधित्वं नाम एकावच्छेदेन तज्ज्ञानविरोधिज्ञानविषयत्वम् । तच्छब्देन प्रामाण्यं तद्विषयकं यज्ज्ञानं तद्विरोधि यदज्ञानं तद्विषयत्वम् । तथा चैकतराप्रामाण्यं गृहीत्वा न दोषः। तथा चाप्रामाण्यविरोधिनी यावती ज्ञानग्राहिका सामग्री तद(द्)ग्राह्यत्वम् । तज्जन्यग्रहविषयतत्त्वं, तथा च ज्ञानजनकसामग्र्याऽनुव्यवसायादिरूपया गृह्यते-विषयीक्रियते। तथा च यावत्ज्ञानग्राहक-सामग्रीग्राह्यत्वमात्रं यदि साध्यं क्रियते, [3]तदेदं ज्ञानमप्रमा-इयमपि ज्ञानग्राहिका सामग्री भवति । अनया प्रामाण्याग्रहाद् बाध इति तद्वारणार्थमप्रामाण्याग्राहकान्तम् । इयं च[4] सामग्री अप्रमाणग्राहिकेवेति ।

ननु यावत्पदं किमर्थमिति चेत्, [5]न । तदा **नैयायिकेन मीमांसकं** प्रति सिद्धसाधनं कर्तव्यम्।

---

१. A वा. २. B -ग्रहप्रकृति. ३. B तदा ज्ञानं. ४. B omits च. ५. A omits न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नैयायिकमतेनापि प्रामाण्यज्ञानग्राहकसामग्रीग्राह्यत्वं स्वीक्रियते एव । यथा ज्ञानग्राहिका सामग्री भवति प्रामाण्यानुमितिः यथा-इदं ज्ञानं प्रमा-इति । इयं प्रामाण्यविषयिणी अनुमितिः । अस्यां ज्ञानमपि पक्षज्ञानत्वेन भासते । तथा चानुमितिरूपयाऽपि सामग्र्या प्रामाण्यमपि गृह्यते एवेति सिद्धसाधनम् । तद्वारणर्थं यावत्पदम् । तथा च यावत्सामग्रीमध्ये ज्ञानानुव्यवसायादिकमपि पतितं तेनैव[१] प्रामाण्यं **नैयायिक**मतेन गृह्यते इति सिद्धसाधनम् ।

ज्ञानपदं चेच्छानिष्ठप्रामाण्यसिद्धसाधनवारणार्थम् । इच्छानिष्ठप्रामाण्यमपि अप्रमाण्यग्राहक यावत्सामग्रीग्राहकग्राह्यत्वमस्ति । तच्चेच्छानिष्ठप्रामाण्यमिच्छाग्राहकसामग्र्या[२]-इच्छाविषयक-ज्ञानादिरूपया गृह्यत इति । ज्ञानग्राहकपदं तु घटप्रत्यक्षसामग्री चक्षुरिन्द्रियघटसंयोगादिरूपा तया प्रामाण्यं न गृह्यते इति बाधवारणाय । **ज्ञानग्राहिकेति** घटेन्द्रियसंयोगादिरूपा च सामग्री ज्ञानजनिका भवति न तु ज्ञानग्राहिका । ज्ञानग्राहकत्वं नाम [३]ज्ञातविषयकज्ञानजनकत्वम् । तच्चेन्द्रियसंयोगे नास्ति । तत्प्रत्यात्ममनःसंयोगः कारणम् अनुव्यवसाये घटेन्द्रियसंयोगस्याकारणत्वात् । यत्र खण्डशरीरमुत्पन्नं तत्र ज्ञानग्राहिका यावत्कारणमप्रसिद्धं तत्र खण्डशरीरे [४]हस्तादिरहितशरीरे ज्ञानमुत्पन्नम् पूर्वं संपूर्णशरीरे हस्तादिशरीरे ज्ञानावच्छेदेन ज्ञानमुत्पन्नम्[५] । तद्ग्राहकं यावत्कारणं संपूर्णशरीरमपि भवति । तच्च खण्डशरीरावच्छेदेनानुव्यवसायकाले नास्तीति बाधवारणाय सामग्रीपदम् । तथा च सामग्रीपदेन चरमकारणमुच्यते । [६]तच्चानुव्यवसायरूप एवेति सामग्रीपददाने न बाधः । तद्ग्राहकत्वं च तत्रास्त्येवेति न बाधः । अपि च यदि सामग्रीपदं न दीयते तदा तदप्रामाण्याग्राहकयावत्ज्ञानग्राहक-ग्राह्यत्त्वम् । ग्राह्यत्वं नाम [७]तज्जन्यग्रहविषयत्वम् । तथा चात्मजन्यं घटादिविषयकज्ञानमपि भवत्येव। तथा च घटविषयकज्ञानविषयत्वं घटे वर्तते । न च प्रामाण्ये तद्बोधः । तद्वारणार्थं सामग्रीपदम् । आत्मा तु ज्ञानं प्रति कारणं यद्यपि भवति तथापि सामग्री न भवति । सामग्री च सैवोच्यते यदनन्तरमविलम्बेन कार्योत्पत्तिरिति । तदपि नात्मनः । अप्रामाण्यग्राहकपदेनैव वारणात् । अप्रामाण्यमप्यात्मना गृह्यते इति तद्वारणम् ।

विधिप्रसिद्धस्तु तद्ज्ञानतद्विषयादावेव । यथा घटोऽयमिति ज्ञाने ज्ञानग्राहकसामग्री घटेन्द्रियसंयोगरूपः (पा) इयं ज्ञानग्राहिका सामग्री भवति । तद्ग्राह्यत्वं घटादीनां वर्तते-इति ज्ञानग्राहकग्राह्यत्वप्रसिद्धि । ननु 'यावत्' इति कस्य विशेषणम् ? ज्ञानस्य ग्रहस्य वा ? सामग्र्या वा तज्जन्यग्रहस्य वा ? यदुच्यन्ते यावन्ति तादृशज्ञानानि तेषां या ग्राहिका सामग्री तद्ग्राह्यत्वम्, तदा **नैयायिकेन** सिद्धसाधनं कर्तव्यम् । तथाहि यावन्ति प्रामाण्याश्रयीभूतज्ञानानि तद्विषयको यो ग्रहः, सामान्यलक्षणाप्रत्यासत्तिजन्यज्ञानत्वं सामान्यलक्षणाप्रत्यासत्त्या ज्ञानमात्रविषयकं ज्ञानं जातम् ।

---

१. A तेन च. २. B सामग्र्यमिच्छा. ३. B omits ज्ञात. ४. B omits हस्तादिरहितशरीरे. ५. Pl. add पूर्वं संपूर्णशरीरे=हस्तादिशरीरे ज्ञानावच्छेदेन ज्ञानमुत्पन्नम् । ६. B तथा चानु०. ७. B तदजन्य०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तज्जनिका या सामग्रीविशेषणत्वज्ञानादिसमवहिता[१] सामग्री तज्जन्यो यः सामान्यलक्षणा-प्रत्यासतिजन्यो ग्रहस्तद्विषयत्वं प्रामाण्यमात्रस्यास्तीति सिद्धसाधनम् ।

नापि द्वितीयः । तथा च तादृशप्रामाण्याश्रयज्ञानविषयकयावज्ज्ञानजनकसामग्रीग्राह्यत्वमिति[२] पर्यवसितोऽर्थः ।

तथा चाप्रसिद्धिः । तादृशयावद्ग्रहजनकसामग्र्यप्रसिद्धेः । न च सामग्र्यैव यावत्विशेषणमिति वाच्यम् । तादृशप्रामाण्याश्रयज्ञानविषयकग्रहजनकयावत्सामग्रीजन्यग्रहाप्रसिद्धेः ।

अयमर्थः-एतादृशं ज्ञानं नास्त्येव । यज्ज्ञानं यावत्सामग्र्या जन्यते घटादिसामग्र्या जननात् । न तज्जन्येति पक्षः [३]सामग्रीजन्यग्रहस्य विशेषणं यावत्त्वमिति वाच्यम् । घटत्ववति घटत्वप्रकारकत्वं पटत्ववति पटत्वप्रकारकत्वादि । तत्र प्रामाण्याश्रयज्ञानविषयकं ग्रहजनकसामग्रीजन्यं यावद् ग्रहविषयत्वस्य कस्मिंश्चिदपि प्रामाण्येऽसत्त्वाद्बधः ।

अयमर्थः-प्रामाण्यविषयकं यावज्ज्ञानं तज्जनिका काप्येका सामग्री न भवतीति बाधः । तस्मात् यावत्पदं कस्य विशषणमिति चेत्, उच्यते । यावत्वं व्यापकत्वम् । तथा च ज्ञानप्रामाण्यं तदप्रामाण्यग्राहकज्ञानग्राहकसामग्रीजन्यग्रहत्वव्यापक-विषयत्वप्रतियोगिविषयताश्रयि इति साध्यम् ।

अस्यार्थः-तस्य ज्ञानस्य प्रामाण्यग्राहिका ज्ञानग्राहिका या सामग्री तज्जन्यो यो ग्रहो ज्ञानं तत्त्वस्य ज्ञानत्वस्य व्यापकं यद्विषयत्वं तत्प्रतियोगिनी या विषयता तदाश्रयत्वं प्रामाण्ये तिष्ठति । यथा घटोऽयमिति ज्ञाननिष्ठं यत्प्रामाण्यं तत्राप्रामाण्याग्राहिका ज्ञानग्राहिका या सामग्री ज्ञानत्वज्ञानादिका, तज्जन्यो यो ग्रहः घटमहं जानामीतिरूपः [४]सः त्वस्य व्यापिका या विषयिता सम्बन्धविशेषा[तद्]फले एकोन्नेयः । तत्प्रतियोगिनी विषयिता प्रामाण्ये तिष्ठति, तदाश्रयत्वं प्रामाण्येऽस्तीति भावः । तथा च यावत्पदस्यार्थः तादृशसामग्रीजन्यग्रहत्वव्यापिकेत्यस्यार्थः।

ननु ग्राह्यत्वं किं नाम ? यदि ज्ञानमात्रजनकत्वं तदा घटज्ञानजनकत्वं कालादावप्यस्ति । तस्यापि प्रामाण्यग्राहकत्वं स्यात् । तथा च प्रामाण्याश्रयीभूतज्ञानविषयकज्ञानजनकत्वं ग्राहकत्वं कालादाविदं नास्ति यद्यपि जन्यमात्रं प्रति कालस्य कारणत्वमस्ति । तदा घटेन्द्रियसन्निकर्ष इति प्रसङ्गो देयः । यथा घटोऽयमिति ज्ञाननिष्ठं यत्प्रामाण्यं तदाश्रयीभूतं यज्जानं घटोऽयमितिरूपं तद्ग्राहकत्वं तद्विषयकज्ञानजनकत्वम् । [५]तद्विषयकं ज्ञानं भवति तदनुव्यवसायः । तज्जनिका या सामग्री सैव तद्ग्राहकपदेनोच्यते । तथा च प्रामाण्याश्रयीभूतज्ञानविषयकज्ञानजनिका या सामग्री सा ज्ञानग्राहकपदेनोच्चयते । [६]तद्ग्राह्यत्वं तु तज्जन्यग्राहविषयत्वम् । ज्ञानग्राहिका च सामग्री

---

१. B समवेता. २. B त्वमिति प्रामाण्यं पर्यवसन्नमतो यावदर्थः । ३. A सामग्री ग्रहजन्यस्य. ४. B तत्त्वस्य. ५. B omits the reading between तद्विषयकं.....ज्ञानजनिका. ६. B तदग्रा..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आत्ममनःसंयोगादिरूपा जाता । तद्ग्राह्यत्वं-तज्जन्यो यो ग्रहोऽनुव्यवसायादिरूपः तद्विषयत्वं यथा ज्ञाने तिष्ठति तथा प्रामाण्येऽपीति ।

मिश्रमते यथाऽनुव्यवसायस्य विषयो भवति व्यवसायः [१]तथा प्रामाण्यमप्यनुव्यवसाय विषयः अनुव्यवसायेन जन्यते । **मुरारिमते** चैतत् । **गुरुमते** तु ज्ञानग्राहिका सामग्री आत्ममनःसंयोगादिरूपा । तद्विषयकं ज्ञानं तदेव तज्जनिका या सामग्री आत्ममनः संयोगादिरूपा तज्जन्यं ज्ञानं तदेव व्यवसायरूपं तद्विषयकत्वं [२]यथा ज्ञाने तिष्ठति तथा प्रामाण्येऽप्यस्तीति **गुरुमतम्** । **भाट्टमते** [३]तु ज्ञानग्राहिका सामग्री ज्ञाततालिङ्गकानुमितिर्यल्लिङ्गज्ञानं पूर्वकृतहेतुः, तज्जन्या याऽनुमितिः=ज्ञाततालिङ्गकानुमितिः, तद्विषयत्वं=तत्सम्बन्धित्वम् ।

अयमत्र प्रघट्टः-ज्ञानग्राहकत्वं नाम ज्ञानविषयकं यज्ज्ञानमनुव्यवसायादिरूपं तस्यानुव्यवसायादेर्यज्जनकं-आत्ममनः संयोगरूपा-मनोघटिता, **न्यायमते** चानुमानघटिता, तया मनोघटितया प्रामाण्यं गृह्यते । कोऽर्थः ? तज्जन्यज्ञानेनानुव्यवसायादिरूपेण । **न्यायमते** चैतदनुमानजन्यं ज्ञानमनुमितिरूपम् । तया च प्रामाण्यं विषयीक्रियते । तथा च प्रामाण्यानुव्यवसाययोर्विषयविषयिभावः सम्बन्धः । प्रामाण्यं भवति विषयः, अनुव्यवसायो भवति विषयी । यथाऽनुव्यवसायस्य घटोऽयमिति ज्ञानं विषयः, यथा ज्ञानस्य विषयः[४] ज्ञानम् । यतः मानसं प्रत्यक्षमनुव्यवसायरूपं तत्तु आत्ममनःसंयोगजन्यं तथा प्रामाण्यस्यानुव्यवसाय एव ज्ञानम् । तेनानुव्यवसायेन प्रामाण्यं विषयीक्रियते ।

नन्वनुव्यवसायादिना प्रामाण्यं गृह्यते चानुव्यवसायादिजनकसामग्र्या मनोघटितादिरूपतया । यथा चक्षुरिन्द्रियेण घटो गृह्यते, चक्षुरिन्द्रियजन्यज्ञानेन विषयीक्रियते, तद्वदनुव्यवसायादेः प्रामाण्यं विषयः । स्वतस्त्वं च प्रामाण्यस्य यावत् ज्ञानग्राहकसामग्रीग्राह्यत्वं परिभाषिकम् । यथा घटमहं जानामीतिज्ञाने घटो विषयो भवति घटत्वं च विषयः, तद्विषयकं च व्यवसायरूपं ज्ञानं विषयः, घटघटत्वयोः[५] सम्बन्धोऽपि[६] विषयः । अथ च ज्ञाननिष्ठं यज्ज्ञानत्वं तदपि विषयः, तद्व्यवसायनिष्ठं प्रामाण्यमपि घटत्ववति घटत्वप्रकारकत्वमपि विषयः । यथाऽनुव्यवसाये घटो भासते, घटत्वं भासते, घटघटत्वयोः सम्बन्धो भासते तथा घटे घटत्वमपि भासते । इदमेव **मीमांसकमते** स्वतस्त्वम् ।

नैयायिकेनोच्यते-प्रामाण्यमुक्तरूपं न भासते । तस्यानुव्यवसायात् पूर्वमभावत्वादस्थितत्वान्न भासतेऽनुव्यवसाये । तथा पूर्वमनुपस्थितस्य प्रकारकत्वं न सम्भवतीति परतस्त्वम् ।

अत्र **मीमांसका**नामयमा[७]शयः-घटोऽयमिति ज्ञाने प्रामाण्यं चेदं घटत्वावच्छिन्नघटनिष्ठ-

१. B omits the reading between तथा.....नुव्यवसाय. २. B यथाऽनुमाने. ३. B omits तु. ४. B omits विषयः. ५. B -त्वयोरपि. ६. B omits ऽपि. ७. A -यमभिप्रायः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विशेष्यतानिरूपितविषयत्वमिदमेकं दलम्। (१) द्वितीयं च घटत्वनिष्ठप्रकार-कतानिरूपितप्रकारित्वम् (२)। तृतीयं दलं यथा घटत्वनिरुपितसमवायिनिष्ठसंसर्गाव्यविषयता निरूपितविषयत्वम्। (३) इदं त्र्यात्मकं [१]स्वरूपं भवति प्रामाण्यम्। इदं च योग्यव्यक्तिवृत्तित्वाद् योग्यमेव प्रामाण्यम्। नातीन्द्रियम्। तथा च यथाऽनुव्यवसायेन व्यवसायरूपज्ञाननिष्ठं ज्ञानत्वं विषयीक्रियते, तस्य योग्यव्यक्तिर्ज्ञानरूपा, तद्वृत्तित्वेन तस्यापि योग्यत्वात्। तथा च ज्ञानत्वमपि योग्यम्। तदप्यनुव्यवसायेन विषयीक्रियते। तथा च पूर्वोक्तं त्र्यात्मकंप्रामाण्यमपि व्यवसायनिष्ठमनुव्यवसायादिना विषयीक्रियते। तस्यापि योग्यत्वात्। यदि चानुव्यवसायादिना प्रामाण्यं विषयीक्रियते तदा ज्ञानत्वमपि न विषयीक्रियताम्। तुल्यन्यायात्। ततः स्वतस्त्वमेव। न च तस्य पूर्वानुपस्थितत्वात् कथं प्रामाण्यविषयः तस्य ज्ञानधर्मत्वेनानुव्यवसायात् पूर्वज्ञानस्य ज्ञानं ज्ञातमेव नास्ति इति कथं तद्धर्मोपस्थितिरिति वाच्यम्। क्वचित् पूर्वानुपस्थितिम(र)पि विषयीभवत्येव, प्रतियोगित्वाभावत्ववत्। यथा घटो नास्तीत्यत्र घटाभावप्रत्यक्षे पूर्वमनुपस्थितं घटाभावत्वं [२]घटनिष्ठप्रतियोगित्वं च भासते। तथा प्रकृते प्रामाण्यं पूर्वोक्तत्रयात्मकं ज्ञानधर्मानुपस्थितोऽ(म)पि विषयीभवतीति दिक्। अयमत्र तात्पर्यार्थः-व्यवसायनिष्ठं यत्र त्रयात्मकं प्रामाण्यं तच्च **नैयायिकैरपि** व्यवसायरूपज्ञानादतिरिक्तपदार्थत्वेन नाङ्गीक्रियते। **न्यायमतेऽपि** प्रकारित्वं विशेष्यीयत्वं संसर्गित्वं स्वरूपसम्बन्धविशेष एव। तथा च व्यवसायात्मकं ज्ञानस्वरूपमेव प्रामाण्यं जातम्। तच्चानुव्यवसायादिना विषयीक्रियते। अनुव्यवसायेन व्यवसायरूपज्ञानं विषयीक्रियते एव। ज्ञानग्रहे च तत्स्वरूपं विषयो भवत्येवेति प्रामाण्यग्रहार्थमतिरिक्तग्राहकल्पना ज्यायसीति **मीमांसकाः**।

प्रकृतं प्रस्तूयते-अत्र **विप्रतिपत्तिरिति**-पूर्वोक्तार्थप्रामाण्यमिति पक्षः। **मीमांसकमात्र** सम्मता या प्रामाण्यग्राहिका सामग्री तद्ग्राह्यत्वम्। अत्र 'मात्र'पदेन **मीमांसकाभिमता** सत्त्वापि सामग्री ग्राह्या। **मीमांसकत्रयातिरिक्तेन** या प्रामाण्यग्राहकत्वेन सामग्री न स्वीक्रियते, अथ च **मीमांसकैरेव** या सामग्री स्वीक्रियते तद्ग्राह्यत्वं **मीमांसकानां** मते साध्यम्।

अत्रेति -यदि मात्रपदं न दीयते साध्ये तदा **नैयायिकेन मीमांसकं** प्रति सिद्धसाधनं कर्तव्यम्। तदेवाह **नैयायिकाभिमतेति नैयायिकाभिमता** सामग्री अनुमितिरूपा तयाऽपि प्रामाण्यं विषयीक्रियते। इयं सामग्री प्रामाण्यग्राहकत्वेन **मीमांसकाभिमता** भवति। कदाचित् प्रामाण्यस्यानुमानेनापि ग्रहात्। तथा चानभ्यासदशायां प्रामाण्यमनुमानेनापि ग्रहात्। तथा चानभ्यासदशायां प्रामाण्यमनुमानेन विषयीक्रियते। अभ्यासदशायां चानुव्यवसायादिनाऽपि विषयीक्रियते। तथा च प्रामाण्येऽऽनुमानिकज्ञानविषयत्वमादाय [३]सिद्धसाधनं कृतम्। तद्वारणार्थं मात्रपदं दत्तम्[४]। एतदस्तु। आनुमानिकज्ञानादिसामग्री **मीमांसक**मात्राभिमता न भवति।

१. B omits स्वरूपं. २. B घटत्वप्रति०. ३. B सिद्धिसा० and omits कृतम्. ४. B कृतम्।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नैयायिकैरपि तस्यां प्रामाण्यग्राहकत्वेनाङ्गीकृतत्वादित्यर्थः । मात्रपददत्तेऽपि बाधः ।

शङ्कते-[१] **न चेति** यस्मिन्नप्रामाण्यविशेषे **मीमांसक**मात्राभिमता[२] सामग्री न मिलिता=ऽनुव्यवसायादिजनका सामग्री न मिलिता, तत्र साध्यसत्त्वेन बाध इत्याशङ्कार्थः ।

उत्तरयति-**जातेति** तथा च जाता=उत्पन्ना या **मीमांसका**भिमता सामग्री, तया ज्ञानप्रामाण्यं गृह्यत इति पक्षः । तथोत्पन्नसामग्रीकप्रामाण्यस्य न पक्षत्वमिति न बाध इति भावः ।

एषैवेति[३] **मीमांसकमात्राभिमता** या प्रामाण्यग्राहिका सामग्री तद्ग्राह्यत्वमिति विधिकोटिर्भावरूपा प्राप्यत इत्यर्थः । **ज्ञानेति**-ज्ञानग्राहिका याऽनुव्यवसायजनकीभूता सामग्री मनोघटिता मनःसंयोगादिरूपा तदतिरिक्ताऽनुमानादिरूपा सामग्री, तदपेक्षत्वमेव स्वतस्त्वम् । **अस्यापीति** [४]ज्ञानग्राहिकाऽतिरिक्तेत्यादिका या **मीमांसक**मात्राभिमता[५] प्रामाण्यग्राहिकासामग्री [तद्]ग्राह्यत्वे तात्पर्यमित्यर्थः । **तदर्थ इति** ज्ञानग्राहकातिरिक्तानपेक्षत्वस्यार्थो न ज्ञानग्राहकग्राह्यत्वम्। एतावत्युक्ते हि **नैयायिकेनापि** सिद्धसाधनं कर्तव्यम् । तथा च पूर्वम[स्म]दुक्ततात्पर्यं एवार्थः ।

यावदिति सिद्धसाधनतावारणार्थं यावदिति विशेषणीयम् । तथाऽत्र[६] यावद्ज्ञानग्राहकग्राह्यत्वं फलितम् । इदं दूषयति-**ज्ञानमस्तीत्यादिकेति** तथा च ज्ञानग्राहिका सामग्री ज्ञानपदमपि जातम् । तत्तु पदं ज्ञानग्राहकं भवत्येव । तेन प्रामाण्यं न गृह्यत इति बाधः । [७]यावत् सामग्री मध्ये एतस्यापि संग्रहो वृत्तिरिति भावः । पुनर्दूषणान्तरमाह **अप्रामाण्येति** यावत् ज्ञानग्राहकसामग्रीमध्येऽप्रामाण्य-ग्राहिकाऽपि सामग्री पतिता-इदं [८]ज्ञानमप्रमेतिरूपा, तया प्रामाण्यं न गृह्यत इति बाधः । [९]तथा चेदमेव लक्षणं कर्तव्यम् । **मीमांसकमात्राभिमतप्रामाण्यग्राहिका** या सामग्री तद्ग्राह्यत्वमेव साध्यम्। अप्रामाण्यग्राहिका तु सामग्री **मीमांसक**मात्राभिमता न भवति । [१०]अप्रामाण्यग्राहिकायाः प्रामाण्यग्राहिकत्वं **मीमांसक नैयायिका**नामङ्गीकारादिति भावः ।

परत इति न्यायमते परतस्त्वमुपपादयतीत्यर्थः । **जलादीति** एतदारभ्य **वस्तुगतिरित्यन्तो मूलग्रन्थः न्यायमत**सिद्धान्तार्थः । **कस्मिंश्चिदिति** जलविशेषे जलज्ञानं जातम् । ततः प्रामाण्यग्रहः प्रत्यक्षानुमानादिना [१०९]जातस्तदनन्तरम् । **तद्दृष्टान्तेनेति** तद्दृष्टान्तविधया । **तज्जातीयत्वेनेतति** लिङ्गेन हेतुना तज्जातीयत्वेन प्रामाण्यमवधार्यतेऽनुमीयत इत्यर्थः । यथा-'इदं जलज्ञानं प्रमा, समर्थप्रवृत्तिजनकत्वात्, पूर्ववर्तिजलज्ञानवत् ।, साजात्यं तु समर्थ प्रवृत्तिजनकत्वेन रूपेण द्वयोरप्युचितम् । तथा चेदमेवमनुमानेन प्रामाण्यज्ञानमात्रस्य परतस्त्वम् ।

---

१. It is नहीति in त.भा.प्र. २. B मीमांसकाभिमता. ३. It is एषेति in त.भा.प्र. ४. It is तस्यापि in त.भा.प्र. ५. B मीमांसकाभि॰ ६. B तथा च. ७. B Inserts here - तथा चेदं लक्षणं. Pl. see ९. ८. B ज्ञानं प्रमे॰. ९. B Pl. See footnote no. ७. १०. A प्रामाण्यग्रा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कश्चिदितीति तथा च प्रामाण्यज्ञानमेव प्रकृत्यङ्गम् । न तु प्रामाण्यनिश्चय एव । तथा सति प्रामाण्यसन्देहे जलार्थिनः पिपासोः प्रवृत्ति र्न स्यात् । तथा च **न्यायमते** सन्देहनिश्चयसाधारण्यम् प्रामाण्य ज्ञान प्रवृत्त्यङ्गमित्यर्थः ।

उपलक्षणमिति - यस्य पुरुषस्य प्रामाण्यनिश्चयो [१]ऽपि नास्ति सन्देहोऽपि नास्ति, तस्यापि पुरुषस्यार्थज्ञानमात्रादेव [२]जलादिज्ञानमात्रादेव प्रवृत्तर्दृश्यते । तथा च सन्देहनिश्चयसाधारण्यं प्रामाण्यज्ञानप्रवृत्तिं प्रति कारणं न भवति । प्रवृत्तिस्तु जलज्ञानमात्रादेव ।

शङ्कते-[३] **प्रामाण्यनिश्चयत्वाङ्गत्वेन** वेति निष्कम्पा प्रवृत्तिर्निश्चयजन्य प्रवृत्तौ प्रामाण्यनिश्चय एव हेतुरित्याशङ्कार्थः ।

अप्रामाण्येति अप्रामाण्यशङ्काशून्यो योऽर्थनिश्चयः तस्मादेव प्रवृत्तिर्भविष्यतीति किमर्थं तत्र प्रामाण्यनिश्चयस्य हेतुत्वम् । यत्र ज्ञानेऽप्रामाण्ये शङ्काः नास्ति तत्रार्थमात्रादेव प्रवृत्तिः । अर्थनिश्चयाच्च निष्कम्पा प्रवृत्तिरित्यर्थः ।

न्यायमतहार्दं स्पष्टयति-**एवं चेति** - इति **नैयायिकाशयः** । **इतीति** किमनुमितौ पक्षज्ञानं कारणम् । तदनुरोधेन पक्षताज्ञानानुरोधेन । तथा च प्रथमतः प्रामाण्यज्ञानमवश्यमपेक्ष्यते । [४]**सन्देहे** चेति सन्देहं प्रति धर्मिज्ञानं कारणम् । यथा पुरोवर्तिनि उच्चैस्त्वादिनि धर्मिणि पुरुषत्वस्थाणुत्वसन्देहो जायते। तदनुरोधेन सन्देहानुरोधेन **मीमांसका**भिमताऽपि सामग्री वृत्ता । तस्याः प्रामाण्यग्रहणेन स्वतस्त्वं वक्तुं युक्तम् । अयमत्र भावः-यथेदं ज्ञानं प्रमेत्याद्यनुमितिर्जायते तत्र पक्षो भवति ज्ञानम् । तज्ज्ञानं च प्रामाण्यानुमित्तेः पूर्वमुभयमतेऽप्यङ्गीकर्तव्यमेव । पक्षज्ञानत्वात् । तथा च ज्ञानस्य यज्ज्ञानं तदनुव्यवसाय एव, तज्जनिका च सामग्री मनोघटिता तिष्ठत्येव । इयं च सामग्री उभयसम्मता भवति। तथा च प्रामाण्यं न गृह्यते अग्रेऽनुमितिर्भविष्यत्वात् । अन्यथा प्रामाण्यविषयिणी अनुमितिरेव न स्यात्। प्रामाण्यसिद्धेः सत्त्वादनुमितिं प्रति सिद्धेः प्रतिबन्धकत्वस्वीकारात् । तथा च तत्र प्रामाण्यानुमितिरेव विषयो, नानुव्यवसायस्यानुमित्यनुत्पादकरूपबाधकादेवेत्याशयः । तथा च परतस्त्वं प्रामाण्यस्य सिद्धमित्यर्थः ।

अयं भावार्थः-यत्र प्रामाण्यविषयिण्यनुमितिर्जायते इदं ज्ञानं प्रमेतिरूपा तत्र पक्षज्ञानं-ज्ञानमेव-ज्ञानमपेक्षते । पक्षज्ञानं चोभयमतेऽनुमितिं प्रति कारणं भवति । तथा च [५]प्रामाण्यविषयकानुमितिस्थले **मीमांसका**भिमता सामग्री पक्षज्ञानरूपा तिष्ठत्येव च । पुनः संशये धर्मे ज्ञानानुरोधेनेदं ज्ञानं प्रमा न वेति सन्देहः । तं प्रति धर्मि यत्र ज्ञाने प्रामाण्यविषयकः सन्देहः, तद्धर्मिज्ञानम् । तथा

१. B omits the reading between ऽपि.....सन्देहोऽपि. २. B omits जलादिज्ञानमात्रादेव.
३. It is प्रामाण्यनिश्चयत्वेन प्रामाण्यज्ञानत्वेन वेति in त.भा.प्र. ४. It is संशये in त.भा.प्र. ५. A प्रामाण्यानुमिति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

च ज्ञानस्य यज्ज्ञानं तस्यैव धर्मित्वम्। ततस्तस्य ज्ञानमवश्यमपेक्षणीयमेव। इयमपि **मीमांसक**ाभिमता सामग्री वर्तते। तथा च प्रामाण्यं न गृह्यते। तथा चानुमित्यैव प्रामाण्यं ग्राह्यमिति न स्वतस्त्वमिति भावः।

इदानीं **मीमांसक**मताशयं दर्शयति **प्रामाण्यज्ञानत्वेनेति** प्रामाण्यज्ञानं जनकम्, प्रवृत्तिश्च जन्या-इति प्रवृत्तिं प्रति कार्यकारणभावानुरोधेन प्रथमतः प्रामाण्यज्ञानमपेक्ष्यते। अन्यथा प्रवृत्तिरेव न स्यात्। कारणव्यतिरेकेण कार्यानुपपत्तेः। प्रवृत्तिश्च जलज्ञानानन्तरमव्यवहितोत्तरक्षणे जलार्थिनो दृश्यते। ततो जलज्ञानसमये प्रामाण्यज्ञानमपि जातमिति स्वीकर्तव्यमेव।

तथा च **गुरुमते** स्वेनैव प्रामाण्यं गृह्यते। **मिश्रमते** तु प्रथमतो जलज्ञानं जातम्। ततो द्वितीयक्षणेऽनुव्यवसायः। तेनैव प्रामाण्यं द्वितीयक्षणे विषयीक्रियते। तथा चाव्यवहितोत्तरक्षणे प्रामाण्यमनुव्यवसायादिना विषयीक्रियते। [1]अव्यवहितोत्तरत्वं च स्वाधिकरणक्षणध्वंसाधिकरण इति ध्वंसानाधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वम्। यथा स्वशब्देन जलादिज्ञानं तस्य यः क्षणोऽधिकरणमुत्पत्तिक्षणस्तस्य यो ध्वंसः, [2]तस्य यदधिकरण क्षणो द्वितीयक्षणस्तस्य यो ध्वंसस्तदनधिकरणत्वे सति द्वितीयस्य शब्देनापि जलज्ञानम्। तस्य यदुत्पत्तिक्षणस्तस्य यो ध्वंसः तदधिकरणत्वमिदं जलज्ञानोत्पत्तिक्षणापेक्षया द्वितीयक्षणमात्रे तिष्ठति [3]नान्यत्रेति जलज्ञानाव्यवहितोत्तरत्वं सत्यन्तकृत्यम्। यथा तृतीयक्षणेऽव्यवहितोत्तरत्ववारणाय द्वितीयक्षणेन व्यवधानात्। अन्यथा विशेष्यभागमात्रोपादाने स्वाधिकरणक्षणध्वंसाधिकरणत्वम्, यथा द्वितीये क्षणे तिष्ठति तदा तृतीयक्षणादावप्यस्तीति। तद्वारणार्थं सत्यन्तं विशेषणम्। तथा च विशेषणपदं स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसिनो ऽधिकरणत्वं तृतीयक्षणादौ नास्ति। तृतीयक्षणस्य जलज्ञानोत्पत्तिक्षणध्वंसाधिकरण-द्वितीयक्षणध्वंसाधिकरणत्वात्। द्वितीयक्षणस्तु द्वितीयक्षणध्वंसा-धिकरणो न भवतीति विशेषणदलम्। विशेष्यदलं तु जलज्ञानोत्पत्तिक्षणात् तत्पूर्वक्षणादिवारणार्थम्। तथा च जलज्ञानोत्तरक्षणापेक्षया तत्पूर्वक्षणस्याव्यवहितोतरत्वं नास्ति। तस्य पूर्वक्षणत्वात्। यदि च विशेष्यमात्रोपादानं जलज्ञानोत्पत्तिपूर्वक्षणेऽतिव्याप्तिः, तत्रापि स्वाधिकरणक्षण-ध्वंसाधिकरणक्षणध्वं-सानधिकरणत्वस्य वर्तमानत्वात्। तदर्थं विशेष्यदलम्। प्रथमक्षणस्तु विशेष्यदलेनैव वारितस्तत्र यद्यपि विशेषणदलं सत्यन्तं तिष्ठति तथापि स्वाधिकरणक्षणध्वंसाधिकरणत्वस्य वर्तमानरूपं विशेष्यदलं नास्तीति।

तथा च जलज्ञानाव्यवहितोतरक्षणे योज्यतेऽनुव्यवसायः यथा जलमहं जानामीत्येवरूपः, तेन प्रामाण्यं **मिश्रमते** विषयीक्रियते। तदनन्तरं तृतीये क्षणे प्रवृतिर्जायते। प्रामाण्यज्ञानरूपकारणस्य

---

१. Pl. add तथा च चाव्यवहितोत्तरक्षणे प्रामाण्यमनुव्यवसायादिना विषयीक्रियते। २. B omits the reading between तस्य.....यो ध्वंस. ३. B -यत्रेत्युत्पत्ति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सत्त्वात् । प्रामाण्यग्रहणानुव्यवसाययोरेकक्षणोत्पत्तिस्तदनन्तरमनुव्यवसायोत्पत्तिक्षणापेक्षया द्वितीयक्षणे प्रवृत्तिर्जायते । सः तु क्षणोऽनुव्यवसायस्य स्थितिक्षणः । तथा च [1]प्रवृत्तिपूर्वकालेऽपि प्रामाण्यविषयानुव्यवसायरूपकारणस्य सत्त्वाद् यदि **मीमांसका**भिमतसामग्र्योक्तरूपया प्रामाण्यं न गृह्यते तदा [2]प्रामाण्यज्ञानरूपकारणाभावेन प्रवृत्तिरेव न स्यात् ।

तस्याः सामग्र्याः**नैयायिका**भिमतत्वं दूषयति- **न च तदिति** तदनुव्यवसायरूपं ज्ञानविषयकं ज्ञानं [3]प्रामाण्यग्राहकत्वेन **नैयायिका**भिमत-सामग्रीरूपं न सम्भवति । तथा च प्रवृत्तें पूर्वं **न्यायमते** प्रामाण्यज्ञानं न वृत्तमेव । तथा च प्रामाण्यज्ञानत्वेन प्रवृत्तित्वेनं च कार्यकारणभावस्वीकारः । तदा **न्यायमते** प्रामाण्यज्ञानव्यतिरेकेण प्रवृत्ति र्न स्यात् । तन्मते प्रवृत्तेः प्रामाण्यग्राहकसामग्र्यभावात्, तद्ग्रह एव न जात इति । तथा च प्रवृत्त्यन्यथाऽनुपपत्तेः प्रवृत्तेः पूर्वं प्रामाण्यज्ञानमवश्यमपेक्ष्यमेव। तथा च प्रामाण्यं स्वतः एव ग्राह्यमिति सिद्धम् ।

न्यायमतं दूषयति-**सर्वत्रेति** तथा च **नैयायिकैः** यदुच्यतेऽनुमानेन प्रामाण्यं गृह्यते, तथाहि कुत्रचित् प्रत्यक्षेण जलादिज्ञानं जातं तत्र ज्ञाने प्रामाण्यं गृहीतम् । तथा च तत्रैव जलादिज्ञानत्वावच्छेदेन प्रामाण्यं गृहीतम् । धूमवत्त्वावच्छेदेन व्याप्तिग्रहवत्[4] । ततः कालान्तरे जलज्ञानानन्तरमनुमानं [5]जायते। यथा-इदं जलज्ञानं प्रमा, जलज्ञानत्वात्, पूर्वजलज्ञानवदिति । तथा चानेनानुमानेन या जन्याऽनुमितिर्यथेदं ज्ञानं प्रमेति अनया प्रामाण्यं विषयीक्रियते । तथा च जलज्ञानत्वेन [6]जलज्ञाने येन पुरुषेण प्रामाण्यं गृहीतं तस्य पुरुषस्य कालान्तरे तज्जातीयेन लिङ्गेन कदाचिदनुमितिर्भवति । यदा च व्याप्तिज्ञानादिरूपा सर्वा सामग्री मिलति तदाऽनुमितिर्भवति । तज्जातीयत्वं तु जलज्ञानत्वेन रूपेण, जलज्ञानत्वं तु प्रत्यक्षं रूपम् । यज्जलज्ञानं जातं तद्वृत्ति यज्जलज्ञानत्वं तत्रापि जलज्ञानत्वस्य वर्तमानत्वात् । तथा च जलज्ञानत्वेनानुमानस्यापि साजात्यमिति न्यायप्रक्रिया ।

इदं सर्वत्र न सम्भवतीति दूषयति **सर्वत्रेति** । तथा च [7]व्याप्तिज्ञानमुक्तरूपं न वृत्तं, लिङ्गज्ञानमपि न वृत्तम् । तत्र प्रामाण्यग्रहो भवन्मते न जात एव । भवदभिमतसामग्र्यभावात् । तथा च भवन्मते प्रवृत्ति र्न स्यात् । अस्मन्मते चानुव्यवसायादि प्रामाण्यग्राहिकाऽस्त्येवेति जायते । तत्र लिङ्गं दूषयित्वा दृष्टान्तं दूषयति-**प्राथमिकेति** यस्य पुरुषस्य प्रथमतः प्रामाण्यज्ञानत्वेन जलादिज्ञानमेव न वृत्तं तत्र दृष्टान्तासम्भव एव ।

अथ हेत्वन्तरमुत्थाप्य दूषयति-**नापीति** इदं जलज्ञानं प्रमा, समर्थप्रवृत्ति जनकत्वात् । अनेनापि हेतुना प्रामाण्यं साधयितुं न शक्यते । [8]हेतुज्ञानस्य प्रवृत्त्युत्तरकालत्वात् ।

---

१. A प्रवृत्तिकाले प्रवृत्तिपूर्वकाले. २. B प्रामाण्यरूप॰. ३. B ग्राहिक. ४. B -प्तिग्रहात्. ५. B -मानं यथा जायते. ६. B जलज्ञानं. ७. B -प्तिज्ञानत्वस्य वर्तमानत्वादुक्तरूपं. ८. B यथा हेतु॰.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समर्थप्रवृत्तिजनकत्वरूपो यो हेतुः स तु प्रवृत्त्यनन्तरमेव जा(ज्ञा)यते ।

मीमांसकमतमुपसंहरति **न्यायमतं** दूषयित्वा । **तस्मादिति** । यत इति प्रवृत्ति [१]प्रामाण्य-ग्रहाधीना । प्रामाण्यावधारणानन्तरमेव पुरुषः प्रवर्तत इत्यर्थः । अत्र प्रामाण्यावधारणं निश्चयसन्देहसाधारणप्रवर्तकम् । **भवदिति मीमांसको नैयायिकं** प्रति स्वसामग्रीं दृढयति भवदिति । भवता योक्ता[२]ऽनुमितिस्तां प्रति पक्षज्ञानं भवति कारणम् । तदनुरोधेन च पुनः संशयं प्रत्यपि धर्मिज्ञानं भवति कारणं । ज्ञानं धर्मि भवति तस्य ज्ञानं धर्मिज्ञानम् । तदपि संशयानुरोधेनाप्यपेक्ष्यते भवन्मतेऽपि । तदेव ज्ञानं मन्मते प्रामाण्यविषयकम् । तथा चोभयवादिसिद्धं यज्ज्ञानं तेनैव प्रामाण्यं विषयीक्रियते । भवन्मते च गौरवमपि । यथा भवतां पूर्वं पक्षज्ञानम् तदनन्तरं हेतुज्ञानम्, तदनन्तरं व्याप्तिस्मरणम्, तदनन्तरं व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शः, तदनन्तरं प्रामाण्यविषयिण्यनुमितिर्यथा 'इदं जलज्ञानं प्रमा'-इति । ततो भवन्मते गौरवम् । मम मते च पक्षज्ञानेनैव भवदभिमतेन प्रथमत एव प्रामाण्यं विषयीक्रियते इति लाघवमेव ।

प्रकारद्वयेति यथा पक्षज्ञानानुरोधेन ज्ञानस्य ज्ञानमनुव्यवसायरूपं भवताऽपि स्वीकार्यम्, इदमनुमानस्थलेऽयमेकप्रकारः । द्वितीयस्तु सन्देहस्थले धर्मिज्ञानानुरोधेन ज्ञानस्य ज्ञानमपेक्ष्यते । तथा च पक्षज्ञानधर्मिज्ञानं चोभयवादिसद्धमित्यत्र विवादो नास्ति ।-इत्येवंरूपा [३]**मीमांस[का]भिमता** भवता स्वीक्रियते एव । अन्यथाऽनुमितिरेव न स्यात् । अस्माभिस्तु **नैयायिकाभिमता** सामग्री अनुमानरूपा प्रामाण्यग्राहकत्वेनाङ्गीक्रियते । पक्षज्ञानादिधर्ममनुमानादिसामग्रीनाऽपेक्ष्यत एव । तथा च पक्षज्ञानधर्मिज्ञानरूपायां सामग्र्यां भवता सह विवादो नास्ति । परं [४]प्रामाण्यग्रहस्तयेत्यत्र विवाद इत्यवशिष्यते ।

सः विशेष्यग्रहोऽपि[५] यथा बाधितस्तथा दर्शयति-**स तु इति** तथा प्रवृत्त्यन्यथाऽनुपपत्तया प्रामाण्यस्यान्वयव्यतिरेकाभ्यां ज्ञानग्राहकसामग्र्यैव ग्राह्यत्वमिति प्रामाण्यमपि प्रथमत एव गृहीतम् । अन्यथा प्रवृत्तिरेव न स्यात् । तथा[६] च धर्मिज्ञानं पक्षज्ञानं च यदि वृत्तं तदा प्रवृत्त्यनुरोधेन प्रामाण्यमपि पक्षज्ञानधर्मिज्ञानाभ्यां विषयीक्रियते एवेति भावः । इति **मुरारिमिश्रगुस्मते** स्वतस्त्वं संपादितम् ।

इदानीं **भाट्टमते** स्वतस्त्वं व्युत्पादयति **भाट्टानां मते इति** तन्मते ज्ञानं प्रत्यक्षं न भवति । ज्ञानस्यातीन्द्रियत्वात् । तथा तन्मतेऽनुव्यवसायरूपमानसज्ञानाभावादनुमानमेव तत्र प्रमाणम् । तदेव संपादयति-**ज्ञाततानामक इति** तथा च विषयनिष्ठो ज्ञानेनैको ज्ञाततारूपो धर्मो जायते । स तु प्रत्यक्षो भवति । तत्र ज्ञातोऽयं घट इति ज्ञाततायां प्रत्यक्षमेव प्रमाणम् । तदन्यथाऽनुपपत्त्या ज्ञाततान्यथानुपपत्त्या

---

१. B प्रामाण्यप्रामाण्यग्रहा.. २. B उक्ताऽनु. ३. B मीमांसकमता. ४. B -माण्याग्रहस्त. ५. B omits अपि. ६. B तथा चेन्द्रियं (?) यदि धर्मिज्ञानं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञातता ज्ञानमिव प्रामाण्यमपि ग्राह्यति ।

अयमर्थः-यथा प्रथमतो ज्ञाततया कृत्वा परिशेषेण ज्ञानसिद्धिः । यथा ज्ञातता केनचिज्जन्या, उत्पत्तिमत्वादित्यनुमानेन ज्ञाततायाः किञ्चित्कारणं सिद्धम् । तच्च परिशेषानुमानेनात्मनो गुणविशेषो ज्ञानरूपः सिध्यति । परिशेषस्तु ग्रन्थकृता स्वयं दर्शयिष्यते । **स तु** इति ज्ञातता नामको धर्मः प्रत्यक्षज्ञातोऽयं घट इति व्यावहारादित्यर्थः ।

ननु तर्हि ज्ञाततायाः प्रामाण्यं कथं ग्राह्यमित्यत आह-**तदन्यथानुपपत्तिरिति** यथा ज्ञाततान्यथानुपपत्ति र्ज्ञानं ग्राह्यति तथा प्रामाण्यमपि ग्राह्यति । **भाट्टमते** ज्ञानमतीन्द्रियं भवति । तत्र प्रामाण्यं ज्ञाततैव । घटादौ ज्ञाततारूपो धर्मो यः प्रत्यक्षतया दृश्यते सोऽकिञ्चित्कारणको भवति । तथा चान्याकारणकत्वेन ज्ञानमेव तत्कारणं सिध्यतीति [१]ज्ञाततालिङ्गका याऽनुमितिः तत्र प्रामाण्यमपि विषयो भवति ।

तथा चानुमानं घटो घटत्ववति घटत्वप्रकारकज्ञानविषयः, घटत्ववति घटत्वप्रकारकज्ञानजन्यज्ञाततात्राश्रयत्वात्, यन्नैवं तन्नैवं यथा पटः । सामान्यव्याप्तिरप्यस्ति । यः पदार्थो यद्धर्मवति, यद्धर्मप्रकारकज्ञानजन्यज्ञाततात्राश्रय भवति सः तद्धर्मवति तद्धर्मप्रकारकज्ञानविषयो भवतीति[२] । घटस्तु घटत्ववति घटत्वप्रकारकज्ञानजन्यताश्रयो भवति । स [३]घटत्ववति घटत्वप्रकारज्ञानविषयो भवतीत्यनुमितिश्च । अस्यां चानुमितौ प्रामाण्यमपि भातमेव विषयत्वेन रूपेणेति ज्ञाततालिङ्गकानुमित्या प्रामाण्यमपि विषयीक्रियते-इति भाट्टमताभिप्रायः ।

इदं **नैयायिको** दूषयति **प्रामाण्यज्ञानस्येति** । **मीमांसकेन** प्रामाण्यस्य स्वतस्त्वे प्रवर्तकत्वान्यथानुपपत्तिरेव [४]मानं युक्तम् । तथा हि यदि यावत्पर्यन्तं ज्ञानस्य प्रामाण्यं न गृह्यते तावत्पर्यन्तं प्रवृत्तिर्न भवति । तस्योक्तरीत्या प्रवर्तकत्वात् । तथा च प्रवृत्तेः पूर्वं प्रामाण्यज्ञानमावश्यकमिति दूषयति -**न चेति** । **नैयायिकेन** प्रामाण्यं ज्ञानस्य प्रवृत्तिजनकत्वमेव न स्वीक्रियते । तदनुरोधेन त्वया प्रामाण्यस्य स्वतस्त्वं वाच्यम् । मम मते तु प्रवृत्तिरर्थज्ञानादेव भवति । यथेदं जलं मदिष्टसाधनमिति ज्ञानादेवप्रवृत्तेः सम्भवात् ।

नन्वर्थमात्रादेव निष्कपा=निःशङ्काप्रवृत्तिः कुतो भविष्यति ? ततस्तदर्थमवश्यं प्रामाण्यग्रहो निष्कम्पप्रवृत्तेः पूर्वं वाच्यं एवेत्याह-**प्रवृत्तिमात्रस्येति** । प्रवृत्तिमात्रे त्वर्थज्ञानं कारणम् । निष्कम्पप्रवृत्त्या[५] त्वप्रामाण्यशङ्काशून्यो योऽर्थनिश्चयस्तस्मादेव निष्कम्पप्रवृत्ति र्भविष्यति ।

नन्वप्रामाण्यशङ्काविरहः प्रामाण्यग्रहव्यतिरेकेण कथं भविष्यतीत्यत आह-

---

१. B परिज्ञाततालि. २. A omits इति. ३. B Repeats the reading between घटत्ववति.....ज्ञानविषयो. ४. B adds स्वतस्त्वे here. ५. B -प्रसृत्तौ.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अप्रामाण्यशङ्काविरहेति यदा धर्मिज्ञानं नास्ति तदा तच्छङ्काऽपि न भवति । सन्देहं प्रति धर्मिज्ञानस्यापि कारणत्वात् । यथाऽयं स्थाणु र्न वेति सन्देहः तदैव भवति यदा धर्मिज्ञानं च पुरोवर्तिसन्निकृष्टोच्चै-स्त्वविशिष्टधर्मिज्ञानम् । तदवत् प्रकृतेऽपि प्रामाण्यरूपधर्मिज्ञानेऽप्रामाण्यशङ्का न[१] भवतीति ।

अयमर्थः-अप्रामाण्यशङ्कात्वप्रामाण्यविषयः सन्देहः । सन्देहे तु कोटिद्वयं विषयो भवति । अत्र त्वप्रामाण्यरूपा एका कोटिः, अपरा च प्रामाण्यरूपेति कोटिद्वयमस्ति । तथा चाप्रामाण्यशङ्का प्रामाण्यरूपकोटिज्ञानव्यतिरेकेण न सम्भवति । ततोऽप्रामाण्यशङ्काविरहस्य प्रामाण्यज्ञानविलम्बेनेति। तथा च यदा दैववशात् प्रामाण्यरूपा या कोटिः सा नोपस्थिता, तदा त्वप्रामाण्यसन्देहो न भवति । अप्रामाण्यसन्देहो प्रामाण्यरूपकोटेरपि विषयत्वात् । शङ्का तदैव स्यात् यदोभयकोट्युपस्थितेः सन्देहं प्रति कारणत्वात् । तथा [२]चाप्रामाण्यशङ्काशून्यार्थज्ञानादेव निष्कम्पा प्रवृत्तिः प्रामाण्यग्रहव्यतिरेकेणापि सम्भवतीति न प्रवृत्त्यन्यथानुपपत्तया प्रामाण्यस्य स्वतस्त्वमिति **न्यायमार्गेण** दूषणं ज्ञेयम् । एतदेवाह-**इत्याशयेनाहेति** ।

भाट्टमतं दूषयति-**ज्ञाततात्वेनेति** अथ ज्ञाततां दूषयति-**नन्विति** तस्य ज्ञाततारूपधर्मस्य ज्ञानजन्यत्वं कुत्रापि गृहीतं नास्ति । परमनुमीयते । तेनाज्ञातधर्मस्यानुमानं न सम्भवतीत्याशङ्कार्थः ।

ननु ज्ञाततायाः ज्ञानजन्यत्वग्रहो न सम्भवति, ज्ञानस्यातीन्द्रियत्वात् । ततो ज्ञानत्वेन कारणता ज्ञातत्वेन कार्यतेति कार्यकारणभावः प्रत्यक्षेण ग्रहीतुमशक्यः । **तस्येति** तत्र-कार्यकारणभावग्रहे स्यात्। तस्यातीन्द्रियरूपज्ञानस्य प्रत्यक्षं न सम्भवतीत्यसामर्थ्यम् ।

अत्र बूम इति यद्यपि **न्यायमते** ज्ञातता नास्ति तथापि **भाट्टमताभिप्रायं** प्रकटयति । यदुक्तं ज्ञानस्यातीन्द्रियत्वात् ज्ञानत्वेन ज्ञाततात्वेन कार्यकारणभावोऽन्वययव्यतिरेकाभ्यां न सम्भवतीति[३]। अथ च ज्ञानजन्यत्वाप्रसिध्ध्या ज्ञाततायां ज्ञानजन्यत्वानुमानं न सम्भवतीति । तत्र समाधीयते **ज्ञाततामिति**। यदि ज्ञाततया कदाचित्प्रत्यक्षं भवति, तदनन्तरं तत्र [४]कादाचित्कत्वमवधारितम् । तत्र ज्ञानजन्यत्वमनुमीयते । यथा-इयं ज्ञातता कारणजन्या, भाववत्त्वे सति कादाचित्कत्वात् । तथा च कादाचित्कत्वेन हेतुना ज्ञाततायां कारणजन्यत्वानुमानम् । तस्मिन्ननुमिते परिशेषानुमानं कर्तव्यम् । तथाहि, ज्ञातता ज्ञानजन्या, ज्ञानेतराजन्यत्वे सति जन्यत्वात्, यथा ज्ञानध्वंसः ।

परिशेषमाह **न तावदेषेति** ननु ज्ञातता ज्ञानजन्या किमर्थं वाच्या । संस्कारधर्मा धर्मान्यतरजन्या भविष्यतीति । तत्राह प्रथमतः संस्कारजन्यत्वं दूषयति-**संस्काराविषयेति** संस्काराविषयो यो पदार्थः, यस्य पदार्थस्य प्रथमत एव ज्ञानं जातं संस्कारस्त्वग्रे भविष्यति । ज्ञानकाले तस्याभावात् । तदानीं संस्कारासत्त्वेन ज्ञाततायारुत्पत्तिरेव न स्यात् ।

---

१. B न सम्भवति । २. B च प्रामाण्यशङ्का. ३. B omits इति. ४. B -कत्वमेव धारितम् ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु सा धर्माधर्मजन्यैव भविष्यतीत्यत आह-**धर्माधर्मेति** उपेक्षणीया या [1]ज्ञातता, तस्या अनुपपत्तिरेव स्यात् । तथाहि प्रवृत्तिनिवृत्त्यजनकीभूतं यज्ज्ञानं तदुपेक्षात्मकम् । तज्जन्या[2] तद्विषये ज्ञाततोत्पद्यते । तस्य धर्माधर्मजन्यत्वे तूत्पत्तिरेव न स्यात् । तथाहि प्रवृत्तिप्रसङ्गः धर्माधर्मयोः भोगः, तज्जनकान्यतरं प्रतिकारणत्वात् । ज्ञातता तु न वा भोगो न वा भोगजनक(निका) इति ।

ज्ञातता इच्छाजन्याऽपि न भवति । तद्विषये विषयादावपि इच्छाव्यतिरेकेणापि ज्ञाततायाः ज्ञायमानत्वात् । एवं द्वेषप्रयत्नाविषयेऽपि चन्द्रादौ ज्ञाततायाः उत्पत्तेः । **तदनुत्पादेऽपीति** यदा सुखदुःखयोनिरुत्पत्तिर्नजाता तदपि यस्य ज्ञानमात्रं जायते तत्रापि ज्ञाततोत्पत्तेः ।

ननु तर्हि आत्मधर्मजन्यैव ज्ञातता भविष्यतीत्यत आह-**प्रत्यात्मनीति**[3] । आत्मनि प्रतिनियतो यो धर्मः ज्ञानरूपस्तज्जन्यत्वात्=तस्य जन्यत्वात्, तस्याः ननु ज्ञानमात्रेण ज्ञाततायाः जन्यत्वे शाब्दानुमितिर्जन्यत्वमप्यायास्यतीत्यत आह **शाब्दानुमित्योरिति**[4] । तयोः ज्ञाततां प्रत्यजनकत्वादित्यर्थः । ज्ञाततायाः प्रत्यक्षज्ञानजन्यत्वादनुमित्यादिस्थले वह्निरनुमित इत्येव न तु ज्ञात इति प्रामाण्यम् । **अनुमानेनेति** उक्तपरिशेषानुमानेनात्मनि ज्ञानसिद्धिर्जाता । **न्यायमते स्वमते** ।

भाट्टमतेऽर्थापत्याऽपि ज्ञानसिद्धिमाह-[5]**एवं चेति** तन्मतेऽर्थापत्तिः पृथक् प्रमाणं भवति । तेनैव प्रमाणेन **भाट्टमते**ऽऽत्मनि ज्ञानसिद्धिः । अथ **न्यायमतेन** ज्ञाततां दूषयति-ज्ञातोऽयमिति । तथा च **न्यायमते** ज्ञानविषयत्वमेव ज्ञातता पदार्थस्वरूपमेव । अतिरिक्तो वा पदार्थ- **नवीनमते** । यथाऽयं घट इत्यत्र ज्ञानविषयो घटो भवति । तत्र[6] च विषयता वर्तते । विषयतायाः विषयधर्मत्वात् **प्राचीनमते** विषयता विषयस्वरूपमेवेति।

अस्मिन्नपीति । यस्मिन्पक्षे **नैयायिकेन** विषयतैव ज्ञातता स्थापिता तस्मिन्नपि पक्षे ज्ञातोऽयं घट इति प्रतीत्या ज्ञाततासिद्धिर्भवत्येव । **तत्रेति** तथा च ज्ञाताधारत्वमेव **नैयायिकाभिमता** विषयता। यदि **न्यायमते** ज्ञाततातिरिक्तपदार्थो न भवति किन्तु विषयतैव तदा **न्यायमते** विषयतास्वरूपसम्बन्ध-विशेष एव । स तु ज्ञानस्वरूपं विषयस्वरूपं वा । तथा च विषयनिष्ठो धर्मो नागत एव । यतो विषये घटादौ विषयो नास्ति । ज्ञाने च ज्ञानं नास्ति-इति ज्ञाततातिरिक्तैव स्वीकार्या। यदि [7]**नैयायिकेन** ज्ञानजनकत्वमेव ज्ञातता वाच्या, तदा चक्षुरादावपि तद्वृत्तिः स्यात् । अतो न ज्ञाततातिरिक्ता ।

दूषयति **शक्येत्याह-ज्ञानभिन्नत्वमिति** । **नैयायिकः** स्वमतेन ज्ञाततातिरिक्तं दूषयित्वा स्वमते विषयतां स्थापयति । **स्वरूप सम्बन्धविशेष** एवेति तथा च **मीमांसकेन** यदुक्तं-अयं घट इति ज्ञाने घट एव विषयो भवति न पटादिरित्यत्र किं नियामकम् ? मन्मते [**मीमांसकमते**]तु

१. B यज्ज्ञातता. २. B तज्जन्यतद्विषये. ३. It is प्रत्यात्मेति in त. भा. प्र. ४. This प्रतीक is not found in त. भा. प्र. ५. It is एवमिति in त. भा. प्र. ६. B अत्र. ७. B नैयायिके तु ज्ञान..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञाततैव। येन ज्ञानेन यत्र पदार्थो ज्ञाततारूपो धर्मो जन्यते तद्विषयकमेव ज्ञानमिति नियामकम्।

तत्र **नैयायिको** वदति-**अर्थज्ञानयोरिति**। अयं घट इति ज्ञाने घट एव ज्ञानविषयो भवति न पटादिः। अत्र स्वभाव एव [१]नियामकः। यत्र यो भासते स एव तत्र विषयः नान्य इति स्वभावः।

ननु विषयताऽपि स्वरूपसम्बन्धो यदि सोऽनेकः अतीतानागतस्थले यदि विषयस्वरूपमेव विषयता, सा च तत्र न सम्भवति। अतीतानागताभावादित्यर्थः। **ज्ञानस्यैवेति**। यद्यप्यतीतानागतस्थले वस्तु नास्ति तथा च **मणिकारमते** विषयता ज्ञाननिष्ठैव। लाघवात्। तथाहि [२]घटपटस्तम्भा इति समूहालम्बनात्मकमेकं ज्ञानमनेकपदार्थविषयमुत्पद्यते। तत्रैकस्मिन्ज्ञाने विषयतास्वीकर्तव्याऽनेकेषु पदार्थेषु, लाघवात्।-एकस्मिन्ज्ञाने विषयता स्वीकर्तव्येति **मणिकृन्मतम्**। तथाच यद्यप्यतीतानागतस्थले विषयनिष्ठा विषयता न सम्भवति तथा च ज्ञाननिष्ठैव साऽस्तीति भावः।

सम्प्रतीति। यद्यपि कथंचित् ज्ञाताऽपि[३] सिध्यतु तथापि तया प्रामाण्यं दुर्ग्रहं स्वत इत्याह **ज्ञाततेति** यया युक्त्या पूर्वं ज्ञाततालिङ्गकानुमितौ प्रामाण्यं विषयो भवतीत्युक्तं तदेव न सम्भवति। तथाहि यदि घटो [४]घटत्ववति घटत्वप्रकारकज्ञानविषयो, घटत्ववति घटत्वप्रकारकज्ञाजन्यज्ञाताश्रयत्वादित्यनुमाने प्रामाण्यमनुमितौ विषयो भवति। एतद्स्वीकारेऽपि ज्ञाततायां ज्ञानजन्यत्वं प्रकारान्तरेणापि सम्भवतीत्याह-**ज्ञाततेति** ननु प्रमारूपज्ञानजन्येति। तथाहि-अस्या[म]नुमितौ प्रामाण्यं पूर्वदर्शितं न विषयः। यदि प्रोच्यते ज्ञातता [५]प्रमारूपज्ञानजन्या तदा व्यभिचारं दर्शयति-**भ्रमेति**। यदि ज्ञातता प्रमारूपज्ञानजन्या, ज्ञाततात्वादित्यनुमाने प्रामाण्यं विषयो भवति। न चैतत्कर्तुं शक्यते। अत्र यदि ज्ञाताप्रमारूपज्ञानजन्यत्वं साध्यते, तदा भ्रमजन्यज्ञाततायां व्यभिचारः। भ्रमजन्यज्ञाततायां ज्ञाततात्वरूपहेतुरस्ति। परं प्रमारूपज्ञानजन्यत्वं नास्तीति। यदि च ज्ञाततावि‌शेषेण प्रमारूपज्ञानजन्यत्वं साध्यते तदा **नैयायिकेन** सिद्धसाधनं विधेयमित्याह-**इयं ज्ञाततेति**।

ज्ञातता प्रमारूपजन्या [६]प्रमाहितज्ञातत्वादित्यनुमाने प्रामाण्यं विषयीभवति। **सिद्धसाधनमिति** तथा चानुमानेन प्रामाण्यं गृह्यते। तदा (द्) **नैयायिकेनापि** स्वीक्रियते। इति सिद्धसाधनमित्यर्थः। दूषयति **मीमांसकः**-[७]**ज्ञाततात्वादिति** तथा च यथा ज्ञाततारूपो विषयनिष्ठो धर्मो वर्तते तथा विषयनिष्ठः एकः प्रमितोऽप्यखण्डः एकपदार्थघटितः स्वीक्रियते। तेन [८]प्रमिततधर्मेणानुमानं कर्तव्यम्। यथा-ज्ञातता प्रमारूपज्ञानजन्या, [९]प्रमिततात्वादित्यत्रानेनाखण्डधर्मे प्रमारूपज्ञानजन्यत्वं सेत्स्यति।

तथा च न सिद्धसाधनम्। **नैयायिकानां** मते प्रवृत्तेः पूर्वं हेतुज्ञानाभावेन तादृशानुमानं न सम्भवतीति न सिद्धसाधनम्। तथा चैतदनुमितौ प्रामाण्यमपि विषयो भवतीति स्वतस्त्वमित्युक्ते

---

१. B नियामकम्. २. B घटाः पटाः स्तम्भा इति. ३. B omits अपि. ४. B omits घटत्ववति. ५. B ज्ञाततारूपज्ञान०. ६. B omits 'प्रमाहित'. ७. It is ज्ञाततावद् in त.भा.प्र. ८. B प्रमितकता. ९. B प्रमितत्वादि०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नैयायिको दूषयति-**न चैवमिति** । प्रतिबन्धिमुद्रया प्रामाण्यस्य स्वतस्त्वं दूषयति-**अप्रमितेति** । यदि च प्रमिततारूपधर्मेण ज्ञाततानिष्ठेन प्रामाण्यं तदनुमाने विषयीक्रियते तदा प्रमिततारूपधर्मेण यज्ज्ञाततायामप्रमारूपज्ञान जन्यत्वानुमानं तत्र प्रामाण्यमपि विषयो भविष्यति । तथा च प्रामाण्यमपि स्वतो ग्राह्यं स्यादिति भावः ।

स्वमतमिति । **नैयायिको मीमांसक**मतं दूषयित्वा **न्यायमतं** स्थापयतीत्यर्थः । तथा च **भाट्टमते** ज्ञानमतीन्द्रियं भवति । तज्ज्ञानं चानुमानेन भवति । अनुमानं तु तत्साधकम् । परिशेषानुमानं प्रागुक्तमेव । तेनानुमानेन ज्ञानसिद्धि विधाय पुनर्विषयनिष्ठज्ञाततायां ज्ञानजन्यत्वानुमानेन प्रामाण्यमपि विषयीभवति । इदं हि तदा सम्भवति यदा ज्ञानमतीन्द्रियं भवति । **नैयायिकेन** तु ज्ञानमतीन्द्रियमेव न स्वीक्रियते । ज्ञानस्य मानसप्रत्यक्षत्वात् । तथा च प्रामाण्यं न स्वतो गृह्यते । तथा च **न्यायमते** प्रामाण्यं परतो गृह्यते । तदनुमानेन सम्भवतीति शङ्कते । **नन्विति प्राथमिमिति** (त.भा.प्र. पृ.६.७) तथा च **न्यायमते** यस्य पुरुषस्य प्रथम त एवानुमानेन प्रामाण्यमनुमिति जाता[1], तन्मते प्रामाण्यं प्रत्यक्षेण न गृह्यत इति । तत्र साध्यप्रसिद्धि[2] रेव कुत्रचिन्नास्तीति साध्याप्रसिद्ध्या दृष्टान्ताभावात् तदनुमानमन्वयि न सम्भवतीत्याशङ्कार्थः ।

न च व्यतिरेकीति यथा-इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्, यत्समर्थप्रवृत्तिजनकं न भवति, तत्प्रमारूपमपि न भवति[3] । यथा शुक्तौ रजतमिति व्यतिरेक्यनुमानमपि न सम्भवति ।

साध्याप्रसिद्ध्येति । तथा च येन पुरुषेण प्रामाण्यं प्रथमतः कुत्रापि गृहीतं नास्ति, तस्य प्रामाण्यमप्रसिद्धम् । कथम् ? सामान्येनाज्ञातस्यानुमानं न सम्भवति । विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्त्वात् । विशिष्टज्ञानं चेदं ज्ञानं प्रमेत्यनुमितिज्ञानम् । तत्र ज्ञाने प्रामाण्यं विशेषणतया भासते । ज्ञानमुक्तरूपं च विशेष्यतया भासते इति विशेषणज्ञानाभावात् व्यतिरेकानुमानमपि[4] न सम्भवतीत्यर्थः ।

समाधत्ते-**जन्मान्तरीयेति** । तथा चास्मिन्जन्मनि तेनाप्रामाण्यमनुभूतं नास्ति । तथापि जन्मान्तरे पूर्वजन्मनि यद्प्रामाण्यं ज्ञानं जातम्, तेन ज्ञानेन प्रामाण्यविषयकः संस्कारो जन्यते । तेन चैतस्मिन् जन्मनि उद्बोधकादृष्टादिसामग्रीसहकारेण तस्य स्मरणं भवति । तथा च प्रथमतः प्रामाण्यज्ञानं स्मरणरूपप्रसिद्धमेव ।

न च प्राचीनजन्मनि प्रथमतः प्रामाण्यग्रहः कथं जातः तत्रापि साध्यप्रतीतेः सत्त्वादिति वाच्यम् । तज्जन्मन्यपि जन्मान्तरीयस्मरणमेव ग्राह्यम् । न चानवस्थेति वाच्यम् । बीजाङ्कुरन्यायेनेयमनव्यस्था दोषाधायिका न भवतीतिध्येयम् । अपि च यद्यपि विशेषतः तद्वतितत्प्रकारकत्वरूपं प्रामाण्यज्ञानं नास्ति,

१. B जायते. २. B -प्रसिद्धेरेव. ३. B न सम्भवति । ४. B omits अपि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथापि प्रमेयत्वसामान्यप्रत्यासत्तिजन्यं ज्ञानं प्रमेयमात्रस्य तिष्ठत्येव प्रमेयमात्रान्तं प्रामाण्यमपि भवत्येवेति।

अथ च **नैयायिकैर्योऽर्थो** स्वीक्रियतेऽथवा मनःपदशक्तिग्रहो मनसि स्यात्। शक्तिग्रहस्तु यो पदार्थः प्रत्यक्षादिना जायते तत्रैव भवति। मनसोऽप्रत्यक्षत्वात्तत्रानुमानमपि न सम्भवति। मनसः सामान्यज्ञानाभावात्। तथा च मनः पदस्य शक्तिग्रहः कथम्?

तत्र[१] **नैयायिकाः** समादधुः-अत्र मोष एव स्वीकर्तव्यः। तथाहि मोषस्यैवायमर्थः। यथा प्रमेयत्वसामान्यलक्षणप्रत्यतासत्त्या चैत्रस्य सर्वविषयकं ज्ञानं जातम्। इदं च प्रमेयत्वप्रकारकं ज्ञानं भवति। तदनन्तरं मनः-पदशक्तिग्रहकाले पूर्वानुभूतप्रमेयत्वस्य मनसः **मोषो** जातः। तस्य प्रमेयत्वांशस्य स्मरणं न जातमिति, यावत्पूर्वं यतः सामान्यलक्षणप्रत्यासत्त्या प्रमेयत्वप्रकारकं यत्प्रमेयमात्रस्य ज्ञानं जातमभूत्, तदनन्तरं तेन ज्ञानेन प्रमेयत्वेन रूपेण प्रमेयमात्रघटादिविषयकः संस्कारो जन्यते। तेन संस्कारेण मनःपदशक्तिग्रहकाले[२] मनोमात्रस्य स्मरणं जन्यते। न च घटादिविषयकमपि स्मरणं तेन जननीयमिति वाच्यम्। तदंशे घटाद्यंशेऽन्यथानुपपत्त्या मोषः स्वीक्रियते। घटाद्युद्बोधिकाऽदृष्टादिका सामग्री न मिलिता। मिलिता[३] च मनोमात्रोद्बोधिका। तयोद्बोधिकया मनोमात्रस्यैव स्मरणं जन्यते। अयमेव मोषशब्दार्थः।

तथा प्रकृतेऽपि प्रमेयत्वसामान्यलक्षणया प्रमेयमात्रस्य ज्ञानं वृत्तमिति। प्रामाण्यसामान्यस्यापि कालान्तरे प्रामाण्यातिरिक्तं विषयं विहायोक्तरीत्या तज्जन्यसंस्कारेण प्रामाण्यमात्रस्य स्मरणं जन्यत इति न साध्याप्रसिद्धिः। तथा च व्यतिरेक्यनुमानं [४]सम्भवत्येव। **प्रयोगश्चेतीति**। तथा च यदुक्तं विवादास्पदीभूतं जलज्ञानं प्रमाणमिति, तत्र दूषणं शङ्कते-

नन्विति तथा चात्र विवादपदेन प्रामाण्याप्रामाण्यसन्देह विषय इदमप्रमाणरूपेऽपि सम्भवति। शुक्तौ यज्जातं रजतज्ञानं तत्रेदं प्रामाण्यं न वेति विवादास्पदीभूतं भवत्येव। तथा च विवादास्पदीभूतं जलज्ञानं भ्रमरूपमपि सम्भवत्येव। तथा च भ्रमरूपजलज्ञानपक्षे साध्याभावेन बाध इत्यर्थः। इति दोषं मूल**कारो** मनसि विचार्य विवक्षां करोति-**अत्रेति** तथा च 'भ्रमरूपे ज्ञाने' इति विवक्षितं पक्षत्वं नास्त्येव। तस्यैव भ्रमज्ञानस्य फलवत्प्रवृत्तिजनकत्वाभावादित्यर्थः।

याथार्थ्यमिति मूलम्। अत्र प्रामाण्यपदेन प्रमाकरणत्वं नोच्यते, किन्तु यथार्थत्वमेव।

स्मृत्येति मूलम्। स्मृतौ फलवत्प्रवृत्तिजनकत्वरूपो हेतुर्वतते, परं साध्यं प्रमाकरणत्वरूपं नास्तीति व्यभिचारो न स्यात्। प्रामाण्यपदस्य यथार्थत्वस्य विवक्षणात्। तथा च स्मृतौ यथा

---

१. B तत्र. २. B -पदशक्तिग्रहो काले. ३. B omits मिलिता च. ४. B न सम्भवत्येव।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

फलवत्प्रवृत्तिजनकत्वरूपो हेतुर्वर्तते तथा तद्वति तत्प्रकारत्वरूपं साध्यमस्तीति भावः । **बाधापत्तेरित्यपि द्रष्टव्यमिति** जलादिज्ञाने प्रमाकरणत्वरूपसाध्याभावे बाध इत्यर्थः ।

अथ **मीमांसको नैयायिकं** प्रति शङ्कते-**नन्विति** [1]तथा च यत्र क्षणे प्रवृत्ति र्न जाताऽग्रे च प्रवृत्ति र्भविष्यति, तस्मिन्नपि काले कदाचिज्ज्ञानस्य प्रामाण्यं गृह्यत इति **नैयायिकेनापि** स्वीक्रियते । अभ्यासदृशापन्नकाले प्रवृत्तेः पूर्वमपि प्रामाण्यं गृह्यते । अथ च समर्थप्रवृत्तिजनकत्वलिङ्गव्यतिरेकेणापि प्रामाण्यं कथं गृह्येत ? तत्र हेतोरभावात् । अथ चानेन लिङ्गेन प्रामाण्यग्रहो न सम्भवति । तद्व्यतिरेकेणापि कार्यसम्भवे कारणताव्यभिचार इत्याशङ्कार्थः ।

स्वत एवेति । तथा च प्रामाण्यस्य स्वतस्त्वमुचितमिति भावः ।

नैयायिकः समाधत्ते **अनभ्यासदशेति** । तथा चानभ्यासदशापन्नं यदज्ञानं स पक्षः । अनभ्यासदशापन्नत्वं व्युत्पादयति-**अनवधृतेति** अनवधृतं=अनिश्चितं यत्प्रामाण्यं तत्सजातीयत्वम् । तथा च यज्जलज्ञानं जातं तत्र यत्प्रामाण्यं तत्रानवधृतसजातीयत्वं तिष्ठत्येव । यत्र ज्ञाने प्रामाण्यनिश्चयो न जातस्तद् सजातीयत्वम् । साजात्यं तदधिकरणं ज्ञानत्वेन । तथा **नैयायिकैरपि** अनुव्यवसायेन प्रामाण्यं विषयीक्रियते। इति[2] स्वीक्रियतेऽभ्यासदशायामेव ।

यथा प्रथमतो घटेऽनुमितिज्ञानं जातं तदनन्तरं घटमहं जानामीत्यनुव्यवसायो वृत्तः, तदनन्तरं द्वितीयानुव्यवसायेन प्रामाण्यप्रकारकं ज्ञानं जायते-यथा 'इदं ज्ञानं प्रमा'-इत्यभ्यासदशायाम् । एतादृशज्ञानसाधारणः पक्षो न क्रियते । किन्त्वनभ्यासदशापन्नस्य ज्ञानस्य पक्षत्वम् । तथा चानभ्यासदशापन्नज्ञानस्य प्रामाण्यमनुमानेनैव गृह्यते ।

अभ्यासदशेति - विचारयति । **अवधृतेति** । ज्ञातप्रामाण्यं सजातीयत्वं सजातीयपदं च येन द्वितीयानुव्यवसायेन प्रामाण्यं विषयीक्रियते, तत्र या वर्तते जातिरनुव्यवसायत्वं सा तु प्रथमानुव्यवसायेऽपि तिष्ठति । तथा च प्रथमानुव्यवसायोऽनभ्यासदशापन्नो भवति । अभ्यासदशापन्नस्तु तदैव यदा द्वितीयानु व्यवसायस्योत्पत्तिर्भवति, नान्यथेति । सजातीयपदेनैवैतावानर्थः प्राप्यते ।

अयमत्र भावः-यत्रानुव्यवसायद्वयत्रयादिकं[3] जातं तत्रानुव्यवसायेनैव प्रकारप्रामाण्यं गृह्यते । यत्र व्यवसायमात्रं तत्रानुमानमात्रेणेति हृदयम् ।

अत्रेदंत्वमिति । पूर्वमीमांसकमतं व्युत्पादयति । **प्रभाकराणामिति** । तथा च **प्राभाकारमते** स्वप्रकाशरूपं यज्ज्ञानं तेन यथा स्वस्वरूपं गृह्यते तथा स्वप्रकाशत्वात् प्रामाण्यमपि

---

१. B omits तथा च. २. B omits इति स्वीक्रियते. ३. B -व्यवसायिद्वय..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तेनैव गृह्यते । तन्मते प्रामाण्यविषयकज्ञानस्यायमाकार इत्याह-**सर्वस्येति** । तथा च[१] घटत्वेन घटमहं जानामीत्यत्र द्वितीयार्थो घटमिति विशेष्यम् । तृतीयार्थो घटत्वेनेतिरूपः प्रकारः । तथा च घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यं भातमेव ।

ननु घटत्वप्रकारकत्वं घटविशेष्यकत्वं ज्ञाने विषयो भवतीति तथा च प्रामाण्यं न गृहीतमेवेति चेत्, अत आह-**घटविशेष्यत्वे** सतीति सत्यन्तं यत्र पटे घटज्ञानं जातं तत्र घटत्वप्रकारत्वमस्तीति भ्रमेऽतिव्याप्तिः स्यात् । अतः सत्यन्तम् । तथा च तस्य घटविशेष्यत्वं नास्ति । तत्र [२]पटविशेष्यकत्वात् । **तस्य चेति** । तथा चेदं यथा घटत्वेन घटं जानामीति प्रतीतिर्जायते तदा प्रामाण्यग्रहो जात एवेति स्वतस्त्वं प्रामाण्यस्येति सिद्धम् ।

भाट्टमते हार्दं दर्शयति-**भाट्टानामिति**[३] ज्ञाततात्वलिङ्गजन्यानुमितेरयमेवकारः[४]। यथा घटं घटत्वेन जानामि, घटत्ववति घटत्वप्रकारकज्ञानजन्यज्ञाततात्रयत्वात् । यत्र यत्र घटत्ववति घटत्वप्रकारकज्ञानजन्यविषयत्वाभावः[५], तत्र तत्र घटत्ववति घटत्वप्रकारकज्ञानजन्यज्ञाततात्रयत्वाभावः । यथा पट इति । तदनन्तरं परामर्शः-यथा घटत्ववति घटत्वप्रकारकज्ञानविषयत्वा(त्व)व्याप्य घटत्ववति घटत्वप्रकारक ज्ञानजन्यज्ञाततात्रयत्ववा-नयमितिरूपं, तदनन्तरमनुमितिर्जायते-घटं घटत्वेन जानामीत्येतादृशी । अत्रापि द्वितीयार्थस्य विशेष्यत्वात् तृतीयार्थस्य प्रकारत्वात् । तेनास्यामप्यनुमितौ घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यं भातमेव । एतत्स्पष्टयति-**ज्ञाने इति** । ज्ञानस्य यज्ज्ञानमनुव्यवसायोऽनुमितिरूपं वा **गुरुमते** तत्स्वरूपं वा तद्विशेष्यकत्वरूप प्रामाण्यस्येदमेव निर्णायकम् । तन्निर्णयार्थमेतदन्या सामग्री न कल्प्यते । प्रामाण्यनिर्णायकस्य ज्ञानज्ञानातिरिक्तस्याभावात् । ज्ञानज्ञानातिरिक्तेन वस्तुनाऽनुमानादिना **नैयायिकाभिमतेनाग्रहणात्** ।

नन्वग्रह एव कथमिति चेत्, तादृशानुमानात् । पूर्वमेव प्रामाण्यग्राहकसामग्रीसत्त्वेन पक्षज्ञानादिरूपसामग्रीसत्त्वात् प्रामाण्यग्रहात् । तथा च सिद्धिसत्त्वेऽनुमिति र्न जायते । तत्र पक्षताभावादिति ।

मुरारीति । **तादृगेवेति** अनुव्यवसायोऽपि घटत्वेन घटं जानामीतिरूप एव प्रामाण्यशरीर घटकीभूताः[६] ये पदार्थाः घटघटत्वे एतयो सम्बन्धः पुनर्घटत्वीयत्वं घटनिरुपितविशेष्यीयत्वं घटत्वनिरूपिते समवायनिरूपितसंसर्गीयत्वमित्येते पदार्था भवन्ति प्रामाण्यशरीरघटकीभूताः । एतेषामनुव्यवसाये भासमानत्वात्प्रामाण्यं भासत इति **मीमांसक**मतहार्दम् ।

अत्र तार्किकाः वदन्ति-यदि प्रवृत्ते पूर्वमेव प्रामाण्यं स्वत एव गृह्यते तदा घटादिज्ञानानन्तरं

---

१. B omits च. २. B omits पट. ३. This प्रतीक is not found in त. भा. प्र. ४. B -नुमितिर. ५. B omits जन्य. ६. B भूयः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रामाण्यसन्देहो न स्यात् । भवन्मते प्रामाण्यस्य निश्चितत्वात् । निश्चिते [१]प्रामाण्ये सन्देहो न स्यात्। **न चेति** । तथा च प्रामाण्यसन्देहः । प्रामाण्यस्य यज्ज्ञानं तत्र यत्प्रामाण्यं तत्सन्देहात् । व्यवसायनिष्ठप्रामाण्यस्यापि सन्देहो भवति । तथा च प्रथमतो घटोऽयमिति ज्ञानं जातम्, तदनन्तरं द्वितीये क्षणे घटं घटत्वेन जानामीत्यनुव्यवसायः । अनेनानुव्यवसायेन घटोऽयमिति व्यवसायरूपं यज्ज्ञानं तन्निष्ठ प्रामाण्यं विषयीक्रियते । तथा च व्यवसायनिष्ठप्रामाण्यस्य ज्ञानमनुव्यवसायरूपम् । तन्निष्ठं=अनुव्यवसायनिष्ठं [२]प्रामाण्यमन्यदेव व्यवसायनिष्ठप्रामाण्यादतिरिक्तमेव ।

तथा चानुव्यवसायनिष्ठप्रामाण्यस्य प्रथमतः सन्देहो जायते । घटं घटत्वेन जानामीतिज्ञानं प्रमाणम् । न चेत्याकारकः अनुव्यवसायनिष्ठप्रामाण्यस्यानिश्चितत्वात् । तथा च व्यवस्यायनिष्ठ प्रामाण्ये निश्चितेऽपि व्यवसायनिष्ठप्रामाण्यज्ञानं यदनुव्यवसायरूपं नियतप्रामाण्यं तत्सन्देहाहित=तत्सन्देह-कृतव्ययवसायनिष्ठप्रामाण्यस्यापि सन्देहो भवतीति न च वाच्यम् ।

तत्रापीति । व्यवसायनिष्ठप्रामाण्यविषयकानुव्यवसायादौ अपि भवन्मते प्रामाण्यसन्देहा-नुदयात् । यया युक्त्या व्यवसायनिष्ठप्रामाण्यं स्वतो ग्राह्यमित्युक्तं, सा युक्तिरत्राप्यनुव्यवसायेऽपि[३] तिष्ठति। **गुरूमते** प्रामाण्यं स्वाश्रयेणैव विषयीक्रियते । तथा चानुव्यवसायनिष्ठं यत्प्रामाण्यं तस्याश्रयो भवत्यनुव्यवसायस्तेनैव स्वनिष्ठं प्रामाण्यं विषयीक्रियते । ततोऽनुव्यवसायनिष्ठप्रामाण्यस्यापि निश्चितत्वात्।

तथा च प्रामाण्यज्ञाननिष्ठप्रामाण्यस्य निश्चितत्वात् प्रामाण्यज्ञाननिष्ठ प्रामाण्यसन्देहाभावेन व्यवसायनिष्ठप्रामाण्यसन्देहोऽपि न सम्भवतीति भावः । अन्यथा स्वज्ञानानिष्ठप्रामाण्यसन्देहेनापि यदि विषयसन्देहः क्रियते तदा भूतले घट इति ज्ञाने प्रामाण्यसन्देहानन्तरं भूतले घटो न वेति सन्देहः स्यात्। अन्यसन्देहादन्यसन्देहो[४] न भवति । तत्रोभयकोटिज्ञानाभावात्[५]। तथा च प्रामाण्यस्य परतस्त्वे संशयानुपपत्तिरेव बाधिका । **मीमांसकः** संशयोपपत्तिं प्रकारान्तरेण शङ्कते **न चेति** । तथा च सन्देहस्त्रिविधिः । एकः समानधर्मदर्शनजः (१), अन्योऽसाधारणदर्शनजः(२) एको[:तृतीयः]-विप्रतिपत्तिजन्यः (३)।

प्रथमो यथा-स्थाणुर्वा पुरुषो वेत्यादौ । अत्र साधारणधर्मो भवत्युच्चैस्त्वरूपः । स तु स्थाणुपुरुषसाधारण इति (१) । द्वितीयो यथा-शब्दो नित्योऽनित्यो वा । [६]अत्रासाधारणधर्मो भवति नित्यत्वानित्यत्वव्यावृत्तः शब्दत्वरूपः । तस्य शब्दातिरिक्तेऽनित्ये नित्ये वाऽभावेनासाधारणः[७] [२]। तृतीयो यथा ज्ञानप्रामाण्यमित्यादौ (३) ।

---

१. A omits प्रामाण्ये. २. A प्रामाण्येऽन्यदेव. ३. B omits अपि. ४. B omits अन्य.. ५. B -भावादिति। ६. B Omits अत्र and reads असा.. ७. B -धारण इति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्र तु[1] सन्देहः-प्रामाण्यसन्देहः साधारणधर्मदर्शनजः । साधारणधर्मस्तु ज्ञानविषयत्वरूपः । तथा चानुव्यवसायेऽपि [2]यद्यपि प्रामाण्यं निश्चितमेव, तथापि ज्ञानविषयकत्वरूपसामान्यधर्ममादाय प्रामाण्यसन्देहो भविष्यति, समानधर्मदर्शनरूपकारणस्य सत्त्वात् ।

इदं दूषयति-**समानेति** । यदि समानधर्ममात्रेणापि सन्देहो जन्यते तदा सन्देहस्य कुत्राप्युच्छेदो न स्यात् । समानधर्मस्य कस्यापि कुत्रचित् सत्त्वात् । तथा च सर्वत्र सन्देह एव स्यात् [न]निश्चय इति ।

उपसंहरति **तस्मादिति** । **न्यायमते**ऽयमुपसंहारः-निश्चिते यः सन्देहः सः प्रामाण्यसन्देहादेव भवति । यतः सन्देहं प्रत्येतादृशं ज्ञानं प्रतिबन्धकं भवति । यथा चाह-**अप्रामाण्यशङ्केति** । तथा च यत्राप्रामाण्यशङ्काकलङ्कशून्यो यो निश्चयः सः सन्देहं प्रति प्रतिबन्धको भवति । न तु निश्चयमात्रम्। जायते तत्र यद्यपि विशेष्यरूपो निश्चयस्तिष्ठति तथापि तत्राप्रामाण्यशङ्काकलङ्कशून्यरूपं विशेषणं नास्ति। तथा च विशेषणाभावः । यतो विशष्टिाभावो निश्चयाभावो वर्तत एव ।

तथा चाभ्यासदशायां प्रामाण्यस्य स्वतोग्रहो प्रामाण्यसन्देहोऽप्रामाण्य-शङ्काकलङ्कशून्य-रूपनिश्चयाभावेन कर्तव्यः । तेन सन्देहं प्रति तादृशविशिष्टं प्रतिबन्धकं तादृशाभावश्च कारणमिति सन्देहोऽप्युपपद्यत एव । स्वतस्त्वमिदं दूषयित्वोपसंहरति-**तस्मादितिति** । तथा च पूर्वं यदुक्तं रजतं रजतत्वेन जानामीत्यनुव्यवसाये रजतत्त्ववति रजतत्वविशेष्यकत्वरूपं[3] प्रामाण्यं विषयो भवतीति प्रामाण्यस्य स्वतस्त्वम् ।

इदमेव दूषयति-**नन्विति** । यथेदं रजतत्वेन जानामीत्येव[4] लक्षणोऽनुव्यवसायः[5] । न तु रजतलक्षणं विशेष्यं रजतत्वेन जानामीत्यनुव्यवसायः । तथा च यथा तादृशं ज्ञानं जातं तदा सन्देहो न स्यादित्युक्तप्रायम् । तथा च यद्यप्यनुव्यवसाये रजतत्वादिप्रकारकत्वं विषयीभूतं भवति तथापि द्वितीयो अंशो रजतादिविशेष्यकत्वरूपो विषयोऽनुव्यवसायेन विषयीभवतीति परत एव प्रामाण्यं सन्देहानुपपत्त्या स्वीकर्तव्यमिति भावः ।

इति प्रामाण्यव्याख्या ।

श्रीमन्नारायणमिश्रात्मजपुष्करमिश्रमुखादधिगम्यवाचकगुणरत्नगणिना व्याख्यातम् [प्रमाणम्]।

श्रीमदरत्नविशालाख्य स्वशिष्याधीतिहेतवे ।

गुणरत्नगणिः चक्रे टीकां तर्कतरङ्गिणीम् ॥

---

१. B omits तु. २. B omits यद्यपि. ३. B -रूपप्रामाण्यं. ४. A त्येवं. ५. Pl. add न तु रजतलक्षणं विशेष्यं रजतत्वेन जानामीत्यनुव्यवसायः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[१६]॥ प्रमेयपदार्थनिरूपणम् ॥

अथ सूत्रसंगत्योद्देशानुक्रमेण प्रमेयप्रस्तावात् प्रमेयसूत्रं-**आत्मेति** । परस्परं प्रमेयाणां पदार्थावच्छेदकभेदमादाय पृथक्त्वेनोपादानम् ।

(I) आत्मा ।

जातित्वमिति । सुखादिसमवायिकारणतावच्छेदकलक्षणं व्यञ्जकत्वेनात्मत्वं जातिः । सा तु प्रत्यक्षा । तस्या योगिव्यक्तौ वृत्तित्वात् । अनुकूलतर्कस्तु कार्यकारणभाव एव । आत्मत्वेन सुखत्वादिना च कार्यकारणभावावगमात् ।

ननु परमात्मनि ईश्वरात्मनि कथमात्मत्वम् ? तत्र सुखाद्यभावात्, यदि तत्र सुखमङ्गीक्रियते तदा तस्यापि नित्यत्वादुक्तरूपकार्यकारणभावानुरोधेन तत्रात्मत्वं जाति न सिध्यतीति । अत्र तस्य सुखे नित्ये प्रमाणं वेद एव । यथा 'नित्यविज्ञानमानन्दं ब्रह्म' इति आनन्दपदेन सुखमेव ग्राह्यम् । तत्रापि नित्यत्वस्यान्वयादिति चेत्, न । ईश्वरेऽऽत्मत्वजातेरनङ्गीकारात् । अथवा तत्साधारणं ज्ञानेच्छाकृत्यपि कारणतावच्छेदकत्वेन तत्राप्यात्मत्वजातिः सिध्यति ।

सामान्यग्रहणमिति । लक्षणं तु[1] आत्मनः आत्मत्वमेव । तस्यैवासाधारणधर्मत्वात् । सामान्यपदमात्मत्वस्य जातित्वबोधार्थम् । उपाधि(धे)श्च भ्रमनिरासः कृतः । [2]निर्बाधकसामान्यत्वात्[3]। तज्जातिरेवेति भावः । **मतुबिति** । इदं चात्मत्वस्य सम्बन्धविशेषणसमवायसम्बन्धेन लक्षणत्वद्योतनार्थम् । तथा चात्मत्वजाति समवायीतयात्मनः लक्षणम् । अन्यथा सम्बन्धविशेषणात्मत्वं लक्षणं न क्रियते । तदाऽऽत्मत्वस्य शरीरादावपि संयुक्तसमवायेन वर्तमानत्वात् । आत्मनः इदं लक्षणं कर्तुं न युक्तम् । आत्मनि संयुक्तसमवायेन तस्य वर्तमानत्वात् ।

न च तयोरिति । शरीरत्वेन्द्रियत्वयो र्जातित्वं नास्ति । पृथिव्यादिना जातिसाङ्कर्यात् । यत्र यत्र पृथिवीत्वं तत्र तत्र शरीरत्वं नास्ति । घटादावभावात् । यत्र यत्र शरीरत्वं तत्र तत्र पृथिवीत्वं नास्ति । तेज(जो)शरीरे व्यभिचारात् । उभयोः, सङ्कर पार्थिवशरीरे इति । तथा च जातिसाङ्कर्यादेवेन्द्रियत्वं न जातिः । तेजसत्वादिना साङ्कर्यात् ।

विभुरितीति । यदि शरीरमात्मा स्यात्, तदाऽऽत्मनो विभुत्वं न स्यात् । आत्मनश्च विभुत्वं युक्तिसिद्धम् । तथाहि-'आत्मा विभुः, देशान्तरसंस्थितवस्तुभोजकत्वात्', व्यतिरेकी । अन्यथा आत्मनो विभुत्वाभावेन काश्मीरदेशोत्पन्नवस्तुनो गुर्जरस्थपुरुषस्य भोगो न स्यात् । तत्रस्थवस्तुनो हि

---

१. B च. २. B निर्बाधसामा.. ३. B -त्वात् । ग्रहणमिति लक्षणं चात्मने (नः !)ऽऽत्मत्वमेव । तस्योवाद (?) (तस्य योगाद् !)जातिरिति भावः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एतद् दृष्टजन्यत्वमेव नियामकम् । यद् भोजकादृष्टेनोत्पादितं तस्यैव भोगात् । तथा चादृष्टस्यात्मगुणत्वात् अदृष्टस्य देशान्तरस्थिति(त)वस्तुना समं सम्बन्धाभावेन कथमदृष्टस्य तज्जनकत्वम् ? सम्बन्धव्यतिरेकेण कारणत्वाभावात् । तथा कार्यकारणभावानुरोधेनादृष्टवदात्मसंयोगरूपः सम्बन्धो वाच्यः । अयं च सम्बन्धः आत्मनो व्यापकत्वव्यतिरेकेण न सम्भवति । यदि चात्मा शरीरमात्रवृत्तिरेव भवेत् तदाऽदृष्टादावात्मसंयोगः तद्देशस्थितिभोज्यवस्तुना स[मं]न स्यात् । तथा च शरीरातिरिक्तदेशेऽप्यात्मनः सत्त्वात् व्यापकत्वम् । अदृष्टस्याव्याप्यवृत्तित्वेनात्मत्वाश्रये यत्र कुत्रापि स्थिति र्वाच्या ।

न च देहावच्छिन्नात्मनो वाऽदृष्टमिति वाच्यम् । आत्मनि क्रियाभावाच्छरीरस्य सक्रियत्वात् । शरीरावच्छिन्नात्मन्येव नादृष्टसत्त्वम् । ततो विभुत्वेन हेतुना आत्मनः शरीराभावत्वं साधनीयम् । – 'आत्मनि शरीरं, विभुत्वात्, कालवदिति' । अथवा विभुत्वेन हेतुना नित्यत्वं साधनीयम् । नित्यत्वेन हेतुना शरीरान्योन्याभावः । शरीरत्वात्यन्ताभावः साधनीयः । अन्यथा यद्यात्मनो विभुत्वं नास्ति किन्तु यावच्छरीरवृत्तिरात्मेति तदा आत्मनो मध्यमपरिमाणवत्त्वं स्यात् । शरीरवत् । न चेष्टापत्तिः । मध्यमपरिमाणत्त्वेन घटादिवत्तस्यानित्यत्वं स्यात् । यथा-'आत्माऽनित्यः, मध्यम[१]परिमाणत्वात् घटादिवत्[२]' । न चात्रापि इष्टापत्तिरिति वाच्यम् । तथा सति बालकादेर्जातमात्रस्य स्तनपाने प्रवृत्तिरेव न स्यात् । प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्यैव कारणत्वात् । जातमात्रस्य तदानीमनुभवाभावेन स्मरणमेव वाच्यम् । स्मरणं च संस्कार व्यतिरेकेण न सम्भवति । संस्कारस्तु जन्मान्तरीय एवेति तस्य नित्यत्वमिति । नन्वनया युक्त्या तस्य देहव्यतिरिक्तत्वं सिध्यतु । परमिन्द्रियव्यतिरिक्तत्वं न सिध्यतीति शङ्कते **श्रोत्रस्येति** । तथा च श्रोत्रस्याकाशात्मकत्वेन विभुत्वात्, मनसश्च परमाणुत्वेन नित्यत्वात् । तथा च विभुत्वेन नित्यत्वेन च हेतुना इन्द्रियत्वाभावः साधयितुं न शक्यते । आकाशमनसो व्यभिचारात् । विभुत्वं च नित्यत्वं चाकाशेऽस्ति । तत्रेन्द्रियत्वाभावरूपं साध्यं नास्ति । कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वात् । तथा चेन्द्रियत्वाभावसाधने विभुत्वं नित्यत्वं च हेतुर्व्यभिचार वृत्त[३] इति भावः ।

तथा चेन्द्रियत्वाभावमात्मनः प्रकारान्तरेणोपपादयति-**स चेतीति** – यथा चेदमनुमानम्-'आत्मा नेन्द्रियम् मानसप्रत्यक्षत्वात्, सुखादिवदिति ।' इन्द्रियं तु प्रत्यक्षं न भवति । ततोऽनुकूलतर्कोऽयम्-'यद्यात्मा इन्द्रियं स्यात्, तदा मानसप्रत्यक्षो न स्यात् । भवति च मानसप्रत्यक्षः, तस्मान्नेन्द्रियमिति ।'

[४]**प्रत्यक्षमपीति** । अहमिति मानसज्ञानविषयत्वेन प्रत्यक्षता । न चेदं शरीरविषयम् । तथा सति मम शरीरमिति भेदबुद्धिर्नस्यात् । जायते च भेदबुद्धिरिति अहमिति प्रत्यक्षविषयो न शरीरमिति । न

---

१. B -परिमाणत्वेन. २. A repeats here the whole previous sentence. ३. B वृत्तिः. ४. B omits the reading between प्रत्यक्षम....शरीरमिति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चाहं गौरः, स्थूलः कृशः इति बुद्धेः शरीरविषयत्वमिति वाच्यम् । इदृशप्रतीते र्भ्रान्तत्वात् । बाधकं च-योगिनां [1]च तथा प्रतीत्यभाव एवेति । **विप्रतिपत्ताविति**-आत्मा शरीरभिन्नो न वेति विप्रतिपत्तौ शरीर भिन्नसाधनायामनुमानमाह **एकेन्द्रियमात्रेति** ।

प्रथमतो बुद्धादीनां गुणत्वं साधयति **यथेति मूलम्** । अन्यथैकेन्द्रियग्राह्यत्वं वर्तते । घटादौ चक्षुरिन्द्रियेणापि गृह्यते स्पर्शेनापि गृह्यते । तथा च द्वीन्द्रियादिग्राह्यत्वेऽप्येकेन्द्रियग्राह्यत्वमप्यस्तीति[2]। घटादौ तु हेतुसत्त्वे साध्यं गुणत्वरूपं[3] नास्तीति व्यभिचारः । तथा च मात्रपदे दत्ते व्यभिचरवारणं वृत्तम् । घटादौ एकेन्द्रियमात्रग्राह्यत्वरूपो हेतुरपि नास्तीति भावः ।

इदं चेति एकेन्द्रियमात्रग्राह्यत्वमपि हेतुः रूपत्वे व्यभिचारी भवति । रूपत्वस्य चक्षुरिन्द्रियमात्रग्राह्यत्वात् । तत्र च गुणत्वरूपं साध्यं नास्तीति व्यभिचारः । तद्वारणायानित्यत्वे सतीति विशेषणं देयमिति भावः । **तावन्मात्रमिति** । यदि [4]नित्यत्वादित्येव हेतुः क्रियते तदा घटादावपि व्यभिचारः स्यात् । अतो विशिष्टरूपो हेतुर्वाच्य इत्यर्थः ।

ध्वंसावच्छिन्नसत्तायोगित्वमिति । उक्तव्यभिचारवारणायानित्यत्वस्य विवक्षां करोति ध्वंस इति । ध्वंसेनावच्छिन्नाव्याप्ता सत्ता । तद्योगित्वं=तदसमवायित्वम् । तथा च रूपप्रागभावे ध्वंसावच्छिन्नसत्तायोगित्वरूपमनित्यत्वं नास्ति । सत्तायास्तत्राभावात् । तथा च यत्राधिकरणे सत्ता वर्तते तस्य यो ध्वंसः तस्य यो प्रतियोगी सोऽनित्यरूप[5] इति । **न तत्रेति** रूपप्रागभावस्य यद्यपि ध्वंसो वर्तते तथापि तत्र सत्तायोगित्वं नास्ति-इति कृत्वा तत्र हेतुरपि नास्तीति न व्यभिचारः इत्याशङ्कार्थः ।

इदमपि दूषयति । विशिष्टेऽपि हेतु र्घटविशेष्ये व्यभिचारी वृत्तः । यथा यो घटश्चक्षुर्मात्रगोचरो वृत्तस्तदनन्तरं तस्य नाशो जातः । तत्र घटे ध्वंसावच्छिन्नसत्तायोगित्वे सति एकेन्द्रियमात्रग्राह्यत्वरूपो हेतुस्तिष्ठति । साध्यं च गुणत्ववरूपं तत्र नास्तीति व्यभिचार इत्याह-**यो घटेति** न **चेति** एकेन्द्रिय-मात्रेत्यत्र द्वीन्द्रियग्रहणयोग्यता राहित्यमित्यर्थो विवक्षितः । तथा चायं हेतुः पर्यवसन्नः । तथाहि ध्वंसावच्छिन्नसत्तायोगित्वे सति द्वीन्द्रियग्रहणयोग्यतारहित्वादिति यद्यपि पूर्वोक्तघटविशेषे ध्वंसावच्छिन्न-सत्तायोगित्वं वर्तते तथापि द्वीन्द्रियग्रहणयोग्यतारहित्यं नास्तीति हेतोरप्यभावान्न व्यभिचार इत्यर्थः ।

दूषयति-**अतीन्द्रियेति** । तथा च द्वयणुकेन्द्रियादौ चोक्तहेतुः ध्वंसावच्छिन्नसत्तायोगित्वे सति द्वीन्द्रियग्रहणयोग्यतारहित्यरूपो हेतुर्वर्तते । परं तत्र गुणत्वरूपं साध्यं नास्तीत्यर्थः । **न चेति** तथा च द्वयणुकादौ प्रत्यक्षत्वं नास्तीति न तत्र व्यभिचार इति भावः ।

एकेन्द्रियेति । तथा चोक्तरूपो व्यभिचारो घटविशेष्ये तदवस्थ एव । द्वीन्द्रियग्रहणयोग्यता-विरहाभाववति एकेन्द्रियग्रहणयोग्यता वर्तते एवेति कृत्वा हेतुर्वर्तते उक्तरूपः । परं गुणत्वरूपं तत्र साध्यं

१. B omits च. २. B ग्राह्यमप्य.. ३. B -गुणरूपं. ४. B अनित्यत्वा.. ५. B -ऽनित्य इति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नास्तीति व्यभिचार इत्यर्थः । अत्र हेतुमाह-**व्यासज्येति** । कदाचिद् भवता वक्तव्यम्, एकेन्द्रियग्रहणयोग्यता द्वीन्द्रियग्रहणयोग्यतोभयत्वावच्छिन्नप्रतियोगिताकोऽभावो वाच्यः । यथा घटपटौ न स्तः इत्यनया प्रतीत्या घटपटोभयत्वावच्छिन्नप्रतियोगिताकोऽभावो व्यासज्यवृत्तिधर्मप्रतियोगिताकोऽभावो घटत्वावच्छिन्नपटत्वावच्छिन्नप्रतियोगिताकाभावावच्छिन्न[१] एव विषयीक्रियते । घटवत्यपि भूतले घटपटौ न स्तः इति प्रतीतेरुदयात् । तथा च यदि घटत्वावच्छिन्नप्रतियोगिताकाभावादतिरिक्तो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकोऽतिरिक्तो न स्वीक्रियते, तदा घटवति भूतले घटपटौ न स्त इति प्रतीतिर्न स्यात् ।

न च घटवति भूतले घटपटौ न स्त इति प्रतीतिः पटाभावविषयिण्येव, तत्र घटवति भूतले पटाभावस्य सत्त्वादिति वाच्यम् । तथा च यदि घटपटौ न स्तः इति प्रतीतिः पटाभावविषयिण्येव तदा पटवति भूतले घटपटौ न स्तः इति प्रतीति न(र्न)स्यात् । तत्र च पटस्य सत्त्वात् । पटत्वावच्छिन्नप्रतियोगिताकाभावो वक्तुं न शक्यते । तत्र पटस्य विद्यमानत्वात् । पटत्वावच्छिन्नप्रतियोगिताकाभावं प्रति पटसत्त्वमेव विरोधि । तथा च यत्र भूतले पटो [२]वर्तते तत्र पटत्वावच्छिन्नप्रतियोगिताकाभावो न तिष्ठति। तथा चातिरिक्तो द्वित्वावच्छिन्नप्रतियोगिताकोऽभावः स्वीकर्तव्य एव । तेन[३] द्वित्वावच्छिन्नप्रतियोगिताकाभावं प्रति द्वित्वावच्छिन्नप्रतियोगिताकाभाव सत्त्वं विरोधि । तथा च यत्रैकपदार्थौ वर्तते तत्र द्वित्वावच्छिन्नप्रतियोग्यसत्त्वेन तदवच्छिन्नप्रतियोगिताकाभावः स्थास्यत्येव । तथा च घटवति भूतले घटपटौ न स्तः इति प्रतीतौ घटपटोभयाभावविषयो भवति । तथा च [४]व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावोऽतिरिक्तो **नवीनैः** स्वीक्रियते । **विशिष्टाभाववदिति**[५] । व्यासज्यत्वं नाम यद्धर्माश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम् । इदं च घटत्वादौ नास्ति । घटत्वस्य घटत्वाश्रये घटे घटत्वात्यन्ताभावस्य विरहात् ।

इदं च द्वित्वे वर्तते । द्वित्वस्याश्रयौ भवतः घटपटौ । घटनिष्ठात्यन्ताभावस्य प्रतियोगित्वं भवति घटे । यद्यपि घटपटोभयत्वं समवायसम्बन्धेन वर्तते तथापि पर्याप्ताख्यसम्बन्धेन घटे द्वित्वं नास्तीति उभयत्वं[६] व्यासज्यवृत्तिधर्मो भवति । न च घटमात्रेऽपि द्वित्वं वर्तते एवेति वाच्यम् । तथा सति यत्र भूतले एक एव घटोवर्तते तत्र भवन्मते घटमात्रे द्वित्वस्य वर्तमानत्वात् द्वौ घटौ इति प्रतीति र्भवतु। न जायते च तथा प्रतीतिः ।

तस्मादित्येकत्र पर्याप्ताख्यसम्बन्धेन व्यासज्यवृत्तिधर्म उभयरूपो नास्तीति व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिता[का]भावोऽतिरिक्त एव, तथा प्रकृतेऽपि [७]एकेन्द्रियग्रहणयोग्यतावत्यपि

---

१. B -भाववद् भिन्न एव. २. नास्ति (?). ३. B omits तेन. ४. B व्यासज्यधर्मांव.. ५. It is विशिष्टाभावत्वात् in त. भा. प्र. ६. B उभयं. ७. Pl. add एकेन्द्रियग्रहणयोग्यतोभयत्वावच्छिन्नप्रतियोगिताकाभाव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावोऽयं तिष्ठतीति उक्तघट[1]विशेषे न व्यभिचार इत्याशङ्कार्थः ।

एकेन्द्रियग्रहणेति-तथा च प्रत्यक्षत्वे सति द्वीन्द्रियग्रहणयोग्यतारहितत्वादिति हेतुः । विशेष्यदलं तु घटादावतिव्याप्तिवारणाय । सत्यन्तं च द्वयणुकादौ व्यभिचारवारणाय । व्यभिचारमुद्धरति **एकेन्द्रियते**[2] - तथा च यद्यपि घटे एकेन्द्रियग्रहणयोग्यता वर्तते तथापीन्द्रियद्वयग्रहणयोग्यताविरहो नास्तीति । घटादौ यथा साध्यं नास्ति तथा हेतुरपि तत्र नास्तीति भावः । एकेन्द्रियग्रहणयोग्यता कुत्रापि नास्ति मनसोऽप्यतीन्द्रियत्वात् ।

समाधत्ते-**एकेन्द्रियग्रहणेति** यद्यपि द्वित्वावच्छिन्नः प्रतियोगिताकोऽभावो नास्ति तथापि विशिष्टाभावो वाच्यः । तथा चैकेन्द्रियग्रहणयोग्यता विशिष्टत्वापरेन्द्रियग्रहणयोग्यता, तस्याः अभावः । अयमभावो विशिष्टाभावो भवति । तथा च व्यभिचारो न भवति । घटादौ तु तत्र एकेन्द्रियग्रहणयोग्यताऽपि वर्तते । द्वीन्द्रियग्रहणयोग्यताऽप्यस्ति । तद्राहित्वं नास्ति । तथा च घटादौ विशिष्टा[3]भावरूपोहेतुरपि नास्तीति न व्यभिचारः । तथा च विशिष्टाभावस्तत्रैवायाति यत्र विशेषणाभावो, विशेष्याभावो वा उभयाभावो[4] वा । रूपादौ तु विशिष्टाभावो वर्तते । रूपादौ एकेन्द्रियग्रहणयोग्यता विशिष्टा । एकेन्द्रियग्रहणयोग्यताया अभावो वर्तते । अत्र यद्यपि रूपादावेकेन्द्रियग्रहणयोग्यता विशेषरूपा तिष्ठति परं तथापि द्वीन्द्रियग्रहणयोग्यता विशेष्यरूपा नास्ति। तथा चत्र विशेष्याभावप्रयुक्तो विशिष्टा भाव इति ।

न चेति । तथापि प्रभाकर्मणि प्रभाचलनादौ व्यभिचारः । तत्र यद्यपि प्रभाकर्मणि [5]चक्षुरूपैकेन्द्रियग्रहणयोग्यता वर्तते तथापि तत्र द्वीन्द्रियग्रहणयोग्यता नास्तीति हेतुर्वर्तते । हेतुस्तु विशिष्टाभावरूपः । गुणरूपत्वं च तत्र साध्यं नास्तीति व्यभिचारः ।

उद्धरति-**कर्मान्यत्वेनेति** । **प्रभाया** इति । यन्मते प्रभाऽप्रत्यक्षा तन्मते प्रभाकर्माप्रत्यक्षम् । तथा च हेतुसत्त्वे प्रभाकर्मणि न व्यभिचारः । अन्यथेति यदि प्रभाऽप्रत्यक्षा, न भवति तदा प्रभायामेव व्यभिचारो भवति । प्रभायाः चक्षुर्मात्र ग्राह्यत्वेन व्यभिचारः स्यात् । किमर्थं कर्मपर्यन्तधावनम् ?

तथा च प्रभाऽप्रत्यक्षैव स्वीकर्तव्या । तत्कर्म अप्यप्रत्यक्षमेव स्वीकर्तव्यम् । तेन प्रभाकर्मणि हेतुसत्त्वेन न व्यभिचार इत्यन्यमतार्थः ।

तयोरिति । बुद्ध्यादीनां गुणत्वं सिद्धम् । तदनन्तरं गुणेन गुण्यनुमानस्वीकर्तव्यम् । तथा च बुद्ध्यादयो द्रव्याश्रिताः गुणत्वरूपादिवत् । तेन बुद्ध्यादिगुणेन तदाश्रयोद्रव्यसिद्धम् । ततः

---

१. B -विशेष्ये. २. This प्रतीक is not found in त.भा.प्र. ३. B भावो भवति । रूपे हेतुरपि. ४. B omits उभयाभावो वा. ५. B चक्षुषैकेन्द्रिय.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

परिशेषानुमानेनात्मरूपमदृष्ट(मष्ट)व्यतिरिक्तं द्रव्यं सिध्यतीति । तथा च गुणिनो गुणेनानुमानं कर्तव्यम् ।

तत्रायं शङ्कते-**नन्विति** । गुणगुणिनोरसमानाधिकरणत्वाद् परस्परं व्याप्तिरेव नास्ति । यथा घटरूपं भवति गुणः, घटो भवति गुणी । अनयोः सामानाधिकरण्यं नास्ति । घटे रूपमस्ति घटस्तु कपाले इत्यर्थः ।

गुणश्चेति । तथा च गुणो गुण्याश्रितो गुणत्वात् । रूपादिवत् । इदं [1]युक्तमनुमानम् । परमिदं पूर्वोक्तमयुक्तम् । - आत्मा गुणी गुणात् । इत्येवमुक्ते समानाधिकरण्यं भवत्येवेति । **भूतसाबन्धित्वेति** । अत्र बुद्ध्यादीनां पक्षत्वम् । तत्तु पक्षे गुणस्याप्यन्तर्भावः । तथा च न कर्तव्यमेव । यथा बुद्ध्यादिगुणा न भूतगणाः इति न कर्तव्यम् । बुद्ध्यादिगुणा इति कृते बुद्ध्यादिकं पक्षतावच्छेदकं भवति । पक्षस्तु गुणा इत्येव । तथा कृते गुणेषु भूतसम्बन्धित्वेन भूतसम्बन्धित्वनिषेधः कर्तुमशक्यः । इति बुद्धादय इत्येव पक्षः ।

मानसमिति । यथा घटादिरूपे प्रत्यक्षत्वं तिष्ठति तत्र भूतगुणत्वाभावकरूपं नास्तीति व्यभिचारः स्यात् । तद्वारणाय मानसपदम् । **तेनेति** चाक्षुषं यत्प्रत्यक्षं तन्मनोजन्यमपि भवतीति व्यभिचारवारणाय **मानसप्रत्यक्षत्वादिति** मनोमात्रजन्यप्रत्यक्षत्वं नास्ति ।

बुद्ध्यादीनां भूतगुणत्वं निषेध्य दिगदिगुणत्वं दूषयति । **नापीति** मूलम् । **अविशेषगुणेति** । यत्र विशेषगुणत्वं तत्र दिगादिगुणत्वं नास्ति । दिगादिषु च सामान्यगुणा एव । तथा च बुद्ध्यादीनां विशेषगुणत्वेन न दिगादिगुणत्वम् । विशेषगुणत्वं चैकेन्द्रियमात्रग्राह्यत्वम् । मात्रपदं चैकत्वादीनां विशेषगुणत्ववारणार्थम् । अन्यथैकत्वसङ्ख्यायां द्वीन्द्रियग्राह्यत्वेऽप्येकेन्द्रियग्राह्यत्वसत्त्वादतिव्याप्तिः स्यात् ।

बुद्ध्यादीनां विशेषगुणत्वं साधयति **गुणत्व इति** मूलम् । **तदपीति** जातमात्र विनष्टघटसङ्ख्यां चक्षुर्मात्र गृहीतत्वादिति व्यभिचारो न स्यात् । तथाऽऽह **इन्द्रियग्रहणेति** । **प्रभासङ्ख्यायामिति** प्रभासङ्ख्या एकत्वादिरूपा । अस्यायमर्थः-मनोमात्रजन्यप्रत्यक्षत्वादिति रूपादौ विवक्षां करोति-**द्वीन्द्रियेति**-द्वीन्द्रियग्राह्यो गुणः, तद्गता या गुणत्वव्याप्या जातिः, तद्राहित्यम् । तथा च गुणत्वाव्याप्या जातिः एकत्वादिः, तद्राहित्यं बुद्ध्यादौ मनोमात्रग्राह्यत्वात् । तथा च सङ्ख्याविशेषे प्रभैकत्वादौ न व्यभिचारः । तत्र द्वीन्द्रियग्राह्यत्वं- यो गुणः घटैकत्वादिः तन्निष्ठागुणत्वव्याप्या जातिरेकत्वरूपा, तद्राहित्यरूपो हेतुः प्रभैकत्वे नास्ति । तथा च प्रभैकत्वे यथा विशेषगुणत्वं साध्यं नास्ति तथा हेतुरपि द्वीन्द्रियग्राह्यनिष्ठगुणत्वव्याप्य जातिराहित्वं नास्ति । द्वीन्द्रियग्राह्यगुणो भवति घटैकत्वादिः । तन्निष्ठा या गुणत्वव्याप्या जातिरेकत्वरूपा, तद्राहित्यं प्रभैकत्वे नास्ति । तत्रैकत्वस्य

१. B प्रयुक्तम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वर्तमानत्वात् । तिष्ठति चायं पक्षे बुद्ध्यादौ विशेषगुणे । द्वीन्द्रियग्राह्यो भवति गुणः एकत्वादिः । तन्निष्ठा गुणव्याप्या जातिर्भवति एकत्वरूपा । तद्राहित्यं बुद्धौ वर्तते । बुद्धेरेकत्वाभावात् । व्याप्यपदं चेन्न दीयते तदा स्वरूपासिद्धो हेतुः स्यात् । द्वीन्द्रियग्राह्य-गुणत्वजातिराहित्यमित्येव हेतुः क्रियते, तदा पक्षे बुद्ध्यादौ हेतु र्नास्ती ति स्वरूपासिद्धः स्यात् । तद्वारणाय व्याप्यपदम् । तथाहि-द्वीन्द्रियग्राह्यगुणो भवति सङ्ख्यादिकम् । तन्निष्ठतया गुणत्वरूपा जातिः । तद्राहित्यं बुद्ध्यादौ नास्तीति स्वरूपासिद्धः स्यात् । व्याप्यपददाने न भवति । गुणत्वं च गुणत्वस्याव्याप्यं न भवति । यद्यपि भेदेनापि व्याप्यव्यापकभावः सम्भवति तथापि भेदेनात्र व्याप्यव्यापकभावस्य विवक्षणात् । तथा च द्वीन्द्रियग्राह्यगुणत्वव्याप्यजातिर्भवत्येकत्वादिरूपा, न गुणत्वरूपा[1] । तद्राहित्यस्य बुद्ध्यादौ वर्तमानत्वादिति ।

एवं चेति द्वीन्द्रियग्राह्यगुणत्वव्याप्यजातिराहित्यरूपे हेतौ कृते गुरत्वे व्यभिचारः[2] । एतादृशहेतुत्वे विशेष्यगुणत्वरूपसाध्यसत्त्वे व्यभिचार इत्यर्थः । **प्रत्यक्षत्वे** इति तथा च प्रत्यक्षत्वे सति द्वीन्द्रियग्राह्यगुणत्वव्याप्यजातिरहितत्वादिति पर्यवसन्नो हेतुः । गुरुत्वं च न प्रत्यक्षम् । न **चेश्वरेति** - ईश्वरबुद्ध्यादौ हेतुर्नास्ति । तस्य प्रत्यक्षत्वाभावादिति भागासिद्धि ।

समाधत्ते-**प्रत्यक्षेति** प्रत्यक्षा या गुणत्वव्याप्या जातिः, ज्ञानत्वं-तत्त्वं, तत्त्वे सति द्वीन्द्रियग्राह्यगुणत्वव्याप्यजातिराहित्यत्वादिति हेतुः पर्यवसन्नः एवं सति गुरुत्वे न व्यभिचारः । तत्र यद्यपि द्वीन्द्रियग्राह्यगुणत्वव्याप्यजातिराहित्यं विशेष्यदलं तिष्ठति तथापि प्रत्यक्षगुणत्वव्याप्यजातिमत्त्वं गुरुत्वे नास्ति । गुरुत्वस्याप्रत्यक्षत्वात् ।

एवं चेश्वरबुद्धावपि भागासिद्धिर्न भवति । तत्र प्रत्यक्षगुणत्वव्याप्यजातिमत्त्वे सति द्वीन्द्रिग्राह्यगुणत्वव्याप्यजातिरहितत्वं हेतुस्तिष्ठति । साध्यमपि विशेष्यगुणत्वं तिष्ठति । ईश्वरबुद्धौ च प्रत्यक्षगुणत्वव्याप्यजातिर्ज्ञानत्वरूपाऽस्ति । भागासिद्धिर्नाम पदस्यैकेदेशे हेतोरवर्तनमिति ।

ननु प्रत्यक्षगुणत्वव्याप्यजातिमत्त्वादित्येव हेतुः, कर्तव्य इति चेत्, न । तथा सति संयोगादौ व्यभिचारः स्यात् । संयोगे प्रत्यक्षगुणत्वव्याप्य जाति[3]संयोगत्वं वर्तते । तत्र विशेष्यगुणत्वरूपं साध्यं नास्तीति व्यभिचारः स्यात् । [4]तद्वारणाय द्वीन्द्रियेत्यादि न विशेष्यदलम् । संयोगस्यापि द्वीन्द्रियगुणग्रहणयोग्यतावत्त्वात् । तथा च तत्र न व्यभिचारः ।

एवं गुणत्वेति मूले च **गुणत्वे** इति विशेषणं दत्तमस्ति तदपि न दातव्यम् । तद् दानं च घटादौ व्यभिचारवारणार्थम् । प्रत्यक्षेत्यादि घटादौ व्यभिचार एव न भवति । तत्र

१. B गुणत्वारूपा. २. B omits व्यभिचारः । ३. B -संयोगत्वरूपत्वं. ४. B omits the reading between तद्वारणाय....विशेष्यदलम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रत्यक्षगुणत्वव्याप्यजातिमत्त्वाभावात् । तत्र गुणत्वाभावेन तद्व्याप्यजातिमत्वाभावात् । **न च धर्मादाविति** धर्माधर्मादौ प्रत्यक्षगुणत्वव्याप्या जातिर्नास्ति । धर्मत्वाधर्मत्वयोरप्रत्यक्षत्वात् [१]भागासिद्धिः । पक्षैकदेशे हेतोरभावादित्यर्थः । अपक्षत्वादितः तथा च बुद्ध्यादीनामिच्छान्तानामेव पक्षत्वमत एव सिद्धम् । बुद्ध्यादयो विशेषगुणाः, प्रत्यक्षगुणत्वव्याप्यजातिमत्त्वे सति द्वीन्द्रियग्राह्यगुणत्वव्याप्यजातिरहितत्वात्, रूपवदिति । बुद्ध्यादीनामनेनानुमानेन विशेषगुणत्वं सिद्धम् । इतः परं कैश्चित् द्रव्याश्रितत्त्वं बुद्ध्यादीनां साध्यते । इत्याह-**प्रयोगश्चेतीति** । **अत्रेति अनुमानखण्डे** व्यतिरेकग्रन्थे यथा बुद्ध्यादयः । इत्यनुमानेन किञ्चिद् द्रव्यं बुद्ध्यादीनामाश्रयत्वेन सिद्धम् । तदेव पक्षः ।

तथा च तद्द्रव्यमष्टद्रव्याणि पृथिव्यादिमनःपर्यन्तान्यात्मानं विहाय-तदतिरिक्तत्वं पृथिव्याद्यष्टद्रव्यतिरिक्तत्वम् । तत्र बुद्धाश्रय साध्यते । केन ? तदवृत्तित्वरूपेण हेतुना । तथा च-'बुद्ध्याश्रयीभूतं द्रव्यमष्टद्रव्यातिरिक्तम्, तदवृत्तित्वरूपेणाष्टद्रव्यावृत्तिधर्मवृत्तित्वात्; गुणवत् ।' गुणे हि अष्टद्रव्यावृत्ति गुणात्वरूपधर्मत्वं वर्तते । अष्टद्रव्यातिरिक्तत्वरूपं साध्यमप्यस्ति । तथा चानेनानुमानेनाष्टद्रव्यातिरिक्तं द्रव्यं सिद्धम् । द्रव्यत्वेन रूपेणेदानीं व्यतिरेक्ययनुमानेनात्मप्रकारकबोधविषयीभूतं द्रव्यं साधयति । **तदाश्रितेति**-आत्माश्रितत्वम् । तथा च मूले प्रयोगः । यथा हेतुः-यथा पृथिव्याद्यष्टद्रव्याश्रितत्वे सति गुणत्वात् । सत्यन्ततादाने रूपे व्यभिचारः । रूपत्वादौ व्यभिचारवारणार्थं गुणत्वादिति भावः । शब्दसाम्ये[ने]ति अन्वयव्यतिरेकिकेवलव्यतिरेकिणोः शब्दसाम्यं पञ्चम्यादिरूपम् ।

गौरवमिति तथा चात्मनो यदि मध्यमं परिमाणवत्त्वं तदाऽनेन हेतुनाऽनित्यत्वं - एतदेव गौरवमित्यर्थः ।

एवं [२]चात्मनि उत्पत्तिः कल्पनीया । समवायिकारणादिकल्पनायां गौरवमिति भावः । **एकस्मिन्निति** - तथैकस्मिन्नेवात्मनि एकस्मिन्नेव काले सुखदुःखयोरनुत्पादेनानयोरेककालावच्छेदेनानुभवो न सम्भवतीति[३] ।

(II) शरीरलक्षणे भोगः ।

यथाश्रुतं मूलोक्तं भोगलक्षणं न सम्भवतीति टीकार्थः । यद्युच्यते 'एकतरानुभवो भोगः'-इति, तदा च प्रत्येकमव्याप्तिः । तथा चोभयथाऽपि मूलोक्तं भोगलक्षणं दुष्टमेवेति मनसि कृत्वाऽन्यथा भोगलक्षणं करोति-**साक्षात्कारसामग्रीति** साक्षात्कारस्य या सामग्री, तत्र निविष्टो यो पदार्थः, तन्निष्ठो यो धर्मो निविष्टितरूपः, तद्व्याप्या योत्पत्तिः, तद्व्याप्या या गुणत्वव्याप्या जातिः, [४]तद्द्वयेन धर्मेण

---

१. B भागासिद्धेः । २. A चात्मनः. ३. B omits इति. ४. B सा द्वयेन.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सुखदुःखानुगमं कृत्वा, [1]तदीयो सुखदुःखीयो यो लौकिकसाक्षात्कारः स एव भोग इति भोगलक्षणम्।

तथा च प्रकृते साक्षात्कारसामग्री सुखदुःखस्वरूपा। एतत्साक्षात्कारं प्रति विषयत्वेनानयोरपि कारणत्वात्। तस्यां सामग्र्यां निविष्टो यो पदार्थः विषयतारूपः, तन्निष्ठो यो धर्मः विषयतारूपः, तद् व्याप्या योत्पत्तिः सुखदुःखयोः साक्षात्कार[2] विषयनिष्ठा यथा यत्र यत्र सुखदुःखनिरूपितविषयत्वं तत्र तत्र विषयत्वसम्बन्धेन सुखदुखयोः साक्षात्कारोत्पत्तिः। इयमुत्पत्तिः सुखदुःख निष्ठा(ष्ठ) ज्ञानस्योत्पत्तिः।

तथापि या गुणत्वसाक्षाद्व्याप्या जातिः सुखदुःखत्वरूपा तद्द्वित्वेन सुखदुःखयोरनुगमः। तथा चानेन रूपेण सुखदुःखयोर्लौकिकसाक्षात्कारः सुखदुःखानुभवो मानसरूपो स एव भोग इत्यर्थः।

लौकिकेति यदि लौकिकपदं न दीयते तदाऽतीतं यद् सुखदुःखादिकं तदनुभवोऽपि भोगः स्यात्। तस्यापि ज्ञाने(नं) सामान्यलक्षणप्रत्यासत्तिप्रवृत्त्या वर्तते इति तद्वारणार्थं लौकिक पदम्। तथा च लौकिकसन्निकर्षजन्यो यः साक्षात्कार [रूपः]पक्षः [स]एव सुखदुःखविषयको ग्राह्यः। **सुखादिति** तथा च साक्षात्कारसामग्रीनिविष्टता व्याप्योत्पत्तिमत्त्वमात्रेणैव यद्यनुगमः क्रियते तदा ज्ञानविशेष्टोऽतिव्याप्ति र्भवति। यथा कस्यचिद् घटविषयकं ज्ञानं जातं यथा घटोऽयमिति तस्य च सामग्री घटेऽपि भवति। तन्निविष्टो धर्मो घटनिरूपितविषयितारूपो घटविषयकज्ञाने, तस्य व्याप्या योत्पत्तिः एतज्ज्ञाननिष्ठैव। तथा चैतत्ज्ञानस्याप्यनेन धर्मेणानुगमो वृत्तः। तेन यथा सुखदुःखानुभवो भोगो भवति तथा[3] एतज्ज्ञानानुभवोऽपि भोगः स्यात्। तद्वारणार्थं व्याप्यगुणत्व साक्षाद्व्याप्यजाति-मत्त्वम्। तथा चैतज्ज्ञानत्वं तु गुणत्वसाक्षाद्व्याप्या जाति र्न भवति ज्ञानत्वरूपा तस्य तथा चानेन द्वितीयभागेन ज्ञानविशेषवारणं वृत्तम्।

ननु गुणत्वसाक्षाद्[4]व्याप्यत्वं कस्य विशेषणम्: यद्युच्यते उत्पत्तेः, तदाऽसम्भवः; यथोत्पत्तेर्घटादावपि वर्तमानत्वात्, यत्र च गुणत्वसाक्षाद् व्याप्यजातिमत्त्वं नास्ति। ततो गुणत्वसाक्षाद्व्याप्यत्वमुत्पत्ति-व्याप्यजातेर्विशेषणम्। [5]सुखदुःखनिष्ठैव ज्ञानस्य योत्पत्तिस्तस्यां व्याप्या या जातिस्तस्यां विशेषणम्। तथा च प्रतिशरीरं विजातीयं ज्ञानमुत्पद्यते। यत्र शरीरं विशेष्ये सुखघटादिसमूहालम्बनात्मकं ज्ञानं वृत्तम्, तद्विषयता यथा सुखे वर्तते तथा घटेऽपि वर्तते। तद्व्याप्योत्पत्तिः सुखघटनिष्ठा, तद्व्याप्या या जातिः, सुखत्वं घटत्वं वा, तदवच्छिन्नानुभवो भोग इति पर्यवसन्नम्।

तदा घटविषयकज्ञानेऽपि अतिव्याप्तिरेवेति। तद्वारणार्थं गुणत्वसाक्षाद्व्याप्यत्वं [6]जातेर्विशेषणं न तूत्पत्तेः। एतदुपरि शङ्कते-**यदीति** एतादृशं ज्ञानं नोत्पद्यते। यथाऽहं सुखी तथाऽहं[7] घटीतिः

१. B तदा. २. B साक्षात्कारनिष्ठा. ३. B यथा. ४. B साध्यव्याप्या (?)- ५. B सुखदुःखेति तथैव ज्ञानस्य. ६. B विशेषणं कृत्यं न तू. ७. A omits ऽहं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कस्याप्यनुभवो नास्ति । तदा गुणत्वसाक्षाद्व्याप्यत्वं न दातव्यमेव, किन्तु गुणत्वव्याप्य-जातिमत्त्वमेवेति ।

तथा च सुखदुखोभयनिष्ठ एकोऽनुगतो धर्मः समानीतः । तेन धर्मेण तथाविधोऽनुभवो वाच्यः । अथवा लाघवात् सुखदुःखान्यत्वमेवानुगतो धर्मो ग्राह्यः । अथवा सुखत्वाभाव[१]विशिष्टदुःख-त्वाभावाभावरूपोऽनुगतो धर्मः । अयं च धर्मो विशिष्टाभावरूपः सुखदुःखोभयनिष्ठ एवेति ध्येयम् ।

(III) शरीरम् ।

शरीरावयव इति शरीरस्य लक्षणं **मूलकृता** कृतम् । यदवच्छिन्नोऽऽत्मनि सुखदुःखान्यतरानुभवो जायते तदेव शरीरमिति । शरीरावयवे [२]हस्तादावतिव्याप्तं हस्ताद्यवच्छेदेनापि सुखदुःखाद्यनुभवात् । तद्धारणार्थमन्त्यावयवपदम् । तथापि मृतशरीरमन्त्यावयवित्वं वर्तते । कार्यद्रव्यानारम्भकत्वात् । परं तदनवच्छेदेन भोगो न जाय[ते]इत्यव्याप्तिः । **न चेति** - प्राक्कालावच्छेदेन तस्यापि भोगायतनमस्तीति नाव्याप्तिरित्युद्धारः । तथाप्यव्याप्तिं दृढयति- **परिणामभेदेनेति** । तथा च मृतशरीरस्य प्राक्कालावच्छेदेनापि भोगायतनत्वं नास्त्येव । पूर्वकालीनशरीरापेक्षया मृतशरीरस्य भिन्नत्वात् । तत्र हेतुपरिणामभेदेन कार्यभेदस्वीकारात् । ततो मरणोत्तरक्षणे मृतशरीरं परिमाणा(णामा)न्तरेणोपचितं वा भविष्यतीति । तत्र भोगायतनत्वा-भावादव्याप्तिरेवेत्याशङ्क्यार्थः ।

विवक्षां करोति-**प्रयत्नेति** प्रयत्नस्य कारणीभूतो यो मनःसंयोगस्तद्वृत्तिर्वर्तते या जातिः सैवान्त्यावयविमात्रवृत्तिर्या जातिः, [३]तद्वत्त्वं शरी[र]लक्षणम् । प्रयत्नकारणीभूतो मनःसंयोगः-शरीरमनःसंयोगः तदाश्रयीभूतं भवति शरीरम्, तद्वृत्तिर्या जातिः शरीरत्वलक्षणं[४], सा चान्त्यावयविमात्रवृत्तिरपि भवति । तद्वत्त्वं शरीरमात्रे[५] तिष्ठतीति लक्षणार्थः ।

ननु मनस्यव्याप्तिरिति चेत्, न । अन्त्यावयविपदेनैव तस्य वारणात् । मनसोऽवयवित्वाभावात् । मृतशरीरेऽपीदं लक्षणं गच्छति । तत्साधारण्यार्थमेवेयं विवक्षा । प्रयत्नकारणीभूतोऽस्मदादिशरीरमनः संयोगः । तदाश्रयोऽस्मदादिशरीरम् । तद्वृत्तित्वे सत्यन्तावयविमात्रवृत्तिर्जाति र्भवति । य[त्]शरीरत्वं यथाऽऽस्मदादिशरीरे वर्तते तथा मृतशरीरेऽपि शरीरत्वजातिसत्त्वात् साधारण्यम् ।

घटादाविति प्रयत्नकारणीभूतमनःसंयोगवत् वृत्तीति भागो घटादावतिव्याप्तिवारणार्थम् । अन्त्यावयविमात्रवृत्तिर्जातिर्घटत्वरूपा तत्राप्यस्तीत्यतिव्याप्तिः । यद्यपि पण्डमनःसंयोगो घटादिषु वर्तते तथापि सः प्रयत्नकारणीभूतो न भवतीति ।

---

१. B -निष्ठ. २. B omits हस्तादावतिव्याप्तं. ३. B तद्वत्तं. ४. B शरीरलक्षणा. ५. B शरीरलक्षणे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पृथिवीत्वादिनेति - यदि मात्रपदं न दीयते तदा पृथिव्यादावतिव्याप्तिः । प्रयत्नकारणीभूतो भवति शरीरमनःसंयोगः । तदाश्रयीभूतं भवति शरीरम् । अन्त्यावयविवृत्तिर्जातिस्तद्वृत्तिशरीरवृत्तिः भवति पृथिवीत्वम् । तद्वत्त्वं पृथिवीमात्रे तिष्ठतीत्यतिव्याप्ति । एवं जलत्वद्रव्यत्वादिकमादायातिव्याप्ति बोध्या । मात्रपदे दत्ते तु पृथिवीत्वादिकं चान्त्यावयविमात्रवृत्ति र्न भवति । तस्य कपालद्वयादावपि वर्तमानत्वात् । **पण्डेति** स्पष्टम् ।

ननु शरीरत्वं न जातिः, जातिसाङ्कर्यात्, तथाहि, पृथिवीत्वादिनेति चेत्, न । जातिशब्देनात्रोपाधिविवक्षितः । अथवा शरीरत्वं जातिरेव । सुखकारणतावच्छेदकत्वेन जातिसिद्धिः । न च जातिसाङ्कर्यमिति वाच्यम् । जातिसङ्करस्तु दोषस्तत्र भवति यत्र च [न ?]कोऽपि अनुकूलतर्को भवति । यथा भूतत्वमूर्तत्वस्थले । प्रकृते च कार्यकारणभाव एवानुकूलतर्कस्तिष्ठति । यदि चानुकूलतर्के कार्यकारणभावे विद्यमाने जातिसाङ्कर्याज्जाति र्न सिध्यति तदा [१]पृथिवीत्वादेरपि जातित्वं न सिध्येत् । शरीरत्वेन समं पृथिवीत्वस्यापि सङ्करात् । तत्र यदि कार्यकारणभावरूपानुकूलतर्केण पृथिवीत्वरूपा जाति र्गन्धासमवायिकारणतावच्छेदकत्वेन स्वीक्रियते तदा प्रकृतेऽपि सुखादिकारणतावच्छेदकत्वेन शरीरत्वं जातिः सिद्ध्यतीति । तथा चोभयत्र विनिगमनाविरहा(त)जातिस्त्वस्तीति दिक् । भूतत्वजातिसाधनेऽनुकूलतर्कः कोऽपि नास्ति । तेन मूर्तत्वेन समं सङ्करः । मूर्तत्वं च जातिरेव । स्यन्दसमवायिकारणताऽवच्छेदकत्वेनेति ज्ञेयम्।

चेष्टावदिति - चेष्टावति वृत्तिर्याऽन्त्यावयविमात्रवृत्तिर्जाति र्भवति, तद्वत्त्वं शरीरत्वम् । मृतशरीरसंग्रहार्थमिदम् । यथा चेष्टावति शरीरेऽन्त्यावयविमात्रवृत्तिर्जातिः, शरीरत्वं तद्वत्त्वं च शरीरमात्रे वर्तते इति कृत्वा तदपि लक्षणमेव । मात्रपदं च घटादावतिव्याप्तिवारणार्थम् । तत्रापि पृथिवीत्वजातिसत्त्वात् । अन्त्यावयिवपदं च हस्ताद्यवयवेऽतिव्याप्तिवारणार्थम् । जातिघटितं च लक्षणं मृतशरीरसंग्रहार्थम् । [२]अत्र चेष्टाश्रयं शरीरमिति शरीरलक्षणे कृते घटादावतिव्याप्तिः । तत्रापि चेष्टाशब्देन क्रिया तदाश्रयत्वं घटादावप्यस्तीति **मूलकारो**ऽन्यथा व्याचष्टे-**चेष्टत्वेति** -न **त्विति** तथा चोक्तक्रियाश्रये घटादौ हिताहितप्राप्तिरिहारौ न सम्भवतः । तयोरात्मधर्मत्वात् । क्रियान्तरेणेष्टसाधनता[३] ज्ञानरूपेणाहितमनिष्टसाधनताऽज्ञानरूपेणाहितम् । ततो यथा घटादौ तौ सम्भवतः तथा शरीरेऽपि न सम्भवति (तः) इत्याशङ्कार्थः । चेष्टात्वं जातिः शरीरनिष्ठकर्मवृत्तिः कर्मत्वव्याप्याजातिः । अथवा चेष्टात्वमुपाधिरित्याह-**प्रयत्नवदिति** - प्रयत्नवानात्मा, तस्य संयोगः आत्ममनःसंयोगः स एवासमवायिकारणं यस्यां क्रियायाः, त[द्व]त्त्वमेव चेष्टात्वम् । एवं च[४] शरीरनिष्ठा या क्रियाचेष्टा, तां प्रत्यात्ममनःसंयोगोऽप्यसमवायिकारणं भवतीत्यर्थः । एवं चेष्टात्वं क्रियात्वव्याप्यजातिविशेष उपाधिविशेषो वा ।

१. B अष्टपृथिवीत्वा.. २. B पूर्वमत्र. ३. B -साधनतारूपेणाहि. ४. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(IV) इन्द्रियम् ।

कालादाविति - तस्यापि कालस्यापि व्यापारवत्त्वेन शरीरेन्द्रियसंयोगवत्त्वेनेन्द्रियापत्तिः । कालस्य [१]जगदाधारत्वात् । दूषणान्तरमपीन्द्रियलक्षणे ददाति-**सन्निकर्षेति** - अन्यथा ज्ञानकारणमतीन्द्रियमित्युच्यमाने इन्द्रियसन्निकर्षेऽतिव्याप्तिः । इन्द्रियसन्निकर्षस्यापि ज्ञानकारणत्वे सतीन्द्रियत्वात् । तद्वारणार्थं संयुक्तेत्यादिकमेव वक्तव्यम् । न तु तद्वारणार्थं शरीरपदमपि देयमिन्द्रियसन्निकर्षस्य तु संयुक्तपदेनैव वारणादित्वाशङ्क्यार्थ

स्वयमिन्द्रियलक्षणमाह-**स्मृत्यजनकेति** स्मृत्यजनको यो ज्ञानकारणीभूतो मनःसंयोगः तदाश्रयत्वमिन्द्रियत्वम् । यथा चक्षुषि स्मृत्यजनकीभूतो ज्ञानकारणीभूतो मनःचक्षुसंयोगः तदाश्रयत्वं चक्षुषि मनसि च तिष्ठति । स्मृत्यजनकेतिपदं आत्मन्यतिव्याप्तिवारणार्थम् । अन्यथाज्ञानकारणमनःसंयोगाश्रयत्वमात्मनोऽपि तिष्ठति । आत्मन्यपि मनःसंयोगस्य सत्त्वात् ।

ज्ञानकारणेति - पदकृत्यं यथा **घटादेरिति** - अन्यथा स्मृत्यजनको यो मनःसंयोगः पण्डमनः संयोगः, तदाश्रयत्वं घटादेरप्यस्तीति तद्वारणार्थं ज्ञानकारणेति पदम् ।

तदसाधारणेति -गन्धस्य यदि साधारणमुपलब्धिकारणं तदेव घ्राणम् । मनसस्तु साधारण्येन ज्ञानकारणत्वमिति न तत्रातिव्याप्तिः । **गन्धग्राहकत्वमिति** तथा च-'घ्राणेन्द्रियं गन्धवत्, गन्धोपलब्धिमात्रसाधनत्वात्[२], घटवत्' । मात्रपदं मनसि व्यभिचारवारणार्थम् । सम्पूर्णोऽपि हेतुः । घ्राणेन्द्रियेण सह गन्धस्य यः संयुक्तसमवायः तत्र व्यभिचारवारणार्थं प्रकारान्तरं वक्ष्यमाणमाह-**अनुमानं चेत्थमिति सामान्यत** इति । अन्वयव्याप्तौ दृष्टान्ताभावात् व्यतिरेकव्याप्तिरेवेत्यर्थः ।

मध्यान्तमिति - रूपादिषु पञ्चसु मध्य इति रूपत्वादीनां प्रति चक्षुरादीनामभिव्यञ्जकसत्त्वात् । [३]तथा च मध्यपदानुपादाने एवकारार्थो न सम्भवतीति मध्यपदग्रहणम् । ननु रूपादिषु पञ्चसु मध्ये इति पदस्याप्रसिद्धिवारकत्वेन व्यर्थतां शङ्कते **अप्रसिद्धवारकमिति** तथा च चक्षुरिन्द्रियस्य रूपमात्रमभिव्यञ्जकत्वं नास्ति । रूपत्वस्याप्यभिव्यञ्जकत्वात्-इत्यप्रसिद्धः । रूपमात्रस्य ज्ञानजनकं किमपि नास्ति । चक्षुषा रूपत्वघटादेरपि ज्ञानं जन्यते । ततो रूपमात्राभिव्यञ्जकमप्रसिद्धम् । तद्वारणार्थं च रूपादिषु पञ्चसु मध्ये इत्युक्तम् । तथा च व्याप्तिग्रहोपायिकत्वेन यथा व्यभिचारवारकं पदं सार्थकं भवति तथा च प्रसिद्धवारकं पदमपि सार्थकं भवति । तथा च यथाऽऽश्रयासिद्धिवारणार्थं व्याप्तिग्रहोपायिकत्वेन दत्तं पदं सार्थकं भवति तथा च स्वरूपासिद्धिवारणार्थमपि पदं सार्थकं भवति । प्रकृते तु मध्यान्तपदानुपादाने स्वरूपासिद्ध एव हेतुः स्यात् । तद्वारणार्थं मध्यान्तपदोपादानम् । एतदेव मनसि कृत्वाऽऽह-**अप्रसिद्ध वारकमिति - नियमेति । रूपस्यैवेति** । नियमो यदि न दीयते तदा

१. B जगदाधारात्. २. B omits मात्र. ३. B omits the reading between तथा च.....शङ्कते.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मनसो रूपाभिव्यञ्जकत्वाद् व्यभिचारः स्यादित्यर्थः । **सन्निकर्षे चेति** – तथा च द्रव्यपदं यदि न दीयते तदा चक्षुरिन्द्रियनिरूपितरूपेण समं यः संयुक्तसमवायलक्षणसन्निकर्षः तस्यापि रूपमात्राभिव्यञ्जकत्वं वर्तत एव । इति हेतुसत्त्वे साध्यं नास्तीति व्यभिचारः स्यात् । तथा च व्यभिचारवारणार्थं द्रव्यपदम् । सन्निकर्षे च द्रव्यत्वाभावान्न व्यभिचार इति भावः।

शब्दग्राहकत्वमिति – देहादिनेति देहस्यापि शब्दग्राहकत्वं नाम शब्दज्ञानजनकत्वम् । तथा च देहे शब्दज्ञानजनकत्वरूपो हेतुरस्ति । श्रोत्रेन्द्रियत्वं नास्तीति व्यभिचारः । यदि च शब्दज्ञानासाधारणकारणत्वमुच्यते, [1]तदा शब्देन सह श्रोत्रेन्द्रियसन्निकर्षे व्यभिचारः । तत्रापि शब्दज्ञानासाधारणकारणत्वरूपो हेतुरस्ति । साध्यं च शब्दत्वं नास्तीति व्यभिचारवारणार्थमिन्द्रियत्वं द्रव्यत्वं वा हेतौ विशेषणं देयमित्याह **द्रव्यत्वेत्यादि** तथा च शब्दज्ञानसाधारणकारणद्रव्यत्वात् शब्दज्ञानासाधारणकारणेन्द्रियत्वाद्वा हेतुः पर्यवसन्नः इति ।

विशेषणेऽन्वयदृष्टान्तो नास्तीति सामान्यव्याप्तिमाह-सामान्यव्याप्तिं **मूलकार** स्वयमाह-**यदेकमात्रेति ।** मनःसाधनाय प्रकारमाह-**सुखाद्युपलब्धय** इति । **सुखेति ।** सुखस्य यः लौकिकः साक्षात्कारः संयुक्तसमवायसन्निकर्षजन्यः, तस्य यत्साधनं तन्मनः । यथाश्रुते चात्मन्यतिव्याप्तिः । तस्यात्मनोऽपि सुखं साक्षात्कारजनकत्वमस्त्येव । तद्वारणार्थमसाधारणपदं देयमेव । यदि लौकिकपदं न दीयते, तदा चक्षुरिन्द्रियेण तत्सुखविषयकं सामान्यलक्षणप्रत्यासत्त्याः गुणत्वरूपायाः ज्ञानं जन्यते । तदा चक्षुरिन्द्रियेऽतिव्याप्तिः । तद्वारणार्थं लौकिकपदं[2] देयम् । सामान्यलक्षणत्वाल्लौकिकी शरीरादिनेति। अन्यथा सुखाद्युपलक्ष्यो (लब्धयोः)ऽ[3]साधारणकारणसाध्या इत्यत्र यद्यसाधारणपदं न दीयते तदा शरीरमादायार्थान्तरता । शरीरमेव करणं भविष्यति । मनःसिद्धि र्न[4] भविष्यति । तथा च शरीरस्यासाधारणकारणत्वाभावान्नार्थान्तरता ।

(V) अर्थाः ।

तेनापीति तथा च यथा प्रमाणादयः पदार्थाः सर्वे यथा [5]यद्यपि प्रमेयमध्येऽन्तर्भव[न्]ति, तथापि तत्त्वज्ञानोपयोगत्वेन पृथक् निरुपिता इत्यर्थः ।

[१७] अर्थप्रकरणे द्रव्यनिरूपणम् ॥

कार्यसमवायीति[6] कार्यस्य यत् समवायिकार्यं निरूपितसमवायिवत् तदेव [6]द्रव्यम् । शेषं स्पष्टम् । **अत्रैवकारेति** । न चैवं द्रव्याणीत्यत्र 'एव'कारो विशेष्यसङ्गतः । विशेष्यपदं द्रव्यरूपम्, तत्सङ्गत एवकारः । तथा च द्रव्यान्ययोगव्यवच्छेदरूपो योऽर्थः स [7]एवकारेण बोध्यते । तथा च

१. B तदा श्रोत्रेन्द्रियसन्निकर्षो. २. B लौकिकमिति पदं. ३. B –ऽसाधारणकरण. ४. B अद्यापि. ५. It is कार्यसमवाय in त.भा.प्र. ६. B द्दष्टम् (!).

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

द्रव्याण्येव नव इत्यर्थः । ततो द्रव्यातिरिक्तेन समं योगःसम्बन्धः एवकारेण व्यवच्छिद्यते । तेन द्रव्यातिरिक्तो योऽन्धकारः पदार्थः तेन समं सम्बन्धः व्यवच्छेदः ।

अन्यथेति । यदि विशेषणसङ्गात् एवकारो विधीयते,-विशेषणं च नवरूपं तत्सङ्गतो यद्येवकारो विधीयते-यथा द्रव्याणि नवैवेत्यर्थो बोध्यते तथा[१] [२]चायोगव्यवच्छेदार्थो बोध्यते । अयोगश्च द्रव्यत्वाश्रयेण समं योऽयोग[३]सम्बन्धाभावस्तस्य यो व्यवच्छेदः तत्प्रतीयते । यथा द्रव्यत्वाश्रये सर्वत्र द्रव्यत्वायोगव्यवच्छेदो वर्तते द्रव्यत्वायोगगुणादौ तस्य व्यवच्छेदो द्रव्यत्वाश्रये । व्यवच्छेदो नाम अत्यन्ताभावः । तेन सुवर्णं नवद्रव्यातिरिक्तं द्रव्यं न भवति । नवातिरिक्ते पदार्थ द्रव्यत्वव्यवच्छेद एव कारेण बोध्यते इत्यर्थः । तथा च विशेष्यसङ्गतो विशेषणसङ्गतो वा, उभयथाऽप्येवकारार्थः सम्भवतीति भावः ।

तथा चात्रायं प्रघट्टः-विशेष्यसङ्गत एवकारोऽन्ययोग्यव्यवच्छेदार्थको भवति । यथा पार्थ एव धनुर्धरः इत्यत्र विशेष्यं भवति पार्थः । तत्सङ्गतेन एवकारेणान्ययोगव्यवच्छेदो बोध्यते । यथा पार्थादन्यो धनुर्धरो नास्ति । यथा पार्थातिरिक्तेन समं यो धनुर्धरत्वस्य सम्बन्धः, तस्य व्यवच्छेद एवकारेण बोध्यते पार्थादन्यस्मिन् पदार्थे धनुर्धरत्वं नास्ति । धनुर्धरत्वस्य पार्थादन्यस्मिन्नत्यन्ताभावो बोध्यते । अयं विशेषसङ्गत एवकारार्थः । विशेषसङ्गत[४] एवकारस्तु पृथिवीव्यामेव गन्धः । अत्र पृथिव्या सप्तम्यन्तत्वाद् विशेष्य(षण) त्वम्, प्रथमान्तस्यैव विशेष्यत्वात् । विशेषणसङ्गत एवकारोऽयोगव्यवच्छेदार्थको भवति तथा च पृथिव्यां गन्धस्य योऽयोगः पृथिव्याऽन्यजलादौ प्रसिद्धः, तद्व्यवच्छेदःतस्यात्यन्ताभाव तथा च गन्धात्यन्ताभावाभावः पृथिव्यामेव वर्तते इति विशेषणसङ्गत एवकारो बोध्यते ।

क्रियासङ्गत एवकारस्तु-अत्यन्तायोगव्यवच्छेदार्थकः । यथा नीलं सरोजं भवत्येव । अत्र क्रियासङ्गतएवकारोऽत्यन्तायोगव्यवच्छेदकं बोधयति । यथा सरोजेन सममत्यन्तानीलायोगः । तस्य व्यवच्छेदं बोधयति-यथा सरोजे नीलायोगाभाव [५]अत्रार्थादयोगव्यवच्छेदार्थ-एवकार इति । यथा विशेषण सङ्गत एवकारेऽयोगव्यवच्छेदार्थः तथाऽयमपीति सङ्गत एवकारेऽयोगव्यवच्छेदार्थः तथाऽयमपीति । तथा च एवकारस्यार्थद्वयमेव । [६]यथा एकोऽन्ययोगाव्यवच्छेदः, एकोऽयोग-व्यवच्छेदः । क्रियासङ्गातस्य द्वितीये एवान्तर्भाव इति । अत्यन्तायोगव्यवच्छेदस्तु अयोग-व्यवच्छेदापेक्षयाऽतिरिक्तो न भवति ।

वस्तुतस्तु एवकारस्यात्यन्ताभावोऽन्योन्याभावो वाऽर्थः । लाघवादन्योन्याभाव एवार्थः । 'पार्थ एव धनुर्धर' इत्यत्र पार्थपदेन लक्षणया पार्थान्यपदार्थो बोध्यते । एवकारेण च पार्थान्यस्य

---

१. A तदा. २. B चायोग्यव्यव०. ३. B योऽयोग्यः. ४. B -सङ्गतस्त्वेवकारः पृथि०. ५. B नीलायोग्या०. ६. B तथा.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यवच्छेदोऽन्योन्याभावो बोध्यते । तथा च पार्थप्रतियोगिकान्योन्याभाववान् धनुर्धर इति शब्दबोधःजायते । यद्यत्यन्ताभावस्तदा गौरवम् । यथा पार्थान्यथाव्यवच्छिन्नप्रतियोगिकात्यन्ताभावो वाच्यस्तथा चावच्छेदकावच्छेद्य प्रवेशेन गौरवमिति ।

सर्वत्र एवकारस्यार्थोऽन्योन्याभावोऽत्यन्ताभावो वेति **नवीनाः** । **जीर्णमते** त्वन्ययोग-व्यवच्छेदन्त्ययोगव्यवच्छेदोऽयोगव्यवच्छेदो वेत्यर्थत्रयः एतत्कल्पने गौरवमेव दोषः । वस्तुतस्त्वन्ययोगव्यवच्छेदो वक्तुं न शक्यते । यथा पार्थ एव धनुर्धर पार्थान्यो यो पदार्थः प्रमेयत्वादिरूपः, तस्य यो योगस्तस्य व्यवच्छेदो धनुर्धरे नास्ति । धनुर्धरोऽपि प्रमेयत्वस्य सत्त्वात् । न च पार्थान्यपदार्थो व्यतिरेकीधर्मो ग्राह्य इति वाच्यम् । पार्थान्यस्य पदार्थस्य [१]द्रव्यत्वव्यतिरेकित्वेनापि तद्योगव्यवच्छेदोऽपि धनुर्धरे नास्ति । न च पार्थान्यपुरुषादौ धनुर्धरत्वयोगव्यवच्छेद इति वाच्यम् । पार्थान्यस्मिन्नपि पदार्थे केनचित्सम्बन्धेन यथैकज्ञानदिसम्बन्धेन यथा धनुर्धरत्व पुरुषाव(वि)ति समूहालम्बनात्मकमृतद्विषयता च धनुर्धरत्वे पार्थान्यस्मिन् पुरुषे तिष्ठतीति । तथा चानेन सम्बन्धेन पार्थादन्यस्मिन्नपि पदार्थेऽनेन धनुर्धरस्य सत्त्वादेवकारेण पार्थान्यस्मिन्पदार्थे धनुर्धरत्वस्यात्यन्ताभावो कथं बोधनीय इति । अपि च पार्थादन्यस्मिन्पदार्थे यद्येवकारेण धनुर्धरत्वात्यन्ताभावो बोध्यते तदा न धनुर्धरत्वेन रूपेण धनुर्धरत्वज्ञानमपेक्ष्यते । तथा च गौरवम् । तथा च एवकारस्यान्योन्या-भावोऽत्यन्ताभावो वाऽर्थः । तेन पार्थ एव धनुर्धर इत्यत्र पार्थपदेन लक्षणया पार्थान्यपदार्थो बोधितः[२]। तत्प्रतियोगिकोऽन्योन्याभावः स एवकारेण बोध्यते । पार्थान्यो **घटसर्वः** तत्प्रतियोगिको योऽन्योन्याभावः तद्वान् धनुर्धर एकस्य पार्थस्यान्योन्याभावो नास्ति अन्यस्य सर्वस्य विश्वस्यान्योन्याभावोऽस्तीत्येवर्थ इति दिक् ।

तथा च प्रकृते द्रव्यादौ नवातिरिक्तयोगव्यवच्छेदो बोध्यते । तथा च नवद्रव्यातिरिक्त प्रतियोगिकान्योन्याभावो द्रव्येषु एवकारेण बोध्यते तथा चात्यान्ताभावपक्षे नवातिरिक्तो यो पदार्थः गुणादि तदत्यन्ताभाववद् द्रव्यम् । अथान्योन्याभावपक्षे नवातिरिक्तो पदार्थः गुणः, तत्प्रतियोगिकान्योन्याभाववत्, द्रव्यम् द्रव्येषु नवातिरिक्तपदार्थस्य गुणादेरन्योन्याभावः तिष्ठत्येव इत्येवकारेणान्योन्याभावो बोधितः इति लीलावत्याम् । **शिरोमणिव्याख्या** तु **शिरोमणि**कारेण व्याख्यतम् (-ख्याता ?) ।

तथा चान्धकारो द्रव्यत्वयोगव्यवच्छेदो बोधितः । यथा द्रव्येष्वन्धकारान्योन्याभावो बोधित इति अन्धकारस्य द्रव्यत्वसाधकमनुमानमप्रयोजकं वक्तव्यम् । अनुमानं च-'अन्धकारो द्रव्यम्, रूपादिमत्त्वात्, घटादिवद् अत्रानुकूलतर्काभावादप्रयोजकमिति ।

---

१. B द्रव्यादेः. २. B बोध्यते.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(१) पृथिवीनिरूपणे पाकजविचारः ।

पाकजा इति -**यरूपीति**। **नैयायिकः** पिठरपाकवादी भवति। पिठरं नाम अणुद्वयणुकादिः। तथा च **नैयायिको** वदति-अवयविन्यग्निपाको जायते । तेनावयवपाकप्रक्रमेणावयविरूपादिमुत्पाद्यते ।

अयमर्थः - प्रथमे क्षणे पार्थिवपरमाणुषु क्रिया अग्निसंयोगेन रूपादिकमुत्पाद्यते । पुनः द्वितीयक्षणेऽस्मदाद्यदृष्टवशात् आत्मपरमाणुसंयोगेन तेष्वेव परमाणुषु क्रिया जायते । तदनन्तरं क्रियावत्परमाणुभिः समं पूर्वदेशविभागः परमाणूनां तदनन्तरं तेषां परमाणूनां पूर्वदेशसंयोगनाशो जातः। तदनन्तरं परमाण्वन्तरेण समं क्रियावत्परमाणोः संयोगो जातः। तदनन्तरं [1]द्वयणुकमुत्पन्नम्। तदनन्तरं द्वयुकेण परमाणुनिष्ठपाकजरूपादिना द्वयणुकनिष्ठं रूपदिकमुत्पद्यते । एवं द्वयणुकनिष्ठरूपादिना त्रसरेणुनिष्ठं रूपादिकमुत्पद्यते इति नियमस्तु **नैयायिकेन** क्रियते । यतः कदाचित् परमाणुषु पाकः कदाचितवयविनि पाकः ।

नियमवादिनः तु **वैशेषिकाः**। तैरुच्यते-परमाणुष्वेव पाकः । अवयवे(वि)षु च पाकजं रूपं नोत्पद्यते । अवयवरूपक्रमेणैवावयिषु रूपाद्युत्पद्यते । प्रथमतो हि पाकेनाग्निसंयोगेन परमाणुष्वेव रूपरसगंधस्पर्शाः उत्पद्यन्ते । तदनन्तरं परमाणुरूपादिप्रकारेणद्वयणुके रूपादिकमुत्पद्यते । **वैशेषिकाणां** मते घटे रूपरसस्पर्शाः पाकजाः कदापि नोत्पद्यन्ते, किन्त्ववयवरूपाद्यसमवायिकारणका एवावयविनि रूपरसगन्धस्पर्शाः उत्पद्यन्ते इति ।

पीलुपाकवादिनः **वैशेषिकाः**। पीलवः-परमाणुष्वेव पाक इति नियमवादिनः। **नैयायिकाः** चानियमवादिनः। यथा **नैयायिकमते** कदाचिद् घट्यादावपि रूपादय उत्पद्यन्ते, कदाचित् परमाणुष्वेव ।

तथा च तयोर्विवादे विप्रतिपत्तिरिदृशी - तथाहि, घटोऽग्निसंयोगासमवायिकारणरूपवान्, अग्निसंयोगासमवायिकारणरूपवत्त्वं **नैयायिकेन** स तदभावस्तु **वैशेषिकेण** । विस्तरो गुणप्रकरेण पाकजप्रकियायां दर्शयिष्यते । इदमेवाह यद्यपीत्यादिना । उक्तार्थमेतत् ।

(२) तेजोनिरूपणे सुवर्णविचारः ।[2]

पिण्डितमिति चतुर्विधमित्युपलक्षणम् । तदेव हि उपलक्षणमनुक्तस्यापि सौरादितेजसो बोधकम्। **नोद्भूतरूपस्पर्शमिति** यद्यपि सुवर्णं पिण्डितं भवति, तथापि तस्य रूपस्पर्शौ नोद्भूतौ। यतः तेजोरूपं हि शुक्लं भवतीदंतु पीतरूपम्। स्पर्शस्तूष्णतेजस इति ज्ञेयम्। न **गृह्यतेति** सुवर्णं [3]तूद्भूतरूपमुद्भूतस्पर्शम्। युक्तिमाह-यदि सुवर्णमुद्भूतरुपवन्न भवति सुवर्णस्याचाक्षुषत्वमेव स्यात्। महत्त्वसमानाधिकरणोद्भूत रूपवत् एव चाक्षुषत्वनियमात्। तथा च सुवर्णस्य चाक्षुषत्वान्यथानुपपत्त्या

---

१. B द्वयणुके पर. २. Following गोवर्धन, गुणरत्न does not mention आपः. ३. B त्वनुद्भूत.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उद्भूतरूपं कल्पनीयमेव। न च तेजोरूपं सुवर्णविषयं कथं नोपलभ्यत इति वाच्यम्। तत्र यद्यपि उद्भूतं रूपं तिष्ठति तथापि बलवत्सजातीर्याभिभवेन तत्प्रत्यक्षं न जायते। बलवत्उत्कटं यत् सजातीयं रूपत्वं=सजात्या समानजातीयं पृथिवीरुपं तेनाभिभवःप्रतिबन्धः चाक्षुषज्ञानविषयः क्रियते इति सुवर्णे उद्भूतरूपाभावे सुवर्णस्य रूपचाक्षुषत्त्वं[1] न स्यात् तन्निष्ठसङ्ख्यादिकमपि न गृह्यत इति। सङ्ख्या तु प्रत्यक्षपदार्थस्यैव [2]गृह्यते। अन्यथाऽऽकाशादिसङ्ख्यायाः अपि प्रत्यक्षता स्यात्। ततश्चसुवर्णमुद्भूतरूपं न भवत्येव। सजातीयाभिभवान्नोपलभ्यते इति सिद्धान्तः।

नन्विति तथा च यदि सुवर्णरूपमुद्भूतरूपं तदन्यं (तदाऽन्ध)कारे सुवर्णरूपःप्रत्यक्षतापत्तिः। पार्थिवरूपेण त्वन्धकारे सुवर्णरूपप्रत्यक्षस्याभिभवः कर्तुं न शक्यते तदानीं पार्थिवारूपस्याप्रत्यक्षत्वात्। तेनाप्रत्यक्षेण पार्थिवरूपेण कथं प्रत्यक्षस्य सुवर्णस्योद्भूतरूपस्याभिभवः-इत्याशङ्क्या **न चेति** - तथा च व्यञ्जकं स्वतेजोन्तरमुद्भूतरूपप्रत्यक्षं प्रत्यपेक्ष्यते इति तेजोन्ताराभावान्न-सुवर्णमुद्भूतरूपम्।

प्रत्यक्षं निराकरोति-**तेजोन्तरेति** तथा च तेजस उद्भूतरूपं प्रत्यक्षं [3]प्रति तेजोन्तरं न व्यञ्जकम्। उपाधि र्वोद्भूतरूपप्रत्यक्षं प्रत्येव तेजोन्तरमपेक्ष्यते। तथा सुवर्णरूपमप्यद्भूतरूपमेव। अन्यथा सुवर्णस्य चाक्षुषत्वं न स्यादित्युक्तमेवेत्याभासार्थः। **बलवदिति** - पार्थिवरूपेण बलवत्सजातीयेन सुवर्णरूपस्य शुक्लभास्वरस्याभिभवः। तत्प्रत्यक्षं(क्ष)ज्ञानप्रतिबन्धः कृतः। पार्थिवस्पर्शेन चोष्णस्पर्शस्याभिभवः कृतः। अभिभवे बलवत्त्वं प्रत्यक्षमेव। अन्यथा सुवर्णरूपमप्युद्भूतरूपत्वात् प्रत्यक्षमेव स्यादिति भावः।

(३) वायुः।

पृथिव्या[मि]ति मूलम्-वायौ वाति सति[4] योऽयमनुष्णाशीतस्पर्श उपलभ्यते स च विशेषगुणो भवति। एकेन्द्रियमात्रग्राह्यत्वात्। तस्य गुणित्वे सिद्धे गुणी वायुरेव, न पृथिवी। उद्भूतानुष्णाशीतस्पर्शवत्त्वेन पृथिव्याः प्रत्यक्षत्वनियमात्। यत्र हि पृथिव्यामुद्भूतानुष्णाशीतस्पर्शो घटादिस्थले तिष्ठति तत्र चोद्भूतरूपमपि तिष्ठतीति नियमः। तथा सत्ययमनुष्णाशीतस्पर्श उपलभ्यते तस्य गुणी पृथिवी स्यात्। तदोद्भूतरूपवत्त्वेन तस्यापि प्रत्यक्षत्वं स्यात्। ततोऽस्य स्पर्शाश्रयः पृथिवी न भवति। जलादावनुष्णाशीतस्पर्शो नास्त्येवेति परिशेषेण तदाश्रयो वायुः सिद्धः। **नन्विति** वायुरिति शेषः। समाधत्ते **उद्भूतस्पर्शेति**।

---

१. B omits रूप and reads अचा.. २. B भवति। ३. B omits the reading between प्रति.....न व्यञ्जकं. ४. B omits सति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

॥ परमाणुवादः ॥

मूले **क्रियतेति** अस्मदाद्यदृष्टवदात्मसंयोगेनाभिघाताख्येन नोदनाख्येन वा परमाणुषु क्रिया जायते । तदनन्तरं तया क्रियया-कर्मणा परमाणोः पूर्वदेशविभागो जातः । तदनन्तरं तेन विभागेन पूर्वदेशसंयोगस्य नाशः कृतः । तदनन्तरं क्रियोत्पत्यपेक्षया चतुर्थक्षणे परमाण्वन्तरेण समं संयोगो जातः । तदनन्तरं पञ्चमक्षणे द्वयणुकोत्पत्तिर्जायते तदनन्तरमस्मदादयदृष्टवदात्मसंयोगेन द्वयणुके क्रियोत्पादिता । तया क्रियया पूर्वदेशविभागः कृतः । तदनन्तरं[1] तेन विभागेन पूर्वदेशसंयोगनाशः कृतः । तदनन्तरं द्वयणुकान्तरेण सममेतद् द्वयणुकस्य संयोगो जातः । तदनन्तरं त्र्यणुकोत्पत्तिः । [2]इत्येवं क्रमेणाग्रेऽपि ।

ननु पूर्वदेशविभागानन्तरं उत्तरदेशेन समं संयोग एव कथं नोत्पद्यते, किमर्थं पूर्वसंयोगनाशोऽपेक्ष्यत इति चेत्, न । पूर्वदेशसंयोगस्योत्तरदेशसंयोगं प्रति प्रतिबन्धकत्वात् । तथा च प्रतिबन्धके विद्यमाने कथमुत्तरदेशे संयोगरूपकार्योत्पत्तिरिति पूर्वदेशसंयोगनाशोऽपेक्ष्यत इति । क्रियानाशकस्त्वत्रोत्तरदेशसंयोग एव । अत एव **प्राचीनमते** चतुर्थक्षणे क्रियानाश इति । एवं चतुरणुकाद्युत्पत्तिरपि बोध्या । **संयोगादीनामिति** टीका, यदा चतुरणुकस्योत्पत्तिर्जायते तदा त्रसरेणवः समवायिकारणम्, तत्संयोगो भवत्यसमवायिकारणम् अस्मदाद्यदृष्टं भोगजनकीभूतं निमित्त-कारणमित्यर्थः ।

स्वाश्रयेति मूलम् स्वशब्देन रूपादिकं कार्यगतम्, तस्य योऽऽश्रयस्तस्य यत्समवायि-कारणम्, तन्निष्ठाः ये रूपादयः तेभ्यः सकाशात् कार्यगता रूपादय उत्पद्यन्ते, यथा घटरूपं कपालरूपाज्जायते । एवं रसादयोऽपीत्यर्थः ।

अथ नाशक्रमो दृश्यते-**इत्थमिति** मूलम् । यथा रूपवद् द्रव्यमुत्पन्नम्, तस्यावयवे कालोत्तरे क्रिया जायते । अस्मदादिभोगजनकीभूतादृष्टसंयोगवदात्मसंयोगेन कार्यद्रव्ये घटादिसमवायिकारणे कपालादौ क्रिया जायते । तया क्रियया कपालस्य पूर्वदेशलक्षणद्वितीयकपालेन समं विभागः क्रियते । तदनन्तरं तेन विभागेन घटारम्भकीभूतकपालद्वयसंयोगोऽस्यासमवायिकारणम्[3], तस्य विनाशः क्रियते । तदनन्तरमसमवायिकारणनाशजन्यो घटादिविनाशो जायते । एवमस्मदाद्यदृष्टध्वंसवदात्मसंयोगेन कपालसमवायिकारणीभूतकपालिकायां क्रियोत्पद्यते । तया क्रियया [4]कपाललक्षणद्वितीयो योऽवयवः, तेन समं क्रियया कपालिकायाः विभागो जातः । तेन विभागेन कपालारम्भकीभूत-कपालिकाद्वयसंयोगलक्षणस्यासमवायिकारणस्य नाशः क्रियते । तदनन्तरमसमवायिकारणनाशात् कपालनाशो जायते । एवं द्वयणुकपर्यन्तनाशो बोध्यः ।

---

१. B omits तदनन्तरं. २. B omits इति. ३. B संयोगो योऽसम॰ ४. कपालद्वितीयो-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अवयविनीति जलद्वयणुकादौ यद्रूपमपाकजमुत्पद्यते तज्जलपरमाणुरूपेणैव । [१]पार्थिवद्वयणुकादौ तु रूपादिकं कदाचिदग्निसंयोगेनाप्युत्पद्यते । तस्य पाकजत्वादित्यर्थः ।

नोदनाभिघातलक्षणं करोति-स्पर्शवद् यद् द्रव्यं तस्य[२] यः संयोगः, सः नोदनाख्यः संयोगविशेष उच्यते । स्पर्शवेगो यत्र द्रव्यत्वे (द्रव्ये ?) वर्तते, तस्य यः संयोगविशेषः [३]सः अभिघाताख्य उच्यते । तथा कुत्रचिददृष्टवशान्नोदनाख्यः संयोगो जायते, कुत्रचिदभिघाताख्यः । तेन संयोगेन कार्यं क्रियारूपमभुयत उत्पद्यत इत्युभयमपेक्ष्यत इत्यर्थः ।

संहारपूर्वकाल इति -यदि संहारसमाने काले महेश्वरस्य संजिहीर्षा जायते तदा संहारं प्रति महेश्वरेच्छायाः कारणत्वमेव न स्यात्, तदानीं च संहारस्य वृत्तत्वात् । यद्यपि संहारपूर्वकालेऽपि महेश्वरे तिष्ठत्येव तस्याः न स्यात् नित्यत्वात्, तथापि प्रलयपूर्वकाले संजिहीर्षात्वधर्मविशिष्टा नास्ति । अत एव **नैयायिकै** र्विशिष्टाभावः स्वीक्रियते । [४]यदापीश्वरस्य सृष्टिकाले इच्छात्वविशिष्टा इच्छा तिष्ठति, तदापि तदानीं संजिहीर्षात्वविशिष्टा नास्ति । यदा तु [५]तद्धर्मविशिष्टा भवति, तदा तदनन्तरं संहार उत्पद्यते । अत एव कैश्चिद् दूषणं दीयते । - ईश्वरेच्छायाः नित्यत्वेनेदानीमपि तस्य वर्तमानत्वेन संहारापत्तिरिति दूषणं परास्तम् । इदानीं संजिहीर्षात्वविशिष्टाया इच्छायाः अभावो विशेषणाभावप्रयुक्तस्तिष्ठतीति नेदानीं प्रलयः, कारणाभावादिति मनसि कृत्वा व्याचष्टे-**संहारपूर्वकालेइति** तथा च पूर्ववर्तिन एव कारणत्वमिति भावः । **क्रियाकारणादिति** भोगजनकीभूतादृष्टध्वंसवदात्मसंयोगविशेषात् कारणीभूतादित्यर्थः ।

[६]**तथा वेति** मूलम्-न तन्तुनाशे सति पटनाश इत्यनुपपन्नम् । असमवायिकारणनाशेनैव कार्यद्रव्यनाश इति नियमात् । तथा च पटस्य समवायिकारणं भवति तन्तुः, तन्नाशेन पटनाशः कथं जननीय इत्यत आह **प्रलय एवेति** । तथा च प्रलये द्वयणुकादिनाशेनैव त्रयणुकादिनाशो जायते । तथा च समवायिकारणनाशस्यापि कार्यद्रव्यनाशं प्रति कारणत्वं वाच्यम् । ततः पटनाशं प्रति तन्तुनाशस्यापि कारणत्वं स्वीकर्तव्यमेवेति । समवायिकारणनाशस्यापि कार्यद्रव्यनाशं प्रति अन्यत्र कारणत्वेन क्लृप्तत्वात् । यत्र च कपालिकायां कपालारम्भकीभूतसंयोगनाशकारणीभूतक्रिया जाता तस्मिन्नेव क्षणे कपालेऽपि क्रिया वृत्ता । तदनन्तरं द्वितीयक्षणे [७]कपालिकाक्रियया द्वितीयकपालिकाद्विविभागो जनितः । तस्मिन्नेव क्षणे कपालक्रियया द्वितीयकपालाद्विभागो जनितः । तदनन्तरं तृतीयक्षणे कपालिका[वि]भागेन द्वितीय कपालिकासंयोगनाशः कृतः । तस्मिन्नेव क्षणे कपालविभागेन द्वितीयकपालसंयोगनाशः । अथ च कपालिकासंयोगनाशेन [८]कपालनाशो जातः । तथा चैकस्मिन्नेव

१. B अपार्थिव. २. B तस्य नाशः संयोगः सः. ३. B omits सः. ४. B तदानीमीश्वरस्य. ५. B विशिष्टो नास्ति । भवति (!). ६. It is यथा in the original त. भा. प्र. ७. B omits reading between कपालिका.....द्वितीयकपा.. ८. B कपालिनाशो.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्षणे कपालनाशः कपालि[का]संयोगनाशजनितः । कपालविभागजनितस्तु कपालद्वयसंयोगनाशः एकस्मिन्नेव क्षणे जातः । तदनन्तरमवश्यं घटनाशो जायते । समवायिकारणासमवायिकारणनाशात् ।

तथा च यत्र समवायिकारणासमवायिकारणयोः सामग्रीवशादेकदैव नाशो वृत्तस्तत्र विनिगमनाविरहेण समवायिकारणासमवायिकारणनाशयोः कार्यद्रव्यनाशं प्रति जनकत्वं वाच्यमेवेति । तथा च कुत्रचित्समवायिकारणनाशाज्जन्यद्रव्यनाशः, कुत्रचिदसमवायिकारणनाशाज्जन्यद्रव्यनाशः । इत्यनुगमं मनसि कृत्वा शङ्कते-**नन्विति** तथा च द्वयणुकस्थले ऽसमवायिकारणनाशेनपरमाणु-द्वयसंयोगनाशेनैव द्रव्यनाशस्य-द्वयणुकनाशस्य[१] सम्भवेन तत्र समवायिकारणपरमाणु-नाशासम्भवेन समवायिकारणनाशेन द्वयणुकनाशासम्भवात् असमवायिकारणनाश एव सर्वत्र कार्यः द्रव्यनाशप्रयोजको मन्तव्यः । तथा चानेन रूपेणानुगमः । न च घटादिस्थले समवायिकारणनाशस्य[२] कार्यद्रव्यघटलक्षणनाश प्रति जनकत्वं क्लृप्तम्, तथा सर्वत्र समवायिकारणनाशेनैव कार्यद्रव्यनाश इति वाच्यम्। व्यभिचारात् । द्वयणुकनाशस्थले समवायिकारणनाशव्यतिरेकेणापि असमवायिकारणनाशेनैव द्वयणुकनाशात् ।

न च द्वयणुकान्यजन्यद्रव्यनाशकत्वेन कार्यता, समवायिकारणनाशत्वेन कारणतेति वाच्यम् । द्वयणुकान्यजन्यद्रव्यनाशत्वं नीलेतरघटत्वादिवद् कार्यतावच्छेदकमेव न भवतीति । यथा नीलेतरघटः स्वसामग्रीसमानादेव भविष्यति तद्वदसमवायिकारणनाशेन कार्यद्रव्यनाशो येन स्वीक्रियते तेन क्षणविलम्बः [३]स्वीकर्तव्यः । यथा प्रथमतः कपालादिनाश तदनन्तरं तत्संयोगनाशः तदनन्तरं घटादिनाशः असमवायिकारणनाशक्षणे घटः क्षणमात्रं काले दिशि वा तिष्ठतीति ।

न चेति यद्यसमवायिकारणनाशादेव द्रव्यनाशस्तदा घटस्य कपालनाशानन्तरं क्षणद्वयावस्थितिः स्यात् । यथा प्रथमक्षणे कपालनाशः द्वितीयक्षणे तत्संयोगनाशः तृतीयक्षणे कपालनाशक्षणापेक्षया [४]घटनाश इति समवायिकारणं विना कार्यद्रव्यस्य क्षणद्वयावस्थितिः स्यात् । न च तथाऽनुभवोऽस्ति । कपालनाशानन्तरं ह्यव्यवहितोत्तरक्षण एव घटो नष्ट इति [५]प्रतीतेरिति समवायिकारणनाश एव युक्त इति कण्टकार्थः ।

कारणान्तरेति यदि द्वयणुकस्थलेऽसमवायिकारणनाशस्य जन्यद्रव्यनाशं प्रति जनकत्वं क्लृप्तं तेनैव सर्वत्र [६]निर्वाहो यदि भवति तदा समवायिकारणनाशस्यापि कारणत्वं किमर्थं कल्पनीयम् । तथा सति गौरवप्रसङ्गः । तथैवोत्थित्वात् घटादेः क्षणद्वयावस्थितेरेव युक्तत्वात् ।

[७]**कपालनाशेति** तथा च समवायिकारणनाशस्यापि कार्यद्रव्यनाशजनकताकल्पने

---

१. omits द्वयणुकनाशस्य. २. B -नाशेऽस्य. ३. B कर्तव्यः. ४. B -नाशक्षणापेक्षयेति. ५. B -इतरेति (!). ६. B यदि निर्वाहो भवति. ७. This प्रतीक is not found in त. भा. प्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इच्छालाघवमेव । तथाहि गुणस्थले समवायिकारणनाशत्वेन कारणता, तत्समवेतगुणत्वनाशत्वेन कार्यतेति कल्प्यमाने लाघवात् । समवायिकारणनाशत्वेन तत्समवतनाशत्वेन च कार्यकारणभाव इति लाघवम् । गुणद्रव्यादिपदं [१]कार्यतादिशि न देयमेव । तत्समेवतपददानात् । तथा च समवायिकारणनाशेन [२]तत्समवेतत्वेन द्रव्यगुणकर्माणां नाशः क्रियते एवेत्ययं कार्यकारणभावस्तु गुणादिनाशानुरोधेन कल्पनीय[३] एव । यदि तेनैव कार्यकारणभावेन द्रव्यनाशोऽपि सम्भवति तदा द्रव्यनाशानुरोधेनासमवायिकारणनाशस्य तन्नाशजनकत्वं किमर्थं कल्पनीयम् ?

नन्विति तथा च योऽसमवायिकारणनाशत्वेन द्रव्यनाशं स्वीकरोति स गुणनाशस्थले कार्यदिशि द्रव्येतरविशेषणं ददाति । यथा समवायिकारणनाशत्वेन कारणता, तत्समवेतद्रव्येतरजन्य-गुणादिनाशत्वेन च कार्यता, तेन स्वीक्रियते । तथा सति गौरवम् । द्रव्येतरतत्समवेतजन्यनाशत्वं कार्यतावच्छेदकमपि न भवति । नीलेतरघटत्ववत् । तथा च समवायिकारणनाशत्वेन तत्समवेतजन्यनाशत्वेन कार्यकारणभाव एव स्वीकर्तव्य इति लाघवात् । अत्र कार्यकारणभावे [४]द्रव्यनाशस्यापि सङ्ग्रहो जात एव । तथा चान्यत्र गुणविनाशस्थले क्लृप्तकार्यकारणभावेनैव द्रव्यनाशस्थलेऽपि निर्वाह श्चेद्भवति, तदाऽसमवायिकारणनाशस्य द्रव्यनाशं प्रति कारणत्वं किमर्थं कल्पनीयमिति ।

अयं प्रघट्टः — गौरवं च तदा भवति यदा द्रव्यनाशानुरोधेनैव समवायिकारणनाशस्य कारणत्वं कल्प्यते । परमन्यत्र गुणनाशादिस्थले क्लृप्तो यः कार्यकारणभावो यथा समवायि-कारणनाशत्वेन तत्समवेतजन्यनाशत्वेन च कार्यकारणताभाव इति क्लृप्तेनैव निर्वाहात् । द्रव्यनाशस्थलेऽपि स एव कार्यकारणभावः स्वीकर्तव्यः । लाघवात् । एतावता द्वयणुकादन्यत्र समवायिकारणनाशेनैव द्रव्यनाशः क्लृप्तकार्यकारणभावेनैव स्थापितः ।

[५]साम्प्रतं तदुपरि च केनचिद् द्वयणुकनाशस्थले व्यभिचारो दत्तः । यथा समवायिकारणनाश-व्यतिरेकेणापिद्वयणुकनाशसम्भवादिति । शङ्कते-**द्वयोरिति** तथा च द्वयोः समवायिकारणा-समवायिकारणनाशयोः यदि द्रव्यनाशकत्वम्, तदाऽननुगमः व्यभिचार उक्तरूपो द्वयणुकस्थले इत्याशङ्कार्थः ।

उभयोः कारणत्वार्थानुगमं करोति-[६]**निमित्तकारणेतरेति** । तथा चोभयनिष्ठं निमित्त-कारणादितरकारणनाशत्वं कारणतावच्छेदकत्वं, द्रव्यनाशत्वं च कार्यतावच्छेदकम् । इदं द्रव्यनाशस्थले । गुणादिना[श]स्थले तु समवायिकारणनाशत्वं कारणतावच्छेदकं भिन्नम् । अभिन्न

---

१. B कार्यतादिसमं. २. B तत्समवेतत्वद्रव्य०. ३. B कल्पनीयमेव । ४. B द्रव्यनाशेऽपि. ५. B शीघ्रतं. ६. B निमित्तकारणमिति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कार्यकारणभावेति द्वयणुकनाशस्थले परमाणुद्वयसंयोगनाशत्वेन कारणता, द्वयणुकनाशत्वेन कार्यता। अत्रानन्यथानुपपत्त्या द्वयणुकनाशं प्रति असमवायिकारणनाशस्य कारणत्वं कल्प्यते, नान्यत्र। [1]तत्र क्लृप्तेनैव समवायिकारणनाशेन निर्वाहात्। ननु प्रलये किं प्रमाणमिति चेत्, अनुमानमेव। तथा हि कालकपालान्यवृत्तिर्घटप्रागभावःकार्यद्रव्यानाधारधारः कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिर्वा, अभावत्वात् आकाशवृत्त्यन्योयन्याभाववदिति[2]।

अयमर्थः – यो घटप्रागभावः कालकपालाभ्यामन्यत्र[3] न वर्तते। वर्तते च काले कपाले च। तथा च कालकपालान्यवृत्तित्वविशिष्टो घटप्रागभावः पक्षः। साध्यार्थः यथा कार्यद्रव्यस्यानधिकरणीभूतो यः कालः स एवाधारो यस्य, तत्त्वं साध्यं-यत्र काले कार्यद्रव्यं न वर्तत इत्यर्थः। खण्डप्रलयसिद्ध्यर्थं द्वितीयं साध्यम्। यथा कार्यद्रव्यस्थानधिकरणीभूतः, अथ च कार्यस्याधिकरणीभूतः पदार्थः तद्वृत्तित्वं साध्यम्। तथा च यत्र पदार्थे कार्यद्रव्यं न तिष्ठति, यत्किञ्चित्कार्यं च तिष्ठति, तद्वृत्तित्वं घटप्रागभावस्य साध्यम्। दृष्टान्तो यथा-आकाशवृत्तिर्योऽन्योन्याभावस्तद्दृष्टान्तः। तत्र घटादीनामन्योन्याभावसत्त्वात्। त त्रान्योन्याभावेऽ-भावत्वं हेतुस्तिष्ठति। कार्यद्रव्यानाधाराधारत्वं साध्यमपि तिष्ठति। कार्यद्रव्यस्यानाधारो भवत्याकाशम्[4]। [5]तदाधारत्वाकाशवृत्त्यन्योन्याभावे तिष्ठति। यथा कार्यद्रव्यानधिकरणं भवत्याकाशम् कार्यस्य च शब्दसंयोगादिलक्षणस्याधिकरणं भवति तद्वृत्तित्वमाकाशवृत्त्यन्योन्याभावे तिष्ठति।

तथा चायं पक्षः।-कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तित्वं व्याप्याभावत्ववानयमिति परामर्शः। तदनन्तरं कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तित्ववानयमित्यनुमितिः। अनेन खण्डवृत्तप्रलयसिद्धिः।

तत्र[6] वेदादृष्टकार्यसत्त्वात्। आगमिलप्रलयानुमानं चेदम्। 'घटः ध्वंसकार्यद्रव्यानधिकरण-कार्याधिकरणत्ववृत्तिः। अभावत्वात्। आकाशे वृत्तिसाध्यशाब्दध्वंसवत्।' (१)। अथवा 'घटः कार्याधिकरणकार्यद्रव्यानधिकरणवृत्तिध्वंसप्रतियोगी। कार्यत्वात्, शब्दवत्। (२)। 'कार्यद्रव्यत्वं कार्याधिकरणकार्यद्रव्यानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति। [7]कार्यमात्रवृत्तित्वात्, शब्दवत्'। (३)।

प्रथमसाध्यार्थो-यथा कार्यद्रव्यस्य योऽनधिकरणीभूतो पदार्थः अथ च कार्यस्याधिकरणीभूतः पदार्थः कालाकाशरूपः तद्वृत्तित्वं साध्यम्। यथा शब्दध्वंसे हेतुसाध्ययोः सत्त्वम्। द्वितीयानुमाने घटो भवति पक्षः। तत्र कार्यस्याधिकरणीभूतो यः पदार्थ स एव कार्यद्रव्यस्यानधिकरणीभूतः। तद्वृत्तिर्यो ध्वंसः तस्य प्रतियोगी। आगामिप्रलये एव घटध्वंसस्तिष्ठति। सः कीदृशः ? गतप्रलये [8]वर्तमाने

---

१. B तथा. २. B -भाव इति। ३. B कपालकपालाभ्याम॰. ४. B काशः। ५. B omits the reading between तदाधार....भवत्याकाशम्. ६. B अत्र. ७. B -मात्रत्वात्। वृत्तित्वात्. ८. B प्रवर्तमाने घट-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घटध्वंसो नास्तीत्यनेन वृत्तप्रलयसिद्धि र्न भवति । वर्तमानघटध्वंसस्तु कार्यद्रव्यानधिकरणीभूते कार्याधिकरणे खण्डप्रलयकाले [1]प्रवर्तते । **न्यायमते** तत्प्रतियोगित्वं चास्मिन् घटे तिष्ठतीति यदि च द्रव्यपदं न दीयते किन्तु कार्यानाधारत्वमेव साध्यम्, तदा महाप्रलयकालसिद्धिः ।

[2]खण्डप्रलये **न्यायमते** वेदस्तिष्ठति । महाप्रलये च[3] वेदोऽपि न तिष्ठति । जन्यमात्रस्य तदानीमभावेन महाप्रलये सर्वमुक्तिरिति दिक् ।

सर्वतः सूक्ष्ममिति मूलम्-त्रसरेणु लक्षणम् - त्रयणुकं प्रत्यक्षम् । स्वल्पं परिमाणं यस्य तत् स्वल्पपरिमाणं द्वयणुकरूपं द्रव्यम् । तदास्थं तज्जन्यम् । **हेताविति-त** यदि कार्यत्वादित्युच्यते तदारूपादौ व्यभिचारः । तद्वारणाय **द्रव्यत्वादिति तत्रेति** । रूपे परिमाणाभावेन तदपेक्षया तदधिकस्वल्पपरिमाणत्वं वक्तुमशक्यम् । तथा च रूपे साध्यासत्त्वे व्यभिचार इत्यर्थः । **तदितीति** - तद् द्वयणुकं त्र्यणुकस्य समवायिकारणत्वेन सिद्धम् । तद् द्वयणुकं कार्यम् । **महदिति** महद् द्रव्यारम्भकं द्रव्यं च कार्यमेव । **महत्पदमिति** परमाणौ व्यभिचारं वारयितुं महदिति । **अत्रेति** - [4]द्वयणुके त्रसरेणौ चेत्युद्देश्यसि द्धये । उद्देश्य सिद्धिशब्देन स्वल्पपरिमाणद्रव्यारब्धं साध्यम् । तस्य सिद्ध्ये स्वल्पपरिमाणत्वं विशेषणं साध्ये देयम् । **अन्यथेति** यदि स्वल्पपरिमाणपदं न दीयते तदा द्रव्यारब्धत्वमेव सेत्स्यति । न तु स्वल्पपरिमाणद्रव्यारब्धत्वम् । **तावतैवेति** द्रव्यारब्धत्वेनवेत्यर्थः । **यद्यपीति** । तथा च जन्यद्रव्यानारम्भकत्वप्रकारिकाः द्वयणुकपरमाणवः जाताः । तथापि द्वयणुकत्वपरिमाणत्वप्रकारिका तु न जाताः । परमाणुद्वयणुकत्वरूपेण साध्यज्ञानं नास्तीति कथं तत्प्रकारिका प्रतीतिः स्यादिति भावः । **यत्प्रकारिकेति** प्रकृते तु स्वल्पपरिमाणद्रव्यारब्धत्वप्रकारिका प्रतीतिरस्ति । अत्रैव विशेषणस्य[5] स्वल्पपरिमाणरूपस्य सार्थकता ज्ञातव्या ।

तथा चेति यदि परमाणुर्नाङ्गीक्रियते तदाऽनवस्था दोषः, । यथा 'द्वयणुकसमवायिकारणं कार्यद्रव्यारब्धम्, कार्यद्रव्यारम्भकत्वात्[6] त्रसरेणुवत् । तथाऽग्रेपि 'परमाणु समवायिकारणम्, कार्यद्रव्यारब्धम् कार्यस्यारम्भकत्वात् द्वयणुकवत् ।' एवं परमाणुसमवायिकारणसमवायिकारणं कार्यद्रव्यारब्धमित्यनवस्था स्यादित्यर्थः । **अप्रमाणिकतामिति** तथा च यद्यनवस्थापि स्वीक्रियते तदा मेरुसर्षपयोरपि तुल्यपरिमाणत्वापत्तिः । [7]सर्षपस्याप्यन्तो नास्ति, मेरोरप्यन्तो नास्ति-इति तुल्यपरिमाणतैवानवस्था बाधिका । तथा चानवस्थाऽप्रमाणिकैवेति भावः ।

अत्र शङ्कते **नन्विति** तथा च तुल्यपरिमाणता न भविष्यति । मेरोरनन्तावयवपरम्परारब्धत्वं

---

१. B वर्तते. २. B खण्डमते वेद०. ३. B omits च. ४. B त्र्यणुके. ५. B विशेष्यपरिमाणस्वतपरूपस्य. ६. त्रसरेणुवत् । तथाऽग्रेऽपि-'परमाणु समवायिकारणम्, कार्यतव्यारब्धम् कार्यद्वारम्भकत्वात् । ७. B repeats the reading between सर्षपस्या.....तैवानवस्था after नन्विति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सर्षपादौ तुल्यावयवारब्धत्वमिति परिमाणभेदाभिन्नपरिमाणता मेरुसर्षपयोः । ततो नानवस्थेति भावः । अनवस्थायां बाधकं प्रयच्छति-**द्वयणुकस्येति** तथा च यदि द्वयणुकं सावयवद्रव्यारब्धं भवति तदा द्वयणुके महत्त्वपरिमाणमपि स्यात् । तत इदमनुमानम्'द्वयणुकं महद् द्रव्यम्, सावयवद्रव्यारब्धत्वात् त्र्यणुकवदिति।' तथा च द्वयणुकस्य महत्वे सत्युद्भूतरूपवत्त्वेन प्रत्यक्षता स्यादिति बाधकमनवस्थायाः प्रमाण्यकत्वे इति भावः ।

नन्वेकेनैव परमाणुना द्वयणुकं कथं नारभ्यते इत्यह आह-**असमवायिकारणेति** । **महत्त्वमिति** । यदि त्रिभिः परमाणुभिः द्वयणुकमारभ्यते तदा द्वयणुके महत्त्वमपि स्यात् । ननु यदि द्वाभ्यां त्र्यणुकमारभ्यते तदा त्र्यणुके महत्त्वं न स्यादित्याह **नन्विति प्रचयाख्येति** द्वयोः द्वयणुकयोः प्रचयाख्यसंयोगोऽपि न सम्भवति । प्रचयाख्यसंयोगो नाम चाक्षुषद्रव्यारम्भकः संयोगः । स च न स्यात्। द्वयणुकद्वयनिष्ठो यः संयोगः सः चाक्षुषद्रव्यारम्भको न भवति । स्वकार्ये त्र्यणुकलक्षणे द्वयणुकद्वयनिष्ठं यत्परिमाणं तेनाणुकनिष्ठं परिमाणमारभ्यते । द्वयणुकद्वयनिष्ठं तु अणुकपरिमाणमेव । तथा चाणुपरिमाणेन कारणे गते कार्यगतं महत्त्वं परिमाणं कथामरम्भमणीयम् ? कार्ये यत्महत्त्वमुत्पद्यते तत्कारणमहत्त्वाद्वा कारणबहुत्वाद्वा । तथा च द्वाभ्यां द्वयणुकाभ्यां त्रसरेणुरूपं कार्यमारभ्यते । तदा त्रसेरुणौ कारणगतमहत्त्वाभावेन बहुत्वाभावेन च महत्त्वं न स्यात् । इति त्रिभिरेव द्वयणुकैः महत्त्वान्यथानुपपत्त्या त्र्यणुकमारभ्यते, न तु द्वाभ्याम् ।

ननु त्रिभिः परमाणुभिः कथं त्र्यणुकं नोत्पद्यते मध्ये किमर्थं द्वयणुकमङ्गीक्रियते, इति चेत्, न । मह[द्]द्रव्यारम्भकद्रव्यस्य कार्यद्रव्यत्वं स्यादिति[1] बाधकम् । आरम्भकपदं समवायिकारणपरमिति नेश्वरेण बाधः यदि द्वयोः द्वयणुकयोः प्रचयाख्यो संयोगो भवति, तदा द्वयणुकयोरपि प्रत्यक्षत्वं स्यात् । ययोः प्रचयाख्यः संयोगो वर्तते तयोः प्रत्यक्षताऽपि स्वीकर्तव्या । यथा कपालयोः द्वयोः । तथा च द्वयणुकत्रयनिष्ठबहुत्वसङ्ख्याता त्र्यणुके महत्त्वमुत्पाद्यते-इति महत्त्वान्यथानुपपत्तिरेव द्वयणुकत्रयस्यैव त्रसरेणुं प्रति कारणत्वे प्रमाणमित्यर्थः ।

[इति परमाणुवादः ॥]

द्रव्यप्रकरणम् (Conti.)

(४) आकाशम्

शब्दगुणमाकाशमिति । शब्दः गुणो यस्य तदाकाशमित्यर्थः । तथा च शब्दसमवायि-

---

१. B omits the reading between बाधकं.....नेश्वरेण बाधः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कारणत्वेनाकाशसिद्धिः । ननु शब्दः पृथिव्यादीनां गुणो भविष्यतीति चेत् न । तत्र परिशेष एव प्रमाणम् । यथा शब्दस्य गुणादौ प्रसक्तिरेव नास्त्यतः [त]त्र स न निषिध्यते । पृथिव्यादीनां च द्रव्यत्वात् । सगुणत्वेन शब्दस्यापि गुणत्वेन तत्र प्रसक्तिर्जाता । 'शब्दः पृथिव्यादीनां गुणो भविष्यतीति ।' तत्र परिशेषो–यथा 'शब्दो न पृथिवीगुणः, श्रोत्रग्राह्यत्वात् । व्यतिरेकी यो पृथिवीगुणः [१]स श्रोत्रग्राह्यो न भवति, यथा पृथिवीरूपादिकम् ।' तथा च[२] शब्दोऽऽत्मनोऽपि गुणो न भवति । तदुणत्वे मानसप्रत्यक्षत्वापत्तिः । कालादीनां च[३] विशेषगुणत्वाभावान्न तदुणः । तथा परिशेषः शब्दोऽऽकाशवृत्तिः । आकाशेतरवृत्तित्वे सति वृत्तित्वादाकाशैकत्ववदिति । **घटादाविति** । अन्यथा घटादौ व्यभिचारः स्यात् । एकैन्द्रियग्राह्यत्वरूपो हेतुस्तत्र तिष्ठति । विशेषगुणत्वरूपं साध्यं नास्तीति ।

नन्वस्मदादीतिपदं किमर्थमुक्तम् ? अत आह **अप्रसिद्धमिति** तथा च योगिनां योगजधर्मसहकारेणाद्दष्टविशेष्यसहकारेण सर्वेन्द्रियैः सर्वं गृह्यते तथा शब्दोऽपि तैः चक्षुरादिना गृह्यत इति–एकेन्द्रियमात्रग्राह्यत्वमेव प्रसिद्धमित्यत उक्तमस्मदादीति । **ज्ञानादिलक्षणयेति** तथा च शब्दस्य कदाचिद[ा]नुमानिकं ज्ञानं वृत्तम्, तदनन्तरं कालान्तरजन्यसंस्कारेण[४] शब्दस्य स्मरणं जन्यते । तदा स्मरणसहकृतेन चक्षुषा शब्दप्रत्यक्षं ज्ञानं जायते । अथवा शब्दत्वसामान्यलक्षणप्रत्यासत्त्या चक्षुरादिनामपि शब्दज्ञानं जायते इति नेकेन्द्रियमात्रग्राह्यत्वमिति लौकिकपदमपि दातव्यमेव । **अप्रत्यक्ष इति** । अप्रत्यक्षसङ्ख्यादौ । तत्र हि[५] द्वीन्द्रियग्रहणयोग्यताराहित्यं रूपादौ हेतुरस्ति । विशेषगुणत्वं नास्तीति व्यभिचार इत्यर्थः ।

बाह्येति । तथा चातीन्द्रियपदार्थे लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति [६]द्वीन्द्रियग्रहणयोग्यताराहित्यादयं हेतुः कर्तव्यः । सत्यन्तमतीन्द्रियपदार्थे व्यभिचारवारणार्थम् । विशेष्यदलं चैकेन्द्रियगृहीतनिष्ठघटे व्यभिचारवारणार्थम् । [७]इदानीमपि प्रभासङ्ख्यायां व्यभिचारो वृत्तः । तत्र लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति द्वीन्द्रियग्रहणयोग्यताराहित्यरूपो हेतुस्तिष्ठति । विशेषगुणत्वरूपं साध्यं नास्तीति व्यभिचारः । प्रभाया एकत्वस्य चक्षुरिन्द्रियमात्रग्राह्यत्वात् । एतद्वारयितुं विवक्षान्तरं करोति शब्दो **विशेषगुण इति** । तथा[८] च प्रभासङ्ख्यायामेकत्वरूपायां न व्यभिचारः । यद्यपि प्रभैकत्वे लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति गुणत्वव्याप्यजातिमत्त्वरूपो हेतुस्तिष्ठति, परं गुणत्वसाक्षाद्व्याप्यजातिमत्त्वं नास्तीति । तथा च गुणत्वसाक्षाद् व्याप्या जातिर्भवति सङ्ख्यात्वम् । तद्व्याप्या जातिर्भवत्येकत्वरूपा । अत्र हेतौ 'साक्षाद्' पदमपि देयमेव ।

प्रभात्वमिति अन्यथा प्रभायां व्यभिचारो भवति । तत्रापि लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे

१. A omits च. २. B omits च. ३. B omits च. ४. B संस्कारे. ५. B omits हि. ६. B इन्द्रिय. ७. B omits अपि. ८. B omits तथा च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति व्याप्या जाति र्भवति प्रभात्वम्। प्रभायामपि हेतुस्तिष्ठति, विशेषगुणत्वरूपं साध्यं नास्तीति व्यभिचारः स्यात्। तद्वारणाय गुणत्वव्याप्येति। प्रभात्वं च द्रव्यत्वव्याप्यम्, न च गुणत्वव्याप्यम्।

गुरुत्वमिति। यदि प्रथमं सत्यन्तं न दीयते तदा [१]गुरुत्वे व्यभिचारो भवति। यथा गुरुत्वे लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति गुणत्वव्याप्यजातिमत्त्वं हेतुस्तिष्ठति। गुरुत्वस्यातीन्द्रियत्वेन द्वीन्द्रियग्रहणयोग्यताराहित्यं तिष्ठति। विशेषगुणत्वरूपं साध्यं नास्तीति व्यभिचारः। इति सत्यन्तम्। तथा च गुरुत्वे लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वाभावाद्धेतुरेव नास्तीति न व्यभिचारः। गुरुत्वस्यातीन्द्रियत्वात्।

अथ द्वितीयं सत्यन्तं सङ्ख्यात्वमादायैकत्वादौ व्यभिचारवारणार्थम्। अन्यथा घटैकत्वादौ लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति गुणत्वव्याप्या जातिः सङ्ख्यात्वम्। तद्वत्त्वरूपो हेतुस्तिष्ठतीति व्यभिचारः स्यात्। **प्रभावेग इति**। उत्कर्षापकर्षरूपा जातिर्यदि तेजोनिष्ठवेगे गुणत्वव्याप्या तिष्ठति, तदा तामादाय व्यभिचारो भवति। तदा तया व्यभिचारवारणार्थं साक्षादिति गुणत्वव्याप्या-जातेर्विशेषणमिति।

विभुत्वादिति विभुत्वं नाम सर्वमूर्तसंयोगित्वम्। तता च यद् विभुद्रव्यं भवति तदेकमेव। क्षेत्रज्ञात्मभिन्नं सदेकं तद्विभुः। अनेककल्पनायां प्रमाणाभावादित्यर्थः। **परममहदिति** – महत्परिमाणं [२]घटादावप्यस्तीति परममहदिति। अतो नात्वम्, षष्ठीतत्पुरुष एवेति परममहा(हद्) परिमाणवदिति न भवति। तत्र हेतुमाह–**सामानाधिकरण्याभावादिति** समानाधिकरणसमासे कर्मधारय एव समासे आत्वमित्यर्थः।

(५) कालः।

दिग्विपरीतत्त्वमिति। कालनिष्ठपरत्वापरत्वयोर्निष्ठा दिग्विपरीतत्वं जातिरेव गुण-त्वव्याप्यव्याप्या जातिः। **तदनुमेयत्वमिति** – तथा चानित्यद्रव्ये घटादावपि परत्वापरत्वानुमेयत्वं वर्तते। यथा–'घटो द्रव्यम्, परत्वापरत्वाश्रयत्वादिति'।

तथापीति–इदं कालस्य लक्षणम्। **तदिति** 'तद्'–पदेन कार्यद्रव्यम्। तस्या-समवायिकारणीभूतो यः कालपिण्डसंयोगः तदाश्रयत्वे सति विभुत्वं कालत्वम्। विभुत्वपदादाने कालपिण्डसंयोगाश्रये पिण्डेऽतिव्याप्तिः। तद्वारणार्थं विभुत्वपदम्। सत्यन्तमाकाशादा-वतिव्याप्तिवारणार्थम्, परत्वादावपि।

---

१. B गुणत्वे. २. B घटादावस्तीति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथा च कालकृतपरत्वापरत्वयोर्दिक्कृत् परत्वापरत्वाविपरीतत्वं कथम् ? अथवा ताभ्यां कालस्यानुमेयत्वं कथमिति प्रश्नद्वयमित्यर्थः ।

प्रथमप्रश्नस्योत्तरं ददाति-**दिक्कृतेति** । तथा च सन्निधाने निकटे वर्तते यः, पुरुषे वृद्धपरत्वे, तत्र यद्यपि दिक्कृतं परत्वं नास्ति, तथाप्ययं-बालकादस्माद् परः इति परत्वम् तद्भेद प्रतीयते । तथा च तन्निष्ठपरत्वे दिककृत् परत्व विपरीतत्वं तिष्ठति । तस्य निकटवर्तित्वात् । दिक्कृतं परत्वम् । यथा चैत्रेण समं यद्देशस्य संयोगः, तत्संयुक्तत्वं [1]द्रव्यान्तरे, तत्संयुक्तत्वं देशान्तरे । एवं परम्परया संयुक्तसंयोगभूयस्त्वम् । एवं यः चैत्रापेक्षया निकटे वर्तते मैत्रस्तत्र चैत्रेण संयुक्तं यद्भूतलादि तत्संयुक्ताल्पत्वमेव ।

येनेति येन पदार्थेन समं पिण्डसंयोगोऽसमवायिकारणम्, अथ च सूर्यसंयोगो निमित्तकारणम्, तेन पिण्डेन समं यः सूर्यसंयोगः, स निमित्तकारणम् । तयोर्तत्पिण्डनिष्ठदिग्विपरीतपरत्वापरत्वयोः कारणम्, पृथिव्यादिकं न कारणम् । तस्य पृथिव्यादेरुभयप्राप्त्यभावात् परत्वापरत्वज्ञानं प्रति कारणत्वाभावात्। भूतलादिज्ञाने जातेऽप्य'यमस्माद् परोऽयमस्मादपर'-इति प्रतीतिर्न जायते । पृथिव्यादिकं मूर्तद्रव्यत्वात् परत्वापरत्वज्ञानकारणं न भवतीत्युक्तं-ताभ्यामन्यत्रेति[2] ।

तथा चात्माकाशयोः परत्वापरत्वज्ञानकारणत्वेऽन्यत्रेति । अन्यत्र घटादावन्यधर्मस्योपनये ज्ञानजननेऽतिप्रसङ्गः । यथाऽऽत्माकाशयोः सर्वत्र सत्त्वात् तत्पिण्डं विहायान्यत्र पिण्डान्तरेऽपि परत्वापरत्वबुद्धिर्जन्यते । तत्प्र(द)तिप्रसङ्गः । **न चेति** कालस्यापि व्यापकत्वात् पिण्डान्तरेऽपि परत्वापरत्वजननप्रसङ्ग इति न वाच्यम् । समाधत्ते-**सिद्ध्यसिद्धीति** । [3]तथा च यदि पिण्डान्तरे परत्वापरत्वप्रतीति र्जायते तदा कालस्य [4]तत्कारणत्वमेव । यदि च न जायते तदा तत्र तस्यापादानमशक्यमिति सिद्ध्यसिद्धिपराहतिः । **न च परत्रेति** । तथा च परत्रैकपदार्थधर्मस्य परत्रपदार्थादन्यस्मिन्नुपनयो-ज्ञानं जन्यत इति । यत्र च परत्वं तत्र परत्वबुद्धिरेव जन्यते । यत्र चापरत्वं तत्रापरत्वबुद्धिरेव जन्यते ।

वस्तुतः कालस्य परत्वं [अन्य]त्र परधर्मोपनायकत्वं वर्तते-यथा 'ऽयमस्मात्परं' इति बुद्ध्याऽपरत्वरूपो गुणो ज्ञातः, स एवान्यत्र-पिण्डान्तरे उपनीयते इत्यर्थः ।

तस्या इति । तथा च दिशः सर्वसाधारणैका प्रतीतिर्नास्ति । यथा या किञ्चिदपेक्षया प्राची, सैव किञ्चिदपेक्षया प्रतीचीति बुद्धिर्जायते । एवं तु काले नास्ति । यथा वर्तमानः सर्वापेक्षया वर्तमान एवेत्यर्थः ।

---

१. B द्रव्यान्तरम्. २. B नान्यत्रेति । ३. B तदा. ४. B सत्त्वात्कारण०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(६) दिक्

विषय एवेति–ग्रामादिरूपो यो विषयः, स एव तादृश व्यवहारजनको भविष्यतीति न दिक् कल्पनीयेत्याशङ्क्यार्थः ।

(७) मनः ।[१]

अतः [२]मनःप्रकरणेऽव्यावृत्तेः स्थितिः । इदमेव स्पष्टयति–**सर्वैरिन्द्रियेति** । **द्विविधमिति**–अणुपरिमाणमपि द्विविधम्–एकं परमाणुनिष्ठं नित्यम्[३], द्वितीयं द्वयणुकनिष्ठम् नित्यम् । तथा च मनसः [४]परमाणुरूपत्वात् तन्निष्ठं परिमाणमपि नित्यमेव ।

एतेनेति–केनचिन्मनस इदं लक्षणं कृतम् । – यथा – [५]**सङ्कोचेति** । सङ्कोचविकासशालित्वेन मनसो मध्यमपरिमाणवत्त्वं स्यात् । तथा सति च मनसोऽनित्यत्वं स्यादिति दूषणम् ।

नानाज्ञानानीति–मनसोऽणुत्वात् [न]युगपदनेकानि ज्ञा[ना]नि जातानि भवन्ति । परं समूहालम्बनरूपमेकमनेकविषयं ज्ञानं भवति । मनसोऽणुत्वादेककालावच्छेदेनैकमेव ज्ञानमुत्पद्यत इत्यर्थः । तथा चैकदाऽनेकज्ञानजनकत्वाभावेन समूहालम्बनं विषयाणां भिन्नत्वेऽप्येकमेव ज्ञानम् । ततो मनोऽण्विति ।

इति द्रव्यप्रकरणम् ।

[१८] ॥ अर्थप्रकरणे गुणनिरूपणम् ॥

अधुना गुणप्रकरणम्–गुणलक्षणं यथा–**सामान्यवानिति** । निष्कर्षमाह–**कर्मेति** तथा च कर्मान्यत्वे सति द्रव्यान्यत्वे च[६] सति जातिमान् गुण इत्यर्थः । जातिमान् गुण इत्युक्ते द्रव्ये कर्मणि चातिव्याप्ति । अत उक्तम् । ततो द्वयभिन्नत्वमुपात्तम् ।

ननु यद्यपि द्रव्यभिन्नत्वे सति कर्मभिन्नत्वं द्रव्यकर्मोभयभिन्नत्वं प्राप्यते, तथा चोभयत्वावच्छिन्नप्रतियोगिकभेदो द्रव्ये कर्मणि च तिष्ठति, ततो गुणलक्षणं द्रव्येऽतिव्याप्तमिति चेत्, न । द्रव्यत्वावच्छिन्नप्रतियोगिताको भेदः, कर्मत्वावच्छिन्नप्रतियोगिताकश्च भेद इति भेदद्वयाधिकरणत्वे सति यः सामान्यवान् सः गुण इत्यर्थः । तथा च द्रव्ये कर्मणि च यद्यपि द्रव्ये

---

१. Following Govardhan Gunaratna rightly omits the discussion on Ātmā, as it is already discussed as a Prameya. २. B ऽव्यावृत्तिस्थितिः । ३. B omits नित्यम्. ४. B परिमाणः(?)रूप॰. ५. B शङ्केति (?). ६. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कर्मत्वावच्छिन्नप्रतियोगिताको भेदो वर्तते तथापि द्रव्यत्वावच्छिन्नप्रतियोगिताको भेदो नास्ति । एवं कर्मणि यद्यपि द्रव्यत्वावच्छिन्नप्रतियोगिताको भेदो वर्तते तथापि कर्मतावाच्छिन्नप्रतियोगिताको भेदो नास्तीति भेदद्वयाधिकरणं गुण एवेति । द्रव्यत्वादावतिव्याप्तिवारणार्थं सामान्यवानिति पदम् ।

शिरोमणिलक्षणं यथा–नित्यवृत्ति–नित्यवृत्तिसत्तासाक्षाद् व्याप्यजाति र्गुणत्वम् । विभुवृत्ति–विभुवृत्तिसत्तासाक्षाद्व्याप्यजातिर्वा । प्रथमलक्षणार्थो यथा नित्यवृत्ति–यन्नित्यं तद्वृत्तिः सत्तासाक्षाद्व्याप्याया जातिः सैव गुणत्वमित्यर्थः । यथा नित्यो भवति जलपरमाणुः, तन्निष्ठं यन्नित्यं रूपादिकं तद्वृत्तिः सत्तासाक्षाद्व्याप्या जाति र्भवति गुणत्वम् । सत्तासाक्षाद्व्याप्या जातिः द्रव्यत्वादिकमपि भवतीति । तन्निरासाय नित्यवृत्तिवृत्ति पदम् । द्रव्यत्वादौ च नित्यवृत्तित्वं नास्ति । यथा नित्यं भवत्याकाशादिकम्[1], तन्निष्ठं यन्नित्यं तत्परिमाणादिकं तत्र द्रव्यत्वं नास्ति । यद्यपि नित्यवृत्तिनि द्वयणुके द्रव्यत्वं तिष्ठति **तथापि** द्वयणुकस्य नित्यत्वाभावात् नित्यवृत्तिवृत्तित्वं नास्ति। तथा जातिर्गुणत्वमित्युक्ते द्रव्यत्वेऽतिव्याप्तिः । अत उक्तं सत्ताव्याप्यजातिः । तथापि तत्रातिव्याप्तिः । तद्वारणार्थं नित्यवृत्तिवृत्तीति । साक्षात्पदं च रूपत्वादावतिव्याप्तिवारणार्थम् । नित्यो भवति जलपरमाणुः तद्वृत्ति तद्रूपम् । तद्वृत्तित्वं च रूपत्वे तिष्ठति । सत्ताव्याप्यजातित्वमपि रूपे तिष्ठतीत्यतिव्याप्तिः । अत उक्तं साक्षादिति । तथा च सत्तायाः साक्षाद्व्याप्यं भवति गुणत्वम् । तद्व्याप्यं च भवति रूपत्वमिति ।

द्वितीयलक्षणार्थो यथा–विभुनि वर्तते यः पदार्थः, तद्वृत्ति र्या साक्षाद्व्याप्या जातिः सैव गुण त्वमित्यर्थः । यथा–विभु[2] भवत्याकाशम्, तत्र वर्तते यो शब्दः, तद्वृत्तिः सतासाक्षाद्व्याप्याजातिर्भवति गुणत्वम् । विभुवृत्तिवृत्तिपदं यदि न दीयते तदा द्रव्यत्वादावतिव्याप्तिः । द्रव्यत्वे तु सत्तासाक्षाद्व्याप्यजातित्वं तिष्ठत्येव, परं विभुवृत्तिवृत्तित्वं नास्ति । विभुनि वर्तते यो ज्ञानादिः[3] शब्दादिर्वा तत्र द्रव्यत्वस्याभावात् । यदि साक्षात्पदं न दीयते तदैकत्वादावतिव्याप्तिः । अथ उक्तं साक्षादिति।

ननु गुणत्वजातौ किं प्रमाणमिति चेत्, अनुमानमेव । तथाहि-'द्रव्यकर्मवृत्ति-सत्तासाक्षादव्याप्यजातिभिन्नम्, जातित्वात्, घटत्ववत् ।' कर्मणि न वर्तते एतादृशी सत्तासाक्षाद्व्याप्या जातिः । तद्भिन्नत्वं साध्यम् । कर्मणि [4]न वर्तते सत्तासाक्षाद्व्याप्या जातिः । अर्थाद् गुणत्वमेव । [5]तद्भिन्नत्वं साध्यते द्रव्यत्वे । अत्र दृष्टान्तः द्रव्यत्वभिन्नत्वेनैव [6]सिद्धः । तथा च घटत्वरूपदृष्टान्ते जातित्वरूपो हेतुस्तिष्ठति । साध्यमपि तिष्ठति । यथा–कर्मावृत्ति[7] सत्तासाक्षाद्व्याप्याजाति र्भवति

१. B –काशादि-. २. B विभुत्वमित्याकाशम्. ३. A शब्दादिर्वर्तते तत्र. ४. B नास्ति. ५. B भिन्नत्वं–i.e. तद् is omitted. ६. B सिद्धान्तः । ७. B कर्मवृत्ति-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गुणत्वम् । तद्भिन्नत्वं च घटत्वे तिष्ठति । तथा च पक्षधर्मताबलात् गुणत्वजातिसिद्धिः । न हि द्रव्यत्वमेव द्रव्यत्वभिन्नं सम्भवति । न [१]चाप्रयोजकरूपम् । अनुकूलतर्कस्य सत्त्वात् । यदि च गुणत्वं जाति र्न स्यात्तदा संयोगविभागोभयसमवायिकारणत्वा-समवायिकारणत्वशून्ये सामान्यवति यत्कारणत्वम्, तदनुगतधर्मावच्छेद्यं न स्यात् । यथा संयोगविभागसमवायिकारणत्वशून्यं (न्यः) भवति संयोगोविभागश्च । यद्यप्यसमवायिकारणता वर्तते तथापि तत्र [२]समवायिकारणताभावेनोभय-त्वावच्छिन्नप्रतियोगिताकाभावसत्त्वात् । तथा चोभयनिष्ठा या कारणता, सा गुणत्वजातिव्यतिरेकेण केन धर्मेणावच्छेद्या भविष्यति ? तथा चोक्तरूपानु[कू]लतर्कसत्त्वात् गुणत्वजातिः सिद्ध्यतीति ।

(१) रूपम् ।

शङ्कते-**नन्विति** -अतीन्द्रिये परमाणुरूपादौ चक्षुर्मात्रग्राह्यत्वाभावादव्याप्तिः । तद्वारणार्थं विवक्षां करोति-**चक्षुर्मात्रेति** चक्षुर्मात्रग्राह्या या जातिः रूपत्वलक्षणा तद्वत्त्वं रूपलक्षणमिति [३]नाव्याप्तिः । **सम्भवाभिप्रायेणेति** पृथिव्यां तु पाकजं रूपम् । तत्सम्भवाभिप्रायेण तत्सम्भवतीति कृत्वा यदा पूर्वं रूपं नश्यति, रूपान्तरमुत्पद्यते तदा पाकजमेव सम्भवतीति ज्ञेयम् ।

ननु रूपत्वं, जातिः किमर्थं स्वीकर्तव्या, चक्षुर्मात्रग्राह्यगुणत्वमेवोपाधिरस्त्विति चेत्, न । तदा रूपत्वस्यातीन्द्रियापत्तिः । तस्यातीन्द्रियचक्षुर्घटितत्वात् । उपाधिस्तु चक्षुर्घटितो जातः । तथा च[४] चक्षुषोऽतीन्द्रियत्वे सर्वस्योपाधेरतीन्द्रियत्वं स्यात् । जात्यपेक्षयोपाधिगुरुत्वात् । सर्वजाति-विप्लवापत्तिश्चेति । अतीन्द्रिये परमाणुरूपे त्वदुक्तोपाधेरसत्त्वादव्याप्तिः[५] । ततः असौ जातिरेव रूपत्वमिति ।

तदेतद् शुक्लाद्यनेकप्रकारम् । पृथिव्युदकतेजोमात्रवृत्ति । पृथिवीपरमाणुष्वेव पाकजमिति **वैशेषिकाः** । द्वयणुकादौ तु वैः[=वैशेषिकैः] पाकजं रूपं न स्वीक्रियते कदाचित्परमाणुषु कदाचिदवयविन्यपि पाकजं रूपमिति **नैयायिकाः** इति ।

तथा च पार्थिवपरमाणुषु तेजःसंयोगादुत्पद्यते विनश्यति चेति पृथिव्यामनित्यमेव रूपम् । सलिलतेजः परमाणुषु रूपं नित्यमेव । द्वयणुकादिषु कारणरूपासमवायिकारणकम् । कपालादिरूपात् घटादिरूपोत्पत्तिः । तत्साजात्योपलम्भात् क्वचिच्चित्रमप्यतिरिक्तं नीलपीतादिविजातीयमेवोत्पद्यते ।

नन्वेकत्रावयवनीलाद्येकमेव रूपमेककालावच्छेदनम्[६] द्वितीयावयवे च पीतरूपम्, तदेताभ्यामुभाभ्यां परस्परविरुद्धाभ्यामवयविन्येकं रूपं कथमुत्पादनीयम्, नीलसामग्र्या नीलमेव

---

१. B -वाप्रयो-. २. B -कारणताभावेन सम्भवति । तथा-. ३. B नाव्याप्तिः सम्भवति । प्रायेणेति. ४. B omits च. ५. B -त्वान्नाव्याप्तिः । ६. B -च्छेदे तु द्वितीया-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रूपमुत्पादनीयम्। पीतमेव रूपमुत्पादनीयमिति चेत् न। परस्परविरोधेन नीलसामग्र्या एकत्रावयविनि नीलं रूपमुत्पादयितुं न शक्यते। तत्र पीतसामग्र्याः प्रतिबन्धकत्वात्। पीतरूपस्य चोत्पत्तौ नीलसामग्री प्रतिबन्धिका। ततः उभाभ्यां मिलित्वा एकत्रावयविनि चित्रं रूपमतिरिक्तमेवोत्पादनीयम्। तत्र च रूपद्वये 'ऽत्र चित्रः पटः' [1]इत्यैकरूपविषयिणी प्रतीतिर्नस्यात्। न च विरुद्धाभ्यां तत्कथमुत्पादनीयमिति वाच्यम्। तदवयवानामपि चित्ररूपवत्त्वेन विरोधाभावात् परमाणुष्वपि चित्ररूपसत्त्वात्। अग्निसंयोगात्तत्र परमाणौ चित्ररूपमुत्पद्यते। तेन द्वयणुकादावपि चित्ररूपम्। न तु यत्र त्तौ नीलमेव रूपं यत्र च[2] पीतमेव रूपं तत्र द्वाभ्यां मिलित्वा चित्रः पटो द्वितन्तुकः उत्पादितः। तत्रापि-अवयवे-तन्तौ चित्ररूपं वर्तते एव कथं नोपलभ्यते ? प्रतिबन्धस्य तत्र कालादृष्टादिविशेषस्य[3] सत्त्वात्। अत्ररूप एव नीलादिभागस्याधिक्यादिति नोपलम्भः।

न चावयविविरुद्धरूपस्थले नीलरूप एवेति [4]विरुद्धरूपप्रतीतिस्त्ववयवगतरूपाणामेव जायते इति वाच्यम्। तथा सत्यवयविनो चाक्षुषत्वं स्यात्। चाक्षुषत्वे च महत्त्वसमानाधिकरणोद्भूतरूपस्यैव नियामकत्वात्। न च तस्याश्रयाश्रितसम्बन्धेन द्रव्यचाक्षुषं प्रत्युद्भूतरूपं कारणम्, तथा च प्रकृतेऽपि यद्यपि घटादौ रूपं नास्ति तथापि घटप्रत्यक्षं प्रति स्वाश्रयसमवेतं कपालादिरूपम्, तदेव चाक्षुषप्रत्यक्षं प्रति कारणमिति न चित्ररूपमतिरिक्तमायास्यतीति वाच्यम्। अवयविनः चाक्षुषत्वान्यथानुपपत्त्या चित्रं रूपं कल्पनीयमेव। न च स्वाश्रयाश्रितेत्यादि दूषणमिति वाच्यम्। तेन सम्बन्धेन द्रव्यचाक्षुषं प्रति कारणत्वे कल्प्यमाने गौरवापत्तिः। लाघवात् समवायसम्बन्धेनैव द्रव्यं चाक्षुषं प्रत्युद्भूतरूपं कारणम्। तथा चावयवी नीलरूपो न स्वीकर्तव्य इति। चित्ररूपमतिरिक्तं, प्रमाणं च [5]चाक्षुषत्वान्यथानुपपत्तिरेव।

ननु शुक्ल पट इत्यभेदप्रतीत्या रूपपटयोरभेदोऽस्त्विति चेत् न। अन्धेनापि रूपग्रहणप्रसङ्गात्। यतो भवतां मते रूपं पटातिरिक्तं नास्ति। पटस्तु त्वचा गृह्यत इति रूपानुपलम्भवत् द्रव्यानुपलम्भोपपत्तेश्च। नन्वधेन रूपं गृह्यत एव, रूपत्वशुक्लत्वादिकं परं न गृह्यत इति चेत्, न। यत्र व्यक्ती रूपादिका योग्या भवति तत्र रूपत्वादिजातिग्रहे प्रतिबन्धकाभावात्। किञ्च यदि 'शुक्लः पटः' इत्यभेदप्रतीतिः तदा-'शुक्लमानय-' इत्युक्तः सन् पटमानयेत्, 'पटमानय'-इत्युक्तः किञ्चिच्छुक्लमानयेत्। अवयविनि सत्येव रूपोत्पादविनाशदर्शनात् विरुद्धधर्माध्यासादपि रूपरुपिभेदात्। यदा पीतं रूपं नष्टं नीलरूपमुत्पन्नं द्रव्ये सत्यपीदृशप्रतीतेश्चेति दिक्।

(२) रसः ।

रसनेन्द्रियेति। यथाश्रुते मूलोक्तेऽगृहीत नष्टे रसेऽव्याप्तिवारणार्थं विवक्षा। यथा

१. B इत्येकविष०. २. B omits च. ३. B विशेषसत्त्वात्। ४. B omits विरुद्ध. ५. B चाक्षुषं प्रति कारणत्वे कल्प्यमानेऽन्यथा०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रसनेन्द्रियमात्रग्राह्यो यो गुणः तद्वृत्तिर्या रसनेन्द्रियमात्रग्राह्या जातिः, तद्वान्। तथा च रसत्वजातेः तत्रापि सत्त्वात् गुणपदवैयर्थ्यादिति। गुणपदं च द्रव्यादिव्यावृत्त्यर्थं देयम्। सा तु रसनेन्द्रियमात्रग्राह्यपदेनैव वारणात्। न च मनसाऽपि तद्ग्रहणात्तल्लक्षणमसिद्धमिति वाच्यम्। रसनेन्द्रियजन्यसाक्षात्कारविषय-[१]वृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। तेजोवृत्त्यवृत्तिपृथिवीजलवृत्तिप्रत्यक्षगुणत्व-साक्षाद्व्याप्याजातिमत्त्वं वा रसत्वम्। रसनेन्द्रियजन्यो यः साक्षात्कारः, तद्विषयीभूता या गुणत्व्याप्या जातिः तद्वत्त्वं रसलक्षणम्। रसनेन्द्रियजन्यः साक्षात्कारो भवति रसत्वविशिष्टरसस्य। तत्र यथा रसो विषयो भवति तथा रसत्वमपि तद्गुणत्वव्याप्या जातिर्भवति। तद्वत्वं च रसे तिष्ठति। तथा चान्येन्द्रियजन्यत्वेऽपि रसनेन्द्रियजन्यत्वान्नदोषः। गुणत्वव्याप्यपदं च रूपादिवारणार्थम्। अन्यथा रसनेन्द्रियजन्यसाक्षात्कारविषयीभूता गुणत्वरूपाऽपि जातिर्भवति। तद्वत्त्वमादाय रूपादौ सर्वत्रातिव्याप्तिः।

द्वितीयलक्षणार्थो यथा तेजसि वर्तते यो गुणः तत्रावृत्ति-र्यस्तत्र न वर्तते। अथ च पृथिवीजलयोर्वतते यो गुणः तद्वृत्तित्वे सति प्रत्यक्षगुणत्वसाक्षाद्व्याप्या या जातिः तद्वत्त्वं रसत्त्वम्। सत्यन्तं चैकत्वादावतिव्याप्तिवारणार्थम्। रूपादिका(वा)रणार्थं तेजोवृत्त्यवृत्तिपदम्। अन्यथा पृथिवीजलवृत्तिवृत्तित्वे सति प्रत्यक्षगुणत्वसाक्षाद्व्याप्यजातीयरूपत्वम्। तद्वत्त्वमादाय [२]रूपमात्रेऽतिव्याप्तिः स्यात्। ततस्तेजोवृतीत्यादिदाने नातिव्याप्तिः। रूपत्वे तु तेजोवृत्त्यवृत्तित्वं नास्ति। तेजोवृत्तिवृत्तित्वस्य रूपत्वे सत्त्वात्। जलपदं च गन्धेऽतिव्याप्तिवारणार्थम्। तत्रापि तेजोवृत्त्यवृत्ति पृथिवीवृत्तिवृत्तिप्रत्यक्षगुणत्वसाक्षाद्व्याप्या जातिर्भवति गन्धत्वम् तद्वत्त्वम्। तमादाय गन्धेऽतिव्याप्तिः। जलपदे दत्ते तु नातिव्याप्तिः। गन्धत्वस्य यद्यपि पृथिवीवृत्त्यवृत्तित्वं वर्तते तथापि जलवृत्तिवृत्तित्वं नास्तीति। सोऽयं रसो जीवनपुष्टिबलारोग्यमरणकृशत्वदौर्बल्यकारणम्।

(३) गन्धः ।

घ्राणमात्रेति। यथाश्रुतेति। [३]घ्राणग्राह्योत्पन्नमात्रविनष्टे पृथिवीपरमाणुत्र गन्धादावव्या-प्तिमाशङ्क्य[४] विवक्षां करोति। घ्राणमात्रग्राह्या जाति र्गन्धत्वम्। तद्वत्त्वमादाय तस्यापि सङ्ग्रह इत्य[र्थः]। न चात्रापि मनोग्राह्यत्वेन घ्राणमात्रे ग्राह्यत्वमसिदमिति वाच्यम्। घ्राणकारणकसाक्षात्का-रविषयगुणत्वव्याप्यजातिमत्त्वं गन्धत्वमित्यर्थः। अयं च परमाणुष्वपि नित्य एवेत्यर्थः।

(४) स्पर्शः ।

त्वगिन्द्रियेति-त्वगिन्द्रियप्रत्यक्षे स्पर्शविशेषेऽव्याप्तिनिरासायाह-त्वगिन्द्रियमात्रग्राह्या या

---

१. B omits व्याप्य. २. B रूपमादायति.. ३. This प्रतीक is not found in त.भा.प्र.. ४. B -दावतिव्या..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जातिः, तद्वत्त्वमादाय सर्वत्र लक्ष्ये लक्षणगमनात् । **मात्रेति** । यदि मात्रपदं न दीयते तदा त्वगिन्द्रियेण यथा स्पर्शत्वं गृह्यते तथा गुणत्वमपीति मात्रपददानम् ।

न च स्पर्शस्यापि मनोग्राह्यत्वेन त्वज्मात्रग्राह्यत्वमसिद्धमिति वाच्यम् । त्वगिन्द्रियकरण-कसाक्षात्कारविषयविशेषगुणः(ण)वृत्तिस्नेहद्रवत्वावृत्तिजातिमत्त्वस्य विवक्षित्वात् । त्वगिन्द्रियं करणं यस्य, एतादृशो यः सः साक्षात्कारः तद्विषयीभूतो यो विशेषगुणः तद्वृत्ति र्या स्नेहद्रव्य(व)त्वावृत्तिर्जातिः तद्वत्त्वं स्पर्शत्वम् । स्नेहे द्रवत्वे चातिव्याप्तिवारणार्थं स्नेहद्रव्यत्वावृत्तिरिति पदम् । एकत्वादिवारणार्थं च विशेषगुणपदम् । रूपादिवारणार्थं त्वगिन्द्रियप्रकरणकपदम् । पृथिवी-उदकज्वलनपवनवृत्तिः । पार्थिवपरमाणुष्वनित्योऽन्यत्र नित्यः । अवयविनि कारणगुणपूर्वकः आश्रयनाश्यश्च । एतेषु गुणेषु प्रत्यक्षमेव प्रमाणम् । अतीन्द्रियरूपादौ च कार्यरूपादिकमेव प्रमाणमिति ज्ञेय[म्] ।

परमाणुरूपादीनामिति - तथा च परमाणुरूपे यद्यप्युद्भूतत्वं वर्तते तथापि महत्त्वं नास्ति। महत्त्वं चैकार्थसमवायसम्बन्धेन रूपप्रत्यक्षं प्रति कारणं बोध्यम् । चक्षुषः रूपे यद्यपि महत्त्वं वर्तते तथाप्युद्भूतत्वं नास्तीति न तत्प्रत्यक्षम् । सुवर्णरूपे तु यद्यप्येकार्थसमवायसम्बन्धेन महत्त्वमुद्भूतत्वमपि तिष्ठति, तथापि बलवत्सजातीय प्रतिबन्धकवशात्, न तत्प्रत्यक्षम् । प्रतिबन्धकाभावरूपस्य कारणस्यासत्त्वादित्यर्थः ।

(A) पाकजप्रक्रियानिरूपणम् ।

अथ प्रसङ्गात् पाकजप्रक्रिया निरूपिता । तत्रादौ परमाणुष्वेव पाकोत्पत्तिः, पीठरेऽपि वेति विचारः । तत्र विप्रतिपत्तिः । पार्थिवाः रूपरसगन्धस्पर्शा अग्निसंयोगजन्या न वा ? घटेऽग्निसंयोगासमवायिकारणरूपवान् वाऽग्निसंयोगो घटसमवेतरूपादिजनको न वा? घटत्वमग्नि संयोगजन्यरूपसामानाधिकरण्यं न वेति विधिकोटिः ।

प्रथमविप्रतिपत्तौ [विधिकोटिः]**वैशेषिकाणाम्** । तैः परमाणुष्वेव हि पाकजरूपादिकं स्वीक्रियते । द्वयणुकादौ तु परमाणुरूपादिना रूपादिज्ञानजननात् ।

द्वितीयविप्रतिपत्तौ तु विधिकोटि**र्नैयायिकानाम्** । निषेधकोटि **वैशेषिकाणाम्** । **नैयायिकैः** घटेऽग्निसंयोगेन जन्यं यद्रूपं तद्वत्त्वं स्वीक्रियते । निषेधो **वैशेषिकाणाम्** । तत्र पाकेनाग्निसंयोगेनाव-यविष्वपि रूपादिकं जन्यते इति **नैयायिकाः** । तेन परमाणुष्वेव पाकजा रूपादयः इति **वैशेषिकाः** । तत्र **नैयायिका**नामयमाशयः-यथाऽऽवाहनिक्षिप्तानां घटादीनां पूर्वरूपाद्[1]विजातीयं रूपादिकमुपलभ्यते, तत्र पाकस्यैवान्वयव्यतिरेकाभ्यां कारणत्वं दृश्यते ।

---

१. A पूर्वरूपादिविजा..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु तेषामपाकस्थानानां घटादीनामापरमाण्वन्तविभागेन द्वयणुकपर्यन्तावयविनाशे[१] सति स्वतन्त्राः परमाणवः पच्यन्ते । अनन्तरं द्वयणुकादि प्रक्रमेण घटपर्यन्तावयविषु जातेषु सत्सु कारणगुणपूर्वकं तत्र घटादिषु रूपादय उत्पद्यन्ते । कल्पनागौरवपराहतत्वात् । द्वयणुकपर्यन्तं नाशः, घटपर्यन्तं पुनरप्युत्पत्तिकल्पनागौरवम् । किञ्च पाकादुत्तरितेषु घटादिषु स एवायं घट इति प्रत्यभिज्ञाऽपि भवन्मते न स्यात् । सर्वासु दशासु पाकक्षेपमारभ्य रूपोत्पत्तिपर्यन्तं घटस्य दर्शनं न स्यात् । भवन्मते द्वयणुकमारभ्य घटोऽन्य एवोत्पद्यते इति न युक्तम् । घटाद्युपरि पात्रान्तरधारणमपि तथैव दृश्यते इत्यपि न स्यात् । तथा संस्थानमपि प्राचीनमेव यथा वर्तते तथैव पाकानन्तरमुपलभ्यते । [२]आपाकप्रक्षेपसमये रेखोपरेखादिकं च पूर्ववदुपलभ्यते । कथं द्वयणुकपर्यन्तं तन्नाशः ? सङ्ख्यापरिमाणमपि तथैवोपलम्भात् । तस्मात् घटादीनामेव पाको जायते ।

नन्वन्तः स्थितानामवयवानामग्निसंयोगाभावाद् पूर्वपूर्वरूपादिनाशो रक्तरूपाद्युत्पत्तिश्च न स्यात् मध्यदेशावच्छेदेनाग्नि[३]संयोगाभावादिति चेत्, न । **न्यायमते** सच्छिद्रत्वादेव । तथाह्यवयविनो यावन्तः पदार्थाः ते सच्छिद्रा एव । तेन मध्यदेशावच्छेदेनाग्निसंयोगस्तेन मार्गेण तत्रास्त्येव । नन्वयविसच्छिद्रतायां किं प्रमाणमिति चेत्, न[४] । अन्तर्निहितघृततैलादिस्रवणस्य जलादिनिर्गमनस्य च तत्र प्रमाणत्वात्[५] । ततः सच्छिद्रा एवावयविनः । अणुमात्रानुप्रवेशात् । सर्वावयवावच्छेदेन कथं पाकः स्यादिति चेत्, न । अन्तः स्थितानामपि तण्डुलानां भस्मीभावदर्शनात् बहुतेजोनुप्रवेशः स्वीकर्तव्यः । इति **न्यायेन वैशेषिकमतं** दूषितम् ।

अत्र **वैशेषिकाः**-प्रत्यभिज्ञानं च सूचिविदलनत्रसरेणुके घटादौ खण्डघटोत्पत्त्याऽवयवं (अयं ?) स घट इति प्रतीति र्न स्यात् । भ्रान्तम् । न च तत्र द्रव्यं न नश्यते इति वाच्यम् । आरम्भक-द्रव्यसंयोगनाशस्य द्रव्यनाशकत्वात् यथा बहुलतेजोऽनुप्रवेशात् सर्वावयवावच्छेदेन पाको जायत इति । तत्स(त)दा स्यात् यदि तावत्तेजोऽनुप्रवेशेनावयवी न नश्येत् । तेजसो ह्यतिवेगवत्तया नोदनाभिघातयोरन्यतरः संयोगोऽवयवविश्लेषहेतुक्रियाजनक[६] इति नावयविनाशः । येनाग्निसंयोगे-नानन्तः स्थितोपलादीनामपि भस्मीभावस्तेन पीठरकं न नश्यतीति महती प्रतिज्ञा ।

तथा च तेजोऽनुप्रवेशान्नोदनाख्योऽभिघाताख्यो वा संयोग उत्पद्यते । तेन संयोगेनावयवेषु कर्म उत्पद्यते । तेनावयवानां परस्परं विभागः क्रियते । तदनन्तरं तदारम्भकसंयोगनाशः क्रियते । तेन संयोगनाशेनासमवायिकारणनाशेनावयविनाशः क्रियते । तदनन्तरं च स्वतन्त्राः परमाणवः पच्यन्ते-इति स्थिते द्वयणुकनाशमारभ्य कतिभिःक्षणैः पुनर्द्वयणुकमुत्पाद्य रूपादिकं भवतीति शिष्यबुद्धिवैशद्यार्थं पाकजक्रियेयं लक्ष्यते ।

---

१. B -नाशेति-. २. B अपाक-. ३. B -ग्नियोग. ४. A omits न. ५. B प्रमाणसत्त्वात् । ६. B -श्लेषक्रियाहेतुजन-.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(B) पाकजप्रक्रियायां क्षणविचारः ।

येन विभागजविभागो न स्वीक्रियते तन्मते नव क्षणाः । विभागजविभागाङ्गीकारमतेऽपि विभागः सापेक्ष एव विभागान्तरं जनयति । [1]विभागो हि क्रियान्तरसापेक्ष एव विभागान्तरं जनयति । द्रव्यान्तरमपेक्ष्य वा[2] विभागः जनयति । संयोगविभागयोरनपेक्षकारणं कर्मेति कर्मलक्षणावयवादि-विभागेन किञ्चिदनपेक्ष्यैव विभागः संयोगश्च जन्येते । तदा विभागे कर्मलक्षणगमनात्कर्मत्वापत्तिः ।

येन च[3] विभागजो विभागः स्वीक्रियते तन्मते दशक्षणाः । द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजननम् । तदा दशक्षणाः । यदि द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागेन विभागो जन्यते तदैकादशक्षणाः ।

तथा हि पूर्वं नवक्षणमतव्युत्पादनम्-यथा वह्निनोदनादभिघाताद् द्वयणुकारम्भके परमाणौ [4]कर्मोत्पद्यते इति प्रथमक्षणे कर्मोत्पत्तिः । द्वितीयक्षणे तेन कर्मणा परमाणोः परमाण्वन्तराद्विभागो जायते । पुनस्तृतीयक्षणे तेन विभागेन द्वयणुकारम्भकसंयोगविनाशो जायते । तदनन्तरं चतुर्थक्षणे तेन संयोगनाशेन द्वयणुकनाशः जन्यते । पञ्चमक्षणे केवलपरमाणौ अग्निसंयोगेन श्यामादिरूपादिनाशो[5] जन्यते । तदनन्तरं षष्ठे क्षणे तत्रैव परमाणौ रक्तरूपाद्युत्पत्तिर्जायते । सप्तमे क्षणे रूपादिमति परमाणौ क्रिया । अष्टमे क्षणे परमाणुद्वयसंयोगः । नवमे क्षणे द्वयणुकोत्पत्तिरिति केचित् ।

अथवा नवक्षणाः-प्रथमे क्षणे रूपादिमति परमाणौ द्रव्यारम्भानुगुणा क्रिया । तया च द्वितीयक्षणेऽऽकाशादिविभागो जन्यते । तृतीयक्षणे तेन विभागेनाकाशादिपूर्वदेशेन समं परमाणोः संयोगनाशः । चतुर्थक्षणे तेन पूर्वसंयोगनाशेन द्वयणुकारम्भकीभूतसंयोगः । परमाण्वन्तरेण समं संयोगो जन्यते । पञ्चमक्षणे परमाणुद्वयसंयोगेन द्वयणुकासमवायिकारणीभूतेन द्वयणुकोत्पत्तिर्जायते । षष्ठे क्षणे द्वयणुके रूपाद्युत्पत्तिर्जायते इति[6] षट् । द्वयणुकविनाशमारभ्य द्वयणुके रक्ताद्युत्पत्तिर्नवमे । प्रथमे क्षणे पूर्वोक्तप्रकारेण द्वयणुकनाशः । द्वितीय क्षणे परमाणुनिष्ठ पूर्व[रूप]नाशः । तृतीयक्षणे परमाणौ रूपाद्युत्पत्तिः - इति [7]त्रयक्षणाः । एतैश्च मिलिता षडिति नव । तथा च परमाणुरूपादिना द्वयणुके रूपादिकमुत्पाद्यते । तत्त्वाग्निसंयोगादिनेति **वैशेषिकाः** । अवयविनि पाकानभ्युपगमात् **पीलुपाकवादिन** इति ।

ननु पाकेन श्यामादिनिवृत्तिक्षणे परमाणौ द्रव्यारम्भानुगुणा क्रियाऽभ्युपगम्यताम्, एतावता सप्तमेऽष्टमे वा क्षणे रक्तरूपाद्युत्पत्ति[र]स्तीति चेत् न । अग्निनुन्नेऽभिहते वा परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण, तत्र परमाणौ क्रियान्तरानवकाशात् कर्मवति कर्मानुत्पत्तिवन्निर्गुणे

१. B omits the reading between विभागो.....जनयति.२. B omits वा. ३. B omits च. ४. B कर्मोद्यतने. ५. B ध्वंसो. ६. B omits इति. ७. B पूर्वत्रय क्षणाः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

द्रव्यारम्भानुगुणक्रियानुत्पत्तेश्चेति । तथापि परमाणौ श्यामादिरूप निवृत्तिसमकालमेव रक्तरूपाद्युत्पत्तिरस्त्विति चेत् न । पूर्वरूपध्वंसस्यापि रूपान्तरोत्पत्तौ कारणत्वात् । कारणस्य च[1]पूर्ववृत्तित्वादिति । अथ दशलक्षणप्रक्रिया । सा चेयम् द्वयणुकस्यारम्भकीभूतो यः क्षणः, तस्य यो विनाशः, तद्विशिष्टकालमपेक्ष्य परमाणुविभागेनाकाशादिदेशविभागो जन्यते । तदा दशक्षणाः । तथाहि-आवाहे[2] घटनाशानन्तरं प्रथम क्षणे वह्निनोदनादभिघाताद्वा द्वयणुकारम्भके परमाणौ कर्मेति विषयः (१)। तेन च कर्मणा परमाण्वन्तरेण विभागः । द्वितीयक्षणे । (२) । तेन विभागेन तृतीयक्षणे द्वयणुकारम्भसंयोगनाशः । [३] । चतुर्थे क्षणे तेन संयोगनाशेन द्वयणुकनाशः । तस्मिन्नेव क्षणे विभागजो विभागः प्रवृत्तः । (४) पञ्चमे क्षणे श्यामरूपादिनिवृत्तिः पूर्वदेशसंयोगनाशश्च । (५) । षष्ठक्षणे रक्तरूपाद्युत्पत्ति उत्तरदेशसंयोगेश्चा । (६) तदनन्तरं सप्तमे क्षणे वह्निगोदनजन्यं यत्परमाणुनिलं कर्म तस्य विनाशः[3] । एतन्मते पञ्चमक्षणावस्थायि कर्म । अष्टमे क्षणे तत्रैव परमाणौ अदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया । (८) । नवमक्षणे पूर्वदेशेन समं विभागः । (९) दशमे क्षणे द्वयणुकोत्पत्तिः । (१०) । इति दशक्षणाः । तदनन्तरं रूपाद्युत्पत्तिः ।

अथैकादशक्षणप्रक्रिया । आवाहे घटादीनां त्रयणुकपर्यन्तं पूर्वनाशो जातः । तदनन्तरं सर्वासु प्रक्रियाषु द्वयणुकस्य कथं विनाशः ? कथं चोत्पत्तिरिति । उच्यते-पूर्वं प्रथमे क्षणे वह्निनोदनाभिघातान्यरतरेण द्वयणुकारम्भपरमाणौ कर्म । (१) तदनन्तरं तृतीयक्षणे द्वयणुकारम्भसंयोगनाशः (२) । चतुर्थक्षणे द्रव्यनाशः । (३) । तदनन्तरं द्वयणुकविशिष्टं कालमपेक्ष्य विभागजविभागः । पूर्वदेशेन समं विभागजो विभागः । पूर्वं परमाणुनां समं विभागो वृत्तः । तेन देशान्तरेण सममिति विभागजो विभाग इति । (४) । तदनन्तरं षष्ठे क्षणे पूर्वसंयोगनाशः । (५) सप्तमे क्षणे उत्तरदेशसंयोगोत्पत्तिः । (६) । तदनन्तरमष्टमे क्षणे परमाणुकर्मनाशः । (७) तदनन्तरं नवमे क्षणे ऽदृष्टवदात्मसंयोगात्तत्रैव परमाणौ द्रव्यारम्भकानुगुणाक्रिया । (८) दशमे क्षणे ततो विभागः । (९) ततः पूर्वसंयोगनाशः (१०) । ततो द्रव्यारम्भकः संयोगः, ततो द्वयणुकोत्पत्तिः, ततो द्वयणुके रक्तरूपाद्युत्पत्तिः । [११] । इति द्वयणुकनाश विशिष्टकालमारभ्यैकादश क्षणाः । इयं पाकजप्रक्रियेति दिक् ।

(५) सङ्ख्या ।

सङ्ख्याप्रकरणे यथा-**सङ्ख्यात्वजातिमतीत्यर्थरिति अन्यथेति** । यदि मूलोक्तमेकत्वादिव्यवहारहेतुत्वं लक्षणं क्रियते तदाऽननुगमः । तथाहि-एकत्वव्यवहारहेतुत्वं तदा

---

१. B omits च. २. B आवाहे प्रथमे क्षणे वह्निनोदनादभिघाताद्वाघटनाशं(शा)नन्तरं द्व्यणुकारम्भपरमाणौ कर्मेति प्रथमः. ३. A विभागः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

द्वित्वसङ्ख्यायां नास्तीति । **मिलितस्येति** । यद्येकत्वादिसमूहालम्बनादिव्यवहारः हेतुत्वं क्रियते तदा प्रत्येकं नास्तीति संभव इत्यर्थः । तथा च यद्येकत्वादिव्यवहारहेतुत्वमात्रं लक्षणं क्रियते तदा व्यवहारविषयीभूते एकत्वादावतिव्याप्तिः । तद्वारणार्थं सङ्ख्यात्वघटितमिदं लक्षणं **टीकाकारेण** कृतमिति भावः ।

वस्तुतस्तु तदपि लक्षणं न सम्भवति । तस्य लक्षणतावच्छेदकत्वात् । सङ्ख्यायाः लक्षणत्वेन सङ्ख्यात्वस्य च लक्ष(क्ष्य)तावच्छेदकत्वात् । सङ्ख्यात्वस्यैव लक्षणेन कृतत्वात् । तथा चेदं लक्षणं बोध्यं । व्यासज्यवृत्तिवृत्तित्वे सति अव्यासज्यवृत्तित्वे सति च पृथक्त्वान्यगुणत्वव्याप्यजातिमत्त्वम् । अस्यार्थो यथा-व्यासज्यं नाम यदनेकवृत्तिधर्मः, एकपदार्थे यस्य समाप्तिर्नास्ति । यथा द्वित्वादिकम् । व्यासज्यवृत्तिधर्मो द्वित्वादिरूपो वृत्तः । तद्वृत्तित्वे सति । अव्यासज्यवृत्तिः यो धर्म एकत्वरूपो, तद्वृत्तिर्यो धर्मः, स(?)वृत्तिः (तद्वृत्तित्वं) पृथक्त्वे न वर्तते । एतादृशी या गुणत्वव्याप्या जातिस्तद्वत्त्वमेव ।

सङ्ख्यालक्षणपदकृत्यं यथा-प्रथमसत्यन्तं च द्वित्त्वादावव्याप्तिवारणार्थम् । द्वितीयं सत्यन्तं चैकात्वाव्याप्तिवारणार्थम् । तत्र व्यासज्यवृत्तिवृत्तिर्भवति । द्वित्वत्वं तत्त्वे सति पृथक्त्वान्य-गुणत्वव्याप्याजाति र्भवति द्वित्वत्वरूपा । तद्वत्वमेकत्वे नास्तीत्यव्याप्ति स्तद्वारणार्थं च द्वितीयसत्यन्तपदेन(दम्) । द्वित्वं चाव्यासज्यवृत्तिधर्मो न भवति । पृथक्त्वे [ऽ]तिव्याप्तिवारणार्थं पृथक्त्वान्यपदम् । गुणत्वमादाय गुणमात्रेऽतिव्याप्तिवारणार्थं व्याप्यपदम् ।

ननु सङ्ख्यायाः द्रव्यातिरिक्तत्वे किं प्रमाणम् सङ्ख्या नास्त्येव, एकत्वादिप्रत्ययस्य घटादिस्वरूपनिबन्धनत्वात् 'एको घट' इति प्रतीतिविषयस्तु घट एव नातिरिक्तः एकत्वरूपो गुण इति चेत् न । घटव्यक्तेस्तत्प्रयोगजकत्वे घटान्तरे तत्प्रत्ययाभावप्रसङ्गात् । एतद्घटविषयत्वेन प्रतीतिः । घटान्तरे तदनुदयात् । न च घटत्वविषयिणीयं प्रतीतिरिति वाच्यम् । घटत्वस्य तत्प्रयोजकत्वे पटादावेकत्वाभावप्रसङ्गात् । न चायं प्रत्ययो भ्रान्त इति वाच्यम् । बाधकाभावात् । तथा च नित्यत्वापेक्षायां सङ्ख्यैव निमित्तम् । द्रव्यातिरिक्ते गुणः सिद्धः प्रयोजकत्वे ।

नन्वेकत्वं जातिरेवाप्यस्तु द्रव्यमात्रनिष्ठा । भवति [१]हीदमेकमिदमेकमित्यनुगतप्रत्यय एकत्वस्य । गुणत्वेऽयमेकोऽयमेक इत्यनुगतधर्मेण गुणेनानुगता प्रतीतिरेव न स्यादिति चेत् न,। द्रव्यत्वान्यूनातिरिक्तवृत्तिः सा वाच्या, द्रव्यमात्रे तथा प्रत्ययात् । तथा च द्रव्यत्वाधिकरणातिरिक्ते पदार्थे सा नास्ति । द्रव्यत्वापेक्षया न्यूनेऽपि नास्ति । ततो द्रव्यत्वमेवैकत्वमिति वृत्तिः[२] । कलशत्व-घटत्वादिवत् । अन्यूनानतिरिक्तवृत्तिजातिर्नाङ्गीक्रियते । तथा च यदि जातिस्तदा द्रव्यत्वाद्यतिरिक्ता नास्तीति । अथ द्वित्वसङ्ख्याऽनित्यैव । तस्याः अपेक्षाबुद्धिजन्यत्वादित्याह-**इदमिति** मूलम् ।

---

१. A हीदमेवमित्यनु॰. २. A वृत्तः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नन्विति । तथा च द्वित्वनाशस्त्वेकत्वादद्यपेक्षाबुद्धिनाशेन [१]जन्यते । तत्राशङ्कते यदि द्वित्वनाशोऽपेक्षाबुद्धिनाशेन[२] जन्यो भवति तदा द्वित्वस्य क्षणिकत्वं स्यात् । यथा घटकैत्वं पटैकत्वं बुद्ध्या इमौ घटपटाविदं द्वित्वं जनितम् । तत्र प्रथमे क्षणेऽयमेक इत्यपेक्षाबुद्धिर्जाता । द्वितीयक्षणेऽयमेक इत्यपेक्षाबुद्धिर्जाता । तृतीयक्षणे इमौ द्वाविति द्वित्वसङ्ख्योत्पद्यते । अस्मिन्नेव तृतीयक्षणे प्रथमापेक्षाबुद्धेर्नाशो वृत्तः । तथा च द्वित्वोत्पत्तिप्रथमापेक्षाबुद्धिनाशयोरेकैव क्षणो जातः । द्वित्वोत्पत्तिक्षणापेक्षया द्वितीय क्षणे द्वित्वनाश एव स्यात् । अपेक्षाबुद्धिनाशरूपकारणस्य सत्त्वात् । ततो द्वित्वस्य क्षणिकत्वं[३] स्यादित्याशङ्कार्थः ।

न च यावदिति यद्यपि प्रथमापेक्षाबुद्धेर्नाशस्तत्र वर्तते तथापि यावदेपेक्षाबुद्धिनाशो नास्ति द्वित्वापेक्षाबुद्धेर्विद्यमानत्वादित्यपि न वाच्यम् । **त्रित्वादीति** - यत्र त्रित्वादिबुद्धिर्जायते तत्र यावदपेक्षा-बुद्धीनां मिलितं नास्ति, तृतीयापेक्षाबुद्ध्युत्पत्तिसमये प्रथमापेक्षाबुद्धेर्नाशात्[४] ततः त्रित्वोत्पत्तिरेव[५] न स्यादित्याशङ्कार्थः ।

समाधत्ते-**समूहालम्बनेति** तथा च त्रित्वोत्पत्त्यन्यथानुपपत्त्या तेषामेकत्वादीनां समूहालम्बनात्म(त्मि)कैकैव बुद्धिर्वाच्या । यथा प्रथमतोऽयमेकोऽयमेकः इत्यपेक्षाबुद्धिः प्रत्येकमेव जायते । तथा चैकत्वविषयकः संस्कारो जन्यते । तेन च समयान्तरे समूहालम्बनात्मिका एका स्मृतिरूपाऽपेक्षाबुद्धिर्जायते । तया च द्वित्वसङ्ख्योत्पत्तिः । यद्येवं तदा द्वित्वस्थलेऽपि क्षणिकत्वं वक्तुमशक्यम् । तत्रापि समूहालम्बनरूपाऽपेक्षाबुद्धिः स्मृतिरूपा स्वीकर्तव्या । तया च द्वित्वमुत्पाद्यते । तथा च द्वित्वोत्पत्तिसमयेऽपि अपेक्षाबुद्धेः सत्त्वेन तन्नाशाभावात् द्वित्वस्य न क्षणिकत्वमित्यर्थः ।

नन्विति - तथा च परमाणुद्वये पृथिव्यादिपरमाणुद्वये[६] यत्र द्वयोत्पत्तिर्जायते तत्र कस्यापेक्षाबुद्धिरस्ति ? तत्र चास्मदादीनामपेक्षाबुद्धिर्नास्ति । तयोरतीन्द्रियत्वात् । तस्मा-दीश्वरापेक्षाबुद्ध्या परमाणुद्वयनिष्ठं द्वित्वमुत्पाद्यत इति । । तथा च यद्यपेक्षाबुद्धिनाशेनैव द्वित्वनाशो जायते तदा परमाणुद्वयनिष्ठ द्वित्वस्य नाश एव न स्यात् । ईश्वरबुद्धेर्नित्यत्वात्[७] ।

उत्तरयति-**तत्रेति** अदृष्टविशेषनाश एव परमाणुनिष्ठद्वित्वस्य नाशक इति । न च परमाणुद्वयनिष्ठं च द्वित्वं च नित्यमेवेति वाच्यम् । तस्य भावकार्यत्वेनानित्यत्वात् । तथा च यत्र [८]दृष्टसामग्री न सम्भवति, तत्रादृष्टमेव कल्प्यते इति ज्ञेयम् । [९]ननु कार्यद्रव्यनिष्ठं[१०] च नित्यमेवापेक्षाबुद्ध्या च व्यज्यत इति चेत्, न । तथा सति घटादीनामपि नित्यत्वप्रसङ्गात् । तत्रापि मृत्पिण्डादीनां घटादिव्यञ्जकत्वमेव वाच्यं स्यात् ।

---

१. A जन्य [:]. २. A बुद्धिनाशनाश्यो. ३. B क्षणिकत्वादित्या-. ४. B बुद्धिनाशात्. ५. B -रेवतस्यापीत्या-. ६. A omits पृथिव्यादिपरमाणुद्वये. ७. B -नश्यात्मत्वात् (!). ८. B दिष्ट-. ९. B तेषु तु कार्य-. १०. B कार्याकार्यनिष्ठं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(६) परिमाणम् ।

परिमाणत्वजातिमदिति-यथाश्रुतमूले यस्यातीन्द्रियस्य परिमाणं न गृह्यते तत्र परिमाणेऽव्याप्तिः स्यात् । अत्राह तत्रापि परिमाणत्वं जातिरस्तीति विवक्षया । ननु परिमाणस्य परिमाणत्वं लक्ष्यतावच्छेदकत्वं तदेव यदि लक्षणं क्रियते तदा व्यतिरेक्यनुमाने वैय्यर्थापतिरिति चेत् न । कालवृत्तिवृत्तित्वे सति एकवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं परिमाणत्वम् ।

अयमर्थः कालवृत्तिर्यो गुणस्तत्र वर्तते या जातिः अथ चैकद्रव्यवृत्तिर्यो गुणस्तन्मात्रवृत्तित्वे सति, गुणत्वस्य साक्षाद्व्याप्या जातिः, तद्वत्त्वं प्रथमं सत्यन्त रूपादावतिव्याप्तिवारणार्थम् । तत्राप्येकद्रव्यवृत्ति भवति रूपम् । तत्र वर्तते यो(या)गुणत्वसाक्षाद्व्याप्या जातिः रूपत्वस्वरूपा तद्वत्त्वं रूपे तिष्ठतीति । तथा च रूपत्वस्य कालवृत्तिर्यः संयोगादिः तद्वृत्तित्वान्नातिव्याप्तिः । एकवृत्तिर्यः संयोगादिः । एकवृत्तिमात्रवृत्तिपदं कालसंयोगादावतिव्याप्तिवारणार्थम् । तस्यापि कालवृत्तिवृत्तित्वे सति गुणत्वसाक्षाद् व्याप्या जातिः संयोगत्वरूपा, तद्वत्त्वं कालघटादिसंयोगेऽस्तीति । व्याप्यपदादाने गुणत्वमादाय गुणमात्रेऽतिव्याप्तिः स्यात् । तस्यापि कालवृत्तिवृत्तित्वे सति एकवृत्तिगुणत्वजातिमत्त्वमस्त्येव । एको भवति घटः, तद्वृत्ति रूपादिकम् तद्वृत्ति भवति गुणत्वमिति । तद्वत्त्व गुणमात्रे तिष्ठतीति तदर्थं गुणत्वव्याप्या या जातिरिति ।

साक्षात्कारपदं चैकत्वेऽतिव्याप्तिवारणार्थम् ।

तस्यापि कालवृत्ति यदेकत्वं-तत्त्वे सत्येको यो कालस्तद्वृत्ति यदेकत्वं तन्मात्रवृत्तिर्या गुणत्वव्याप्या जातिरेकत्वरूपा तद्वत्त्वं च कालैकत्वेऽतिव्याप्तिः स्यात् । तद्वारणार्थं साक्षात्पदम् । सङ्ख्यापरिमाणत्वस्यैव गुणत्वस्य व्याप्यत्वात् ।

जातिपदं समवायसम्बन्धेन तद्वत्त्वबोधार्थम् । अन्यथा द्रव्यादौ सर्वत्रातिव्याप्तिः स्यात् । द्रव्यस्यापि कालवृत्तिवृत्तिर्या[1] जातिः परिमाणत्वं तदेवैकवृत्तिमात्रवृत्तिर्भवति । सैव [2]च गुणत्वसाक्षाद्व्याप्या जातिर्भवति । तद्वत्त्वं यथा परिमाणे तिष्ठति तथा स्वाश्रयाश्रयसम्बन्धेन द्रव्यमात्रेऽपि तिष्ठति । स्वशब्देन परिमाणत्वम्, तदाश्रयो भवति परिमाणम्, तस्याश्रयो भवति द्रव्यम् । अनेन सम्बन्धेन [3]परिमाणं द्रव्ये वर्तते-इत्यतिव्याप्तिः । एतन्निरासार्थं समवायपदम्[4] । तथा च समवायसम्बन्धेन परिमाणत्वं द्रव्ये नास्तीत्यतिव्याप्तिर्न भवतीत्यर्थः ।

अन्यथेति मूले यद्वर्तते [5]मानव्यवहारासाधारणं कारणमिति[6], तत्र[1]साधारणपदकृत्यमाह-**कालादाविति** । कालस्यापि कार्यमात्रं प्रति कारणत्वेन कालेऽतिव्याप्तिः स्यात् । तद्वारणार्थमसाधारणपदम् ।

---

१. B कालवृत्ति. २ B omits च. ३. B परिमाणत्वे वर्तते. ४. B -वायिपदम्. ५. A -व्यवहार साधा.. ६. B -मित्युक्तं.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यवहारपदनिर्वचनेन लक्षणं दूषयति- **व्यवहारेति**-यदि व्यवहारपदेन शब्दग्राह्यो प्रयोगो गृह्यते तदाऽसम्भवः शब्दस्तु व्यवहर्तव्यः । यो पदार्थो प्रकृते परिमाणरूपः, तेन न जन्यत इति । यदि व्यवहारपदेन मानविषयकं प्रत्यक्षज्ञानम्, तदाऽतीन्द्रियपरिमाणेऽतिव्याप्तिः । तद्वारणार्थं **टीकाकृता** व्याख्यातं परिमाणजातिमदित्यर्थ इति भावः । ननु परिमाणत्वजातिसिद्धौ किं प्रमाणमिति चेत्, न । अनुगतप्रत्यक्षमेव । यद्युच्यते इदं प्रत्यक्षप्रमाणमतीन्द्रियपरिमाणसाधारणं न भवतीति तदाऽनुमानमेव वाच्यम् । यथा 'महत्परिमाणं महापरिमाणासमानाधिकरणगुणवृत्तिगुणत्वव्याप्यजातिमत्, मूर्तगुणत्वात्, रूपवत्।' महापरिमाणेन सहासमानाधिकरणा या गुणवृत्तिः गुणत्वव्याप्या जातिः तद्वत्त्वं साध्यम् पक्षधर्मताबलात्परिमाणत्वं जातिः सिध्यति । मूर्तपदं च ज्ञानादौ व्यभिचारवारणाय हेतोः । अन्यथा गुणत्वं वर्तते ज्ञाने । तत्र महेत्यादि साध्यं नास्ति । महापरिमाणाधिकरणे आत्मनि ज्ञानस्य सत्त्वेन व्यभिचारः स्यात् । तत्र ज्ञाने साध्याभावात् ।

प्रशिथिलेतीति । कार्यद्रव्यासमवायिकारणीभूतो यः संयोगस्तत्र प्रशिथिलत्वं नाम संयोगत्वव्याप्यो जातिविशेषः, येन संयोगविशेषेण स्थूलोऽवयवव्युत्पद्यत इत्यर्थः ।

(७) पृथक्त्वम् ।

पृथग्त्वव्यवहारे[१] **हेतुरिति** मूलम् । ननु कालेऽतिव्याप्तिः, तस्यापि जन्यमात्रकारणत्वादिति चेत्, न । अवधिव्यङ्ग्यत्वे सत्येकमात्रवृत्ति वृत्त्यनेकवृत्तिवृत्तिगुणत्वजातिमत्त्वं पृथक्त्वम् । यथा घटात्पटः पृथगित्यत्र घटे भवत्यवधिः । एवं सर्वत्र पञ्चम्यन्तं पदम् । पृथक्त्वपदं समभिव्याहरेण पञ्चम्यन्तं पदार्थोऽवधिः । तथा चावधिव्यङ्ग्यत्वे सति एकमात्रे वर्तते यो गुणः तद्वृत्तित्वे च सति या गुणत्वव्याप्या जातिः, तद्वृत्तित्वमित्यर्थः ।

आद्यं सत्यन्तं द्वित्वादिसङ्ख्यायामतिव्याप्तिवारणार्थम् । तत्राप्येकमात्रवृत्ति गुणे भवत्येकत्वम्, तद्वृत्तिर्भवति सङ्ख्यात्वम् सैवानेकवृत्तिवृत्तिर्भवति । यतोऽनेकपदार्थवृत्तिर्भवति द्वित्वातद्वृत्तिर्दित्वादौ भवति सङ्ख्यात्वम् । सैव च गुणव्याप्या जातिर्भवति । तद्वत्त्वं द्वित्वादावस्ति । तद्वारणार्थमवधिव्यङ्ग्यत्वपदम् । द्वित्वैकत्वादीनामवधिव्यङ्गत्वं नास्ति । एकमात्र वृत्ति पदादाने एकपृथक्त्वेऽव्याप्तिः । यथाऽवधिव्यङ्ग्यत्वे सत्यनेकवृत्तिवृत्तिर्भवति गुणत्वव्याप्या जातिः द्विपृथक्त्वम् तद्वत्त्वं चैकपृथक्त्वे नास्तीति । तद्वारणार्थकमेकमात्रवृत्तिवृत्तिपदम् द्विपृथक्त्वं चैकमात्रवृत्ति न भवतीति तत्र नाव्याप्तिः । अनेकवृत्तिवृत्तिपदं च द्वित्वपृथक्त्वेऽतिव्याप्तिवारणार्थम्। अत्राप्यवधिव्यञ्यत्वे सति एकमात्रवृत्तिवृत्तिर्या गुणत्वव्याप्या जातिरेकपृथक्त्वम् । तद्वत्कंव द्विपृथक्त्वे नास्तीत्यव्याप्तिः । अत उक्तमनेकवृत्तिवृत्तिपदम् । एकपृथक्त्वस्य यद्यप्येकमात्रवृत्तिवृत्तित्वं वर्तते,

१. B It is पृथग्व्यवहारासाधा.. in त. भा. प्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथाप्यनेकवृत्तिवृत्तित्वं नास्तीति नातिव्याप्तिः । गुणत्वमादाय गुणमात्रेऽतिव्याप्तिवारणार्थं व्याप्यपदम् । यद्यप्यनेन गुणत्वमपि गुणत्वव्याप्यं भवत्येव तथापि भेदेनात्रव्याप्यव्यापकभावो विवक्षितः ।

जातिपदं समवायसम्बन्धेन तद्वत्त्वबाधार्थम् । प्रमाणं चात्रेदमस्मादित्यबाधितं प्रत्यक्षमेव गुणत्वसाधकम् । कथम् ? यथा सङ्ख्यात्वं पक्षः[1] । एकानेकवृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजाति-समानाधिकरणात्यन्ताभावप्रतियोगिगुणत्वव्याप्यजातित्वात्, रूपत्ववत् । साध्यार्थो यथा एकस्मिन्नेकस्मिन् च वर्तते यो पदार्थ स्तद्वृत्तिर्या गुणत्वसाक्षाद्व्याप्या जातिः, तत्समानाधिकरणो योऽत्यन्ताभावः तत्प्रतियोगित्वं रूपत्वस्यास्ति । यथा रूपत्वं साध्यं तिष्ठति । तथा हि यथा घटात्पटः पृथगित्यत्र- अथ च [2]घटात्पटस्तन्तौ पृथगित्यत्रैकानेकवृत्तिर्गुणः पृथकत्वरूपो जातः । तत्र वर्तते या गुणत्वसाक्षाद्व्याप्या जातिः पृथक्त्वम् । अर्थात् तत्समानाधिकरणो योऽत्यन्ताभावो रूपत्वादीनाम्, तत्प्रतियोगित्वं रूपे तिष्ठतीति-तथा पक्षरूपसङ्ख्यात्वेऽपि तिष्ठति । एकानेकवृत्तिवृत्तिगुणत्व-साक्षाद्व्याप्या जातिर्भवति पृथक्त्वम् । तत्समानाधिकरणोऽत्यन्ता-भावसङ्ख्यात्वस्य । तत्प्रतियोगित्वं सङ्ख्यात्वेऽस्ति । तथा चानेनानुमानेन पक्षधर्मताबलात् पृथक्त्वनिष्ठा पृथक्त्वरूपा जातिस्तिष्ठति । द्वितीयवृत्तिवृत्त्यन्तं पदानुपादाने[3] बाधः । यथा गुणत्वसाक्षाद्व्याप्या जातिर्भवति सङ्ख्यात्वम् । तत्समानाधिकरणात्यन्ताभावप्रतियोगित्वं सङ्ख्यात्वस्य सङ्ख्यात्वे नास्तीति बाधः स्यादिति । अनेकवृत्तिपदानुपादाने बाध एव । यथैकवृत्तिर्यो गुण एकत्वम् । तत्र वर्तते वा गुणत्वसाक्षाद्व्याप्या जातिः सङ्ख्यात्वरूपा, तत्समानाधिकरणो योऽत्यन्ताभावो रूपत्वादीनाम्, तत्प्रतियोगित्वं च सङ्ख्यात्वस्य नास्तीति ।

ननु पृथक्त्वे बुद्धेरन्योन्याभावेनैवान्यथासिद्धः न तदुणान्तरमिति चेत् न । पृथक्त्वस्या-वधिनिरूप्यत्वात् । अन्योन्याभावस्य प्रतियोगिनिरूप्यत्वात्-इदमस्माद् पृथगिदमिदं न भवतीति प्रतीतिवैलक्षण्याद् पृथक्त्वम्न्योन्याभावो न भवतीति । यदि पञ्चमीपदसमभिव्याहारेऽप्य-न्योन्याभावप्रतीतिर्भवति तदा नञ्पदसमभिव्याहारेऽपि घटान्न पट इति प्रतियोगेऽपि अन्योन्याभाव प्रतीतिः स्यादिति ततो भेदः ।

(८) संयोगः ।

मूले [4]**संयुक्तव्यवहारे हेतुरिति** यथा कालेऽतिव्याप्तिवारणायासाधारणपदम् । व्यवहारस्य पूर्वपदनिर्वचनात् विवक्षान्तरं लक्षणस्य । विभागप्रतियोगिकान्योन्याभाववत्त्वे सत्यनेकवृत्तिमात्र वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं संयोगत्वम् । सत्यन्तं विभागेऽतिव्याप्तिः । वाचनार्थम् गुणत्वपदानुपादाने द्रव्यत्वेऽतिव्याप्तिः । साक्षात् पदानुपादाने एतत्संयोगवत्त्वमादाय संयोगान्तरे-

१. B पक्षाः. २. This reading is corrupt in B. ३. B पददानेनुपादाने (!) ४. It is संयुक्तव्यवहार हेतुः in त.भा.प्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ऽव्याप्तिः। एतत्संयोगत्वस्यापि गुणत्वव्याप्यत्वात्। अत उक्तं गुणत्वसाक्षात्पदम्।

अथ संयोगजसंयोगव्युत्पादने टीका **हस्तेति** -[१]संयोगजसंयोगस्तु कारणाकारणसंयोगात् कार्याकार्यसंयोग उत्पद्यते। यथा [२]हस्तः कायस्य समवायिकारणं भवति। कायावयवात्। हस्तस्य[३] कायस्याकारणं भवति वृक्षः। तत्संयोगेन हस्तेन समं यो वृक्षसंयोगस्तेन कायतस्संयोगो जन्यते। अथ कार्याकार्यसंयोगो यथा हस्तस्य कार्यं भवति शरीरम्, अकार्यं भवति वृक्षः, तथा च तयोर्यः संयोगः स कारणाकारणसंयोगेन हस्ततरुसंयोगः जन्यते इत्यर्थः।

ननु संयोगजसंयोगे किं प्रमाणमिति चेत्, न। प्रतीतिरूपं प्रत्यक्षमेव। यदा[४] हस्ततरुसंयोगो जातस्तदापि यथा वृक्षः हस्तसंयोगी[ति]प्रतीतिर्जायते तथा वृक्षः चैत्रकायसंयोगी इति प्रतीत्युदयात्[५]।

कर्मसंयोगस्थले किञ्चिल्लिख्यते। ननु संयोगकर्मजत्वं न सम्भवत्येव, तत्र व्यासेरभावाद्व्यभिचारः, यथा घटक्रियया यत्र घटाकाशसंयोगो वृत्तः, स भवति कार्यः, तथा च घटाकाशसंयोगसमानाधिकरणात्यन्ताभावप्रतियोगिकतानवच्छेदकत्वं घटक्रियात्वे नास्ति, कथं घटाकाशसंयोगाधिकरणेऽऽकाशे घटक्रियाया[६] अत्यन्ताभावोऽस्ति, तथा च क्रियानधिकरणेऽपि पदार्थे संयोगस्योत्पाद्यमानत्वाद् व्यभिचारः, यत्र संयोगः समवायसम्बन्धेन तत्र समवायसम्बन्धेन क्रिया नास्तीति चेत्, न। तादात्म्यसम्बन्धेनैव कार्यकारणभावसमर्थनात्। तथा हि यत्र तादात्म्यसम्बन्धेन घटाकाशसंयोगः, [७]सः स्वस्मिन् घटाकाशसंयोग एव तिष्ठति, तत्र स्वजन्यतासम्बन्धेन घटक्रिया घटाकाशसंयोगे तिष्ठतीति न व्यभिचारः। अत्र तु सम्बन्धान्तरेण कार्यकारणभावासम्भवेऽनेनैव सम्बन्धेन कर्मसंयोगयोः कार्यकारणभावकल्पनादिति।

अत्र [८]**भवानन्द भट्टाचार्याः** चिन्त्यं वदन्ति। यद्यप्यनेनापि सम्बन्धेन व्यभिचारस्थलेऽपि कार्यकारणभावः कल्प्यते, तदा घटं प्रति रासभस्यापि कारणत्वं कल्पयितुं शक्यते। **कृष्णदासाः**- यत्र तादात्म्यसम्बन्धेन घटस्तत्र स्वजन्यतासम्बन्धेनापि रासभस्तत्र तिष्ठति। यथा यत्रान्यसम्बन्धो न सम्भवति तत्रायं सम्बन्धः कल्पनीय इति। यदि कार्यमात्रं प्रति सर्वस्यैव कारणत्वं स्यादिति। यदि चोच्यते व्यभिचारिण्ययं सम्बन्धो न कल्पनीयः, तदा भवन्मतेऽपि कर्मसंयोगयोः कार्यकारणभावोऽयं सम्बन्धो न कल्पनीयः। तस्यापि व्यभिचारित्वादिति चिन्त्यम्।

अत्र समाधानं यथा-यत्र समवायसम्बन्धेन संयोगः तत्र [९]घटक्रियाश्रयवृत्तिसंयोगाधिकरण-त्वसम्बन्धेन घटक्रिया नान्यत्र।

प्रघटः अत्र [१०]घटाकाशसंयोगः समवायसम्बन्धेन घटेऽऽकाशे च तिष्ठति। तत्रैव घटक्रियाया[११]

---

१. B संयोगसंयोगस्तु. २. B हस्तावयवो कायस्य. ३. B हस्ताकायस्य. ४. B यथा. ५. B प्रतीतिरुदयात्. ६. B क्रियया. ७. B omits सः. ८. B भावानन्द. ९. B घटाश्रयवृत्ति-. १०. B प्रकाशसंयोगः. ११. A घटक्रिया.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आश्रयो भवति घटः। तद्वृत्तिर्यः घटाकाशसंयोगः तदधिकरणत्वं घटेऽऽकाशे च तिष्ठतीति। तथा चानेन सम्बन्धेन क्रियाया उभयत्र सत्त्वे न व्यभिचार इति दिक्।

ननु संयोगस्याव्याप्यवृत्तित्वे द्वयणुकस्थले परमाणुद्वयसंयोगोऽव्याप्यवृत्ति र्न स्यात्, त(य)स्यावयवान्तरं भवति, तत्रैवाव्याप्यवृत्तित्वं संयोगस्य वक्तुं शक्यते इति चेत्, न। तत्र दिश एवावच्छेदकत्वात्। यद् दिगवच्छेदेन परमाणुद्वयसंयोगो वृत्तस्तदपेक्षयाऽन्यदिगवच्छेदेन तत्संयोगात्यन्ताभावस्य सत्त्वात् दिशामतीवसूक्ष्मत्वात्। संयोगस्याव्याप्यवृत्तित्वे किं प्रमाणमिति चेत्, प्रत्यक्षमेव। यथा मूलावच्छेदेन वृक्षे संयोगः, न शाखावच्छेदेनेति। नन्वनया प्रतीत्या सत्या संयोगस्याव्याप्यवृत्तित्वं [१]**नैयायिकै**[२]र्यदि साध्यते तदा नितम्बे हुताशनो न शिखरे', इत्यनया प्रतीत्या संयोगसम्बन्धेन द्रव्यस्याव्याप्यवृत्तित्वमायातु न च समवायसम्बन्धेनैव द्रव्यस्य साध्यव्याप्यवृत्तित्वं **नैयायिकैः** स्वीक्रियते इति वाच्यम्, समवायसम्बन्धेनापि तन्तुषु पटो न तदाशाषपृ[३](तदंशुषु ?) इति प्रतीत्या तन्तुलक्षणस्वावयवेषु पटाभावप्रतीतेरुदयात्; समवायिसम्बन्धेनापि [४]द्रव्यस्याव्याप्य-वृत्तित्वमायाति; यद्युच्यते "नितम्बे हुताशनो न शिखरे" इत्यनया प्रतीत्या हुताशनसंयोगाभाव एव[५] विषयीक्रियते, शिखरावच्छेदेनापि[६] [७]वह्नेः सत्त्वात्, यतः पर्वते वह्निरित्यनया प्रतीत्या शिखरावच्छेदेन वह्निः सिद्धः परं वह्निसंयोगस्तत्र नास्तीति द्रव्यस्याव्याप्यवृत्तित्वमिति चेत्, न।

यद्यनयायुक्त्या द्रव्यस्य व्याप्यवृत्तित्वं साध्यते तदा वृक्षे कपिसंयोगो, न शाखायामित्यनया प्रतीत्या शाखावच्छेदेन संयोगस्य समवायिभावः प्रतीयते, परं संयोगस्तत्र तिष्ठत्येव। [८]अन्यथा वृक्षः कपिसंयोगी, इति प्रतीतिरेव न स्यात्। जायते च तथा प्रतीतिरिति संयोगस्यापि व्याप्यवृत्तित्वम्। न च[९] शाखावच्छेदेन कपिसंयोगस्य समवायाभावेन संयोगवृत्तिरापादयितुं न शक्यते सम्बन्ध-व्यतिरेकेणासम्बन्धिना स्थातुं न शक्यते इति वाच्यम्। यथाऽऽकाशस्य भूतलादौ संयोगसत्त्वेन सम्बन्धी आकाशे नास्ति, तथा प्रकृते सम्बन्धव्यतिरेकेणापि सम्बन्धी कुत्रचित्स्थास्यति। तथा च यत्र सम्बन्धस्तिष्ठति तत्राकाशसम्बन्ध्यपि तिष्ठति। यत्र च सम्बन्धो नास्ति तत्र सम्बन्ध्यपि नास्तीति न नियमः। पूर्वोक्तव्यभिचारात्।

ननु यद्युच्यते "यत्र सम्बन्धस्तत्र सम्बन्धी" इत्यत्र यद्यपि नियमो नास्ति तथापि यत्र सम्बन्धाभावस्तत्र सम्बन्ध्यभाव इति नियम एवेति चेत्, न। विपरीतमेव किं न स्यात् ? 'यत्र सम्बन्धस्तत्रैव सम्बन्धी' इति। तथा चाकाशस्यापि वृत्तिमत्त्वमायातीति। ततः इयं व्यासिरप्रयोजिका[१०]। तथा च शाखायां न संयोगः इत्यनया प्रतीत्या कपिसंयोगसमवायाभाव एव

१. A omits नैयायिकै:. २. B omits यदि. ३. A दशाषु. ४. A -स्याव्याप्य.. ५. A omits एव. ६. B omits अपि. ७. A omits the reading between वह्नेः.....च्छेदेन. ८. B न वृक्षः. ९. B जायते तथा च. १०. B -जका.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रतीयते, न संयोगाभावः तत्र संयोगस्य सत्त्वात्, इति संयोगस्यापि द्रव्यवद्व्याप्यवृत्तित्वम् ।

वस्तुतस्तु द्रव्यस्य व्याप्यावृत्तित्ववादिनाऽनया वक्ष्यमाणयुक्त्या द्रव्यस्य व्याप्यवृत्तित्वं साध्यते । यथा पर्वतो वह्निमानित्यत्र पर्वत्वावच्छेदेन प्रथमतो वह्निः सिध्यति । तदनन्तरं या प्रतीतिर्जायते 'नितम्बे हुताशनो न शिखरे' इति प्रतीत्या पर्वतावयवे [1]च वह्न्यभाव प्रतीयते । पर्वतावयवे शिखरलक्षणे वह्निर्नास्त्येव । तथा च यद्यपि पर्वतावयवे नास्ति तथापि[2] पर्वतरूपावयविनि वर्तते एवेति द्रव्यस्य व्याप्यवृत्तित्वम् । तथा संयोगस्यापि व्याप्यवृत्तित्वमेव । वृक्षः कपिसंयोगीति प्रतीतेर्वृक्षत्वावच्छेदेन कपिसंयोगविषयत्वादिति **नवीनाःलीलावतीकाराः** । इति संयोगस्य व्याप्यवृत्तित्वं स्थापितं **नवीनैः**।

नन्वात्मन्यपि आकाशसंयोगः स्वीकर्तव्यः, तस्यात्मनो व्यापत्वादिति चेत्, न । आत्मनि कर्मजः संयोगः आपाद्यते, संयोगजः संयोगो वा ? नाद्यः । उभयोर्निष्क्रियत्वात् । नापि द्वितीयः । संयोगजसंयोगस्तु कारणाकारणसंयोगेनैव कार्याकार्यसंयोग उत्पद्यते । प्रकृते च तयोर्नित्यत्वेन कारणं किमपि नास्ति । तथेदं द्वयं परस्परं कार्यमपि न भवतीति न संयोगजसंयोगोऽपि तयोः । न च नित्य एव संयोगो वकतव्य इति वाच्यम् । प्रमाणाभावात् । नन्वनुमानमेव प्रमाणमिति यथा – आत्मा आकाश संयोगवान्, द्रव्यत्वात् घटवदिति चेत्, न । अप्रयोजकत्वात् । अनुकूलतर्कश्च कोऽपि नास्त्येव । तथा च विभुसंयोगो नास्त्येव । विभवश्च परस्परं विवक्ता एव तिष्ठन्ति ।

इति संयोगग्रन्थव्याख्या ।

(९) विभागः ।

विभागग्रन्थोऽपि सुकरमेव ।

ननु संयोगाभाव एव विभागोऽस्त्विति चेत्, न । विन्ध्याचलहिमाचलयोरपि विभक्तप्रत्ययः स्यात् । न चैवम् । ततः संयोगपूर्वक एव स इति न च संयोगाभाव स इति वाच्यम् । 'इमौ विभक्तौ' इति प्रतीतेः, संयोगज्ञानाभावेऽपि सत्त्वात् । तेन गुणान्तरं सिद्धम् । असंयुक्तयोरिति तथा च विन्ध्यहिमाचलयोः 'इमौ विभक्तौ' इति प्रतीतिः संयोगाभावविषया । तयोः परस्परं संयोगस्याजातत्वाद्विभागो नास्तीत्यर्थः ।

[इति विभागः ।]

---

१. B omits च. २. B omits अपि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(१०-११) परत्वापरत्वे

दिक्कृतपरत्वमिति - यत्र पिण्डेऽयमस्मात्पर इति परत्वविषयिणी प्रतीतिर्जायते तस्य परत्वस्यापि पिण्डः समवायिकारणम् । दिक्पिण्डसंयोगः परत्वं प्रत्यसमवायिकारणम् । अयमिति यदपेक्षया पिण्डे परत्वं प्रतीयते तत्संयुक्तभूतलादिसंयुक्तवानयम् यथा-एतत्पुरुषसंयुक्तोऽयं देशः तत्संयुक्तोऽग्रिमदेशः, [1]तत्संयुक्तोऽप्यग्रिमदेशः इति परंपरया संयुक्तं यद्भूतलादि, तत्संयोगो यो वर्तते पिण्डे, तद्वानयमिति बुद्धिर्निमित्तकारणम् । अपरत्वप्रतीतिः-अयमस्मादपरो निकट इति । [2]**परत्वधीरिति** निमित्तमिति शेषः । शेषः । शेषः (षं) सुगमम् ।

(१२) गुरुत्वम् ।

द्वितीयपतनेति (त.भा.प्र. पृ. ८२) तथा च द्वितीयादिपतनासमवायिकारणं वेगोऽपि भवति। वेगादपि पतनसम्भवात् । अत **आद्येति** गुरुत्वस्यातीन्द्रियत्वात्पतनलक्षणकार्येण तदनुमानम् ।[3]

(१३) स्नेहः ।

पर्यायेति चिक्कणताशब्दः स्नेहस्य पर्याय एव । तेन स्नेहत्वसामान्यवान् स्नेह इत्यर्थः ।

(१४) शब्दः ।

श्रोत्रेति - यदि गुणपदं न दीयते तदा शब्दत्वेऽति व्याप्तिः । अतः गुणपदम् । सन्निकर्षं विनेति । तथा च भेरीदेशो शब्दो भेरीदण्डसंयोगेनोत्पद्यते । श्रोत्रेन्द्रियं तु कर्णशष्कुल्यवच्छिन्नं नभत्यं वर्तते पुरुषदेशे । तथा च शब्दश्रोत्रेन्द्रिययोः परस्परपरमसम्बन्धेन श्रोत्रेन्द्रियेण शब्दज्ञानं न जननीयमित्याशङ्कार्थः ।

सिद्धान्तमाह-**अत्रेति** शब्दोत्पत्तिर्द्विधा भवति । एका वीचितरङ्गन्यायरूपा । - प्रथमतो जले यदा द्रव्यान्तर किञ्चित्प्रतिक्षिप्यते [तदा]तरङ्गोत्पत्तिर्जायते । तेन तरङ्गेण तरङ्गान्तरमुत्पाद्यते, तेन च तरङ्गान्तरमिति । एवं कृत्वा तीरपर्यन्तं क्रमेणैव तरङ्गोत्पत्तिर्जायते । तदा शब्दस्थलेऽपि यदा दिक्षु एक एव वायुर्वाति, तदा वीचितरङ्गन्याय एव ग्राह्यः । यदा च [4]वाच्यन्तरमपि चलति, तदा कदम्बगोलकन्यायः । कुण्डलकारेण शब्दोत्पत्तिर्जायते । यथा कदम्बमुकुलस्य पत्राणि-चतुर्दिक्षु पत्राण्युत्पद्यन्ते तथा शब्दोत्पत्तिर्जायते । तथा च भेर्यां शब्द उत्पद्यते । तदा भेरी भवति निमित्तकारणम्, भेरीदण्डसंयोगश्च निमित्तकारणम्, भेर्याकाशसंयोगश्चासमवायिकारणम् । दण्डोऽपि निमित्तकारणम् आकाशं तु समवा[यि]कारणम् ।

---

१. B omits the reading between तत्संपु॰....देशः. २. This प्रतीक is not found in त. भा. प्र. ३. Following गोवर्धन, गुण॰ does not discuss the quality द्रव्यत्व. ४. A वाद्यान्तरमपि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इयं प्रक्रिया प्रथमशब्दोत्पत्तौ । द्वितीयादिशब्दोत्पत्तौ तु प्रथमशब्दो द्वितीयशब्दे निमित्तकारणम्, वाय्वाकाशसंयोगस्त्वसमवायिकारणम्, आकाशं समवायिकारणम् । एवं द्वितीयेन तृतीयो जन्यते । एवं वायुनाऽऽकाशेन सह शब्दोत्पादे[१] कर्णदेशे यो शब्दः उत्पन्नः स एव श्रूयते ।

अन्त्य इति प्रथमशब्दस्यातीन्द्रियत्वात् न श्रोत्रग्राह्यत्वम् । अन्त्यः श्रोत्रप्राप्तः शब्दः श्रूयते, न तु मध्यमाः न च (नु) यदि भेरी शब्दः प्रथमोत्पन्नो यो न श्रूयते तदा भेर्यां शब्द इति प्रतीतिर्न स्यादिति चेत्, न । तस्य भ्रान्तत्वात् ।

ननु शब्दस्य समवायिकारणं भेर्येव कुतो न भवति, किमर्थमतीन्द्रियपदार्थान्तरकल्पना, तथाहि येनाकाशस्य शब्दं प्रति समवायिकारणत्वं स्वीक्रियते तेनापि भेर्यादीनां निमित्तकारणत्वं स्वीक्रियते एव। तथा च भेर्यादीनां शब्दकारणत्वमुभयसिद्धम् समवायित्वमात्रं परमधिकं कल्प्यते । भवता च एको धर्मी आकाशलक्षणः कल्पनीयः पुनस्तस्य कारणत्वं कल्पनीयम् तत्रापि पुनः शब्दसमवायित्वं कल्पनीयम्, तथा चैतत्त्रयकल्पनापेक्षयाऽस्मन्मते समवायिमात्रकल्पना भेर्यादीनां लघीयसी' ति भेर्यादीनामेव शब्दो गुण इति चेत्, न ।

यदि भेर्यादीनामेव शब्दो गुणस्तदा शब्दप्रत्यक्षमवेन न स्यात् । श्रोत्रेन्द्रियस्य भेरीशब्देन समसम्बन्धात् । इन्द्रियाणां च वस्तुप्राप्यकारित्वनियमात् । असम्बद्धभेरीशब्दविषयकं प्रत्यक्षं कथं जन्येत ? यद्युच्यते प्रथमतो भेर्यां शब्द उत्पन्नः, तेन च पूर्वरीत्या शब्दान्तरमुत्पाद्यते तेनापि शब्दान्तरम्, एवं क्रमेण श्रोत्रेन्द्रियशब्दे य उत्पन्नः शब्दः स एव श्रूयते तदा भेर्यतिरिक्तस्थले समवायिकारणत्वाभावात् शब्दोत्पत्त्यसम्भव एव बाधकः । तस्मात् भेर्याद्यतिरिक्तः शब्दप्रत्यक्षान्यथानुपपत्त्या व्यापको द्रव्यान्तरशब्दसमवायिकारणत्वेन स्वीकर्तव्यः । इति शब्दसमवायिकारणामाकाशमेव न मृदंगभेर्यादीति।

विभागजेति यथा संयोगेनाभिघाताख्यसंयोगेन शब्द उत्पाद्यते तथा विभागेनापि वं[श]दलद्वयादिविभागेनापि शब्दः जन्यते । वंशदलद्वयविभागस्तु शब्दं प्रति निमित्तकारणं, वंशदलद्वयाकाशविभागस्तु असमवायिकारणं, आकाशं तु समवायिकारणम् । वंशदलद्वयविभागेन यः प्रथमं चटचटेति शब्दः उत्पादितः स चातीन्द्रियः । तेन [२]चानुकूलवातादिसंयोगेन चटचटेति शब्दान्तरमुत्पादितम् । तं[३] प्रति वाय्वाकाशसंयोगोऽसमवायिकारणम्, शब्दो निमित्तकारणम् आकाशः समवायिकारणम् । शेषं पूर्ववत् ।

बुद्धिवदिति यथा बुद्धे[४] र्द्विक्षणावस्थायित्वम् । [५]ननु बुद्धेः द्विक्षणावस्थायित्वे किं

१. B adds द्वितीयशब्देन निमित्तकारणम् after शब्दोत्पादे. २. B omits च. ३. B omits तं. ४. B बुद्धेक्षणा. ५. B omits the reading between ननु....पदार्थत्वेन.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रमाणमिति चेत्, कार्यकारणभाव एव । ज्ञाननाशत्वेन कार्यता, ज्ञानोत्तरात्मादृष्टान्योत्पन्नपदार्थत्वेन कारणता । यदाऽऽत्ममनः संयोगेन प्रथमं ज्ञानमुत्पादितं तदा तदनन्तरमेवात्मादिकारणसत्त्वात् ज्ञानान्तरमिच्छा चोत्पत्स्यति, तदा प्रथमं ज्ञानं ते[न]नाश्यते । तथा च प्रथमज्ञानं प्रथमक्षणे उत्पन्नम् । द्वितीयक्षणे च प्रथमज्ञानस्य स्थितिः तदैवैतन्नाशकस्योत्पत्तिः । तृतीयक्षणे प्रथमज्ञाननाशकत्वेन प्रथमज्ञानस्य नाशो जन्यते । ततो द्विक्षणावस्थायित्वम् । न च प्रथमज्ञानस्योपिस्थितिरेवाङ्गीक्रियते इति वाच्यम् । तदा द्वितीयज्ञानादीनामुत्पत्तिरेव वक्तुमशक्येति तात्पर्यन्तम् । तस्यैवानवस्थायित्वात् । तथा च ज्ञानस्य नित्यत्वमेव स्यात् । ज्ञानं च नित्यं न भवति । ज्ञानं नष्टमिति प्रतीतेः । तथा च प्रथमज्ञानस्य तात्पर्यन्तमवस्थायित्वे तस्य नाशकं किञ्चिद्वाच्यमेव । तत्समानाधिकरणधर्मस्यैव[१] तदुत्तरोत्पन्नात्म-विशेषगुणत्वेनैव नाशकता वाच्या इति द्विक्षणावस्थायित्वमेव ज्ञानस्य ।

न तु कर्मसाम्यमिति कर्मणः क्षणचतुष्ट्यावस्थायित्वम् । यथा प्रथमं नोदनाभिघाताख्यसंयोगात् घटादौ कर्म उत्पद्यते । तदनन्तरं पूर्वदेशेन समं घटादीनां विभागो द्वितीयक्षणे जायते । तदनन्तरं तृतीयक्षणे पूर्वदेशेन समं यो घटसंयोगस्तस्य नाशो जायते । चतुर्थक्षणे घटस्योत्तरदेशसंयोगो जायते । न च तृतीयक्षणे एवोत्तरदेशसंयोगः कथं न जायते इति वाच्यम् । तदानीं पूर्वदेशघटसंयोगस्य प्रतिबन्धकस्य विद्यमानत्वात् उत्तरसंयोगं प्रति पूर्वसंयोगप्रतिबन्धको भवतीति तत्सत्त्वे तदनुदयात् । तदनन्तरं पञ्चमे क्षणे कर्मनाशः । इति कर्मणः क्षणचतुष्टयावस्थायित्वम् ।

अत्र प्रसङ्गात् ज्ञानं विचार्यते । नन्वेकस्मिन्नेव घटे दशपुरुषाणां घटविषयकमेव ज्ञानं जातम्, तत्सर्वेषामेकमेव ज्ञानं स्वीकर्तव्यं लाघवादिति चेत्:-अत्र **नवीना आहुः**-समवायिकारणभेदेन कार्यभेदाङ्गीकारात्-यथा तन्त्वादिभेदेन पटादीनां भेदो जायते तथाऽत्राप्यात्मभेदात् ज्ञानभेद इति । तदपि न सम्भवति । समवायिकारणभेदेऽपि कार्याभेदात् । [२]यथा द्वित्वोत्पत्तिस्थले घटपटादिनिष्ठं यत् द्वित्वम्, तत्प्रति घटपटौ समवायिकारणम् । अनयोः परस्परं भेदेऽपि द्वित्वसङ्ख्याया अभेदात् । न चासमवायिकारणभेदेनैव कार्यभेदः, प्रकृते चासमवायिकारणमात्मसंयोगस्तस्य चैत्रीयाद्यात्मसंयोगापेक्षया भिन्नत्वात्, ततो ज्ञानमपि भिन्नं भवतीति वाच्यम् । द्वित्वस्थले एवासमवायिकारणभेदेऽपि द्वित्वभेदाभावात् । यथा घटपटौ द्वावित्यत्रासमवायिकारणं भवति घटैकत्वम्, पटैकत्वं च भिन्नमस्ति। तत्र परं कार्यरूपद्वित्वे भेदो नास्ति ।

न च ज्ञानस्यानेकव्यक्तिवृत्तित्वं [३]द्वित्ववद् स्यादिति वाच्यम् । व्यासज्यवृत्तित्वेऽनेकव्यक्तिवृत्तित्वं नियामकं न भवति । तथा च सति भवन्मते घटत्वस्यापि व्यासज्यवृत्तित्वं स्यात्। ततो बाधकाभावादनेकात्मसु एकविषयकमेकं ज्ञानमेकमेवेति **नवीनाः** । **जीर्णानां** सर्वेषां मते

---

१. A -करणस्यैव. २. B तथा. ३. B द्रव्यवद्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भिन्नमेव ज्ञानं तदिति ।

तत्समाधीयते-व्यभिचारादेवानेकात्मसु एकविषयकमेकं ज्ञानं न स्वीक्रियते । तथाहि ज्ञानस्थले कार्यकारणभावस्तु विशेषत एव ग्राह्यः । अन्यथा चैत्रीयात्ममनः संयोगे विद्यमाने मैत्रीयात्मनि ज्ञानं[1] स्यात् । न चैवम् । तस्मात् चैत्रीयात्ममनः संयोगत्वेन चैत्रीयज्ञानत्वेन च कार्याकरणभाव एव । तथा च यात्रात्मनि चैत्रीयात्ममनः संयोगस्तिष्ठति तत्रैव चैत्रीयज्ञानं तिष्ठति । यदि चैत्रीयात्ममैत्रीयात्मनोरेकमेव ज्ञानमुत्पद्यते तदा मैत्रीयज्ञानमेव चैत्रीयात्मज्ञानं जातम् । [2]तथा च व्यभिचारः । चैत्रीयात्ममनः संयोगव्यतिरिक्तस्थलेऽपि मैत्रीयात्मनि ज्ञानोत्पत्तेः भिन्नमेव ज्ञानं स्वीकर्तव्यम् ।

अयमाशय[3] इति द्वयोरपि [4]उपान्त्यान्त्यशब्दयोः क्षणमात्रावस्थायित्वम्, तच्च वक्तव्यम् । तथा च यदा कर्मवदिति दृष्टान्तो दीयते तदा क्षणत्रयावस्थायित्वम् । यदा च ज्ञानवदित्युच्यते तदा द्विक्षणावस्थायित्वं शब्दस्य । तथा चोपन्त्यशब्दोऽन्त्यशब्दस्य नाशको भवतीत्युक्तं मूल**कारेण**; न सम्भवतीत्युच्यते **टीकाकृता** । तथाहि प्रथम उपान्त्यशब्दस्योत्पत्ति पूर्वन्यायेन जाता । द्वितीयक्षणे उपान्त्यशब्दस्य स्थितिः । तृतीयक्षणेऽन्त्यशब्दस्योत्पत्तिः । तस्मिन्नेव क्षणे उपान्त्यशब्दस्य नाशः । पुनरूपान्त्यक्षणापेक्षया चतुर्थक्षणेऽन्त्यस्य स्थितिः । पञ्चमक्षणेऽन्त्यशब्दस्य नाशः । तदानीमुपान्त्यशब्दस्याभावात् कथमन्त्यशब्दनाशकत्वम् ? [5]उपान्त्यशब्दस्य यदि च पूर्ववर्तित्व मात्रेणैवान्त्यशब्दनाशकत्वमुच्यते, तदा प्रथमादिशब्दानामपि तन्नाशकत्वं स्यात् । **इदमिति**-उपान्त्यशब्दोत्पत्त्यपेक्षया पञ्चमे क्षणे इत्यन्तशब्दस्य नाशो भवतीतीदं पदस्यार्थः । **क्षणद्वयावस्थायित्वपक्षे** इति । प्रथमतः प्रथमे क्षणे उपान्त्यशब्दस्योत्पत्तिः, द्वितीयक्षणे उपान्त्यशब्दस्य स्थितिः, तृतीयक्षणे उपान्त्यशब्दस्य नाशोऽन्त्यस्य स्थितिः, चतुर्थक्षणे चान्त्यनाशः । तथा च चतुर्थक्षणे उपान्त्यस्याव्यवहितपूर्ववर्तित्वाभावात् कथमुपान्त्यस्यान्त्यशब्दनाशकत्वमिति; न सम्भवतीति दूषितम् ।

न चेति -यदि सुन्दोपसुन्दन्यायेनान्त्योपान्तययोर्नाशस्तदाऽन्त्यशब्दस्य क्षणिकत्वापत्तिः । यथोपान्तस्योत्पत्तिक्षणः प्रथमः, द्वितीय क्षणे उपान्त्यस्य स्थितिक्षणः, तृतीयेनोपान्त्यनाशोऽन्त्यशब्देन क्रियते । यदुपान्त्येनान्त्यनाशः क्रियते । अन्त्यशब्दनाशं प्रत्युपान्त्यशब्दः कारणं भवति । उपान्त्यस्थितिक्षणेऽन्त्यस्योत्पत्तिक्षणः । स एवान्त्यशब्द उपान्त्यस्य नाशकः । तथा च नाशके विद्यमाने तृतीयक्षणे उपान्त्यनाशः । तृतीयक्षणे एवान्त्यशब्दस्य नाशः । तत्रोपान्त्यशब्दस्य तदव्यवहितपूर्वक्षणे विद्यमानत्वात् । तथा च तृतीयक्षणे एवान्त्यस्यापि नाशत्वात् । तस्य क्षीणत्वात्[6]

१. B विद्यमानं स्यात् । २. B जातमिति । ३. B अयमाशयति. ४. B उपान्तशब्द०. ५. B उपान्तशब्दस्य. ६. A omits क्षीणत्वात्

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तस्य क्षणिकत्वम् । न चेष्टापत्तिः । अपसिद्धान्तात् । तथा च सुन्दोपसुन्दन्यायो न युक्तः ।

तस्मादिति मूलम्-उपान्त्यशब्दस्य यो नाशस्तेन तस्य नाशः क्रियते । तेनान्त्यस्योपान्त्यशब्दोत्पत्त्यपेक्षया चतुर्थक्षणेऽन्त्यस्य नाशः तृतीयक्षणे उपान्त्यशब्दस्य नाश उत्पद्यते । तदानीमन्त्यशब्दस्य नाशो न जन्यते । कारणाभावात् । पूर्ववर्तिन एव कारणत्वात् । प्रथमक्षणे उपान्त्यस्यान्त्यशब्दस्योत्पत्तिः । द्वितीयक्षणे उपान्त्यस्य स्थितिः । तृतीयक्षणे उपान्त्यशब्दस्य नाशः । चतुर्थक्षणे चान्त्यनाशः । तथा च चतुर्थक्षणाव्यवहितपूर्वक्षणे उपान्त्यस्याविद्यमानत्वादुपान्त्यस्यान्त्यशब्दनाशं प्रति कारणत्वं न सम्भवतीत्यर्थः ।

एतदेवाह-**अन्वयस्त्विति**[१]-उपान्त्यशब्दोत्पत्त्यपेक्षया द्वितीयक्षणेऽन्त्यशब्दोत्पत्तिः[२] । तदपेक्षया तृतीयक्षणावस्थायित्वमन्त्यस्य । [३]तदान्त्यशब्दोत्पत्तिक्षणापेक्षया द्वितीयक्षणानुगामित्वमुपान्त्यस्यास्ति । तृतीयक्षणेऽन्त्यशब्दोत्पत्तिक्षणापेक्षया तृतीयक्षणेऽवर्तमानेनान्त्यशब्देन कथमन्त्यस्य नाशो जननीयः ? तस्मादुपान्त्यनाशादेवान्त्यनाश इति सुस्थम् । अनुमानमुक्तार्थमेव । व्यतिरेक्यनुमानमन्वयि वा प्रथमशब्दो वा दृष्टान्तः । हेतौ तच्छब्देनोपान्त्यशब्दो ग्राह्यः । तथा चान्त्यस्य शब्दनाशव्यवहितपूर्वक्षणेउपान्त्यस्य व्यवहितपूर्वक्षणे उपान्त्यस्य शब्दत्वादित्यर्थः ।

हेतावसिद्धमनुमानेन निराकरोति-**तत्रेति** केनापि प्रतिवादिना वाच्यम् । तदानीमन्त्यशब्दनाशापेक्षयाऽव्यवहितपूर्वक्षणे उपान्त्यस्य, शब्दस्तिष्ठत्येवेति स्वरूपासिद्धिरिति वक्तव्या । तन्निराकरणं स्पष्टयति । **तथा च तत्रेत्यस्य** व्याख्यातम् । अन्त्यनाशाव्यवहितपूर्वक्षणे उपान्त्यशब्दोऽसन्निति साध्यम्[४] । उपान्त्यः शब्दः इति पक्षः । हेतुमाह **त्रिक्षणेति** यथोपान्त्यशब्दस्त्रिक्षणावस्थायी भवति, तदवधिकोऽन्त्यशब्दनाशावधिकं पञ्चमे क्षणे उपान्त्यशब्दस्योत्पत्तेर्जायमानत्वात् । तथा चान्त्यशब्दनाशापेक्षया प्राक् पञ्चमे क्षणे यद्युपान्त्यस्योत्पत्तिस्तदोपान्त्यस्य तृतीयत्रिक्षणावस्थायित्वत्तृतीयक्षणे तस्य नाशो भविष्यति । ततः पञ्चमे क्षणेऽन्त्यशब्दनाशः । तेनान्त्यशब्दनाशापेक्षयाऽव्यवहितपूर्वक्षणे-चतुर्थक्षणे उपान्त्यस्यासत्त्वमेव ।

तथा च हेतुरनुमानेन सिद्धः कृतः । तदनन्तरं पूर्वोक्तानुमानेनोपान्त्यशब्दस्यान्त्यनाशजनकत्वाभावः साधितः । ननु भवतोक्तम्-अन्त्यशब्दनाशक्षणापेक्षया पञ्चमक्षणे उपान्त्यशब्दस्योत्पत्तिः, तच्च न सम्भवति । यथा प्रथमक्षणे उपान्त्यस्योत्पत्तिः, द्वितीयक्षणे उपान्त्यस्य स्थितिरन्त्यस्य चोत्पत्तिः, तृतीयक्षणे उपान्त्यस्य नाशोऽन्त्यस्य च स्थितिः, चतुर्थक्षणेऽन्त्यनाशः । तथा चान्त्यनाशक्षणापेक्षया प्राक् पञ्चमक्षणे उपान्त्यशब्दस्य जायमानत्वं यो हेतुः "उक्तः, स च स्वरूपासिद्धौ वृत्तः इति । अत आह-**द्वितीयक्षणेति**[६] तथा चोपान्त्यशब्दस्तत्रासन् । कोऽर्थः ?

---

१. B अन्वयस्थितिः. २. B -शब्दस्योत्पत्तिः. ३. B तदन्त्य. ४. B शब्दसाध्यम् । ५. B कृत. ६. B द्विक्षणेति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्त्यशब्दनाशाव्यवहितपूर्वक्षणेऽसन्-अविद्यमानत्वात्-इति साध्यम्[१]। हेतुमाह **द्वितीयक्षणेति** । द्विक्षणमात्रावस्थायी भवत्युपान्त्यशब्दः । तत्र तदधिको यश्चतुर्थक्षणे जायमानत्वादित्यर्थः । सत्यन्तं च व्यभिचारवारणार्थम् । घटादौ हेतुरस्ति, साध्यं नास्तीति । तद्वारणाय सत्यन्तम् । तथा चानेनानुमानेन पूर्वोक्तहेतुः । तदव्यवहितपूर्वक्षणेऽसिद्धरूपो[२] हेतुः सिद्धः कृत इति । तदनन्तरं तेन हेतुनोपान्त्य-शब्देऽन्त्यशब्दनाशजनकत्वाभावः साधनीय इति । तस्मादुपान्त्यशब्दनाशेनैवान्त्यशब्दनाशो जन्यते इति सिद्धान्तः । **अलौकिकेति** तथा चात्मनि योगजधर्मलक्षणाप्रत्यासत्त्या प्रत्यक्षत्वं वर्तते, इत्यात्मनि व्यभिचारवारणायास्मदादीति । **संपातायातमिति** । कस्यचिदित्येतस्य पदार्थस्य प्राप्तिरर्थादेव भविष्यति । अन्यथा परमाणुषु प्रत्यक्षत्वं यदा[३] सिध्यति तदा कस्यचिदित्येव ग्रहणम् । स्पष्टार्थं-**सामान्येति** - सर्वेषां परमाणवः सामान्यलक्षणप्रत्यासत्त्या द्रव्यत्वरूपया । अथवा ज्ञानमनुमित्यादि ज्ञानसन्निकर्षेणास्मदादीनामपि[४] अप्रत्यक्षा[५] सन्त्येवेति । तदन्यत्वं प्रत्यक्षविशेषणं वाच्यम् । ताभ्यां ज्ञानलक्षणसाध्यसामान्यलक्षणाभ्यामर्थान्तराता सिद्धसाधनमित्यर्थः ।

(१५) बुद्धिः ।

बुद्धिमाह **अर्थेति**-अर्थविषयकत्वमित्यर्थः । इदमिच्छायामतिव्याप्तम् । यदि तद्वारणायार्थ विषयकत्वं बुद्धित्वं विशेषणम्, तदा लाघवात् बुद्धित्वमेव बुद्धेर्लक्षणं वाच्यमित्येवं मनसि कृत्वाऽऽह **बुद्धित्वमिति** ।

(१६-१७) धर्माधर्मौ ।

आद्यमिति ज्ञानादीति । योगिना तत्त्वज्ञानानन्तरं भोगार्थं कार्यव्यूहो यदा क्रियते तदा तत्त्वज्ञानेनैव यावन्त्येव शरीराणि जन्यन्ते इत्यर्थः । ननु धर्माधर्मावतीन्द्रियौ, शरीरजनकत्वेन किमर्थं स्वीकर्तव्यौ, भावनयैव शरीरोत्पत्तिर्भविष्यतीत्यत आह-**भावनयेति**-स्मृतिजन्यसंस्कारविशेषस्येत्यर्थः। स च स्मृत्यन्यथानुपपत्त्याऽऽत्मनि कल्प्यते । तेन च स्मृतिमात्रमेव जननीयमिति शरीरजनकत्वं कल्प्यते । न प्रमाणाभाव इत्यर्थः । **एकत्वेति** तथा चात्मैकत्वादिना सामान्यगुणेन सिद्धसाधनता स्यात्, तद्वरणाय विशेषपदम् । अस्मदादिपदं चेश्वरज्ञानमादाय सिद्धसाधनतावरणाय ।

(१८) संस्कारः ।

सदृशादृष्टेति - एते स्मृतिबीजस्य संस्कारस्योद्बोधकाः एतान्हि प्राप्य संस्कारः स्मृतिं जनयति । तानाह **सदृशेति** सदृशं सादृश्यपदार्थः । अदृष्टं धर्माधर्मौ चिन्ताधीतवेदार्थस्य[६] विशेषस्मृतिः चिन्तया भवति । तत्र [७]स्मृतिबीजस्य चिन्ता संस्कारोद्बोधिका । सादृश्यज्ञानानन्तरं गोसदृशो गवय इति

---

१. B सिद्धम् । २. B -ऽसत्त्वरूपो ३. B omits यदा. ४. B omits अपि, ५. B अप्रत्यक्षाः. ६. B -वेदस्य. ७. B omits स्मृतिबीजस्य.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गोज्ञाने गवयस्य स्मृति र्भवति । तत्र सादृश्यज्ञानं संस्कारोद्बोधकमदृष्टस्य । यथा बालस्य स्तनपानादावदृष्टसाधनता स्मरणम् । चिन्ता चाधीतवेदार्थानुध्यानरूपा विस्मृतार्थ हेतुः । आदिशब्दादीश्वरेच्छादयः ।

(C) अन्यथाख्यातिः ।

स्मृतिरप्रमैव । तस्यां स्मृतिव्यतिरिक्तत्वाभावात् । तथा च ज्ञानं द्विविधं भवति- प्रमारूपमप्रमा[रूपं]चेति । [1]अप्रमा चान्यथाख्यातिः । यथा शुक्तौ रजतज्ञानम् ।

नन्वन्यथाख्यातौ च प्रमाणं नास्ति । विपर्ययज्ञानकारणाभावात् । तथाहि शुक्तौ तादात्म्यसम्बन्धेन रजतस्य भानं जायते । तदात्मना स्वरूपसमवायसम्बन्धेन रजतत्वस्य ज्ञानं जायते तत्र सम्भवति । रजतत्वाभ्यां समं सन्निकर्षाभावात् । तदात्मन स्वरूपसमवायसम्बन्धेन रजतत्वस्य ज्ञानं जायते । प्रत्यक्षज्ञाने [2]चासन्निकृष्टं च किमपि न भासते । अन्यथाऽतिप्रसङ्गः स्यात् । विशिष्टज्ञानसामग्रीपूर्वं विशेष्यमिन्द्रियसन्निकर्षः, तदनन्तरं विशेषणज्ञानम्, तदनन्तरं विशेषणस्य विशेषणसममसंसर्गाग्रहस्ततो विशिष्टबुद्धिरिति । अत्र तु विशेष्येन्द्रियसन्निकर्षाभावाद्विशिष्टज्ञानं न सम्भवति । सामग्रीमध्येऽसंसर्गाग्रहोऽवश्यं वाच्य एव । अन्यथा यदा च विशेषणज्ञानं वर्तते [तदा]विशेषेन्द्रियसन्निकर्षोऽपि स्थलान्तरे वर्तते । अथ च तस्य विशेषस्य घट्यदेः सम्बन्धाभावंग्रहो [3]जातः, यथाऽत्र घटे नास्तीतिरूपः, तत्र घटेऽयमिति विशिष्टबुद्धिर्न जायते । असंसर्गाग्रहस्य प्रतिबन्धकत्वात् । ततोऽसंसर्गाग्रहोऽप्यवश्यमपेक्ष्यते इति नान्यथाख्यातिरिति चेत्, न ।

यत्र चैकत्र भूतले रजतशुक्ती तिष्ठतः, तत्र रजतशुक्तीभ्यामुभाभ्यां [4]सन्निकर्षसत्त्वात् रजतत्वज्ञानं यत्र विद्यते, तदनन्तरं शुक्तौ रजतत्वस्य रजतस्यवाऽसंसर्गाग्रहो वर्तते यत्र रजतसम्बन्धाभावज्ञानं न जातं तत्र शुक्तौ [5]इदं रजतमिति बुद्धिर्भवत्येव । विशिष्टज्ञानसामग्रीसत्त्वात् । तथा च शुक्तौ अवर्तमानं रजतत्वं समवायसम्बन्धेन भासते, तादात्म्यसम्बन्धेन वाऽयमेव भ्रमः । सामग्रीसत्त्वे विशिष्टज्ञानरूपं कार्यं न भवतीति ब्रह्मणापि वक्तुमशक्यम् । न च यत्र शुक्तिरेवास्ति रजतेन समं सन्निकर्षो नास्ति तत्र कथं विशिष्टबुद्धिरिति वाच्यम् । तत्र माऽभूत् । परमन्यथाख्यातिः पूर्वोक्तस्थलविशेषे सिद्धाऽत अत्रापि कल्प्यते । न चात्र सन्निकर्षाभावात् कथं विशिष्टबुद्धिरिति वाच्यम् । तत्र ज्ञानलक्षणाऽलौकिकी प्रत्यासत्तिरेव सन्निकर्ष इति **शिरोमणयः** ।

वस्तुतस्तु अयं घट इत्यत्रैवान्यथाख्यातिः सिध्यति । यदा घटे रूपत्वस्यासंसर्गाग्रहो वर्तते, रूपस्य वा, यथा घटरूपं घटभिन्नमिति ज्ञानं न जातम्, तदा प्रतिबन्धकाभावसत्त्वात्[6]

१. B वेति । २. B चासंस्कृष्टं. ३. B जायते. ४. B सन्निकर्षभावात् न तत्त्वज्ञानं विद्यते. ५. B omits the reading between रजतमिति....शुक्तौ. ६. B प्रतिबन्धकं भावसत्त्वात्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कारणान्तर[१]विशेषणज्ञानादिमत्त्वादित्ययं रूपाभिन्न इति ज्ञानं भविष्यत्येव । वस्तुगत्या रूपत्वाभाववति[२] घटे रूपत्वप्रकारकज्ञानस्य जायमानत्वादियमेवान्यथाख्यातिः । यत्र च **प्रभाकरेण** ज्ञानद्वयं स्वीक्रियते-रजतस्य स्मरणं [३]शुक्तश्चेदंतत्त्वेन रूपेणानुभव[४] इति ग्रहणस्मरणात्मकं ज्ञानद्वयमिति गौरवम्। लाघवादेकमेव स्वीकार्यम् । तेन समं रजतेन सह सन्निकर्षो ज्ञानमेवेत्युक्तम् [**इत्यन्यथाख्यातिः** ।]

स्पर्शवानिति-स्थितिस्थापकस्तु स्पर्शवान्यकश्चित् मूर्तद्रव्यविशेषस्तत्र वर्तते इत्यर्थः । [५]**अनन्त इति** नियमेन सर्वशरीरेषु स्थितिस्थापकसत्त्वादित्यर्थः ।

[६]**इति श्री गोवर्धनटिप्पणे गुणप्रकरणं सम्पूर्णम् ॥**

[१९] अर्थप्रकरणे कर्मनिरूपणम् ॥

कर्मत्वेति अन्यथा चलनशब्देन यदि गमनं तदा कर्मलक्षणमिदं सर्वकर्मस्वव्याप्तम् । अत आह **कर्मत्वाक्रान्तमित्यर्थः ।**

[७]**भाष्यकारेण** तु लक्षणमिदं कृतम् संयोगविभागयोरनपेक्षकारणं कर्म । यदि संयोगकारणं कर्म [इ]त्युच्यते तदा संयोगेऽतिव्याप्तिः । तेनापि संयोगजसंयोगजननात् । अत उच्यते **विभागेति** । यदि विभागमात्रं कारणमुच्यते तदा विभागेऽतिव्याप्तिः । अत उक्तं **संयोगेति** । तता चोभयकारणं कर्मैव। अनपेक्षपदं द्रव्येऽतिव्याप्तिवारणार्थम्, द्रव्यस्यापि संयोगविभागकारणत्वात् । अत उक्तमनपेक्षेति। तथा च द्रव्येण यदा संयोगविभागौ जन्येते तदा कर्मसंयोगापक्षयैव जन्येते इत्यर्थः।

ननु कर्मणा यदा संयोगो जन्यते तदाऽन्यापेक्षयैव क्रियते । यथा प्रथमतो घटादौ कर्म उत्पद्यते। तदव्यवहितोत्तरक्षण एव संयोगो नोत्पद्यते । किन्तु विभागपूर्वसंयोगध्वंसद्वारा एवोत्तरदेशसंयोगे जननीये विभागपूर्वसंयोगध्वंसयोरपेक्षा क्रियते इत्यसम्भव इति चेत्, न ।

अनपेक्षत्वं नाम स्वाधिकरणकालध्वंसाधिकरणक्षणोत्पत्तिकभावानपेक्षत्वे सति संयोगविभागयोः कारणं कर्मेति लक्षणम् । अस्यार्थो यथा स्वपदेन लक्ष्यत्वेनाभिमतं कर्म ग्राह्यम् । तदधिकरणं यो कालस्तद्ध्वंसाधिकरणीभूतो यः [८]क्षणस्तत्रोत्पतिर्यस्य भावस्य तदनपेक्षत्वे सति संयोगविभागकारणत्वम् । ततः च यदा कर्मणा संयोगविभागौ जन्येते तदा कर्माधिकरणकाल-

---

१. B विशेषज्ञान.. २. B त्वभाव इति. ३. B शुक्तौ चेदं. ४. B -नुभवति ग्रह. ५. It is अन्तत in त. भा. प्र. ६. B इति गुणप्रकरणं समाप्तम् । ७. It should be सूत्रकारेण because in वै.स. १.१.१७ it is -एक द्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् । It seems that गुणरत्न has citied this लक्षण from memory as it is incomplete and slightly changed. ८. B -त्पत्तिकभावानपेक्ष्य तटनपेक्षत्वे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ध्वंसाधिकरणे क्षणे उत्पद्यते यो भावपदार्थस्तस्यापेक्षा न क्रियते । यथा घटे प्रथमतो नोदनाभिघाताख्यसंयोगेन कर्मोत्पद्यते । तदनन्तरं पूर्वदेशेन समं विभागो जायते । स एव कालः कर्माधिकरणीभूतो यः [1]क्षणस्तस्य ध्वंसः, तस्याधिकरणीभूतो तृतीयक्षणः । तत्रोत्पद्यते यो भावपदार्थो द्रव्यादिः, तदनपेक्षत्वम् ।

तथा च यद्यपि तृतीयक्षणे पूर्वसंयोगनाश उत्पद्यते तथापि सः न भावपदार्थः । पूर्वदेशविभागस्यापि यद्यप्यपेक्षा क्रियते कर्मणा तथापि स्वाधिकरणकालध्वंसाधिकरणे क्षणोत्पत्तिको विभागो न भवति । विभागस्य स्वाधिकरणकालध्वंसानधिकरणे द्वितीये क्षणे उत्पद्यमानत्वात् । सत्यन्तं च संयोगविभागयोरतिव्याप्तिवारणार्थम् । यथा घटे प्रथमतो नोदनाख्योऽभिघाताख्यो वा संयोगविशेष उत्पद्यते, तेन च कर्मोत्पद्यते, तदनन्तरं पूर्वदेशविभागः, तदनन्तरं पूर्वसंयोगनाशस्तदनन्तरं संयोग इति ।

अत्र स्वशब्देन संयोगः । तस्याधिकरणीभूतो यः कालः, द्वितीयक्षणरूपस्तस्य ध्वंसाधिकरणीभूतो यस्तृतीयक्षणस्तत्रोत्पद्यते [सं]योगविभागरूपो भावपदार्थस्तस्यापेक्षा संयोगेन संयोगजसंयोगेन जननीये क्रियते । परं तदनपेक्षत्वं नास्तीति कर्मलक्षणं तत्र न गतम् । अत्र कालपदं कालिकसम्बन्धेन स्वाधिकरणतालाभाय । अन्यथा विषयतासम्बन्धेन स्वविषयकज्ञानस्यापि स्वाधिकरणत्वात् तद्ध्वंसाधिकरणीभूतो यः क्षणस्तदुत्पत्तिकं यद्द्रव्यं तदपेक्षत्वात् सर्व-कर्मणामित्यसम्भवः । तद्वारणार्थं कालपदम् ।

कर्मणोऽपि कर्माधिकरणक्षणोत्पत्तिकत्वाद् सम्भवति ध्वंसाधिकरणेति पदम् । क्षणपदं चाव्याप्तिवारणाय । अव्याप्तिस्तु स्वाधिकरणकालध्वंसाधिकरणमहाकालोत्पत्तिकद्रव्यसापेक्षत्वात् । तादृशक्षणवर्तिद्रव्यापेक्षणाद् व्याप्तिरेव दोष इत्यत उक्तमुत्पत्तीति । तादृशपूर्वसंयोगध्वंससापेक्षत्वात् भावेति पदम् । तथा च कर्मणा येन पदार्थेन संयोगे विभागे च जननीये तृतीयक्षणोत्पत्तिकभाव-पदार्थस्यापेक्षा न क्रियते, स एव कर्मेति प्रमाणकथनम् ।

[इति कर्मप्रकरणं समाप्तम्]

[२०] अर्थप्रकरणे सामान्यनिरूपणम् ॥

एतदिति । यदि जाति र्न स्यात्तदाऽनुगताकारा [2]प्रतीतिरेव न स्यात् । तथा च घटत्वादि सामान्यम्, अनुगतप्रत्ययविषयत्वात् । व्यतिरेकिपटादिवदिति । ततोऽनेनानुमानेन सामान्यतः कस्यापि पदार्थस्य सिद्धिर्जायते[3] । [4]यत्र च कार्यकारणभावादिरूपोऽनुकूलतर्कस्तिष्ठति, तत्र तु लाघवा

१. B क्षणदण्डादिस्तस्य. २. B omits प्रतीतिरेव. ३. B -र्जाता. ४. B तत्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[त्]जातिरेव सेत्स्यति। यत्र चानुकूलतर्को नास्ति, तत्रानुगतप्रत्ययहेतुरूपाधिरेव। यथा घटत्वद्रव्यत्वादि र्जातिः। अत्र प्रथमतो द्रव्यमित्यनुगतप्रतीत्या द्रव्यत्वरूपं सामान्यं सिद्धम्। तत्र पुनः कार्यकारणभावरूपोऽनुकूलस्तर्कस्तिष्ठति। यथा संयोगत्वेन द्रव्यत्वेन च कार्यकारणभावः। तथा च संयोगत्वावच्छिन्नकार्यतानिरूपितसमवायिकारणतावच्छेदकत्वेन द्रव्यत्वजातिः सिध्यति। बाधकाभावात्। एवं संयोगत्वमपि द्रव्यनिष्ठकारणतानिरूपितकार्यतावच्छेदकत्वेन संयोगत्वमपि जातिः सिध्यति। न च गुणत्वादिनोपधिनैव भविष्यतीति वाच्यम्। गुणस्यैकस्याभावेन कारणतावच्छेदके गौरवात्। तथा च कारणतावच्छेदकत्वमेकस्य वा कल्पनीयमनेकस्य वा कल्पनीयम्? लाघवादेकस्यैव द्रव्यस्य कल्पनीयम्। एवं घटत्वादिकमपि पार्थिवत्वादिव्याप्या जातिर्भिन्ना एव वाच्या। अन्यथा जातिसाङ्कर्यं स्यात्। तेजस्त्वेन समं यथा यत्र यत्र घटत्वं तत्र तत्र तेजस्त्वं नास्ति। यत्र यत्र पुनस्तेजस्त्वं तत्र तत्र घटत्वं नास्ति, [यथा]सुवर्णकुण्डलादौ। उभयोः सङ्करः सुवर्णघटे। तथा च पर्थिवत्वव्याप्या[1] घटत्वरूपा जातिः, सा च पार्थिवघटमात्रे तिष्ठति, न सुवर्णघटे। अथ च [2]तेजस्त्वव्याप्या या जातिः सुवर्णघटादिवृत्ति, सा च पार्थिवघटे नास्ति। तथा च घटत्वस्य भिन्नभिन्नत्वे। तथा च पार्थिवत्वव्याप्या घटत्वरूपा भिन्नेति न सङ्करः। एवं दण्डत्वमपि जातिः तेजस्त्वव्याप्या भिन्ना, पार्थिवत्वव्याप्या भिन्ना। **उपाधाविति** यद्यनुवृत्तिप्रत्ययमात्रहेतुत्वं जातिलक्षणं तदोपाधावतिव्याप्तिः स्यादित्यर्थः। शेषं स्पष्टम्। **अन्यथेति** अयं घटोऽयं घट इत्यनुगतप्रत्ययो जायते। न त्वगोव्यावृत्तोऽयमित्याकारः। घटेतरान्योन्याभावत्वमेव घटत्वमिति प्रतीतिर्जायते किन्तु विधिमुखेनैव प्रतीतिर्जायते इत्यर्थः।

ब्राह्मणत्वमपि चतुष्टयम्, नैकम्। (१) एकाखण्डप्रलयानन्तरं यदाऽऽद्यब्राह्मणा उत्पद्यन्ते तेष्वदृष्टविशेषजन्यतावच्छेदिका[3] ब्राह्मणत्वजातिस्तिष्ठति। अग्रे तत्सन्ततौ ब्राह्मणत्वावच्छिन्नकारण-तानिरूपितकार्यतावच्छेदकत्वेनाद्यब्राह्मणनिष्ठब्राह्मणत्वापेक्षया भिन्नैव तिष्ठति।

आद्यब्राह्मणेष्वदृष्टविशेषजन्यतावच्छेदिका। यतोऽदृष्टविशेषणं यच्छरीरं ब्राह्मणशरीरजनीतं[4] तच्छरीरे या वर्तते कार्यता, तदवच्छेदिका वा याऽऽद्यब्राह्मणेषु साऽतीन्द्रिया। (२) द्वितीयस्तु कार्यकारणभावः। [5]ब्राह्मणत्वेन चैका कारणतावच्छेदकत्वेन, (३) अन्या च कार्यतावच्छेदकत्वेन। इदं द्वयं कारणतावच्छेदकत्वेन, (४) अन्या कार्यतावच्छेदकत्वेन च चतुर्थी। विश्वामित्रशरीरे पूर्वं क्षत्रियोऽभूत् पश्चात्ब्राह्मणः। अदृष्टविशेषात्। तथा चादृष्टविशेषजन्यतावच्छेदिका जातिर्विश्वामित्र-शरीरेषु भिन्ना। आद्यैकैव। तया विश्वामित्रेन समं सङ्करः। यथा यत्र यत्र विश्वामित्रत्वं तत्र[तत्र]ब्राह्मणत्वं नास्ति। क्षत्रियशरीरे व्यभिचारात्। यत्र यत्र ब्राह्मणत्वं तत्र तत्र विश्वामित्रत्वं नास्ति।

---

१. B पार्थिवत्वरूपा. २. B omits च. ३. B -च्छेदकब्रा॰. ४. B -जनीतं तज्जनीतं तच्छ॰. ५. A repeats ब्राह्मणत्वेन.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्यब्राह्मणव्यभिचारात् । उभयं च ब्राह्मणावस्थायां विश्वामित्रशरीरे तिष्ठतीति । तथा च विश्वामित्रनिष्ठान्यब्राह्मणव्यावृत्त्या भिन्नेव तिष्ठतीति चतुष्टयम् ।

जातिप्रत्यक्षे ब्राह्मणजन्यत्वे सति ब्राह्मणाजन्यत्वं व्यज्जकम्, विद्यमाने सन्निकर्षकृष्टेऽपि ब्राह्मणे ब्राह्मणत्वसन्देहात् यदोक्तं व्यज्जकं जातम्, तदा तु झटित्येव ब्राह्मणत्वनिश्चयो भवतीति ।

[इति सामान्यप्रकरणम् ।]

[२१] अर्थप्रकरणे विशेषनिरूपणम् ॥

विशेषपदार्थलक्षणे **सामान्येति** सामान्ये एकमात्रसमवेतत्वं नास्ति ।

इति विशेषप्रकरणम् ।

[२२] अर्थप्रकरणे समवायनिरूपणम् ॥

समवायग्रन्थे शङ्कते **नन्विति** परमाणुरथ च परमाणुरूपध्वंसः [१]अनयोर्यः स्वरूपसम्बन्ध-विशेषः तस्यायुतसिद्धप्रतियोगिकत्वात् परमाणुरूपध्वंसौ परस्परमयुतसिद्धौ भवतः इत्यपि व्याप्तिः ।

समाधत्ते-**स्वरूपेति** तथा चेदं लक्षणं जातम्-अयुतसिद्ध्यो[२] र्यः स्वरूपसम्बन्धातिरिक्तो भावलक्षणः सम्बन्धः समवायमित्यर्थः । तथा च परमाणुतद्रूपध्वंसयो र्यः स्वरूपसम्बन्धविशेषस्तत्र तत्र स्वरूपसम्बन्धातिरिक्तत्वाभावान्नतिव्याप्तिः । **भावत्वानुपादान इति** यदि लक्षणे भावपदं न दीयते, तदा भूतले घटो नास्तीत्यभावेऽतिव्याप्तिः स्यात् । तत्राप्ययुतसिद्ध्योरभाव भूतलयोः स्वरूपसम्बन्धातिरिक्तत्वभावे तिष्ठतीत्यतिव्याप्तिः । ततः उक्तम्-**भावत्वेति** तथा च तत्र भावत्वाभावान्नातिव्याप्तिरित्यर्थः । समवायस्त्वेक एव ।

अत्र किञ्चिद् विचार्यते-समवायसम्बन्धस्तु स्वरूपातिरिक्त [एक]एव । लाघवात् । यत्रैकस्मिन्नैव घटे पाकेनैकस्मिन्नैव क्षणे रूपरसगन्धस्पर्शोत्पादितास्तत्र रूपादिचतुष्टयस्य घटस्य च परस्परं स्वरूपसम्बन्धत्वं वाच्यम् । [३]उत तेषामेक एव सम्बन्धो वाच्यः । लाघवात् । तदतिरिक्त एक एव रूपादिचतुष्टयप्रतियोगिकः समवायः [४]सम्बन्धः सिध्यति । ननु रूपप्रतियोगिकः समवायः भिन्न एव-गन्धादीनामपि भिन्न इति चेत्, न । तदा समवायस्य सिद्धिरेव न स्यात् । यत्र क्षणे एकस्मिन्नेव

---

१. B अन्ययो. २. B omits the reading between स्वरूप....ध्वंसयोर्यः. ३. B अत एतेषामे.. ४. B omits the reading between सम्बन्धः...समवायः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्षणे चत्वारः पाकजाः रूपादयः उत्पद्यन्ते, तत्र यदि प्रत्येकं रूपादीनां समवायो भिन्न भिन्न एव । तदा रूपादिस्वरूपसम्बन्धातिरिक्तसमवायस्य साधकं प्रमाणं नास्ति । समवायसिद्धिः स्वरूपसम्बन्धातिरिक्तस्य लाघवानुरोधेन भवति । समवायादीनां मते तु एक एव चतुर्णां सम्बन्धो बाधकाभावात् । भवन्मते तु भिन्नसम्बन्धकल्पने गौरवमेव बाधकम् । तत एक एव समवायः । एकत्र सिद्धोऽर्थोऽन्यत्रापि कल्पने गौरवमिति न्यायेन सर्वत्र समवाय एक एव कल्पनीयः । एवं घटत्वपटत्वादीनामप्येक एव समवायः ।

ननु यदि सर्वत्रैक एव समवायस्तदा शुक्तौ रजतत्वसमवायस्यापि सत्त्वातत्र जायते या रजतत्वप्रकारिका प्रतीतिः सा भ्रान्ता न स्यादिति चेत् न। तत्र तेन सम्बन्धेन रजतत्वस्यावर्तमानत्वात्। यद्यपि तत्र रजतत्वसमवायस्तिष्ठति तथापि तेन सम्बन्धेन रजतत्वं तत्र नास्ति । आकाशवत् यथा भूतलादौ आकाश सम्बन्धसत्त्वेऽपि आकाशाभावात् । तत्र च रजतत्वं कालिकसम्बन्धेन यथा यदा रजतं तदा कालः । एकज्ञानविषयत्वेन सम्ब्धेन वा यथा रजतशुक्ती इति समूहालम्बनात्मकं ज्ञानं कदापि जातमभूत्तद्विषयता उभयत्र तिष्ठति[1] तेन सम्बन्धेन रजतत्वं तत्र वर्तते । तथा चानेन सम्बन्धेन यदा रजतत्वप्रकारिका बुद्धिर्जायते तदा तु प्रमैव । बाधकाभावात् । तथा च यथा भूतलमाकाशवदिति प्रतीतिस्तत्संयोगे सत्यपि, तथा च रजतत्वसमवायेसत्यपि शुक्ताविदं रजतमिति बुद्धिर्भ्रान्तैव । तेन सम्बन्धेन रजतत्वस्य शुक्ताववर्तमानत्वादित्येक एव समवायः ।

वस्तुतः यदि स्वरूपसम्बन्धेन[2] सर्वत्र निर्वाहसम्भवे समवायस्वरूपः [तर्हि]सम्बन्धान्तर-कल्पनमयुक्तम् । यदुक्तं पाको नैकदैव रूपाद्युत्पादस्थले भिन्नः,[3] भिन्न कल्पने गौरवम् तदयुक्तम्। येन समवायः स्वरूपसम्बन्धातिरिक्तः स्वीक्रियते, तेनापि समवायवृत्त्यर्थः स्वरूपसम्बन्धोऽवश्य-स्वीकर्तव्य एवेति । तथा च लाघवात् स्वरूपसम्बन्ध एव प्रथमतो वाच्य इति । अपि च शुक्तौ यद्रजतप्रकारकं ज्ञानं जायते तत्र रजतत्वसमवायस्य सत्त्वेन प्रमात्वापत्तिः । न च तेन सम्बन्धेन तत्र रजतत्वं न भवतीति वाच्यम् । रजतत्वस्य स्थलान्तरे तेनैव सम्बन्धेन वृत्तिमत्वात् । अत्रापि तत्र सम्बन्धेन वर्तते को दोषः ? आकाशदृष्टान्तस्तु न युक्तः । आकाशं तु संयोगसम्बन्धेन यदि कुत्रापि वृत्तिम[त्]तदा संयोगसम्बन्धेन भूतलादौ वृत्तिः सम्भाव्या । आकाशस्यातीन्द्रियत्वात् । अत्राकाशमिति प्रतीतेरसिद्धेः । शुक्तौ चेदं रजतमिति विशिष्टबुद्धिर्जायते । स्थलान्तरे समवायसम्बन्धेन रज[त]त्ववृत्तिमत्वे तत्रापि समवायसम्बन्धेन वृत्तिमत्त्वं रजतत्वस्य निराकर्तुमशक्यत्वादिति । तथा च स्वरूपसम्बन्धेनैव रजतत्वं शुक्तौ नास्तीति समवायादिनाऽपि वाच्यमेव । ततः स्वरूपसम्बन्धेनैव शुक्तौ रजतत्वं नास्तीति तत्प्रकारकं ज्ञानं भ्रमरूप एव । स च सम्बन्धो रजतमात्रेण समं रजतत्वस्य तिष्ठतीति फलबलैकतया कल्प्यः । स च रजतत्वनिष्ठाधेयतानिरुपिताधारतैव, संयुक्तसमवायादिवत् । सम्बन्धानां

१. B omits तिष्ठति तेन. २. B रूपसम्बन्धो न सर्वत्र. ३. B omits one भिन्न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नैयायिकानां[१] मतेऽनंतत्वात् । ततः समवायोऽतिरिक्तः इति स्वरूपसम्बन्धेनैव निर्वाहात् ।

तथा च समवायिकारणत्वमपि घटादिनिष्ठाधेयताविशेषनिरुपिताधारताविशेषसम्बन्धेन यत्र घटादिरुत्पद्यते तदेव समवायिकारणं स्वरूपमेव, न त्वतिरिक्तं पदार्थान्तरम् । प्रमाणाभावात् गौरवाच्चेति ।

भवतामिति नैयायिकानामिति शेषः । तथा च भवदभिमते उदाहरणेऽस्माकं विवाद इत्यर्थः ।

इति समवायग्रन्थः ।

[२३] अर्थप्रकरणे अभावनिरूपणम् ॥

इदानीमभावनिरूपणम् । स च **द्विविधमिति**[२] मूलम् ।

(१) संसर्गाभावः ।

संसर्गाभावस्य हीदं लक्षणम् । [३]यत्र संसर्गेण=संयोगादिसम्बन्धेन प्रतियोगिनामारोप्यनिषेधः क्रियते, तत्र संसर्गाभावः । यथेह भूतले घटो नास्तीत्यत्यन्ताभावः प्रतीयते । प्रथमतोऽत्र संयोगसम्बन्धेन घटस्यारोपः क्रियते-भूतले घट-इत्येतन्मात्रम् । तदनन्तरं नञाऽभावः प्रतिपाद्यते । ततोऽयमेव संसर्गाभावः ।

एवं प्रागभावोऽपि । यथा घटोत्पत्तेः पूर्वकाले इह कपाले घटो नास्तीति । तदानीं प्रागभावविषयिणी प्रतीति र्जायते । तत्र तदत्यन्ताभावस्यासत्त्वात् । अग्रे कपाले एव घटस्योत्पाद्यमानत्वात् । तदा घटानुपपत्त्या ध्वंसविषयिणी प्रतीतिर्नजायते एव । तथा च प्रागभावादित्यत्र [४]घटस्थलेऽपि प्रतियोग्यारोप्यं(य) हेतुकाभावधीविषयः[५] संसर्गाभाव एव । ध्वंसोऽपि कपालमालायां घटनाशानन्तरं कपाले घटो नास्तीति प्रतीतिर्जायते, सा ध्वंसविषयिण्येवेति ।

नन्वारोपो नाम यत्र यत्रास्ति तत्र[तत्र]तस्य प्रसङ्गः, तस्याभावज्ञानं प्रति कारणत्वे किं प्रमाणमिति चेत्, न । भूतले घटो नास्तीत्यत्र संयोगसम्बन्धेन भूतले यदा घटज्ञानं जातं तदा तेन सम्बन्धेन तदानीं तदभावज्ञानानुदयात् । जायते च तत्रैव समवायसम्बन्धेन तदभावप्रतीतिरिति । तथा च येन सम्बन्धेन प्रतियोगी यत्रारोप्यते तेनैव सम्बन्धेन तत्राभावप्रतीति र्जायते । अन्यथा संयोगसम्बन्धेन घटवति भूतले समवायसम्बन्धतात्पर्यकेण श्रोतारं प्रति 'इह भूतले घटो नास्ती'ति

---

१. B नैयायिकमतेनान्तत्वात् । २. It is द्वेधा in त. भा. ३. B यथा ४. B omits घट. ५. B -विषयी.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शब्दप्रयोगः कृतः, तदा श्रोतुः संयोगसम्बन्धेनैवाभावप्रतीतिः कुतो न जायते ? तत्र नियामकमिदमेव वाच्यम् । तथा च येन सम्बन्धेन प्रतियोगिनोऽऽरोपः कृतः-यथा [१]संयोगसम्बन्धेन घटवति भूतले घटो नास्तीति शब्दप्रयोगः । तदनन्तरं या बुद्धिर्जायते सा समवायसम्बन्धेनैव, न संयोगसम्बन्धेन । संयोगस्य विद्यमानत्वेन संयोगसम्बन्धेन प्रतियोगिनोऽऽरोपो नास्ति ।-इत्यभावस्यारोपज्ञानं प्रति कारणता संसर्गाभाव इति ।

(२) अन्योन्याभावः ।

अन्योन्याभावस्तु यत्र प्रतियोगितावच्छेदकमारोप्य यस्य यत्र निषेधः क्रियते, तत्र तस्याभावोऽन्योन्याभावः । तथा च घटः पटो न भवतीति । अत्र घटे प्रतियोगितावच्छेदकं पटत्वमारोप्य निषिध्यते । अतो घटे प्रतियोगिकान्योन्याभावविषयिणी प्रतीतिर्जायते । यथा वा तादात्म्यसम्बन्धेन प्रतियोगिनमारोप्य यत्र यस्य निषेधः क्रियते तत्र तस्यान्योन्याभावः । यथा प्रथमत उक्तं-घटःपट इति । तादात्म्यसम्बन्धेन घटे पट आरोपितः । तदनन्तरं नञा घटः पटो नेत्यत्र योऽभावः प्रतीयते स एवान्योन्याभावः । अथवा घटः पट इत्युक्ते प्रतियोगितावच्छेदकं यत्पटत्वं समवायसम्बन्धेन तदारोप्य यदा पटस्य निषेधः क्रियते तदा घटे पटप्रतियोगिकान्योन्याभाव एवेति । अत एव घटः [२]घटेनेति प्रतीतिर्न जायते । तत्र समवायसम्बन्धेन घटत्वस्य विद्यमानत्वेन [३]तादात्म्यसम्बन्धेन घटस्य च विद्यमानत्वेनारोपाभावात् । जायते नीलघटः पीतघटो नेति प्रतीतिः । तत्र नीलघटे पीतघटत्वस्य तादात्म्यसम्बन्धेन [४]पीतघटस्य चारोपसम्भवात् ।

(३) अत्यन्ताभावान्योन्याभावयो र्विशेषः ।

अयमर्थो निष्कृष्टः-यत्र तु[५] नञस्थले यत्राधिकरणेऽनुयोगिन्याधारता सप्तमीविभक्त्या प्रतिपद्यते तत्र संसर्गाभावप्रतीतिर्जायते यथा भूतले घटो नास्तीति । अथ यत्र नञ् नास्ति, अथ च मतुप्प्रत्ययस्तिष्ठति तत्रापि संसर्गाभावप्रतीतिः सप्तमीविभक्तिव्यतिरेकेणापि जायते । यथा-घटाभाववद्भूतलमिति । नञस्थले त्वधिकरणता सप्तमीविभक्त्यैव यत्र प्रतीयते तत्र संसर्गाभाव एव । यत्र मतुप्-प्रत्ययो(ये)नाधिकरणता प्रतीयते तत्र सप्तम्या विनाऽपि संसर्गाभाव एव प्रतीयते । यत्र पुनरनुयोगिनि प्रतियोगिनि च नञ्-स्थले प्रथमा विभक्तिस्तत्रान्योन्याभाव एव । यथा घटः पटो नेति । अत्र नञर्थो भवत्यभावस्तस्य प्रतियोगी भवति पटः, तत्प्रतिपादकं पटपदम् । तत्र प्रथमा विभक्तिर्भवति । अनुयोगि भवति घटस्तत्प्रतिपादकं घटपद तत्रापि प्रथमाविभक्तेः सत्त्वाद् यद्यत्र घटे पटो नेति प्रतीतिः, तदाऽत्यन्ताभाव एव प्रतीयेतेति । प्रतीतिवैलक्षण्यादभाववैलक्षण्यम् ।

वस्तुतस्तु प्रतियोगितावच्छेदकात्यन्ताभाव एव प्रतियोगिनोऽन्योन्याभावः । यथा

---

१. B तथा. २. B पटो. ३. A adds सामान्यसम्बन्धेन after विद्यमानत्वेन. ४. B पीतस्य . ५. A omits तु.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घटान्योन्याभावप्रतियोगी भवति घटस्तस्यावच्छेदकं भवति घटत्वम्, तस्य योऽत्यन्ताभावः स घटे नास्ति, वर्तते च पटादौ । तत्र घटान्योन्याभावस्यापि सत्त्वात् । तथा च घटप्रतियोगिकान्योन्याभावस्य घटत्वात्यन्ताभावातिरिक्तत्वे प्रमाणं नास्ति । अतिरिक्तकल्पनायां तु गौरवम् । लाघवात् घटः पटो न भवतीति प्रतीतौ घटत्वस्य योऽत्यन्ताभावः घटे, स एव पटे घटस्यान्योन्याभावः । बाधकाभावात् अतिरिक्तपदार्थकल्पनायां[1] गौरवम् ।

तच्चिन्त्यम् । तथा सति घटत्वज्ञानव्यतिरेकेण घटान्योन्याभावबुद्धिरेव न स्यात् । घटान्योन्याभावस्य तव मते घटत्वात्यन्ताभावात् । तस्य प्रतियोगितावच्छेदकं भवति घटत्वम् । तदवच्छिन्नज्ञाने तदभावज्ञानानुदयात् । अभावज्ञानं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्य कारणत्वात् । तथा च प्रकृते प्रतियोगितावच्छेदकं घटत्वम् । तेन च रूपेण घटत्वस्याज्ञानात् । तदत्यन्ताभावबुद्धि र्न जायते । अन्योन्याभावः पृथगेवेति[2] । अथवा ध्वंसत्वात्यन्ताभाववत्त्वे सति प्रतियोग्यवृत्तिनित्याभावोऽन्योन्याभावः । अयमर्थः-योऽभावस्त्वप्रतियोगिनि न वर्ततेऽथ च योऽभावो नित्यो भवति, अथ च ध्वंसत्वानाधिकरणी भूतो[3] भवति सोऽन्योन्याभावः [4]इत्यर्थः । यथा घटः पटो न भवतीत्यर्थ, पटान्योन्याभावो घटे । अयं चाभावः स्वप्रतियोगिनि घटे पटान्योन्याभावो नास्ति । अथ च तस्य नाशो नास्ति । अत एवान्योन्याभावो नित्यः । तत्रान्योन्याभावे ध्वंसत्वात्यन्ताभावोऽप्यस्ति । सत्यन्तं ध्वंसेऽतिव्याप्तिवारणार्थम् । अन्यथा प्रतियोग्यवृत्तिनित्याभावो ध्वंसोऽपि भवति । ततस्तदुपादाने नातिव्याप्तिः । यदि नित्याभावत्वमात्रम्, तदाऽत्यन्ताभावेऽतिव्याप्तिः । अत उक्तं प्रतियोग्यवृत्तीति पदम् । घटेऽपि घटाभावान्घटात्यन्ताभावोऽस्ति । नित्यपदं प्रागभावेऽतिव्याप्तिवारणार्थम् । ध्वंसत्वात्यन्ताभावस्तु प्रागभावादित्रिकेऽस्तीति । अनेन लक्षणेनान्योन्याभावो भिन्न एव । स तु व्याप्यवृत्तिरेव । अत्यन्ताभावस्तु किञ्चिदवच्छेदेनैवेति सिद्धान्तः ।

शिरोमणिमतेऽन्योन्याभावोऽप्यव्याप्यवृत्तिर्यथाऽत्यन्ताभावोऽप्यव्याप्यवृत्तिः कपिसंयोगात्यन्ताभावस्थले सिद्धः । प्रतीत्या यथा मूले कपिसंयोगः शाखायां नेति । तथाऽन्योन्याभावोऽपि । यथापि मूले वृक्षः कपिसंयोगवान् शाखायां नेति प्रतीत्या शाखावच्छिन्ने वृक्षे कपिसंयोगवदन्योन्याभावः प्रतीयते-इत्यव्याप्यवृत्तिरन्योन्याभाव इति । न च तत्र वृक्षेऽन्योन्याभावविरोधिनः प्रतियोगितावच्छेद[क]धर्मस्य तत्र सत्त्वेन कथमन्योन्याभाववृत्तिः स्याद्, यथाऽन्योन्याभावस्य विरोधी भवति प्रतियोगितावच्छेदको धर्मस्तथा च यत्रान्योन्याभावप्रतियोगितावच्छेदको धर्मो भवति घटत्वादिस्तत्र घटान्योन्याभावो न तिष्ठति, तथा च संयोगवदन्योन्याभावस्य प्रतियोगितावच्छेदको भवति संयोगस्तस्य वृक्षवृत्तित्वेन कथं वृक्ष संयोगवदन्योन्याभाव इति वाच्यम् । तथा सति

१. B कल्पनागौरवम् । २. A पृथगिति वेति ३. B भूतोऽयं भवति. ४. B omits the reading betweeen इत्यर्थः.....न्योन्याभावो.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

संयोगात्यन्ताभावोऽप्यव्याप्यवृत्तिर्न स्यात् । अत्यन्ताभावविरोधी भवति प्रतियोगी । तथा च यत्र घटत्वं तिष्ठति तत्र घटत्वात्यन्ताभावो न तिष्ठति । प्रतियोगि भवति घटत्वम्, तद्विरोधित्वाद् घटत्वात्यन्ताभावस्येति सर्वप्रतियोगिना सममत्यन्ताभावस्य विरोध्येव । तथा च वृक्षे प्रतियोगिनः संयोगस्य सत्त्वेन तत्र तदत्यन्ताभावो न स्यात् ।

यद्युच्यते यदनवच्छेदेन संयोगरूपः प्रतियोगी तिष्ठति तदवच्छेदेन तदत्यन्ताभावो मा तिष्ठतु । तत्र तदवच्छेदेन विरोधिनः संयोगस्य सत्त्वाद् अन्यावच्छेदेन तु तदसत्त्वेन तदत्यन्ताभावस्तिष्ठत्येव । यथा प्रकृतेऽपि यदनवच्छेदेन प्रतियोगितावच्छेदको धर्मस्तिष्ठति तदवच्छेदेन तद्वदन्योन्याभावो समाः तिष्ठतु, परमन्यावच्छेदेन विरोधिना प्रतियोगितावच्छेदकधर्मस्यासत्त्वेन तद्वदन्योन्याभावस्तत्र स्थास्यत्वेवाबाधकादिति दिक् ।

अथ घटात्यन्ताभावात्यन्ताभावोऽपि प्रतियोग्येव । यथा घटवति भूतले घटात्यन्ताभावो नास्तीति प्रतीतेः सत्त्वात् । घटातिरिक्तो घटात्यन्ताभावाभावो न कल्प्यते । गौरवात् । क्लृप्तेनैव प्रतीतिसम्भवात् । अक्लृप्तकल्पनायां मानाभावात् । घटान्योन्याभावात्यन्ताभावस्तु प्रतियोगितावच्छेदको धर्मो घटत्वादिरेव । यथा घटे घटान्योन्याभावो नास्तीति प्रतीतेरुदयात् । अन्यथा यदीयं प्रतीतिः प्रतियोगिनैव क्रियते, यथा तदन्योन्याभावात्यन्ताभावो यदि प्रतियोग्येव तदा घटवत्यपि भूतले घटान्योन्याभावो नास्तीति प्रतीतिः स्यात् । तत्र तदन्योन्याभावात्यन्ताभावस्य घटे लक्षणस्य सत्त्वात् । यदि वा कपाले घटघटान्योन्याभावयोरुभयोः सत्त्वेन सहानवस्थानलक्षणविरोधभङ्गः स्यादिति ।

नवीनमतेऽत्यन्ताभावाभावस्तु न प्रतियोगी किन्त्वतिरिक्त एव । यत्र प्रतियोगिनः ना[ना]भवन्ति तत्रैवातिरिक्तः । यथा घटात्यन्ताभावस्थले प्रतियोगिनः नाना भवन्ति । यथा घटात्यन्ताभावस्य घटाः भवन्ति बह्वः प्रतियोगिनः, तथा च तेषां सर्वेषां घटात्यन्ताभावाभावत्वं कल्पनीयम् । तदपेक्षया लाघवाद् घटातिरिक्तो घटात्यन्ताभावाभावो घटाधिकरणमात्रवृत्तिरन्य एव स्वीकर्तव्यः । तथा चानेके घटानां घटात्यन्ताभावो नास्तीति प्रतीतिविषयत्वम् । [१]उतातिरिक्तैरेकाभावस्येति[२] लाघवात् । अतिरिक्त एवेति ।

यद्युच्यतेऽक्लृप्तकल्पनातो भवन्मते एव गौरवम्, तदाऽभावोऽप्यतिरिक्तो [३]न सिद्धेत् । **मीमांसकै**रधिकरणस्यैवाभावत्वाङ्गीकारात् । यथा **मीमांसकं** प्रति लाघवा[त्]तर्केण भूतलाद्यतिरिक्तोऽभावः साध्यते । तथाहि यदि भूतलादिकमेव नानाघटत्वात्यन्ताभावस्वरूपं तदा महद्गौरवमलाघवात् । भूतलादिवृत्तिरेकोऽभावोऽतिरिक्त एवेति । तथाप्यत्राप्यतिरिक्तकल्पनैव लघीयसी। यत्र पुनः प्रतियोगी भवत्येकस्तत्रात्यन्ताभावाभावः प्रतियोग्येव । यथा घटत्वात्यन्ता-

१. B तत्राति.. २. B -रिक्तैकभा.. ३. B नास्ति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भावाभावः । अत्र तु घटत्वातिरिक्तकल्पनायां गौरवम् । एवमन्योन्याभावात्य-न्ताभावस्थलेऽपि यत्र प्रतियोगितावच्छेदकधर्मस्य नानात्वं तत्र प्रतियोगितावच्छेदकधर्मापेक्षयाऽतिरिक्त एवाभावः । यत्र पुनरेकं तत्र प्रतियोगितावच्छेदकमेव तदन्योन्याभावात्यन्ताभावः । अत एव **प्राचीन**मतमप्यत्यन्ता-भावात्यन्ताभावः प्रतियोग्येवेति । [१]एवमन्योन्याभावात्यन्ताभावस्तु प्रतियोगितावच्छेदको धर्मः । इति स्थलविशेषे सुष्ठु जातम् ।

(४) सामान्याभावः

ननु **नैयायिकमते** सामान्याभावोऽस्ति, यथा वायौ रूपं नास्तीति प्रतीतिः सामान्यरूपाभाव एव तस्यां प्रतीतेर्विषय इत्यत्र किं प्रमाणमिति चेत्, न । सन्देहान्यथानुपपत्तिरेव । तत्र प्रमाणम् । तथाहि-यदि विशेषाभावादतिरिक्तः सामान्याभावो नास्ति तदा वायौ रूपं न वेति सन्देहो न स्यात्, वायुरूपवान्न वेति वा । पृथिवीरूपाद्यभावलक्षणविशेषाभावस्य तत्र निश्चितत्वादिति । निश्चयस्तु विपरीतबोधं प्रति प्रतिबन्धः । यथा भूतले घटनिश्चयानन्तरं भूतले घटो नास्तीति विपर्ययो भूतले घटोऽस्ति न वेति सन्देह श्च जायते, तथा प्रकृते वायौ रूपाभावविषयकः सन्देहोऽपि न स्यादिति।

ननु सन्देहं प्रति निश्चयमात्रं प्रतिबन्धकं न भवति, किन्त्वतिरिक्तसम्भावनाभावविशिष्ट एव निश्चयः । तथा सम्भावनाभावविशिष्टो न भवतीति सः । अतः विशिष्टो निश्चयाभावोऽस्तीति सन्देहो भविष्यतीति तत्र सामान्याभावोऽतिरिक्त इति चेत् न ।

तथा सति घटत्वत्यपि भूतले विषयस्य विशेषणाभावरूपस्य सत्त्वेन घटो नास्तीति प्रतीतिः प्रमारूपा[२] स्यात् । अतः न ततो विशेषाभावातिरिक्तः सामान्याभावो घटो नास्तीति प्रमीतविषयः ।

वस्तुतस्तु घटवति भूतले घटो नास्तीति प्रतीतिरेव न जायते । भवन्मते च साम्यात् । तत्र विशेषणाभावस्य निश्चितत्वात् । न चैकावच्छेदेन [३]यावद्विशेषणाभावस्य प्रतीतिविषयत्वात्, तथा च घटवति भूतले यावद्विशेषणाभावो नास्ति, वर्तमाने घटस्य तत्र सत्त्वेन यावद्विशेषाभावो नास्तीति तथा प्रतीतिरिति अत्रैव यत्र भूतले घटद्वयं तिष्ठति तत्र भूतले घटो नास्तीति प्रतीतिरापादयितुं न शक्यते; तत्रापि यद्यपि यावद्विशेषाभावो वर्तते, एतद्घटद्वयातिरिक्तघटनामभावो विशेषाभावरूपस्तिष्ठत, अन्ययोरप्यधस्तात् परस्परं तिष्ठति, एकस्य परघटवति भूतले [४]परस्यापरघटवतिभूतले इति; यावद्घटविशेषाभावोऽस्ति, तथाप्येकदेशावच्छेदेन यावद् विशेषाभावो नास्तीति न तत्र घटो नास्तीति प्रत्ययः,[५] अत एव पृथिव्यां जले च रूपं नास्तीति न प्रतीतिरेकावच्छेदेन यावद्विशेषाभावस्याभावादिति, तथा च यावद्विशेषा भावेनैव सर्वत्र निर्वाहादतिरिक्त सामान्याभावकल्पने प्रमाणं नास्तीति वाच्यम् ।

---

१. B omits इति । एवं. २. B -रूपस्य । अतः. ३. B omits the reading between यावद्विशे....भूतले. ४. B परस्पर. ५. B प्रत्यक्षः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]वायौ एकावच्छेदेनैव [2]यावद्रूपविशेषाभावसत्त्वेन तन्निश्चयानन्तरं वायौ रूपं न वेति सन्देहो न स्यात् । यथा वायुत्वावच्छेदेन सर्वरूपाभावनिश्चयात्कथं सन्देहो भविष्यति ? तथा च सन्देहे विषयीभूतो रूपसामान्याभावोऽतिरिक्त एव । यद्युच्यतेऽतिरिक्तसम्भावनेत्यादि, तदा प्रतिबन्धकाभावस्य कारणत्वे कल्पनीये सामान्याभावासिद्धिः । यथा करतलानसंयोगानन्तरं मणिसत्त्वे दाहो न जायते, मण्यभावे सति जायते, तथा भवन्मते मणिप्रागभावस्य मणिध्वंसस्य मणिविशेषाभावानां च दाहं प्रति कारणत्वं कल्पनीयम्, तदपेक्षया लाघवात् । मणित्वावच्छिन्नप्रतियोगिताकाभावस्यैव कारणत्वं कल्पनीयम् । लाघवात् । [3]अनेकेषां मणिप्रागभावादीनां कारणत्वकल्पने गौरवम् । तथा च लाघवाद्विशेषाभावातिरिक्त एकः सामान्याभाव कल्प्यते । अत एव कार्यकारणानुरोधेन **प्राचीनमतं** दूषयित्वा **शिरोमणिनाऽवयविनि** घटादौ रूपसामान्याभावः साधितः । प्रमाणत्वमेव यथोत्पत्ति-कालावच्छिनो घटः रूपसामान्यभावान्यतरवान् । प्रमेयत्वात्पटादिवदिति । अत्रानुकूलतर्कस्तु कार्यकारणभावः । घटरूपोत्पत्तिं प्रति घटरूपं प्रतिबन्धकं भवति । तथा च घटरूपप्रागभावादीनां कारणत्वकल्प्यमाने गौरवम् । लाघवात् [4]रूपत्वावच्छिन्नप्रतियोगिताकाभावस्य सामान्याभावरूप-कारणत्वं वाच्यमिति सामान्याभावः सिद्धः ।

वस्तुतस्तु इह भूतले घटो नास्तीति प्रतीत्यैव सामान्याभावः सिध्यते । तथाहि भूतले घटो नास्तीत्यत्रानेकेषां घटप्रतियोगिकाभावानां घटो नास्तीति प्रतीतिविषयं कल्पनीयम् । उतारिक्तस्यैकस्यैव तथा प्रतीतिविषयत्वं कल्पनीयं-लाघवात् । एक एव सामान्याभाव एव विषयाभावातिरिक्तस्तथा प्रतीतिविषयः स्वीकर्तव्य इति दिक् ।

(५) प्रागभावः ।

प्रागभावं लक्षयति-**उत्पत्तेरिति कारणेति**-समवायिकारणे कपालादावुत्पत्तेः प्राक् कार्यस्य घटादेरभावः प्रागभाव इत्यर्थः । **अन्योन्याभाव इति कपाले** घटो न भवतीति प्रतीत्या घटान्योन्याभाव उत्पत्तेः प्रागपि कपाले तिष्ठतीत्यतिव्याप्तिरित्यर्थः । **न चेति** अन्योन्याभावेऽतिव्याप्तिवारणार्थम् । **संसर्गाभाव** इति तथा चोत्पत्तेः प्राक् कारणे कार्यस्य संसर्गाभाव इति वाच्यम् ।

दूषयति-**दण्डादीति** दण्डादौ कारणे घटस्य योऽत्यन्ताभावस्तत्रातिव्याप्तिरित्यर्थः । **समवायिकारणेति**-यद्यभावस्यात्यन्ताभावेऽतिव्याप्तिवारणार्थं समवायिकारणवृत्तित्वे सत्युत्पत्ते प्राक् कार्यस्य संसर्गाभावः प्रागभावः-इति लक्षणे दूषणमाह-**तद्वृत्तीति** - यद्यपि घटोत्पत्तिपूर्वकाला-

---

१. A omits वायौ. २. B यावद्विषयवि.. ३. B omits the reading between अनेकेषां..... .....तरवान्. ४. B रूपस्थत्वाव..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वच्छेदेन समवायिकारणवृत्तित्वं तिष्ठति तथापि घटोत्पत्त्यनन्तरकालावच्छेदेन घटप्रागभावे [१]घटसमवायिकारणवृत्तं नास्तीत्यव्याप्तिरित्यर्थः ।

यद्युपलक्षणत्वं समवायिकारणवृत्तित्वस्योच्यते यदा कदापि समवायिकारणवृत्तित्वमुच्यते- [२]**उपलक्षणमेतदिति** तेन विशेषणत्वं नास्तीति दूषयति-**अवच्छेदकाभाव** इति [३]उपलक्षणत्वं च तत्रैव सम्भवति यत्रोपलक्ष्यतावच्छेदकं किञ्चिद्भवति । यथा 'काकवत् देवदत्तगृह'मित्यत्रो[४]तृणत्वमुपलक्ष्यतावच्छेदकम् । गतेऽपि काके देवदत्तगृहे, उत्तृणत्वेन हेतुना काकवत्त्वं प्रतीयते । यथा पूर्वकालावच्छेदेनात्र काको ऽभूदिति प्रतीतिस्तथा प्रकृते उपलक्षणतावच्छेदको धर्मः कश्चिन्नास्तीति नोपलक्षणं समवायिकारणवृत्तित्वमित्यर्थः ।

वस्तुतस्तु घटसमवायिकारणदेशे कपाले यो वर्तते घटात्यन्ताभावस्तत्रातिव्याप्तिः । न च तत्रात्यन्ताभावो नास्त्येव, तत्र विरोधिनो ह्यत्यन्ताभावस्य सत्त्वात्, त्रयोऽत्यन्ताभावविरोधिनः प्रागभावध्वंसप्रतियोगिरूपा इति वाच्यम् । यदि समवायिकारणदेशे कार्यस्यात्यन्ताभावो नास्तीतिति, तदोत्पत्तिपूर्वकालावच्छेदेन कपाले घटो नास्तीति प्रतीतिर्न स्यात् । न च प्रागभावविषयिण्येवेयं प्रतीरिति वाच्यम् । घटत्वावच्छिन्नप्रतियोगिताकाभावास्वीकारात् । घटत्वं हि प्रागभावप्रतियोगितावच्छेदकं [५]न भवति । घटत्वस्य प्रागभावप्रतियोगितातिरिक्तवर्तमाने घटेऽपि वर्तमानत्वात् ॥ किन्तूत्पत्स्यमाने घटत्वं प्रागभावप्रतियोगितावच्छेदकमिति ।

तथा च कपाले घटो नास्तीत्यत्र घटत्वं प्रतियोगितावच्छेदकत्वेनैव प्रतीयते । अन्योन्याभावो न प्रतीयते । अनुयोगिनि सप्तम्युल्लेखात् । यथा कपाले घटो नास्तीति । अन्यथैतादृशी प्रतीतिः प्रागभावविषयिण्यपि जायते । यथा यस्मिन्घटे पीतं रूपमुत्पन्नमग्रे उत्पत्स्यते पाकेन रक्तं रूपं तत्र पीतरूपवत्यपि घटे रक्तरूपस्य प्रागभावो वर्तते । तथा च घटे रूपप्रागभावत्वमेव, पीतरूपवत्यपि घटे रूपं नास्तीति प्रतीतिः स्यात् । भवन्मते रूपत्वस्यापि प्रागभाव[६]प्रतियोगितावच्छेदकत्वात् । विषयसत्त्वे सत्यवश्यं तादृशी प्रतीतिर्भविष्यत्येव, बाधकाभावात् । मन्मते त्वियं प्रागभावविषयिणी प्रतीति र्न भवति । भवति चेयमत्यन्ताभावविषयिणी । तथा च पीतरूपवति घटे रूपं नास्तीति प्रतीति र्न जायते । प्रतियोगिलक्षणस्य विरोधिनस्तत्र सत्त्वात् । अत्यन्ताभावं प्रति तु [७]समानकालाव-च्छेदे[८]नैकाधिकरणतावच्छेदेन प्रतियोगिसत्त्वस्यैव विरोधित्वात् । प्रागभावप्रध्वंसयोरत्य-न्ताभावविरोधित्वे प्रमाणाभावात् । ततो घटोत्पत्तिपूर्वकालावच्छेदेन समवायिकारणे कपाले जायते घटो नास्तीति प्रतीतिः । तद्विषयोऽत्यन्ताभाव एव । तेन तत्रातिव्याप्तिः ।

---

१. B प्रघट॰. २. It is उपलक्षणत्वमेतद् in the त. भा. प्र. ३. B उपलक्षणं. ४. B तृणमुप॰. ५. A repeats the reading between न भवति.....च्छेदक. ६. B प्रतियोगित्वा॰. ७. B सामान्यकाला॰. ८. B omits the reading between नैकाधिक.....वच्छेदक.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न च प्रागभावोच्छेद इति वाच्यम् । घटो भविष्यतीति प्रतीतिर्घटप्रागभाव एव विषयिणी[१] । भविष्यत्वं च वर्तमानप्रागभावप्रतियोगित्वम् । यद्यत्राप्यत्यन्ताभाव एव विषय इत्युच्यते तदा यो घटः कपाले ध्वस्तस्तद्विषयिणी घटो भविष्यतीति प्रतीतिः स्यात् । घटात्यन्ताभावस्य तदानीमपि सत्त्वात् । ततो घटो भविष्यतीति प्रतीति र्घटप्रागभावविषयिण्येव । तथा च कपाले घटप्रागभावध्वंसौ तिष्ठतः, तथा च घटात्यन्ताभावोऽपि तदानीं तिष्ठत्येव ।

न चानया घटो भविष्यतीतिरूपया प्रतीत्या प्रागभावो न सिध्यति, भविष्यत्त्वं च न वर्तमान-प्रागभाव प्रतियोगित्वम्, किन्तु वर्तमानकालोत्तरकालोत्पत्तिकत्वम्, तथा च न प्रागभावसिद्धिरिति वाच्यम् । कार्यकारणभावानुरोधेन प्रागभावत्वस्वीकारात् । तथाहि यथा सहस्रन्तुषु सहस्रतन्तुक एको पट उत्पद्यते । एतत्पटस्य स्वानधिकरणे तन्तावुत्पत्तिवारणाय विशेषकार्यकार-णभावोऽपि स्वीकर्तव्य एव । अन्यथा यदि तन्तुत्वेन पटत्वेन च सामन्यतः कार्यकारणभा-वसत्त्वेन सहस्रतन्तून्विहाय तन्त्वन्तरेऽपि पटोत्पत्तिप्रसङ्गवारणाय तत्र तन्तुत्वेन तत्तत्पटत्वेन च कार्यकारणभावो वाच्यः । तथा च सहस्रतन्तुकपटोत्पत्तौ सहस्रकार्यकारणभावाः स्वीकर्तव्या इति गौरवम् । तदपेक्षया सहस्रतन्तुष्वेतत्प-टप्रागभाव एकः स्वीकर्तव्यः, लाघवात् । तथा च यत्र देशे एतत्पटप्रागभावो वर्तते तत्रैवैतत्पट उत्पद्यते, न स्वाधिकरणदेशतन्तौ । तत्र प्रागभावरूपकारणाभावात् । तथा चैतत्पटत्वेनैतत्त-न्तुत्वेनापि विशेषकार्यकारणभावोऽपि स्वीक्रियते । तत्र प्रागभावस्यैव नियामकत्वादिति प्रागभावसिद्धिरिति दिक् ।

(६) प्रध्वंसाभावः ।

[२]**सादित्वे सतीति** अनन्तत्वमात्रमत्यन्ताभावेऽतिव्याप्तम् । अतः सत्यन्तम् ।

ननु ध्वंसस्यापि ध्वंस स्वीकर्तव्यः, न च घटोन्मज्जनप्रसङ्गेन तत्स्वीकार इति [३]वाच्यम् कपालद्वयसंयोगादिकारणता भावेन घटोन्मज्जनं न भवतीति चेत्, न ।

घटध्वंसस्य ध्वंसः किमतिरिक्तः पदार्थो वा घटस्वरूपं वा ? नाद्यः । अतिरिक्तकल्पनायां प्रमाणाभावात् । न द्वितीयः । भावेऽभावत्वानङ्गीकारात् । अनन्यगत्या प्रागभावध्वंसानधिकरणकाले प्रतियोगिसत्त्वनियमात्[४] । तथा च प्रागभावध्वंसौ यदा न तदा प्रतियोगिसत्त्वं स्यादिति ।

अन्योन्येतीति । तथा च तादात्म्यमसद्भवति । कोऽर्थः ? तादात्म्यं कश्चिदतिरिक्तः पदार्थः नास्ति, तेन तत्प्रतियोगिकत्वेनान्योन्याभावोऽप्यसन्नैवेति-तुच्छ एवेत्याशङ्कार्थः । **प्रतियोगितेति** प्रतियोगितावच्छेदस्य योऽऽरोप्यस्तस्य[५] वा धीस्तस्यां विषयोऽन्योन्याभाव इत्यर्थः । यथा घटः पटो

---

१. A विषयः. २. B अस्य द्वित्वे सतीति (!). ३. B इत्यर्थः कपाल.. ४. B सत्त्वानियमात्. ५. B तस्य विषयोऽन्यो..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न भवतीत्यत्र घटत्वं पूर्वं [1]पटेऽऽरोप्यते । यतो घटत्वं पटे नास्तीति । अत एव तदारोप्यते । घटः पटः इत्येतावन्मात्रे घटत्वारोपः, उत्तरत्र तन्निषेध इत्यर्थः । तथा च प्रतियोगितावच्छेदकं [2]च सदेव । तेन च नान्योन्याभावस्य तुच्छता ।

[इत्यभावग्रन्थः समाप्तः ।]

[२४] प्रमेयप्रकरणम् । [Cont.]

(VI) बुद्धिः ।

[3]अथ च प्रमेयसूत्रान्तर्गत बुद्धिपदार्थमाह-**स्वप्नस्येति** -तथा च स्वप्ने इदंता, [त]त्प्रत्यक्षविषयिणी निद्रारूपदोषादेवेत्यर्थः । जाते इति उत्पन्नं यज्ज्ञानं तत्र स्वविषयीभूतेनार्थेन स्वस्याकारो ज्ञाने जन्यते । तथा चार्थेन स्वाकारो ज्ञाने जन्यते-इति --इत्येकः पक्षः । द्वितीयपक्षार्थस्तु यदा ज्ञानमुत्पद्यते तदा स्वीकारः स्वशब्देन विषयस्तस्याकारः, स्वरूपं तद्विशिष्टत्वेन[4] यदा घटज्ञानमुत्पद्यते तदा घटरूपेणैवोच्यते । इति द्वितीयपक्षार्थः ।

ज्ञानज्ञानेति-यथा घटमहं जानामीत्यत्रार्थो घटेऽपि भासत इति ज्ञानज्ञानस्यार्थ निरुप्यत्वम् ।

इदं दूषयति-**ज्ञानमस्तीति** अत्रार्थप्रतिपादकपदाभावाज्ज्ञानमात्रप्रतिपादकसत्त्वात्[5] शुद्ध-ज्ञानमेव भासते । ततः सर्वं ज्ञानमर्थनिरुप्यं न भवतीत्युक्तं **सामग्र्यसम्पत्तिरिति** विषय-प्रतिपादकपदरूपा सामग्री तत्र नास्तीति न विषयनिरुप्यत्वं ज्ञानमात्रस्येत्यर्थः ।

(VII) प्रवृत्तिः ।

सूत्रस्थां प्रवृत्तिः व्याचष्टे-**धर्माधर्ममयीति** प्रवृत्तेः धर्माधर्ममयत्वं धर्माधर्मस्वरूपत्वं न सम्भवतीत्यन्यथा व्याचष्टे-**धर्माधर्मजनकेति**- तथा च प्रवृत्तेर्लक्षणं अदृष्टस्य जनको योऽनित्ययत्नः तत्त्वम् । तथा चादृष्टजनकपदं जीवनयोनियत्नेऽतिव्याप्तिवारणार्थम् । येन यत्नेन निद्रादशायामपि श्वासादिकमुत्पद्यते तददृष्टजनकत्वं न भवतीति न [6]न लक्ष्यम् । लक्ष्यतावच्छेदकं च धर्माधर्मजनको यः संसारियत्नस्तत्त्वं लक्ष्यम् । लक्ष्यतावच्छेदकं च तथा यत्र धर्माधर्मजनकः संसारियत्नस्तत्रैव तल्लक्षणम्, जीवनस्य योनिःकारणम्, एतादृशो यो यत्नस्तत्र लक्ष्यतावच्छेदकं नास्तीति तदलक्ष्यम् । तद्वारणमर्थमदृष्टजनकं पदम् । वाग्क्रियावाग्यत्नः । तथा च वागुच्चारणविषयकः प्रयत्न इत्यर्थः ।

आत्मेति - आत्मधर्मस्य ज्ञानरूपस्योपादानद्वारा ग्रहणद्वारा । तथा च ज्ञानेनेच्छा, इच्छया च यः प्रयत्नः, प्रयत्नेन च क्रिया, क्रियया कृत्वा प्रयत्नस्यानुमानं क्रियते ।

---

१. B omits पटे. २. B omits च. ३. B अत्र. ४. B -शिष्टेन. ५. B -पादकपदसत्त्वात्. ६. B omits न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

बुद्धिशब्दार्थमाह-**बुद्धिश्चेति** । अत्र बुद्धिपदेनेदं विवक्षितम्-यथा भोगावच्छेदिका कारणीभूता या क्रिया, तद्द्वारा तादृशो यो प्रयत्नः अदृष्टजनकी भूतो यः, स एव शरीरारम्भकः । तथा च मनस(सि)भोगजनिका क्रियोत्पन्ना, तद् द्वारा[१] प्रयत्नः उत्पन्नः । [२]तदनन्तरमदृष्टमुत्पन्नम्, तदनन्तरं कालान्तरे तेनैवादृष्टेन शरीरमारभ्यते इत्यन्वयः । यथा सामान्यतः पूर्वं यागविषयकं ज्ञानं जायते, तदनन्तरं यागे इच्छा जायते । तत इच्छया यागविषयकः प्रयत्नः उत्पाद्यते, तदनन्तरं प्रयत्नेन यागादि क्रिया जन्यते । तया पुनरदृष्टमुत्पाद्यते । तदैव यागस्य द्वारं स्वर्गजनने=स्वर्गसुखजनने । सुखं च शरीरव्यतिरेकेण न सम्भवतीति प्रथमतोऽदृष्टेन शरीरमुत्पाद्यते । तदवच्छेदेनात्मनि यागजन्यादृष्टेन सुखं जन्यते इति प्रयत्नस्य परंपरया भोगजनकत्वं[३] तिष्ठतीत्यभिप्रायः ।

(VIII) दोषाः ।

अथ [४]दोषानाह-दोषैः प्रवृत्ति र्जन्यते । अत एव योगिनां दोषाभावेन कुत्रापि प्रवृत्तिर्न जायते। अतो न तेषां धर्माधर्मोत्पत्तिः ।

प्रवृत्तिजनकेति तथा च दोषसामान्यलक्षणमिदम् । यथा प्रवृत्तिजनकीभूता ये आत्मानं प्रति विशेष[५]गुणास्तत्त्वं दोषत्वम् । इदं च रागादित्रयेऽपि सामान्यलक्षणं तिष्ठतीति सामान्यलक्षणं हृदि विचार्य विभजते दोषात्-**अदृष्टजनकेति**, इदं रागस्य लक्षणम् । यथा-अदृष्टजनकी भूतो यो यत्नस्तस्य जनकीभूतेच्छा स राग इत्यर्थः । तथा चादृष्टकारणं भवति यत्नः, यत्नस्य कारणं भवतीच्छा । यथा पूर्वमिच्छा, ततो यत्नक्रियाकारणीभूतात्मविशेषगुणाः [६]। इच्छाव्यतिरेकेण यत्नानुत्पादात् । ततो यत्नादृष्टमुत्पद्यते । अदृष्टं तु यागादि विषयकयत्नेनैव जन्यते । नापि गमनविषयकेणेति रागः इच्छारूपः उक्तलक्षणः ।

नात इति [७]जीवन्मुक्ते नारदादावदृष्टाभावादृष्टजनको यत्ननो नास्तीति न तेषां राग इत्यर्थः । द्वेषत्वेति तथा च दुःखजनकीभूतादृष्टजनकत्वमेव द्वेषत्वमात्मन इति ।

(IX) प्रेत्यभावः ।

तथा चात्मनः पूर्वदेहेन समं विभागे सत्युत्तरदेहेन यः सम्बन्धः स एव प्रेत्यभाव इत्यर्थः ।

(X) फलम् (भोगः) ।

[८]**मूढभाव(भोग ?) इति** । नारदादिभोगादौ तु मिथ्याज्ञानाभावात् मूढभोगो नास्ति । मूढभोगस्तु सांसारिकभोग एवेति भावः ।

---

१. B omits द्वारा. २. B omits the reading between तदनन्तर....ज्ञानं जायते । ३. B -जनकं. ४. B दोषमाह. ५. A गुणास्त०. ६. B -गुणः. ७. B तथा चात्मनः जीवन्मु०. ८. This प्रतीक is not found in त.भा.प्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

(XI) दुःखत्वम् (पीडा)।

आत्मापवर्गेति आत्मन्यतिव्याप्तिवारणार्थं मोक्षेऽव्याप्तिवारणार्थं चात्मापवर्गान्यत्वे सतीति विशेषणम्। दुःखवृत्ति यत्प्रमेयत्वं तद्दुःखत्वम्। तथा च यत्प्रमेयत्वं दुःखे वर्तते तदेवातिव्याप्तमात्मन्यपवर्गे चास्तीति। तद्वारणार्थं तदन्यत्वं **हेयत्वमिति** तथा दुःखं हेयमेवेत्यत्र सुखं यद् दुःखं तस्यैव प्रवेश इति। **नात्माश्रय इति** अन्यथाऽऽ[१]त्माश्रयः स्यात्। यथा दुःखसम्बन्धि प्रमेयत्वमिति दुःखस्य लक्षणं कृतम्, तथा च दुःखलक्षणे क्रियमाणे दुःखस्य, [२]लक्षणे प्रवेशो जायते। इत्यात्माश्रयः[३] स्यादित्यर्थः।

(XII) अपवर्गः (मोक्षः)॥

मननमिति यथा शास्त्रेण समस्तपदार्थानां विदितत्वं येन सः तस्येति। अनुमितिरूपं ज्ञान मननम्। **वैराग्यमिति** ध्यानस्य कारणं वैराग्यम्। **न तु [४]परममिति** तथा च परमं तत्त्वज्ञानं ध्यानं प्रति कारणं न भवति। तस्य तत्त्वज्ञानस्य ध्यानोत्तरकालभावित्वात्। कारणं तु पूर्व कालवर्त्येव भवतीति भावः। ध्यानपरि [पाक]-इति निदिध्यासनस्यायमर्थः। यः ध्यानपरिपाकेन ध्यानदिसमाप्त्या योगजधर्मःयोगाभ्यासेन यः संस्कारविशेषः स योगजः धर्मः नाम निदिध्यासनमित्यर्थः। **साक्षात्कार इति** ईश्वरसाक्षात्कार इत्यर्थः। ननु **निष्कामस्येति** मूले किमर्थमुक्तमित्यत्राभासं दर्शयति-**नन्विति** तथा च प्राचीनकर्माणि यान्यनुक्तानि तेषां क्षयस्तु भोगमन्त रा(रेण ?) न सम्भवतीति तैः कर्मभिः भोगोऽवश्यं जननीय एव। तथा च भोगकाले च यया क्रियया भोग उत्पद्यते तया च क्रिययाऽदृष्टान्तरमवश्यमुत्पादनीयमेव। तेनादृष्टेन च पुनरपि भोगान्तरेऽपि उत्पादनीयमिति क्रमेणादृष्टद्वारा भविष्यति। कुतो मोक्षः-इत्याभासार्थः[५]। **[६]निष्काममिति** तथा च येन पुरुषेण कामा(म)नां विना गङ्गास्नानादि कर्म क्रियते तेनादृष्टान्तरं नोत्पद्यते इति भावः[७]। **योगप्रभावादिति** मूलम् योगप्रभावात्तत्त्वज्ञानजनकीभूतात् पूर्वजन्मकृतं कर्म। तथा योगेन तत्त्वज्ञानमुत्पनम्, तेन पूर्वकृतं कर्म जातम्। तदनन्तरं भोगद्वारा पूर्वकर्मक्षयो जातः, भोगेन सर्वकर्मणां क्षयो जातः, ततो वर्तमानशरीरादिनाशः[८]। तदनन्तरमेकविंशतिदुःखसम्बन्धो न भवति। कर्मरूपकारणाभावादिति स्वसमानाधिकरणदुःखावृत्तिः दुःखध्वंसो मोक्षः। स्वशब्देन दुःखध्वंसो ग्राह्यः। तत्समानाधिकरणं दुःखावृत्तिः यद् दुःखं तस्य यो ध्वंसः स मोक्ष इत्यर्थः।

दुःखावृत्तित्वं नाम कालिकसम्बन्धेन ग्राह्यम्। कोऽर्थः ? यद् दुःख ध्वंसानन्तरं, तस्मिन्नेवात्मनि दुःखं नोत्पद्यते। तथा च यदा चैत्रीयदुःखध्वंसः[९] नास्तीति कालिकसम्बन्धः। तेन

---

१. B -माश्रयत्वं. २. A omits लक्षणे. ३. B -श्रय इत्यन्यथाऽऽत्माश्रयः. ४. B परमिति. ५. B -भासमित्यर्थः। ६. It is निष्काम in त.भा. ७. It is योगाभ्यासप्र०. in त.भा. ८. B शरीरस्य नाशः। ९. B -ध्वंसास्त०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चरमदुःखध्वंस एव मोक्षः । स च स्वसमानाधिकरणं यद् दुःखम्, तत्र यो दुःखध्वंसो न वर्तते सांसारिकदशायां चैकाधिकरणवृत्तित्वसम्बन्धेन दुःखध्वंसः उत्तरदुःखे वर्तते इति तन्निरासः । यदि स्वसमानाधिकरणपदं न दीयते, तदा चैत्रीयदुःखध्वंसो मैत्रीयस्य मोक्षः स्यात् । तद्वारणाय स्वसमानाधिकरणपदम् । दुःखावृत्तिपदादाने संसारदशायां दुःखध्वंससत्त्वेन मोक्षत्वप्रसङ्गः स्यात् । अत उक्तं दुःखावृत्तिपदम् ।

अथवा **वर्धमानोक्तमेव** लक्षणं ग्राह्यम् । यथा समानकालीनसमानाधिकरण-दुःखप्रागभावासहवृत्तिदुःखध्वंस इत्यस्यैव पूर्वोक्तलक्षणम्(णा)र्थम् । अत्र गौरवमनेकपददानादिति दिक् । मोक्षं प्रत्यसाधारणं कारणं तत्त्वज्ञानमेव । काशीमरणादिकं मोक्षं प्रति तत्त्वज्ञानेन प्रयोजकम्, न स्वातंत्र्येण कारणमिति नात्र विस्तरः ।

(२६) संशयनिरूपणम् ।

संशयलक्षणे **एकस्मिन्निति** एकस्मिन्नधर्मिणि इदं शब्द वाच्ये उच्चैस्त्वादि धर्मि(र्म) विशिष्टे विरुद्धाः ये नानार्थाः स्थाणुत्वादयस्तेषां योऽवमर्शो ज्ञानं स एव सन्देहः । यथाऽयं स्थाणुर्न वा । अत्र विरुद्धार्थाः भवन्ति स्थाणुत्वस्थाणुत्वाभावरूपाः । अयं द्विकोटिकः । यदाऽयं स्थाणुर्वा पुरुषो वेति सन्देहस्तदा चतुःकोटिसंशयो भवति । स्थाणुत्व-तदभाव-पुरुषत्व-तदभावरूपाः चतस्र कोट्यः ।

[1]अत्राशङ्कते-**नन्विति** यथा जलं गन्धवदित्यत्र निश्चयरूपे ज्ञाने एकस्मिन् धर्मिणि जले विरुद्धौ यौ जलत्वरूपगन्धरूपपदार्थौ तयोरवमर्शत्वं वर्तते एवेति । अस्यापि संशयत्वं स्यादित्यतिव्याप्तिरित्याशङ्कार्थः । समाधत्ते-**एकस्मिन्निति** - तथा चैकस्मिन्न धर्मिणि[2] स्फुरन्विरोधो येषां ते स्फुरन्विरोधाः-ज्ञायमानविरोधा इति यावत् । तेषां[3] च [4]पदार्थानां परस्परं विरोधो ज्ञायते इति । एतादृशपदार्थानां अवमर्शो-ज्ञानं संशयः । तथा च जलं गन्धवदित्यत्र निश्चयरूपे ज्ञाने नातिव्याप्तिः, तत्र जलत्वगन्धयोः परस्पर विरोधेऽपि तदानीमज्ञानान्नात्र विरोधो ज्ञायमान इति न तत्रातिव्याप्तिरित्यर्थः ।

अत्र त्रिविधसंशयस्य प्रथमभेदमाह-**एकेति** समानाधर्मवत् यद् धर्मि, तस्य यज्ज्ञानं तदनन्तरमुभय कोटिस्मरणं भवति । तदनन्तरं-कोटिद्वयस्मरणानन्तरं समानधर्मदर्शनजः सन्देहो भवति। यथा समानधर्मो भवत्युच्चैस्त्वम् तस्य पुरुषे स्थाणौ च सत्त्वात् । तथा च कालान्तरे सन्निकृष्टे पुरोवर्तिन्युच्चैस्त्वविशिष्टे पदार्थे दोषवशात् पुरुषत्वं स्थाणुत्वं च तन्निश्चितमिति उच्चैस्त्वरूपधर्मेण चोभयरूपा कोटिः स्मर्यते । एकसम्बन्धि ज्ञानान्तरमुभयस्मरणेन संशयो भवति । एतदेव स्पष्टयति-**तत्रेति**[5]-अन्यथा समानधर्मेण कोटिस्मरणं विनाऽन्यकार्यजननात् सम्बन्धिज्ञानत्वेन । तथा

१. B अत्र शङ्कते. २. B omits the reading between स्फुरन्वि....येषां ते. ३. B येषां. ४. A repeats the reading between पदार्थानां.....इति after पदार्थानां. ५. B अत्रेति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चोच्चैस्त्वस्य पुरुषेऽपि स्थाणावपि सहचारस्य वर्तमानत्वादुभयकोटिस्मारकमते(तमि)ति ज्ञेयम् ।

द्वितीयमाह-**विप्रतिपत्तिरिति** विप्रतिपत्तिस्तु विरुद्धार्थप्रतिपादकः शब्दः । तथा च विप्रत्तिपत्त्या उभयकोटिरूपौ यौ विरुद्धार्थौ, तयोः स्मरणं जन्यते । तथा चोभयकोटिस्मरणद्वारा विप्रतिपत्तिरपि संशयहेतुः । यत्कोटिद्वयस्मरणं तस्यापि हेतुर्विप्रतिपत्तिः । यथा शब्दो नित्यो न वेति मध्यस्थस्य[1] सन्देहो भवति । नित्यपदेन नित्यत्वरूपा कोटिरूपस्थापिताऽनित्यपदेन चानित्यरूपा कोटिरूपस्थापिता ।

ननु नित्यपदेन नित्यपदार्थोपस्थितिः कृतेति मध्यस्थस्य सन्देहो भवति । अनित्यपदार्थेनानित्यपदार्थस्योपस्थितिर्कृतेत्यन्यतरस्य निश्चयो न जातः । प्रतिबन्धकं च तदभावज्ञानम् । तथा चाभावज्ञाने विद्यमाने शाब्दबोधरूपनिश्चयो न भवति । संशयस्तु शाब्दबोधज्ञानरूपो भविष्यति। संशयज्ञानं प्रत्यक्षरूपं विप्रतिपत्तिजन्यं किमित्यत आह-**शाब्दस्येति** । तथा च योग्यतारूपशाब्दज्ञानं प्रति प्रतिबन्धकमस्तीति न संशयः शाब्दरूपमिति भावः । यथा भूतलादौ घटाभावज्ञानं शब्देन वा प्रत्यक्षेण वा जातं तदा घटविषयकं शाब्दज्ञानं तत्र न भवतीति न शब्दः संशयः, किन्तु प्रत्यक्षमेव ज्ञानं संशयः ।

तृतीयमाह-**असाधारणेति** विरोधिसम्बन्धेनासाधारणधर्मकोटिद्वयमुपस्थापयतीति । तत्रासाधारणधर्मोऽपि संशयजनकं यद्विरुद्धकोटिद्वयस्मरणं तत्रोपयोगीति । [2]यथा गन्धत्वरूपो धर्मोऽसाधारणो भवति, भूमात्रवृत्तित्वात् । धर्मिणि विरोधिसम्बन्धेन नित्यत्वानित्यत्वरूपकोटिस्मरणं क्रियते । यथा विरोधिसम्बन्धः नित्येऽऽकाशादौ गन्धवत्त्वं न तिष्ठति अनित्ये च जलादौ गन्धवत्त्वं किं न तिष्ठतीति गन्धवत्त्वं किं नित्ये तिष्ठति उतानित्यते तिष्ठतीति कोटिद्वयस्मरणम्, तदनन्तरं संशयो भूर्नित्याऽनित्या वेति । असाधारणधर्मस्तु संशयजनककोटिद्वयस्मरणोपयोगी ।

ननु संशयस्यापि निश्चयत्वमेवास्तु । तथाहि तस्यापि निश्चयविषयत्वात् । यथा यत्र वस्तुगत्या पुरुषस्तिष्ठति तत्र विशेषदर्शनाभावकालेषु पुरुषविषयकसन्देहो जायतेऽयं पुरुषो न[3] वेति । तथा चास्मिन् ज्ञाने पुरुषः पुरुषत्वं पुरुषत्वाभावो विषयीभवतीति । ततो विशेषदर्शनानन्तरं पुरुषविषयकं निश्चयरूपं प्रत्यक्षं जातमयं पुरुष इति । पुरुषपुरुषत्वे च[4] तत्सम्बन्धश्च भासते । इदं च संशयरूपज्ञानेऽपि भासते इति कथं निश्चयभिन्नत्वं संशयस्य विषयभेदाभावादिति चेत् न । पुरुषत्वप्रकारकत्वे सति पुरुषत्वाभावप्रकारकत्वस्य पुरुषसंशयत्वात्, अयं पुरुषो न वेत्यत्र पुरुषत्वपुरुषत्वाभावयोः प्रकारकत्वात् । निश्चये तु यद्यपि पुरुषत्वं प्रकारो भवति तथापि पुरुषत्वाभावः प्रकारो निश्चये न भवतीति । तथा च निश्चयत्वं पुरुषप्रकारकत्वे सति पुरुषत्वाभावप्रकारकमिति

---

१. B मध्यमस्य. २. B तथा. ३. B omits न. ४. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

संशयस्य निश्चयाद्भेद इति दिक् ।

(२६) प्रयोजनम् ।

यदिच्छयेत्यर्थ इति यद्विषयकेच्छया यत्र पुरुषः[प्र]वर्तते तस्य तत्प्रयोजनम् । यथा स्वर्गेच्छया पुरुषो यागे प्रवर्तते इति यागस्य स्वर्गः प्रयोजनम्[१] । तत् सुखात्तिदुःखहानिरूपमेव । **नान्यादिति उपलक्षणमेतदिति** इदमुक्तं मुख्यं प्रयोजनम् गौणमन्यदिति । **गौणमिति** यथा पाकेच्छया काष्ठादौ पुरुषः प्रवर्तते । तथा च पाकरूपं गौणं प्रयोजनम् मुख्यं च पाकजन्यौदनभोजनजन्यतृप्तिजन्यं सुखं दुःखाभावो वेति ।

[२७] दृष्टान्तः ।

[२]दृष्टान्तग्रन्थमाह-**वादीति । सम्प्रतिपत्तिरपीति** सम्प्रतिपत्तिः हि ज्ञानविशेषः । स च न शुद्धः । किन्तु व्याप्यव्याप्यकभाववत्तया विवक्षितः । तेन व्यतिरेकिदृष्टान्तस्य हृदादेः संग्रहो जात इति भावः ।

ननु दृष्टान्तस्यावयवपदार्थान्तर्गततया पृथग्व्युत्पादनं व्यर्थमिति चेत्, न। [३]दृष्टान्तस्यावयवभिन्नत्वेनापि पृथग्मोक्षोपयोगित्वमिति पृथग्व्युत्पादनम्[४] ।

[२८] सिद्धान्तः ।

प्रामाणिकत्वे इति-प्रामाणिकत्वं प्रकारो यत्रैतादृशोऽर्थ निश्चयो यत्र स एव सिद्धान्त इत्यर्थः । यथा श्रुते प्रमेयमिति ज्ञानस्यापि सिद्धान्तत्वं स्यात् । तत्र प्रमेयत्वं प्रकारः, न च प्रामाणिकत्वमिति न तत्रातिव्याप्तिः । **अयं चेति** प्रामाणिकत्वप्रकारार्थनिश्चयः कथानुकूलत्वेन विशेष्यः, यथा कथानुकूलोऽयं प्रामाणिकत्वप्रकारार्थनिश्चयः सिद्धान्तः । अत एव न लौकिकालौकिकोऽभ्युपगमस्तु कथोपयोगी न भवति । तत्र प्रामाणिकार्थत्वाभावादिति भावः । लौकिकाभ्युपगमह-**स चेति** ।

(I) सर्वतन्त्रसिद्धान्तः ।

तत्र सर्वतनन्त्रसिद्धान्तं लक्षयति-**वादिभ्यामिति** तथा चोभाभ्यां वादिभ्यां कथायां यस्योपयोगः सः सर्वतन्त्रसिद्धान्त इत्यर्थः । यथा शब्दस्य नित्यत्वानित्यत्वविचारे शब्दरूपो ये धर्मी स चोभाभ्यामभ्युपगम्यत इति सर्वतन्त्रसिद्धान्त[५]इति ।

(II) प्रतितन्त्रसिद्धान्तः ।

वादे भेदो यथा-**प्रभाकरस्येति-प्रभाकरेण** शब्दस्य नित्यत्वं स्वीक्रियते, तच्च **नैयायिकैः**

---

१. B प्रयोजकम्. २. B दृष्टान्तमाह. ३. B अदृष्टा-. ४. B -त्पादिता । ५. B -सिद्ध इति ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नाङ्गीक्रियते । एवं **न्यायभिमतानित्यत्वं प्रभाकरैः** नाङ्गीक्रियते इति वादिनो भेदः । परं शब्दरूपो धर्मी उभाभ्यमभ्युपगम्यत इत्यर्थः । **प्रमाद इति** । यथा धर्मी उभयवादिसिद्धो भवति मनोरूप इति पूर्वस्मिन्नुदाहरणे एव प्राप्यते किमर्थं पृथक् द्वितीयस्योपादानमिति प्रमादः ।

(III-IV) अधिकरणाभ्युपगमसिद्धान्तौ ।

परतन्त्र इति स्पष्टम् । **अयमर्थ** इति **जैमिनीयेनापि प्रभाकरेणापि** शब्दस्य गुणत्वमङ्गीकृतमस्ति नित्यत्वानित्यत्वे यथा तथा । **अर्थान्तरमिति** यदि नित्यत्वानित्यत्वविचारः प्रतिवादिना समं क्रियते तदा शब्दस्य वादिनं प्रति गुणत्वसाधनेऽर्थान्तरस्य प्रकृतानुपयोगित्वात् । **यदि च प्रकृतोपयोगीति** यदि च शब्दस्य गुणविचारः क्रियते तदा तस्याप्युपभोगस्तदा सर्वतन्त्रसिद्धान्त एव । गुणत्वस्य शब्दे सर्वैरङ्गीकारात् ।

अन्यतराभ्युपगमेति यदि शब्दस्य नित्यत्वमनित्यत्वं वाऽभ्युपगम्यते तदा प्रतितन्त्रसिद्धान्तो भवति । तथा च यदा शब्दस्य नित्यत्वमभ्युपगम्यते तदा प्रतितन्त्रं **मीमांसा**सिद्धान्तः । यदि वाऽनित्यत्वमभ्युपगम्यते तदा प्रतितत्रं **न्यायशास्त्रं** प्रतितन्त्रशास्त्रम् । तथा चाभ्युपगमरूपः चतुर्थो न सम्भवतीत्यर्थः ।

[२९] अवयवाः ।

(१) अवयवलक्षणम् ।

अवयवान् लक्षयति-**अनुमानेतीति** अनुमानवाक्यस्य ये एकदेशाः-अनुमानवाक्यं पर्वतो वह्निमानित्यारभ्य वह्निव्याप्यधूमवानयमित्यन्तं महावाक्यम्-तस्य ये एकदेशाः प्रतिज्ञादयः ते एवावयवाः पर्वतो वह्निमानित्यादयः ।

नन्विति तथा चावयवावयवे वह्निरित्यादिके यद्यवयवादौ यथा वह्निमान् धूमादिति अवयवद्वयेऽतिव्याप्तिः । तत्राप्यनुमानरूपमहावाक्यावयवत्वमस्ति । परं वस्तुगत्या तत्रावयवत्वं नास्तीत्यतिव्याप्तिरित्याशङ्क्यार्थः ।

पूर्वलक्षणे दोषसद्भावाल्लक्षणान्तरमाह **न्यायजन्येति** न्यायेनानुमानरूपे महावाक्येन जन्यो यो बोधो महावाक्यार्थज्ञानं पञ्चावयववाक्यार्थज्ञानानन्तरं यन्महावाक्यार्थज्ञानं तस्माद्वह्निव्यान्यधूमवानन्य-मितिरूपम् तस्य यो विषयोऽन्वयः पर्वतवह्न्यादिसम्बन्धस्तस्य यः प्रतियोगिनिरूपकः, एतादृशं यत् खण्ड वाक्यार्थबोधकं वाक्यम्, तस्य भावस्तस्य पर्याप्त्याधारः-समाप्त्याधारः-एतादृशोऽवयवः । यावता वाक्येन खण्डवाक्यार्थस्य संपूर्णोऽन्वयो भवति । यथा पर्वतो वह्निमानित्यादिरूपोऽवयवः । एवं कृते च न्याये पञ्चावयवरूपमहावाक्येऽतिव्याप्तिर्नभवति । कथम्[१] ? महावाक्यस्य

१. B omits कथम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

खण्डवाक्यार्थज्ञानजननाभावात्। **एवमिति** अवयवस्यावयवे वह्न्यादिप्रतिपादकादिरूपे वह्निपदादिरूपे नातिव्याप्तिः। द्वावयवादौ च नातिव्याप्तिः।

अत्र शङ्कते-**अवयवावयवेति**। तथा [१]चावयवावयवयवेऽवयवलक्षणं पूर्वकृतमितिव्याप्तमेवेत्यर्थः। समाधत्ते-**अन्वयाप्रतियोगित्वस्येति**। पूर्वोक्तलक्षणे[२] खण्डवाक्यार्थस्य[३] योऽन्वयस्तस्याप्रतियोगित्वं-सतीति विशेषणं देयम्। तथा च खण्डवाक्यार्थान्वयप्रतियोगित्वे सति महावाक्यार्थान्वयप्रतियोगिबोधकवाक्यत्व[४]मवयवत्वमित्यर्थः। सत्यन्तं चावयवेऽतिव्याप्तिवारणार्थम्। विशेषदलानुपादाने महावाक्यार्थेऽतिव्याप्तिः। तस्य च न्यायत्वात्। एतदेव विशदयति **अवयवेति** अवयवस्य योऽवयवो वह्न्यादिपदरूपो[५] स महावाक्यार्थप्रतियोगी। यः खण्डवाक्यार्थस्तत्प्रतियोगी भवत्यवयवावयवः। तथा चावयवावयवे खण्डवाक्यार्थान्वयप्रतियोगिबो[६]धकत्वाभावान्नतिव्याप्तिरिति भावः।

न चेति तथा च यद्वाक्यं न्यायान्तर्गतं न भवति किन्तु न्यायबहिर्भूतम्, यथा केनचिद्वातुलेन प्रमादादुक्तं वह्निमान् धूमादितिरूपम्, तत्रापि [७]महावाक्यार्थान्वयप्रतियोगि-प्रतिपादकमस्त्येवेत्यतिव्याप्तिरित्याशङ्क्यार्थः। समाधत्ते **पदसमुदायेति** च न्यायबहिर्भूते न्यायैकदेशत्वाभावान्नातिव्याप्तिरिति भावः।

अवयवलक्षणस्य निष्कर्षं करोति-**तथा चेति** न्यायस्य ये एवंविधाः एकदेशाः ते कीदृशाः? न्यायजन्यो यो बोधः, यथा वह्निमानित्यारभ्य वह्निव्याप्यधूमवानयमित्यन्तस्तस्य विषयीभूतो योऽन्वयस्तस्याप्रतियोगी यो वाक्यार्थोऽथ चान्वयप्रतियोगी भवति अर्थात् खण्डवाक्यार्थान्वयप्रतियोगी भवति यो पदार्थः, तस्यार्थबोधकतापर्याप्त्याधारस्तेऽवयवा इत्यर्थः। तथा च न्यायजन(न्य)[८]बोधविषयान्वयप्रतियोगिपदं न्यायबहिर्भूते वाक्येऽतिव्याप्तिवारणार्थम्, अवयववावयवेऽतिव्याप्तिवारणार्थं च। अन्वयप्रतियोगिखण्डवाक्यार्थबोधकतापर्याप्त्याधारत्वमवयवे नास्ति। [९]तस्यावयवन्यायजन्यबोधविषयान्वयस्य संपूर्ण खण्डवाक्यार्थबोधकता नास्तीति न तत्रातिव्याप्तिः। न्यायैकविशेषपदं विशेष्यं न्यायरूपसम्पूर्णमहावाक्येऽतिव्याप्तिवारणार्थम्।

(२) प्रतिज्ञा।

[१०]प्रतिज्ञालक्षणे शङ्कते-**नन्विति** तथा च न्यायबहिरर्थे [११]प्रतिज्ञासमानाकारार्थे [१२]वाक्ये वातक्यादिनोक्तेऽतिव्याप्तिः। तस्याः च न्यायबहिर्भूतत्वात्। **उदाहरणैकदेशे इति** यो धूमवान् सोऽग्निमानिति संपूर्णमुदाहरणम्। तस्यैकदेशो भवति वह्निमानितिरूपः, तस्यापि न्यायान्तर्गतत्वादिति

---

१. B चोभयावयवे. २-३. B लक्षणखण्डवाक्यार्थप्रतियोगित्वस्य यो॰. ४. B -त्वमित्यर्थः। ५. B -दिरूपो. ६. B -प्रतियोग्यबो॰. ७. B -वयप्रतिपादकप्रतियोगि- ८. B बोधि. ९. B -वयवावयवस्य १०. B प्रतिज्ञानल. ११. B प्रतिज्ञानस॰ १२. B omits वाक्ये.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्याप्तिः । एवं निगमनैकदेशेऽतिव्याप्तिः । निगमनं भवति सम्पूर्णं वह्निव्याप्यधूमत्वाद्वह्निमानितिरूपम्। तस्याप्येकदेशो भवति वह्निमानितिरूपस्तत्राप्यतिव्याप्तिः, तस्यापि न्यायान्तर्गतत्वादित्यर्थः ।

प्रतिज्ञायाः निष्कृष्टं लक्षणमाह-**हेत्वभिधानेति** हेतो र्यदभिधानं-वचनं तस्य प्रयोगिका जनिका या जिज्ञासा ज्ञानविषयिणी इच्छा [१]तज्जनकं जिज्ञासाजनकं यज्ज्ञानम् तस्य जनकत्वे सति न्यायावयवत्वं प्रतिज्ञात्वम् । यथा हेतोर्धूमादिति हेतोर्यदभिधानं तस्य प्रयोजिका या जिज्ञासा धूमज्ञान-विषयिणी इच्छा तज्जनकीभूतं यज्ज्ञानं वह्निज्ञानं तज्जनकं यद्वाक्यं वह्निमानितिरूपम्, तत्त्वे सति न्यायावयवत्त्वम् ।

तथा च सत्यन्तं ग्रहणोदाहरणैकदेशे निगमनैकदेशे च नातिव्याप्तिः । न्यायावयवपदं च न्यायबहिःस्थे वातुलवाक्ये वह्निमानितिरूपेऽतिव्याप्तिवारणार्थम् ।

(३) हेतुः ॥

निगमनैकदेशेति । तस्माद्वह्निव्याप्यधूमत्त्वाद् वह्निनमानिति निगमनं भवति सम्पूर्णम् । तस्याप्येकदेशो भवति धूमादिति पञ्चम्यन्तः, तत्रातिव्याप्तिरित्यर्थः ।

समाधत्ते-**व्याप्त्यभिधानेति** तथा च व्याप्तेर्यदभिधानमुदाहरणरूपम्, यो यो धूमवान स: वह्निमानित्येव व्याप्त्याभिधानम्, तस्य या जिज्ञासा ज्ञानविषयिणी इच्छा, तज्जन्यं यज्ज्ञानं धूमादितिवाक्यार्थज्ञानम्, तज्जनकीभूतो योऽवयवो धूमादिरूपस्तत्त्वे सति न्यायावयवत्वं हेतुत्वमित्यर्थः । सत्यन्तपददाने च निगमनैकदेशे नातिव्याप्तिः । तस्य व्याप्त्यभिधानजनक-ज्ञानजनकत्वाभावात् । व्याप्तिज्ञानं च पूर्वमुदाहरणेनैव जातम् । सिद्धे ज्ञानविषयेच्छाभावात् । न्यायावयवपदं च न्यायबहिःस्थे तटस्थवाक्ये धूमादित्याकारेऽतिव्याप्तिवारणार्थम्।

(४) उदाहरणम् ।

सव्याप्तिकमिति तथा च येन वाक्येन व्याप्ति र्दृश्यते तदेवोदाहरणम् । यथा यो यो धूमवान् सोऽग्निमानिति वीप्साबलात् धूमनिष्ठा वह्निनिरूपिता व्याप्तिरनेन वाक्येन प्रदर्श्यते इति । [२]उदाहरणस्यैवेदं लक्षणम् । [३]यदि महानस-इत्यादि कल्प्यते तदाऽऽशङ्कानिवारणम् । अत्र **शङ्कते न चेति** । तथा च दृष्टान्तवचनं सामयिकं भवति । कदाचित्तस्य प्रयोगो क्रियते, कदाचिन्न क्रियते इति । यदा तु क्रियते तदोदाहरणवचनत्वं तस्य वाक्यस्य तिष्ठति । यदा तु न क्रियते तदा तद्वत्त्वमुदाहरणस्य नास्तीत्यव्याप्तिः ।

अव्याप्तिवारणार्थमुदाहरणस्य लक्षणान्तरं करोति[४]**पक्षधर्मत्वेति** तथा च धर्मतायाः यदभिधानं [५]वाक्यप्रयोगः, यथा वह्निव्याप्यधूमवानितिरूपस्तस्य जनकीभूता या जिज्ञासा, तज्ज्ञानविषयिणी इच्छा,

---

१. A omits the reading between तज्जनकं.....इच्छा. २. B -स्येदं. ३. B यथा. ४. B क्रियते. ५. B -प्रयोगत्वम्.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तज्जनकत्वम् । यज्ज्ञानं उदाहरणजन्यज्ञानम् । व्याप्तिज्ञानं यथा-यो यो धूमवान् सः वह्निमानितिरूपं तज्जनकं यद्वाक्यं तत्त्वे सति न्यायावयत्वमुदाहरणत्वम् ।

(५) उपनयः ।

निगमनैकदेशे इति वह्निव्याप्यधूमवत्त्वात् वह्निमानित्यस्यैकदेशे वह्निमानयमितिरूपेऽतिव्याप्तिः । तस्यापि पक्षे उपसंहारवचनत्वादिति भावः ।

समाधत्ते-**न्यायैकदेशेति** न्यायस्य पञ्चावयवरूपस्यैकदेशो वह्निव्याप्यधूमवत्त्वात् वह्निमानितिरूपस्तेन जन्या या पक्षधर्मजिज्ञासा-यथा वह्निव्याप्यधूमवानयमितिरूपा, तस्य निर्वर्तकं यद्वाक्यं यथा वह्निव्याप्यधूमवत्त्वाद् वह्निमत्त्वरूपम् । इदमेव निगमनलक्षणं निवर्तकन्तम् । तत्रैकदेशे-निगमनैकदेशेऽतिव्याप्तिवारणार्थम् । वाक्यपदं च वह्न्यादिरूपेऽतिव्याप्तिवारणार्थम् ।

(६) निगमनम् ।

एतच्चतुष्टयेति प्रतिज्ञादिचतुष्टयावयवान्यत्वे सति अवयवत्वमित्यर्थः ।

(७) अवयवपदस्यार्थनिरूपणम् ।

अवयवत्वमिति । द्रव्यसमवायिकारणत्वमवयवत्वमित्यवयवलक्षणं प्रकृतेऽनुपन्नम् । शब्दस्य किञ्चित्प्रतिसमवायिकारणत्वाभावादित्यत आह-**औपचारिकमिति** पारिभाषिकमेवा-वयवत्वमत्र । तेन **नैयायिक**परिभाषेयमिति भावः । यथा वह्निमान् धूमादिति द्वाभ्यामवयवाभ्यां मिलित्वा धूमज्ञानव्याप्यो वह्निरिति शाब्दबोधो जायते । धूमादिति पञ्चमीज्ञानज्ञाप्यत्वे लक्षणा । [१]अन्यथा पञ्चम्या शक्तिसम्बन्धेन हेतुत्वस्यैव बोधजननादिदंत्वसम्भवि । यथा धूमादित्यत्र धूमपदेन धूम उपस्थापितः । पञ्चमीविभक्त्या च हेतुत्वमुपस्थाप्यते । हेतौ पञ्चमीत्यनुशासनात् । तदनन्तरं धूमेन समं हेतुत्वान्वयो भवति[२] । यथा धूमनिरूपितहेतुत्वमिति । पुनरेतस्य हेत्वर्थस्य प्रतिज्ञार्थेन वह्नि सममन्वयो भवति । तथा च धूमहेतुको वह्निरित्यर्थो प्राप्यते । स चानुपपन्नः । वह्नौ धूमहेतुकत्वं धूमजन्यत्वं नास्तीति मुख्यार्थबाधः । इति लक्षणा आवश्यकी । तथा च पञ्चमीपदेन लक्षणया धूमपदेन धूम एवोपस्थापितः । पञ्चमी पदेन ज्ञानज्ञाप्यत्वं लक्षणयोपस्थापितम्, तदनन्तरं धूमस्य ज्ञानज्ञाप्यत्वेन सममन्वयो भवति । यथा धूमज्ञानज्ञाप्य इति हेत्वर्थो जातः । तदनन्तरं प्रतिज्ञार्थेन वह्निना समं हेत्वर्थस्यान्वयो भवति । यथा धूमज्ञानज्ञाप्यो वह्निरिति प्रतिज्ञार्थे हेत्वर्थान्वय इति ।

केचित्तु वह्निज्ञानं धूमज्ञानजन्यमिति शाब्दबोधं वदन्ति । वह्निपदे वह्निज्ञाने लक्षणां वदन्ति । धूमपदे ज्ञानं जन्यते पञ्चमीपदस्य हेतुत्वमेवार्थ इति । तथा च धूमज्ञानहेतुः किं वह्निज्ञानमिति शाब्दबोधं

१. B त्वन्यथा. २. B omits भवति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वदन्तीति भावनीयम् । अत्र मते दूषणमुभयत्र लक्षणास्वीकारेण गौरवमिति ।

न च सुब्-विभक्तौ न लक्षणा, अन्यथा 'ऽनुशासनं द्वितीयाषष्ट्यर्थे स्मृतौ चेति' सूत्रं व्यर्थं स्यादिति वाच्यम् । अनुशासनेन नियमकरणात् । यथा स्मृतिधात्वर्थयोगे द्वितीयायाः षष्ट्यर्थे एव लक्षणा, न तु पञ्चम्यर्थादाविति नियमात् । तथा च सुब्विभक्तिस्थले यदनुशासनं तिष्ठति तच्च नियमार्थमेवोक्तन्यायेन ज्ञेयम् । घटपदेन घटातिरिक्तबोधजनने सर्वत्रलक्षणया घटबोधस्तु शक्य एव जन्यः-इति सुब्विभक्तावपि लक्षणा[१] स्वीक्रियते एवेति नियमातिरिक्तस्थले सुब्विभक्तौ लक्षणा न भवतीति सिद्धम् ।

[इत्यवयवनिरूपणम् ।]

[३०] तर्कविचारः ।

तर्कग्रन्थमाह-**तर्कस्येति अनिष्टप्रसङ्गस्तर्क** इति मूलम्-अनिष्टपदेन प्रकृताभावो ग्राह्यः । तेनानिष्टेन यः सम्बन्धिनोऽनिष्टस्य प्रसङ्ग स एव तर्कः । यथा धूमोऽस्तविति । अप्रयोगकत्वशङ्का-निवारणार्थमनुकूलतर्कावतारो यथा निर्वह्निः स्यात्, निर्धूमः स्यात्'-इत्यत्रानिष्टो भवति [२]वह्न्यभावः । तेन धूमाभावः प्रसज्यते-बलादारोप्यते-इति तर्कः । एवं सर्वत्रानुमानस्थले यत्र साध्याभावेन हेतोरभावः प्रसज्यते स एव तर्कः । प्रत्यक्षस्थले चानिष्टप्रतिपादनमेव । यथाऽत्र यदि घटः स्यात्तदा भूतलमिवाद्रक्ष्यत् । अत्रेष्टो भवति घटाभावः, अनिष्टो भवति[३] घटः । इष्टत्वं घटाभावस्य यथा मम घटाभावः प्रत्यक्षं भवतु; तदनन्तरमत्र घट इति घटाभावाभावशङ्का जाता; तत्रायमनुकूलतर्कावतारः-'यद्यत्र घटो भविष्यत् तदा भूतलमिवादृक्ष्यत्' इत्यनिष्टघटलक्षणस्य प्रसज्जनारोपेण तर्कः-इति प्रत्यक्षस्थलेऽनिष्टशङ्कार्थनिवर्तकत्वमेव तर्कस्येति मूलार्थः ।

स चायमिति तर्कः प्रमाणानामनुग्राहकः साक्षी भवति । यथा-'यदि निर्वह्निः स्यात् तदा निर्धूमः स्यात् । धूमाभाववानपि स्यादिति वह्निव्याप्य धूमवानयमिति परामर्शानन्तरं धूमस्तिष्ठतु, वह्नि र्मा तिष्ठतु-इत्यप्रयोजकत्वशङ्कानिराकरणद्वारा तर्कोऽनुमानस्य साक्षी सहकारी। इदमेवाह **टीकाकृत् तर्कस्येति** । तथा च तर्कस्येदमेव प्रयोजनम् ।

विपर्ययेति विपर्ययो नाम अभावः । [४]कस्याभावः ? तर्कविषयीभूताभावस्य साध्याभावस्य यो विपर्ययोऽभावः । यथा निर्वह्निः स्यात् तर्हि निर्धूमः स्यादित्यत्र विपर्ययो निर्धूमः । तस्य पर्यवसन्नं धूमलक्षणम् । यथा भवति चायं धूमवानिति, तस्माद् वह्निमानिति साध्यं साधयति-इति तर्कस्य

१. B omits लक्षणा. २. B वह्नेरभावः. ३. B omits भवति. ४. B omits कस्याभावः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

साध्यसाधकत्वमित्यर्थः

इदमिति - इदं विपर्ययपर्यवसानप्रत्यक्षं स्थलेऽस्तु । अत्र यदि घटः स्यात्तदा भूतलमिवादृश्यत् इत्यत्र विपर्ययो भवति घटाभावाभावरूपो घटः । तस्य पर्यवसानं स्थितं रूपम्, तेन विषयं साध्यते ।

अयमर्थः घटाभावाभावस्थित्याऽनिष्टप्रसञ्जनं सम्भवति। अनिष्टो भवति घटाभावः, तस्य प्रसञ्जनमपादानम् । घटश्चेत्स्यात् तदोपलभ्येत इति । **अन्यथेति** यदि सर्वसाधारणविपर्ययपर्यवसानं साध्यं साधयतीति प्रोच्यते, तदाऽनुमानादिस्थले तर्को विफलो भवति । साध्यं चानुमानेनैव सिध्यति किं तर्केणेति । ततः तर्कस्य यदि विपर्ययपर्यवसानं तत्प्रत्यक्षस्थल एव साध्यं साधयतीति नानुमानादिस्थले । तथा च तर्कः प्रत्यक्षज्ञानरूपो भवति[१] । तस्य तर्कस्य वैफल्यम् । अनुमानादि-वाक्यार्थस्य वह्न्यादेः सिद्धेः । तर्कस्य च प्रयोजनं विपर्यपर्यवसानमेव । तथा चानुमानस्थले साध्यं न साधयति । किन्तु प्रत्यक्षस्थले एव साध्यं विषयं साधयति ।

ननु तर्ह्यनुमानस्थले तर्कस्य कुत्रोपयोग इत्यत आह-**नन्वनुमानस्थलेत्विति** तथा च विपर्ययपर्यवसानेनाप्रयोजनकत्वाशङ्कानिराकरणं क्रियते । [२]तदेव वस्तुगत्याऽनुमानम् । अयमत्र प्रघट्टार्थः-स प्रत्यक्षस्थले तु तर्केण विषयो घटाद्यभावस्य साध्यते । अनुमानस्थले चाप्रयोजकत्वशङ्का निराक्रियते । विषयस्तु वह्न्यादिरूपोऽनुमानेनैव साध्यते-इति विशेषो ज्ञेयः ।

नन्विति लाघवमप्यनुकूलतर्को गीयते । यथेश्वरस्यैकत्वे नित्यज्ञानेऽनुकूलतर्को लाघवमेव यथेश्वरस्यानेकत्वं कल्पनीयमेकत्वं वा ? लाघवादेकत्वमेव । लाघवं हि कल्पनालघीयसी । यत्रानेकत्वज्ञानं [तत्र]चैकत्वज्ञानं प्रतियोगित्वेनावश्यकमित्येकत्वमेव कल्प्यते-इति लाघवमपि तर्कोऽस्ति । तत्रातिव्याप्तिः ।

हेतुमाह-**अनिष्टप्रसङ्गाभावादिति** यथा निर्वह्निः स्यात् तदा निर्धूमः स्यादित्यनिष्टस्य धूमाभावस्य प्रसञ्जनम् । तथा प्रकृतेऽनिष्टापादानं नास्ति । यथा यदीश्वरस्यानेकत्वं स्यात्, तदाऽमुकं स्यादित्यनिष्टापादानं नास्तीत्यव्याप्तिः । आदिशब्दात्कार्यकारणभावादिष्वव्याप्तिः यथा पृथिवीत्वजातौ साध्यमानायामनुकूलतर्कः कार्यकारणभाव एव, यथा गन्धत्वेन पृथिवीत्वेन च कार्यकारणभावः गन्धसमवायिकारणतावच्छेदकत्वेन पृथिवीत्वं जातिः सिध्यति **तेषामिति** लाघवादीनामपि लक्षणं न[३] क्रियते, किन्तु विषयपरिशोधकव्याप्तिग्राहकतर्कयोरेव, लक्ष्यत्वादिति भावः । एतदेवाह-**अनुमानस्थले** चेति । **धूमो यदीति** - अयं व्याप्तिग्राहको यथा-'धूमो यदि वह्निव्यभिचारी, वह्न्यभावेऽपि धूमो भवेत्तदा वह्निजन्यो न स्यात् घटादिवदिति' । यथाऽत्र विषयो भवति व्याप्तिः । तस्याः शोधको भवति

---

१. B omits भवति. २. A omits the reading between तदेव.....निराक्रियते ३. B omits न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रतिबन्धकाभावः[1], व्याप्तिज्ञानं भवति प्रतिबन्धकम् तदभावस्तर्केण क्रियते । [2]यदेदृशस्तर्क उत्पन्नस्तदा व्यभिचारज्ञानं नोत्पद्यते-इति व्याप्तिग्राहक एव । अयं चानिष्टप्रसञ्जको भवति । [3]यथाऽत्रानिष्टो भवति वह्निजन्यत्वाभावः । सः धूमेऽऽपाद्यते । इदमेवानिष्टप्रसञ्जनम् ।

[4]**विषयशोधको मूलेति** - [5]अत्र घटश्चेत्स्यात् तदा भूतलमिवादृक्ष्यदिति । यदि च न दृश्यते तस्मान्नास्तीत्यत्रविषयो भवति घटाभावः । तस्यायं तर्कः परिशोधको भवति । व्याप्तिग्राहकतर्केऽत्र विशेषसामग्रीमाह-**व्याप्येति** अत्र व्याप्तिग्राहके तर्के व्याप्याहार्यः कारणम्, व्याप्यस्याहार्यो योऽऽरोपः सः कारणम् । व्याप्यो भवति वह्न्यभावस्य धूमाभावः, तस्याहार्यारोपः । आहार्यत्वं हीच्छाजन्य-ज्ञानत्वम् । अनाहार्यारोपो न सम्भवति, तत्र धूमस्य विद्यमानत्वात् । अनाहार्यरूपस्तु तत्रैव सम्भवति यत्र वस्तुगत्या धूमाभावस्तिष्ठति । तत्र धूमाभावज्ञानम् । अथवा शुक्तौ रजतारोपोऽनहार्यारोप इति ।

नन्वत्र [6]कथमाहार्यारोपोऽऽपाद्यापादकयोर्व्याप्यत्याभावादित्यत आह-**व्याप्तिज्ञानेति** तथा च व्याप्तिज्ञानं पक्षधर्मताज्ञानं चात्रापि व्याप्तिग्राहकतर्केऽऽपाद्यापादकयोर्व्याप्ति विद्यते एव । कथम् ? यथाऽऽपादको भवति वह्न्यभावः । आपाद्यो भवति धूमाभावः । अनयो र्वह्न्यभावधूमाभावयोः परस्परं व्याप्तिस्तिष्ठत्येव । [7]तदभावे तु दोषमाह-**व्याप्तिज्ञानं विनेति** तथा चापाद्यापदाकयोर्व्याप्य-व्यापकयोः व्याप्ति ज्ञानं विना आहार्यरूपो आपादस्यारोपस्तं विना-आहार्यारोपं विना आहार्यारोपरूपो यस्तर्कः सः नोदेति । तथा च साध्याभावसाधनाभावयोर्व्याप्तिसत्त्वादाहार्यसाध्याभावरूपेणा-हार्यसाधनाभावारोपः क्रियते, यथा धूमज्ञाने विद्यमाने धूमाभावज्ञानस्याहार्यत्वात् [8]निर्वह्निः स्यात्, निर्धूमः स्यात्,-इति व्याप्तिग्राहकस्तर्कः इति सिद्धम्।

आत्माश्रयादिदोष चतुष्टयस्य तर्केऽन्तर्भाव । संप्रदायेति आत्माश्रयादीनामपि तर्केऽन्तर्भावः । कथमिति चेत् तर्कस्य यथाऽनिष्टप्रसञ्जकत्वं तथाऽऽत्माश्रयादीनामपि । एतदेवाह-**घटो यदीति** इत्यनिष्टप्रसञ्जनं वादिनः घटे घटाश्रितप्रमाऽनिष्टा, तस्या प्रसञ्जकमिति भावः । **एवमन्योन्याश्रयादावपीति** यथा समाप्तिं प्रति मङ्गलस्य कारणत्वे कल्प्यमाने व्यभिचारवारणार्थं नास्तिककृतग्रन्थेषु जन्मान्तरीयमङ्गलस्य कल्पनम्, क्लृप्ते च जन्मान्तरीयमङ्गले कार्यकारणभावज्ञानम् ज्ञाते च कार्यकारणभावे जन्मान्तरीयमङ्गलं व्यभिचारवारणार्थं कल्पनीयमित्यन्योन्याश्रयस्य तर्कत्वेऽनिष्टप्रसञ्जनम् । यथा न हि जन्मान्तरीयमङ्गलं कृतं भवेत्तदा कदाचित्संस्कारसत्त्वेन स्मरणमपि भवेदिति ।

---

१. Both A and B read भावः क्रियते; but क्रियते seems to be redundant here. २. B तदे. ३. B omits अत्र. ४. It is विषयपरिशोधकस्तु मूल in त.भा.प्र. ५. B अतः. ६. B -हार्य आपाद्या॰. ७. B तदभावेति दो॰. ८. A adds here साध्याभावसाधनाभावयोर्व्याप्तिस्त्वादाहार्यसाध्याभावरू पेणाहार्यसाधनाभावारोपः क्रियते यथा धूमज्ञाने मात्रे and omits the reading between निर्वह्निः.....प्रकृतेति

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चक्रकेति प्रथमतः समाप्तिमङ्गलयोः कार्यकारणभावः कल्प्यते, तदा व्यभिचारात्तत्र कार्यकारणभावेऽनुपपत्ति र्भवति । तद्वारणार्थं जन्मान्तरीयं मङ्गलं कल्प्यते, तदनन्तरं तत्कल्पने व्यभिचाराभावाभावज्ञानं जायते । तदा ज्ञानेन च कार्यकारणभावज्ञानं भवति, तदनन्तरं व्यभिचारात् कार्यकारणभावज्ञानानुपपत्तिरेव । तदनन्तरं पुनर्जन्मान्तरीयमङ्गलं कल्पनीयमिति चक्रकम् । प्रथमे तृतीयापेक्षा, तृतीयस्य द्वितीयपेक्षा ।

अनवस्थायाः अनिष्टप्रसञ्जकत्वं बीजाङ्कुरादौ स्पष्टम् । **एतदन्येति** एतच्चतुष्टयान्यस्य बाधितोऽर्थो यस्य स तर्के हि बाधित एवार्थः । यथा बाधितोऽर्थो धूमाभावरूपः स धूमवति पर्वते प्रसज्यते इति तर्कः । **प्रमाणिका इति** प्रमाणसिद्धे इत्यर्थः ।

एककोटिविषयत्वादिति एतद् ग्रन्थकारमते तर्कः भ्रमेऽन्तर्भवति । यद् यत्र नास्ति, स तत्रापाद्येतेति भ्रम एव । यथा शुक्तौ रजत्वमापद्यते, तथा च धूमवान् धूमाभावः आपाद्यते इति भ्रमः । संशयत्वे तु कोटिद्वयोपस्थितिरपेक्ष्यते, अत्र त्वेककोटिरस्तीति मूलार्थः । [इति तर्कविचारः ।]

[३१] वादः[1]

दूषयति-**तन्नेति मात्रेति [2]प्रकृतेति[3]** । मात्रपदव्यवच्छेद्याभावादित्यर्थः । यथैकत्र द्वयं न सम्भवति । यत्र तत्त्वबुभुत्सा तत्र विजिगीषा नास्ति, यत्र च[4] विजिगीषा तत्र [5]**तत्त्वबुभुत्सा नास्तीति**। **वादकथायामिति** - तत्त्वबुभुत्सारूपे वादे सभ्यस्यापेक्षाभावात् । **स हीति** - वादे तत्त्वजिज्ञासारूपे सभ्यो मध्यस्थो वीतराग एव भवति । तेन यत्तत्त्वनिर्णयरूपं कार्यं कर्तव्यं तच्च ताभ्यां वादिभ्यामेव वीतरागत्वात् क्रियते इति तत्र सभ्यापेक्षा नास्ति । तथा च मात्रपदं पूर्वलक्षणे व्यर्थमिति भावः ।

अनुविधेय इति यत्र च लाभार्थं राजादिर्मध्यस्थः क्रियते, सोऽपि वादिकथकयोः तत्त्वबुभुत्सारूपवादिकथकयोरनपेक्षित एव । तथा च वादे राजापि मध्यस्थो न कर्तव्य एवेति भाव। [6]**तत्संवादेनेति राजा** यदि तत्र दैववशादागतस्दा तत्संवादेन वादिभ्यामुक्तेऽर्थौ (र्थे !) राज्ञाऽप्यङ्गीकृते सुतरां तद्निर्णयो भवतीत्यर्थः ।

(१) वादे निग्रहस्थानयोग्यताविचारः ।

[7]अत्र शङ्कते **नन्विति** तथा च निग्रहस्थानान्येभ्योऽष्टभ्योऽधिकानि भवन्ति, अन्यथा वादेऽष्टाधिकेन निग्रहस्थानप्रयोगाणां निरर्थकता स्यात् ।

---

१. Following Govardhana Gunaratna does not discuss निर्णय. २. This प्रतीक is not found in त.भा.प्र. ३. Pl. see page no. 243, footnote no. 8 ४. B omits च. ५. B omits तत्त्व. ६. B तत्संपादेनेति. ७. A omits अत्र.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्रमेणाधिक्यं दर्शयति-शास्त्रान्तरे यथा प्रतिज्ञाहानिरित्यादि-एतत् षटकं पूर्वोक्ताष्टके न पतितं भवति । यतः कारणात् वादे प्रारब्धे वादिभ्यामेषां निग्रहस्थानानामर्थात् वादिनोरेव शक्तिनिगूहनं-शक्तिभ्रंश-एतत्प्रयोगे सति भवति । तत एतेषूक्तेषु तत्त्वप्रतिपत्तिज्ञानम्, तस्य व्याघात एवैकतरस्य स्यात्। तथा चायमर्थः-तत्त्वबुभुत्सारूपे वादे यद्येषामपि प्रयोगः क्रियते तदा तत्त्वव्याघात एव । [१]एषां च प्रयोगो विजिगीषारूपे एव वादे तेनाष्टावैतत् वादे तत्त्वबुभुत्सारूपे इत्युक्तमिति न दोषः इति भावः ।

(२) प्रतिज्ञाहानिपञ्चकम् ।

प्रतिज्ञाहानिं लक्षयति-**स्वीकृतेति** पक्षादीनां प्रत्येकं परित्यागात्पञ्चधा भवति । यघटत्र इति शब्दस्यानित्यत्वं प्रत्यक्षगुणत्वेन साध्यते । तत्र प्रतिवादिना **मीमांसकेन** प्रतिज्ञाबाधेन दूषितेऽनित्यत्वे तदनन्तरमनित्यवादिनोक्तं तर्हि घटोऽनित्यो भवति । [१]पक्षपरित्यागात् पक्षरूपप्रतिज्ञाहानिर्जाता । पुनस्तत्रैवानुमाने तेनैव प्रतिज्ञाबाधेन नित्य एव शब्द इत्यनित्यत्वरूपसाध्यपरित्यागे द्वितीया । (२) । **शब्दस्येति** यथा शब्दोऽनित्यः, प्रत्यक्षगुणत्वात्, घटवदित्यनुमानेन शब्देनानित्यत्वं साध्यते, तदा प्रतिवादिना **भाट्टेन** शब्दद्रव्यवादिना हेतौ स्वरूपासिद्धिरूपं दूषणं दत्तं [२]गुणत्वाभावत्वेन । तदनन्तरमनित्यत्ववादिना कृतकत्वादिति हेतुप्रयोगकृते हेतुपरित्याग एव तृतीया प्रतिज्ञाहानिः । (३) । चतुर्थामाह-**घटस्येति** पूर्वानुमाने घटो द्रव्यं भवतीति कृत्वा तत्र हेतुत्वेनाभिमतगुणत्वाभावात् दृष्टान्तं न सम्भवतीति **भाट्टेन** दूषणे दत्ते वादिना यदा रूपवदिति दृष्टान्तः क्रियते तदा दृष्टान्तहानिरूपा प्रतिज्ञाहानि र्भवति ।

एवमिति यथा पर्वतो वह्निमान्, प्रमेयधूमादिति व्यर्थविशेषणतया, विशेषणत्यागे विशेषहानि निग्रहस्थानमिति ।

(३) प्रतिज्ञासन्यासम् ।

प्रतिज्ञासन्यासरूपं द्वितीयं लक्षयति-उक्तापलाप सुबोध एव प्रान्तभेदे[३] । तथा च **स्वीयतयेति** - यदा[४] मनसा वादिना शब्दो प्रयोगान्तरमेव विचार्यते, इतः परं वादिनिर्वृत्ति र्भवतु-इत्येवं स्तेनवत् चौरवत् प्रतिज्ञानिर्वृत्तिर्वाञ्छति ।

(४) निरर्थकम् ।

निरर्थकं लक्षयति-**अवाचकेति** तथा च लिङ्गानुशासने शब्दस्य पुंस्त्वादत्रावाचकत्वम् ।

(५) अविज्ञातार्थम् ।

अविज्ञातार्थं लक्षयति-**यदि वादिनाऽभिहितमिति** तथा च यद्वादिनाऽभिहतं तद् यदि

---

१. B तथा चैतेषां प्र.. २. B omits गुणत्वाभावत्वेन. ३. B -भेदे इति । ४. B यदि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रतिवादिना-सभ्यैश्चापि-न ज्ञायते-तद् दुर्बोधं यथा स्वशास्त्रीयन्यायपरिभाषादि यदि वेदान्तवादिना न ज्ञायते, तदा अविज्ञातार्थरूपं वादिनो निग्रहस्थानं भवति ।

(६) अर्थान्तरम् ।

अर्थान्तरं लक्षयति-**प्रकृतेति**-प्रकृते=विवक्षितेऽर्थे यस्योपयोगःनास्ति तस्य यदि प्रयोगः क्रियते तदा वादिनोऽर्थान्तरम् । यथा वादिना शब्दस्य नित्यत्वे साधनीये प्रतिवादिनोक्तं शब्दः समवायसम्बन्धेनाकाशे तिष्ठतीत्यनुपयुक्ते एवेत्यर्थान्तरतारूपं निग्रहस्थानं प्रतिवादिनो जातमिति भावः ।

(७) अपार्थकम् ।

अपार्थकं लक्षयति-**अनन्वितमिति** येन सममन्वयो न सम्भवति तदनन्वितमपार्थकमेव । यथा चैत्रेण ओदनं पच्यते इत्यत्र द्वितीयाऽनन्विता भवति अपार्थकता वक्तुरिति भावः ।

(८) उपसंहारः ।

उपसंहरति-**तदेतदिति** वादे तत्त्वबुभुत्सारूपो एतन्निग्रहस्थानषटकस्य प्रयोगो न भवति । विजिगीषाभावात् । एतेन घटकेन हि परस्याप्रतिभा भवति । स्वस्य च जय इति । तत्त्वबुभुत्सारूपे वादे एतेषामुपयोगो नास्ति । **यद्यपीति** तथा च यत्र वादिना योऽर्थोऽभिहितः[१], तत्रानुक्तत्वभ्रमात्-यथा मयाऽभावर्थो नोक्त इति हानिसन्यासौ-प्रतिज्ञाहानिप्रतिजासन्यासौ सम्भवत एव ।

(९) अन्यनिग्रहस्थानविचारः ।

एवमन्येऽपि सम्भवन्ति । यथा वस्तुगत्या यदि अवाचकमस्ति तत्र वादिना वाचकभ्रमो जातः । तत्रावाचकत्वमपि निग्रहस्थानं भवति । अथानुपयुक्तेषु वस्तुगत्या [२]यत्प्रत्यक्षं प्रकृतेऽनुपयोगि[३] भवति, तत्रोपयुक्तत्वभ्रमात्प्रयोगं निग्रहस्थानम् । एवमस्फुटार्थत्वभ्रमात् वस्तुगत्या यद्भवति स्फुटं तत्रैतस्यास्फुटत्वभ्रमो जातः । तत्र तन्निग्रहस्थानमेवमस्तु[४]-वस्तुगत्या यद्भवत्यन्वितं तत्र चैतस्यानन्वित भ्रमो जातस्तदैतस्य निग्रहस्थानम् । इत्यनयारीत्याऽन्यान्यपि निग्रहस्थानानि जल्पे सम्भवन्ति परं वादे तेषामनुपयोग इति ।

(१०) कथातात्पर्यम् ।

कथातात्पर्यमाह-**अनुद्धाव्यमिति** -यथा द्वयणुकस्य अनित्यत्वे वादिभ्यां विचार्यमाणे एकतरेण वादिनोक्तं 'द्वयणुकमनित्यम्, अवयवित्वात्, घटवत्'-इत्यत्र यद्यप्यत्र प्रतिज्ञा द्वयणुकमनित्यमित्यत्र प्रतिज्ञान्तरमपि सम्भवति हेत्वन्तरमपि सम्भवति यथा 'द्वयणुकं विनाशि,

१. B ऽर्थ उक्तः. २. यत्प्रकृते.. ३. A उपयोगि. ४. B omits अस्तु.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जन्यत्वात्,' इत्यपि सम्भवति, तथापि तत्त्वबुभुत्सारूपे वादे एतदुभयं नोद्भाव्यमेव । अत्र स्वशक्तिनिगूहनार्थम्, अन्यथा स्वशक्तिनिगूहनमेव स्यादिति भावः ।

(११) वादेऽनुद्भाव्यनिग्रहस्थानसप्तकम् ।

पुनरपि वादेऽनुद्भाव्यनिग्रहस्थानदर्शनम्[१] । यथा-अपूर्वप्रतिज्ञान्तरम् (१)हेत्वन्तरम् (२), अज्ञानम् (३), अप्रतिभा (८), विक्षेपो (५) मतानुज्ञा (६) पर्यनुयोज्यम् (७)-एतत्सप्तकं वादे उपेक्षणीयमेव । एतत्सप्तानां निग्रहस्थानानां क्रमेण व्याख्यां करोति.

(१२) प्रतिज्ञान्तरम् ।

परोक्तेति परेण प्रतिज्ञावादिना उक्तं यद्दूषणं तदुद्धाराय पूर्वं यदुक्तो तत्र विशेषणं न दत्तमभूत्। तस्य पूर्वोक्तस्य साधनीयोऽंशः तस्य प्रतिपादनं विशेषणदानेन प्रतिज्ञानन्तंर नाम निग्रहस्थानम्। (१)। अयं द्विविधो भवति-पक्षविशेषणपूरणादेकः (I), द्वितीयः साध्यविशेषणपूरणात्। (II)।

तत्राह क्रमेणोदाहरणे-यथा शब्दो नित्यः, कार्यत्वादिति वादिना यदोक्तं तदा प्रतिवादिना-ऽनित्यरूपे शब्दे अंशतः सिद्धसाधनं कृतम्। यथा तत्र सिद्धसाधनतावारणार्थं पक्षे वर्णात्मकत्वं विशेषणं दत्तम्। [२]तथा चात्र पक्षविशेषणपुरणात् प्रतिज्ञान्तरं जातम् (I)। एवं द्वितीयं साध्यविशेषणपूरणात्-यथा विवादाध्यासितं पृथिव्यादिकं बुद्धिमत्पूर्वकमिति यदा वादिनोक्तं [३]तदा प्रतिवादिनाऽन्यविषयकज्ञानवताऽस्मदादिना सिद्धसाधनं दत्तम्। तदा साध्ये बुद्धिविषयकत्वं विशेषणं देयम्। यथा विवादाध्यासितं पृथिव्यादिकं बुद्धिमज्जन्यमिति साध्यविशेषणपूरणता प्रतिज्ञान्तरम् (II)।

(१३) हेत्वन्तरम् ।

चरमो (मं) द्वितीयः(यं) हेत्वन्तरनाम निग्रहस्थानं लक्षयति-**अविशिष्टमिति**[४] पूर्वहेतौ वादिना विशेषणं दत्तं नास्ति। यदा च प्रतिवादिना हेतोर्दूषणं दत्तम् तदुद्धाराय तत्र विशेषणान्तरं यदा दीयते तदा हेत्वन्तररूपं वादिनो निग्रहस्थानां पततीत्यर्थः।

उदाहरति-**शब्द इति** तथा च सामान्ये प्रत्यक्षत्वं वर्तते; अनित्यत्वं च साध्यं नास्तीति व्यभिचारवारणाय जातिमत्त्वे सतीति विशेषणं देयम्। तथा च जातिमत्त्वे सति सामान्यप्रत्यक्षत्वं नास्तीति न व्यभिचारः-इत्यर्थः।

(१४) अज्ञानम् ।

अज्ञानं नाम निग्रहस्थानं लक्षयति-**कथायामिति**। कथायां वादे प्रकृत विषये-प्रकृतो यो

१. B वादे उद्भाव्य.. २. B यथा. ३. B यदा. ४. B अविष्टमिति.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वा विषयो वादास्पदीभूतः-तत्र स्वस्य यदज्ञानं तदाविष्करोति, तदाऽज्ञानं नाम निग्रहस्थानम् । एतदेव प्रकटयति-**वादिमध्यस्थाभ्यामिति** । तथा च कदाचिद्वादिनोक्तं तन्निर्वचनं मध्यस्थेनाप्युक्तं तदाऽनेनोच्यते मयाऽयमर्थो न बुद्ध इत्युक्ते वादिनोऽज्ञानरूपं निग्रहस्थानं पततीत्यर्थः ।

(१५) अप्रतिभा ।

अप्रतिभा स्पष्टार्थम् ।

(१६) विक्षेपः ।

विक्षेपं लक्षयति-**कार्येति** कार्यव्यासङ्गवशात् कदाचिदपच्छेदे कृते-यथा वादे प्रारब्धे ममामुकं कार्यमस्ति, स्वासामर्थ्यज्ञानत्वाद्त्यागे विक्षेपो भवतीत्यर्थः ।

(१७) मतानुज्ञा

मतानुज्ञा स्पष्टा ।

(१८) पर्यनुयोज्यम् ।

पर्यनुयोज्योपक्षणमाह-**निग्रह इति** एकवारं निग्रहस्थानं प्राप्तम्, पुनरपि निग्रहस्थानप्राप्तिः पर्यनुयोज्योपक्षेपणं नाम निग्रहस्थानं [१]भवतीत्यर्थः ।

[इति निग्रहस्थानसप्तकम् ।]

(१९) एतत्सप्तकस्योद्भावनं वादेऽयुक्तम् ।

एतदिति यद्यप्येतत्सप्तकं वादे सम्भवति तथाप्येतदुद्भावनं न कर्तव्यमिति । तत्त्वबुभुत्सायां निग्रहस्थानोद्भावनं न दोषाधायकमित्यर्थः ।

शङ्कते-**नन्विति** तथा च वादेऽपि तदुभयोः [i.e. प्रतिज्ञान्तरहेत्वन्तरयोः] उद्भावनमवश्यं कर्तव्यम् । अत्र हेतुमाह-**तदनुद्भावनेति** तथा च यदा हेतोर्विशेषणता [२]न दीयते तदा साध्यान्तरस्य सिद्धिरेव न स्यात् । यथा-शब्दो नित्यः, प्रत्यक्षत्वादिति वादिना यदि हेत्वन्तररूपनिग्रहस्थानोद्भावनं न क्रियते तदाऽनित्यरूपं यत्साध्यं तस्य सिद्धिरेव न स्यात् । यथाश्रुते हेतोर्व्यभिचारित्वात् । ततो हेत्वन्तररूपं यन्निग्रहस्थानं तदुद्भावनीयमेव । तथा च वादे हेत्वन्तररूपनिग्रहस्थानोद्भावनं युक्तमेवेत्याशङ्क्यार्थः ।

समाधत्ते-**यत्रेति** यत्र च विशेषः- विशिष्ट एव हेतुः कृतस्तत्र, तथा च यथाश्रुतप्रत्यक्षत्वादिति

---

१. A न भवतीत्यर्थः । २. B omits न.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रूपं साध्यं साधनमभिप्रेतं न भवति । किन्तु विशिष्टमेव जातिमत्त्वविशिष्टं-तदेवभिमतम् । **तदिति** हेत्वन्तरं नाम निग्रहस्थानम् । तत्स्थलाभिप्रायेणैव वादेन भवतीत्युक्तं **प्रसङ्गाभासेति** तथा च यदि वादे मतानुज्ञोद्भाव्यते [१]तदा तत्त्वव्याघातो भवति । तथा च समीचीनप्रसङ्गाभावात् ।

व्यभिचाराभावात् तत्त्वज्ञानमेव न स्यात् । यदि तत्त्वज्ञानमेव न भवति तदा व्यभिचारः किमर्थं कर्तव्यः इत्येषोऽप्युद्भाव्य एवेत्याशङ्कार्थः । **तस्या इति**-मतानुज्ञायाः प्रसङ्गत्वमेव । यदि वादिना प्रतिवादिनो दूषणं दत्तम्, तदा प्रतिवादिना वादिनि दूषणं देयमिति, तदा विचारः कर्तव्य इति । तत्र विचार एव कथं--विचाराभासत्वमित्यर्थः । **मध्यस्थस्येति** तत्त्वबुभुत्सुकथायां मध्यस्थ एव नास्तीति न पर्यनुयोज्योपक्षेपणमुद्भाव्यम् ।

प्रतिज्ञाविरोधमुद्भावयति-**एकवाक्यांशयोरिति** [२]अयं च वादेऽप्युद्भाव्य एव तत्त्व-विरोधित्वादिति भावः । अथवा हेतूद्भाव्यं निग्रहस्थानसप्तकं दर्शयति-**अप्राप्तिकालेति** यथा धूमात्पर्वतो वह्निमानित्यत्र निराकाङ्क्षता धूमादित्यत्र वह्निमत्त्वे आकाङ्क्षा नास्तीति निराकाङ्क्षत्वादप्राप्तकालता । शेषं सुगमम् ।

एतत्सप्तकं वादे उद्भाव्यमपि न कथा निवर्तनक्षमं भवति । तथा चैतस्मिन् सप्तके उद्भावितेऽपि कथायाः निर्वृत्तिर्न जायते इति ।

जल्पे एव निग्रहस्थानान्येतानि इति ज्ञेयम् । **यद्यपीति** । **अवयवान्तरेति** । तथा चोदाहरणन्यू-नतायां न कथाविच्छेद इति जल्पनिग्रहस्थाने कथाविच्छेदक एव-वादे तु कथाविच्छेद इति ज्ञेयम् ।

निरनुयोज्यानुयोगं लक्षयति-**तद्दूषणेति** यथा वादिना प्रतिवादिनं प्रति दूषणं दत्तं तदा तद्दूषणोपरि प्रतिवाद्युक्तदूषणोपरि वादिना यद्दूषणं दत्तं- तदा निग्रहस्थानं प्रतिवादीनां निरनुयोज्यानुयोगो भवति । **अस्येति** निग्रहस्थानानामियं परिगणना नाममात्रमेव । न च वादे एषामुपयोगः । किन्तु जल्पे एव तेषामुपयोग इति कारणात् **मूलकारेण** सर्वाणि निग्रहस्थानानि न दर्शितानीति भावः ।

[३२] जल्पः ।

अथ जल्पलक्षणे **उभयसाधनवतीति** यदि विजिगीषापदं न दीयते तदा तत्त्व-बुभुत्सावादेऽतिव्याप्ति र्भवति । ततो विजिगीषु पददानम् । उभयसाधनवतीति पदं वितण्डाया-मतिव्याप्तिवारणार्थम् । वितण्डायाः परपक्षदूषणमात्रे तात्पर्यादुभयसाधनवत्त्वं नास्ति । तथा च जल्पः

---

१. B omits तदा. २. B अवयवादि च (?).

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सर्वनिग्रहस्थानानामधिकरणं भवतीति । **समयबन्ध**[1] इति यद्येतादृशः समयबन्धः कृतो भवति, निग्रहस्थानं परित्याज्यमिति तदा निग्रहस्थानता नान्यत्रेति [2]विशेषः । कण्टको(कमु)द्धरति-तथा च वादिना प्रथम परपक्षे दूषणं देयम् पश्चाद् स्वमतस्य स्थापनं कर्तव्यमिति[3] । **अन्यथेति** शास्त्रादौ विद्यमाने प्रथमत एव स्वपक्षस्थापनं कर्तुं न शक्यत इति कण्टकोद्धारं कृत्वा एव स्वपक्षस्थापनं कर्तव्यम् ।

[३३] वितण्डा ।

वितण्डालक्षणमाह-**स्वपक्षेति विजिगीषु कथेत्यपीति अन्यथेति** यदि वितण्डालक्षणे विजिगीषु कथेति पदं न दीयते तदा तत्त्वबुभुत्सायां यदि स्वपक्षस्थापनाहीनस्यापि वैतण्डिकत्वं न भवतीति न तत्रातिव्याप्तिः । अत उक्तं विजिगीषु कथेति पदम् । एतदेव विशदयति-**तद्विचारणीयमिति** । **यदि चेति** - यदि वादेऽपि स्वपक्षस्तेषां स्थापनाहीनत्वं न स्वीक्रियते किन्तु तत्त्वविचारमात्रमेव तदा न तत्रातिव्याप्तिरिति न तत्पदं देयमित्यर्थः । **अत्र चेति**-वितण्डावादिनो परपक्षदूषणमेव प्रयच्छन्ति । परं स्वपक्षस्तेषां स्थाप्यो नास्ति- इति न द्वैतमिति भावः । **प्रतिवादिनेति** यद्यपि वितण्डावादिनाऽपि स्वपक्षसाधकानुमानं क्रियते इत्याशङ्क्यार्थः । दूषयति **विप्रतिपत्तीति** वितण्डावादिना विप्रतिपत्तिविषयीभूतो योऽन्यतरपदार्थस्तदनुमानं वितण्डावादिनो नास्ति । ततः स्वपक्षस्थापनानुमानत्वं तस्य नास्तीति भावः ।

[३४] कथा ।

कथेतीति कथा तु वादजल्पवितण्डारूपा त्रिविधा भवतीति सामान्यम् तथा च **मूलकारेण** कथासामान्यलक्षणं कृत्तम् यथा **नानेति** ।

शङ्कते-**नन्विति** तथा[4] च यत्र बहूनां विचारः, तत्र कथात्वं नास्ति । किन्तु यत्र द्वयोरेव कथाप्रसङ्गस्तदेव एतल्लक्षणलक्ष्यम् । तत्रापि लक्षणगमनेनातिव्याप्तिरिति भावः । **साधनेति** तथा च वादिनैव स्वपक्षसाधनस्य योऽनुवादः क्रियते तत्रातिव्याप्तिः । तथा च यत्रैकेन स्वपक्षासाधनं कृतम्, तत्रापरेण तस्यैवानुवादः कृतस्तत्र नानावक्तृकेत्यादिलक्षणं तिष्ठति । अनुवादस्य हि कथात्वाभावादलक्ष्यत्वमित्यतिव्याप्तिः ।

अव्याप्तिश्चेति तथा च यत्र कथायां प्रारब्धायामेकेन स्वपक्षस्थापनमारब्धम्, तदा द्वितीयेनाप्रतिभया किञ्चिन्नोक्तं तत्कथायामव्याप्तिः । एकेनैव वक्त्रा प्रतिपाद्यत्वात् द्वितीयेन च किमपि नोक्तमिति । **असम्भवश्चेति**-तथा चैकेन पूर्वपक्षः कृतः, उत्तरं चापरेण दत्तम्, तदोभयनानावक्तृकत्वं

---

१. It is समयसम्बन्ध in both A and B. २. B शेषः. ३. B omits इति. ४. B omits तथा च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नास्तीत्यसम्भवः ।

समाधत्ते-कथासामान्यलक्षणं सिद्धान्तयति-**वादीति** । वादी अथ च प्रतिवादी, तदपेक्षया योऽन्यः तस्य यदभिधानम्, तेन यत्कथितं वाक्यम्, [१]तदवृत्ति तत्र यन्नवर्तते, तत्त्वे सतीति[२] । अथ च स्थापनावादिनो मूलसाध्यवादिनो यत्साधनाभिधानं साधनार्थं कथनम्, प्रतिवादि[३]नश्च यद्दूषणाभिधानं तद्वृत्तित्वे सति यत्र[४] यद् वर्तते वाक्यम्[५], तदधिकरणीभूतं यत् तस्य यन्निपादनम्, तत्र यद्देशस्तत्र प्रवृत्तौ यौ [६]वादिप्रतिवादिनौ, तयोरन्यतरेण साधनं दूषणं च, [७]तदन्यतरत्वस्य कथात्वस्वरूपत्वम् ।

तथा चास्यायं निष्कर्षः-यत्र वादिप्रतिवादिभ्यां विचारः क्रियते-यथैकेन स्वपक्षस्थापनमपरेण च तत्रैव दूषणं दीयते, एतादृशं वादिप्रतिवादिवाक्यम्, तस्यैव समूहस्य कथात्वमित्यर्थः । अतो न पूर्वोक्तदोषः । तटस्थादिभिः बहुभिर्मिलित्वा यत्र विचारः क्रियते, तत्र पूर्वमति[व्याप्तिः]क्रियते । तत्र पूर्वमतिव्याप्तिर्दत्ता, तदुद्धारार्थम् । तथा च तत्र यद्वर्तते वाक्यत्वं तत्र वादिप्रतिवाद्यन्याभिधानवृत्तित्वं नास्तीति न तत्रातिव्याप्तिः । [८]द्वितीयवृत्त्यन्तं चानुवादेऽतिव्याप्त्युद्धारार्थम्, अनुवादवाक्यत्वे स्थापनावादिसाधनाभिधाने प्रतिवादिदूषणाभिधानवृत्तित्वं नास्ति । यद्यप्यनुवादवाक्यत्वे स्थापनावादि-स्थापनावृत्त्यभिधानवृत्तित्वं वर्तते तथापि प्रतिवादिदूषणाधिानवृत्तित्वं नास्तीति न तत्रातिव्याप्तिः । अव्याप्तिवारणार्थं च [९]प्रवृत्तिवादिप्रतिवाद्यन्यतरसाधनदूषणान्यतरत्पपदम् । तथा च पूर्वमतिव्याप्तिस्तत्र दत्ता यत्र वादिनोक्ते प्रतिवादिना अप्रतिभया किमपि नोक्तम् । तत्रातिव्याप्तिर्दत्ता । तद्वारणार्थं च प्रवृत्तौ यौ वादिप्रतिवादिनौ, तदन्यतरसाधनदूषणान्यतरत्वं नास्ति । तत्र यद्यपि वादिनः साधनत्वं वर्तते तथापि प्रतिवादिदूषणत्वं नास्तीति नाति व्याप्तिः ।

विशेषणत्रयमिति-वादजल्पवितण्डारूपं त्रयम्-एकस्मिन् वादिप्रतिवादीत्यादि लक्षणं तिष्ठत्येष । यत्र वादो वा वितण्डा वा जल्पो वा, तत्र सर्वत्र वादिप्रतिवादिनोः [१०]सत्त्वाल्लक्षणगमनम्; त्रय एव विशेषा इत्याशङ्कते । तथा च यथैतास्तिस्रः कथाः । तथा यथैका वादरूपा (१) अपरा विजिगीषु कथा जल्परूपा (२) तृतीया तत्रैव विजिगीषु कथा या वितण्डारूपा । (३) ।

चतुर्थी च तत्त्वबुभुत्सुकथायामपि वितण्डा स्यातृत्तीयावदिति । (४) । एताः **सनातनपण्डितेन** लिखिताः सन्तीत्याशङ्क्यर्थः ।

इदं दूषयति-**नेति** तत्त्वबुभुत्सुनाऽपि स्वपक्षस्थापनं क्रियते एवेति न तत्र वितण्डा, परं तत्त्वनिर्णिनीषोरपि विजिगीषु कथा काचिच्चतुर्थी वादवितण्डात्मिकारूपा भविष्यतीति

१. B तद्वृत्ति. २. B omits इति. ३. B प्रतिवादिना च. ४. B तत्र. ५. B वाक्यत्वम् . ६. B -वादिनः. ७. B -न्यतरस्य. ८. A omits the reading between द्वितीयवृत्त्यन्तं.....तत्रातिव्याप्तिः. ९. B प्रवृत्तिवादि०. १०. सत्त्वल०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रत्नकोशकारमतम् । तदूषयति-**तन्नेति**-तत्त्वनिर्णिनीषो विरुद्धेच्छाद्वयं न जायते एव । एकैव तत्त्वविचारात्मिका । तथा च चतुर्थी कथा न सम्भवतीति दिक् ।

[३५] हेत्वाभासप्रकरणम् ।

(I) हेत्वाभासलक्षणम् ।

अथ हेत्वाभासग्रन्थः । शङ्कते-**नन्विति**-यत्र हेतौ पक्षधर्मता नास्ति, अथवा यत्र सपक्षे सत्त्वादिकं नास्ति । **तच्चेति** - यदि प्रत्येकं-तदानुगमः । तथा च यत्र पक्षधर्मता नास्ति इतीदमेव लक्षणे यदि हेत्वाभासानां लक्षणं क्रियते तदा यत्र हेतौ विपक्षाद् व्यावृत्तिः-तदर्थवृत्तिर्नास्ति[१], अर्थात् व्यभिचारिणि-तत्र हेत्वाभासत्वं न स्यात् । लक्षणे पक्षधर्मताविरहमात्रस्यैवाङ्गीकृतत्वादित्यत्रापि एकतरानुगम इत्याशङ्कार्थः । यदि चान्यत्वस्यान्योन्यत्वं[२] लक्षणं [३]कृतम्, तदाऽर्थविशेषणता । यथा पक्षधर्मतादिविरहादन्यद्विश्वं तदन्यत्वमत्रैवेति तथा व्यर्थविशेषणम्, प्रतियोगिन्यवच्छेदकस्यैकस्याभावात् । यथा पक्षधर्मताविरहादयः पञ्चप्रतियोगिनः, तेष्वनुगतो एको धर्मा नास्ति, पक्षधर्मत्वादीनां भिन्नत्वात् । तदन्योन्याभावस्तु तदा गृहीतुं न शक्यते यदि प्रतियोगितावच्छेदकोऽनुगतः कश्चिदायाति । तथा च यदि प्रतियोगितावच्छेदको धर्मो एको नायाति तदा प्रतियोगिविशेषणं व्यर्थमेव । तथा च प्रतियोग्यनुगतधर्माभावेन तदन्योन्यत्वं परस्परं पञ्चष्वपि तिष्ठतीति।

तथा[४] च पक्षधर्मताविरहान्यत्वं विपक्षवृत्तावपि हेतौ तिष्ठति । अथ च विपक्षवृत्त्यन्यत्वं विपक्षाताविरहवति हेतौ तिष्ठतीत्येवं परस्परमन्यत्वे विद्यमानेऽन्योन्यत्वं वक्तुमशक्यमिति व्यर्थविशेषणत्वम् तथा चेदं विशेषणमतिव्याप्तिवारकं न भवतीति ।

व्यर्थविशेषणतां सिद्धान्तयति-**परामर्शेति** परामर्शस्य लिङ्गपरामर्शस्य यः प्रतिबन्धः [५]पदार्थस्तस्मादन्योपाध्यादिद्वारा ऽनपेक्षत्वे सति सार्वत्रिकी याऽनुमितिस्तत्प्रतिबन्धकं यज्ज्ञानम् तस्य यो विषयस्तद्वत्त्वं हेत्वाभासत्त्वम् । तथा च हेत्वाभासानां मध्ये कस्यचिद्बाधेऽनुमितिं प्रति प्रतिबन्धकं कस्यचिद् व्यभिचारादेर्व्याप्तिज्ञानं प्रति प्रतिबन्धकत्वम् । लिङ्गपरामर्शं प्रति तु हेत्वाभासानां मध्ये कस्यचित् प्रतिबन्धकत्वं नास्ति [इति]यदुच्यते तर्हि व्यभिचारज्ञानानन्तरं परामर्शः कुतो न जायते इति चेत्, न । तत्र परामर्शस्य विशेषणं यद् व्याप्तिज्ञानं तदभावादेव वह्निव्याप्यधूमवानयमिति विशिष्टज्ञानं नोदेति ।

ननु परामर्शं प्रति व्यभिचारज्ञानं प्रतिबन्धकम्, प्रतिबन्धकं च व्याप्तिज्ञानं प्रत्येव, व्यभिचारज्ञानाभावविशिष्टे हेतौ साध्यसामानाधिकरण्यस्यैव व्याप्तित्वात्, तथा च यदा

---

१. A omits नास्ति. २. B चान्यत्रस्य०. ३. A omits कृतम्. ४. B यथा. ५. B पदार्थोपाध्यादि तस्मादन्यो तर्हि द्वारा०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

साध्यतावच्छेदकावच्छिन्नसाध्यप्रतियोगिकात्यन्ताभाववद्वृत्तिहेतुरिति ज्ञानं तिष्ठति तदा व्याप्तिज्ञानं न जायते इति ग्राह्यं प्रति ग्राह्याभावज्ञानस्य प्रतिबन्धकत्वात्। अत्र हि ग्राह्याभावेऽतिव्याप्तिः। तस्यैकदेशो भवति व्यभिचाराभावस्तस्याभावो भवति व्यभिचारः, तज्ज्ञानमव्यभिचारिज्ञानं प्रति प्रतिबन्धकम्। व्याप्तिस्त्वव्यभिचारघटितैव[1]। तथा च व्यभिचाररूपहेत्वाभासस्य व्याप्तिज्ञानं प्रत्येवं प्रतिबन्धकत्वम्, न तु परामर्शं [2]प्रतीति बाधसत प्रतिपक्षयोरनुमितिं प्रत्येव प्रतिबन्धकम्। यदा बाधो भवति पर्वतो वह्न्यभाववान् तदा पर्वतो वह्निमानित्यनुमिति र्न जायते। तथा च परामर्शस्य प्रतिबन्धकः उपाधिः, तदन्यो भवति व्यभिचारादिः। तदनपेक्षत्वे सत्यनुमिति मात्रं प्रति यज्ज्ञानं प्रतिबन्धकं तद्विषयत्वं हेत्वाभासत्वम्। यथा तिष्ठति चेदं लक्षणं व्यभिचारादौ कथं विशेष्यदलमनुमितिप्रतिबन्धकीभूतं ज्ञानं व्यभिचारज्ञानं तद्विषयत्वं व्यभिचारे तिष्ठतीति तस्य हेत्वाभासत्वम्। सत्यन्तं चोपाधावतिव्याप्ति-वारणार्थम्। उपाधौ यद्यपि परंपरयाऽनुमितिप्रतिबन्धकत्वं वर्तते, अनुमितिप्रतिबन्धकं भवति व्यभिचारज्ञानं तदुपाधिनोन्नीयते। अत एव व्यभिचारज्ञानोत्थापक तयोपाधिदूषकत्वम्। एवमस्मिन् विशेषणे सत्यन्तं दत्ते उपाधौ नातिव्याप्तिः। कुतोऽति व्याप्ति र्न भवतीति चेत्, न।

यथा परामर्शप्रतिबन्धकीभूतो भवत्युपाधिः, तदन्यो यः पदार्थः व्यभिचारः, तदनपेक्षत्वमुपाधौ नास्ति। यदा ह्युपाधिनाऽनुमितिः प्रतिबध्यते, परामर्शो वा प्रतिबध्यते, तदा च स्वान्यमनपेक्ष्य न प्रतिबध्यते। व्यभिचारमपेक्ष्य परामर्शप्रतिबन्धकात्। व्यभिचारादीनां तु हेत्वाभासानामनुमितौ व्याप्तिज्ञाने प्रतिबन्धकत्वे किं स्यात्, यत्किञ्चिदन्यद्वारं नापेक्ष्यते इति हेत्वाभासत्वम्।

तथा चायमत्र निष्कर्षः-अनुमिति र्व्याप्तिज्ञानान्यतरत्प्रति प्रतिबन्धकज्ञानविषयत्वं हेत्वाभासत्वम्। अत एव **मणिकारेणोक्तं**-अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्। तद् यथा श्रुते तु व्यभिचारादौ लक्षणमव्याप्तम्। कथम्? व्यभिचाराभावस्तु अनुमितिं प्रति कारणं न भवति, किन्तु व्याप्तिज्ञानं प्रत्येव तस्य कारणत्वात्।

ततो **मदुक्ते** लक्षणे निष्कृतं तात्पर्यम्-यथा किञ्चिद्धेत्वाभासज्ञानं व्याप्तिज्ञानं प्रति प्रतिबन्धकम्, किञ्चिच्चानुमितिं प्रतीत्यनुमितिव्याप्तिज्ञानान्यतरत् प्रति प्रतिबन्धकं [3]यज्ज्ञानं तद्विषयत्वं हेत्वाभासत्वम्। तथा च [4]व्यभिचारेऽपि व्याप्तिज्ञानं प्रति प्रतिबन्धकत्वान्नातिव्याप्तिः। तिष्ठति चेदं व्यभिचारिणि यथा धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तिर्वह्निरिति ज्ञाने विद्यमाने व्याप्तिज्ञानं तद्भिन्नं न भवति।

गच्छति चेदं विरुद्धे-यथेयं गौरश्वत्वादित्यत्र गोत्वासमानाधिकरणाश्वत्वमिति ज्ञाने विद्यमानेऽश्वत्वे गोत्वनिरूपितव्याप्तिज्ञानं न जायत इति व्याप्तिज्ञानं प्रति विरुद्धज्ञानस्य प्रतिबन्धकत्वम्।

---

१. B घटवानेव (!). २. B परामर्शप्रतिबन्धकोभवति प्रतीति (!). ३. B तज्जावं. ४. B -भिचारादेः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

असिद्धे यथा-'गगनारविन्दं सुरभि, अरविन्दत्वाद्' इत्यत्र पक्षस्यासिद्धित्वज्ञानमनुमितिं प्रति प्रतिबन्धकत्वम् । तद्विषयत्वं चासिद्धे तिष्ठति । एवं व्याप्यत्वासिद्धावपि ।

एवं सत्प्रतिपक्षे-यथा'शब्दो नित्यः, अस्मदाद्यात्मनः[१] विभुविशेषगुणत्वात्, ईश्वरज्ञानवद्'-इत्यत्र सत्प्रतिपक्षो भवति । 'शब्दोऽनित्यः, जातिमत्त्वे सत्यस्मदादिबहिरिन्द्रियग्राह्यत्वात् घटवद्'-इत्यत्रानुमानेन नित्यत्वानुमितिः प्रतिबध्यते । न च पूर्वोक्तेनानित्यत्वानुमितिः प्रतिबध्यते इति, द्वयोरनुमितिप्रतिबन्धकज्ञाने विषयत्वं तिष्ठतीति सत्प्रतिपक्षस्य हेत्वाभासत्वम् । एवं बाधे पर्वतो वह्न्यभाववानिति ज्ञाने वृत्ते, पर्वतो वह्निमानित्यनुमिति[प्रति]बन्धक ज्ञानविषयत्वं वाच्यमिति हेत्वाभासत्वम् । एवं हेत्वाभासविशेषेऽपि लक्षणं बोध्यम् ।

कण्टकमुद्धरति-**न चेति** तथा च यथा श्रुते उपाधावेवातिव्याप्तिः । तस्योपाधिज्ञानस्यानुमितिप्रतिबन्धकत्वं परंपरया यद्यपि वर्तते तथापि स्वान्यद्वाराऽनपेक्षत्वं तस्य नास्ति । किन्तु व्यभिचाराद्वारैव ।

एतदेवाह-**उपाधिज्ञानस्येति न चेति** तथा च[२] साध्येऽतिव्याप्तिः । गौरवे चातिव्याप्तिः । साध्यस्याप्यनुमितिं प्रति प्रतिबन्धकत्वमस्ति । यतः साध्यज्ञानस्य पक्षीयसाध्यनिश्चयस्यानुमितिं प्रति प्रतिबन्धकत्वात् । तथा च तद्विषयकज्ञानविषयत्वात्, गौरवज्ञानस्याप्यनुमितिप्रतिबन्धकत्वात् ।

समाधत्ते-**पक्षतास्थलेति** यत्र साध्यनिश्चयस्तत्रापि साध्यविषयानुमितेर्जायमानत्वात् । तथा च सर्वत्रानुमितिं प्रति साध्यनिश्चयस्य प्रतिबन्धकत्वं नास्ति । गौरवज्ञानमपि प्रामाणिकं न प्रतिबन्धकमिति न तत्रातिव्याप्तिः ।

मतुबिति अन्यथा यथाश्रुते सिद्धे हेतावतिव्याप्तिर्भवति । यथा धूमाभाववद्वृत्तिरिति, वह्न्यालोकाविति समूहालम्बनस्यापि धूमनिरूपितव्याप्तिज्ञानं प्रति प्रतिबन्धकत्वं वर्तते । तद्विषयत्वं यथा वह्नौ तिष्ठति तथाऽऽलोकेऽपि तिष्ठतीति आलोकेऽतिव्याप्तिः । तस्याप्यनुमितिप्रतिबन्धक-ज्ञानविषयत्वस्य सत्त्वात् । यतः प्रतिबन्धकज्ञानविषयो भवति व्यभिचारः । तद्वत्त्वादालोक-स्येत्याशङ्क्यार्थः ।

न चेति तथा च यत्र वस्तुगत्या व्यभिचारित्वं वर्तते तस्यैव लक्षणं हेत्वाभासस्य प्रसक्तम् । पूर्वोक्ते च समूहालम्बनात्मकं ज्ञानविषयत्वं यद्यपि दुष्टं तिष्ठति तथापि व्यभिचारित्वं तत्र नास्ति । यतस्तत्रालोके वह्न्यभाववद्वृत्तिरूपो दोषः, स च तत्र नास्तीति न तत्रातिव्याप्तिः । **हेतुत्वाभिमते** इति तथा चं धूमवान् वह्नेरित्यत्र हेतुत्वाभिमतो भवति वह्निर्न चालोके-इत्यालोके हेतुत्वाभिमताभावान्नानिव्याप्तिः ।

---

१. A -दाद्यात्मन्यविभु॰. २. B omits च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[II] **असिद्धः ।**

असिद्धलक्षणमाह-**व्याप्तस्येति अजातदोषत्वादिति** तथा च तस्यैव हेत्वाभासत्वं यस्य ज्ञानेनानुमितिः प्रतिबध्यते । तेन ज्ञातो दोषः हेत्वाभासः । प्रकृते चासिद्धे ज्ञातदोषत्वं नास्ति । कथम् ? यदा व्याप्तिविशिष्टपक्षधर्मताज्ञानं तिष्ठति तदाऽनुमितिर्जायते । यदा चेदं नास्ति तदा कारणाभावादेव नानुमितिरिति व्याप्तस्य पक्षधर्मत्वाभाव एवानुमितिप्रतिबन्धकः, न तु तद्ज्ञानमपि कारणत्वाभावादेव। यथा कुलालादिसामग्रीसत्त्वे दण्डाभावे घटोत्पत्तिर्न जायते । कारणाभावादेव । **तद्विशेषणत्वादिति** असिद्धिरपि हेत्वाभास एव । तथा [1]चैतस्यानुमितिप्रतिबन्धकज्ञानविषयत्वाभावात् हेत्वाभासत्वं कथं वाच्यमित्यर्थः।

लिङ्गपरामर्शाभावेति तथा च यदि लिङ्गपरामर्श एवासिद्धः-इत्युच्यते तदा सद्धेताव-प्यतिव्याप्तिः। [2]यत्र व्याप्तङ्गस्याव्याप्तिज्ञाने विद्यमानेऽपि वह्निसाध्यकधूमलिङ्गकः पर्वतपक्षकः परामर्शो न जातस्तत्रापि वह्निव्याप्यधूमवानयमिति परामर्शाभावेन धूमस्याप्यसिद्धत्वं स्यात् । **तत्सत्त्वे इति** यथा ह्रदो वह्निमान् धूमादित्यत्र व्याप्तिज्ञानानन्तरं दैववशात् परामर्शो जातः । यथा वह्निव्याप्यधूम-वानयमिति, तत्र धूमस्याप्यसिद्धत्वं न स्यात् । कथम् ? यतस्तत्र वह्निसाध्यकः धूमलिङ्गकः ह्रदपक्षकः परामर्शसत्त्वेन परामर्शाभावो नास्तीत्यसिद्धस्याप्यसिद्धहेत्वाभासत्वं न स्यात्। **असतोऽपीति** वस्तुगत्या यो हेतुः स्वरूपासिद्धो भवति, पक्षे हेतु र्न भवतीति तावत्[3] तस्याप्यासिद्धरूपहेत्वाभासत्वाभावापत्तिः ।

समर्थयति-**तथापीति लिङ्गेति** लिङ्गपरामर्शस्य यो [4]विषयस्तस्याभावः, स एवासिद्ध इत्यर्थः। ह्रदो वह्निमानित्यत्र लिङ्गपरामर्शस्य विषयीभूतो यो धूमस्तत्र ह्रदे तदभावस्य सत्त्वात् । तथा चायमसिद्धस्तत्रास्त्येव नाति व्याप्तिरित्यर्थः । **तद्विषयश्चेति** लिङ्गपरामर्श विषयो हि एका व्याप्तिः । अथ च पक्षतावच्छेदकं पक्षे हेतुमता च । तथा च पूर्वोक्तोदाहरणे पक्षे हेतुमत्त्वाभावात् तत्र धूमस्यासिद्धत्वमित्यर्थः । पक्षतावच्छेदकासत्त्वोदाहरणं च 'काञ्चनमयः पर्वतो वह्निमान्, धूमादित्यत्र परामर्शविषयीभूतम् । यतः पक्षतावच्छेदककाञ्चनमयत्वं यत्र पर्वतरूपे पक्षे नास्तीति पक्षतावच्छेदकरूपविषयाभावादसिद्धः । तथा च यत्र पक्षतावच्छेदकत्वेनाभिमतो यो धर्मः, स यत्र नास्ति, सोऽप्याश्रयासिद्धः । यत्र च व्याप्तिर्नास्ति, सः व्याप्यत्वासिद्धः । अथ च यत्र हेतुमत्ता नास्ति पक्षे स [5]स्वरूपासिद्ध इति भेदभावः ।

व्याप्यत्वासिद्धः यथा 'यद् सत् तत्क्षणिकम्'-इत्यत्र सत्त्वं भवति हेतुः, तत्र हेतौ [6]परामर्शविषयीभूता या व्याप्तिः, सा नास्तीत्यं व्याप्यत्वासिद्धः । नन्वयं कथं [7]व्याप्यत्वासिद्ध एव ?

---

१. B -बन्धकाज्ञान॰. २. B तत्र. ३. A यावत्. ४. B विषयः स एवा॰. ५. B omits स्व. ६. B परामर्शभूता. ७. B त्वासिद्धः । एतस्य च.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तस्य च घटादौ व्यभिचारित्वादिति । तथा धर्मसङ्करो वृत्तः । यथैको धर्मो भवति व्यभिचारित्वम्, द्वितीयो भवति व्याप्यत्वासिद्धत्वमिति ।

हेत्वाभासानामिति तथा च हेत्वाभासानां परस्परं धर्मसङ्करो-व्यभिचारित्वादि सङ्करो न दोषाय भवति । सर्वत्रैव परस्परं सङ्करात् । यथा विरुद्धव्यभिचारित्वं स्वरूपासिद्धत्वं विरुद्धत्वं च व्याप्यत्वासिद्धं च तिष्ठति । 'यथेयं गौरश्वत्वात्'-इत्यत्र व्यभिचारित्वम्, यथा गोत्वात्यन्ताभाव-वद्वृत्तित्वमश्वत्वे तिष्ठति ।

एवं स्वरूपासिद्धत्वंमपि पक्षे-गोलक्षणेऽश्वत्वस्याभावात् स्वरूपासिद्धत्वम् । एवं विरुद्धत्वं समानाधिकरणत्वं तिष्ठति । एवं व्याप्यत्वासिद्धत्वमपि अश्वत्वे हेतौ गोत्वरूपसाध्यसमानाधिकरणत्वा भावादेवेति व्याप्ति र्हि साध्यसामानाधिकरण्यघटिता हेतोः । इत्येवं धर्मसङ्करो हेत्वाभासानां दोषाय न। [१]यदा यस्य ज्ञानं पूर्वमेवानुमिर्ति[२] प्रतिबध्नाति तत्र स एव हेत्वाभासः । यदा च बहूनां ज्ञानसमूहालम्बनात्मकमनुमिर्तिं प्रतिबध्नाति तदा तेषामेव हेत्वाभासत्वम् । परमयं विशेषः - यदा प्रथमत एकधर्मस्य व्यभिचारित्वादे र्ज्ञानं यामनुमिर्तिं प्रतिबध्नाति, तत्र तेनान्यस्य विरुद्धादेरपेक्षा क्रियते । एवं नास्ति । स्वातन्त्र्येण पुरः स्फुर्तिकस्यैवानुमितिप्रतिबन्धकत्वात् । इति मनसि कृत्वाऽऽह-**नहीति** सुगमं प्रायः ॥

[३]असाधकताऽनुमानं यथा-धूमवान् वह्नेरित्यत्र वह्निर्धूमासाधकः, धूमाभाववद्वृत्तित्वादिति । एवमन्यत्रापि बोध्यम् । साङ्कर्यस्थले पुरस्फुर्तिक एव साधकतायां प्रयोज्य इति भावः । **यदीति** 'इयं गौरश्वत्वाद्' इत्यत्र विरुद्धत्वेनायं हेतुः शास्त्रेष्वेव क्रियते । अत्र यद्यपि व्यभिचारित्वमप्यस्ति तथापि व्यवहार एव विरुद्धोऽयं हेत्वाभास इत्यर्थः । स इतीति-**तथा च सतीति** - यद्वर्तते मूले तदग्रे 'य' इति पूरयित्वा **फक्किका** पठनीया ।

व्यभिचारव्यवहारेति - तथा च व्यभिचारस्य यो व्यवहारस्तस्य प्रयोजकीभूतः प्रवर्तकीभूतः यथाऽनैकान्तिक एवायं व्यभिचारीति हेत्वाभास इति व्यवहारोऽनैकान्तिके साध्यात्यन्ताभाववद्-गामित्वरूपे एव जायते इत्यर्थः । **पूरणीयमिति** ये दोषाः उक्ताः, तेऽनेकान्तिकादय इति पूरणीयम्। **असिद्धपदेनेति** अत्रासिद्धिपदेनैकाऽसिद्धिः व्याप्यत्वासिद्धिराश्रयासिद्धि र्वा ग्राह्या । तत् आदिपदेन तदितरयोः संग्रह इत्यर्थः । अन्यथा 'आदि-पदं' व्यर्थमेव स्यात् ।

एवं चेति अयमाश्रयासिद्धिः पृथगूपेण पक्षावृत्तित्वेन रूपेण व्यभिचारादित्यपि व्यभिचारादीनामनेन रूपेण हेत्वाभासत्वं नास्तीति भावः ।

गगनीयत्वमिति तथा च गगनीयत्वमपि विशिष्टं यद्यरविन्दं तस्य पक्षत्वम् । तत्र पक्षो

१. A तद्यदा. २. B -नुमितं. ३. B असाधारकताऽ..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भवत्यरविन्दम्, गगनीयत्वं च पक्षतावच्छेदकत्वम् । तथा च पक्षे पक्षतावच्छेदकत्वाभावात् तदवच्छिन्नपक्षाप्रसिद्ध्या, आश्रयासिद्ध इत्यर्थः । अत एव प्रागुक्तं परामर्शविषयीभूताभावोऽसिद्धः । परामर्शविषयाश्रयपक्षतावच्छेदक(१) [१]हेतुमत्त्व(२)-व्याप्ति(३)स्वरूपाः । [२]यत्र च परामर्शविषयीभूत-पक्षतावच्छेदकं नास्ति, स आश्रयासिद्धः । शेषौ [३]पूर्वविवृत्तौ ज्ञेयौ । अत्राशङ्कते[४]**नन्विति** - गगनार-विन्दमत्यन्तमसद्भवति । तस्य पक्षतायां क्रियमाणायां तदप्रसिद्धत्वात्-तस्य च प्रसिद्धिर्नास्ति तदा आश्रयासिद्धिरपि वक्तुमशक्या ।

अयमर्थः - यस्य पदार्थस्य कुत्रापि प्रसिद्धिर्नास्ति तेनाश्रयाप्रसिद्ध्या आश्रयासिद्धि-रूपोऽभावो वक्तुमशक्यः । प्रतियोगिप्रसिद्ध्यैवाभावप्रसिद्धिरिति । ननु तर्हि को दोषोऽयमित्यत आह - **तत्रेति** - अयमपार्थक एव दोषः-निरर्थकमेव तत्र[५] दोष इत्यर्थः ।

सिद्धसाधनस्येति तथा च हेत्वाभासस्य ज्ञानं प्रतिबन्धकम् । तत्तु स्वरूपसत् । सिद्धसाधनस्य तु ज्ञानं प्रतिबन्धकं न भवति । यतः साध्यनिश्चयस्यानुमितिप्रतिबन्धकत्वम् न तु साध्यनिश्चयत्वमिति । सिद्धसाधनस्य यद्यपि हेत्वाभासत्वं न सम्भवति तथापि **प्राचीनमते** आश्र यासिद्धे एव तदन्तर्भाव इति भावः । तथा चात्रापि संदिग्धसाध्यवत्त्वरूपपक्षतावच्छेदकाभावान्न पक्ष [६]इत्यर्थः । नास्तीत्यर्थः । अन्यथा यथाश्रुते सद्धेतावपि कदाचित्पक्षेऽज्ञातत्वात् स्वरूपासिद्धत्वं स्यात् । स्वरूपासिद्धेऽव्याप्ति श्च स्यात् । कथम् ? यतः पक्षे यस्य वस्तुगत्या स्वरूपासिद्धस्य ज्ञानं जातं तस्य स्वरूपासिद्धत्वं न स्यात् । **भवतीति** चोक्तं यस्य ज्ञानं न जातमिति । ततोऽव्याप्तिरित्यन्यथाव्याख्यातम्।

भागासिद्धेति पक्षतावच्छेदकावच्छिन्ने पक्षे हेतोरसत्त्वादयं भागासिद्धः [७]स्वरूपासिद्ध एवेति भावः । **असमर्थमिति** येन विशेषेण व्यावृत्तिर्जन्यते तदसमर्थमित्यर्थः । विशेष्यासमर्थं च यत्र पक्षे संपूर्णहेतोर्मध्ये विशेष्यभागो नास्तीत्यसमर्थत्वमित्यर्थः । तथा च यत्र पक्षे विशिष्टस्य हेतोर्विशेषणभागो नास्ति तत्रापि हेतो र्विशेषणाभावप्रयुक्तो विशिष्टाभावः । एवमन्योऽपीति भावः ।

अर्वाचीनमत इति - तथा च तत्र व्याप्तिरेव नास्ति । यतो हेतुतावच्छेदकावच्छिन्नसमानाधि-करणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं हेतुतावच्छेदकावच्छिन्ने । तथा च हेतुतावच्छेदकं प्रकृतानुमाने विशेषणासिद्धे द्रव्यत्वरूपं हेतुतावच्छेदकं नास्तीति व्याप्यत्वासिद्धः । यतो व्याप्तिर्हेतुतावच्छेदकघटिता जाता, तदभावत्वे व्याप्यत्वासिद्धोऽयमित्यर्थः।

व्याप्यत्वासिद्धस्य **मूलकारेण** कृतं लक्षणम्-यथा **यत्र[८] हेतौ व्याप्तिर्न विगम्यते इति** यथाश्रुतमिदमशुद्धं भवति । सद्धेतावपि [९]दशाविशेषे यदा व्याप्तिर्न गृहीता तदा तस्यापि व्याप्यत्वं

१. B हेतुत्व. २. B तत्र. ३. B पूर्ववृत्तौ. ४. B अत्र शङ्कते. ५. B यत्र. ६. B omits इत्यर्थः. ७. B omits स्वरूपासिद्ध. ८. The words यत्र हेतौ are not found in त.भा.प्र. ९. B दशावशेषे.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सिद्धत्वं स्यादिति । तथा च यत्र हेतौ यत्साध्यनिरूपिता [1]व्याप्तिर्नास्ति, स हेतुः तत्साध्ये व्याप्यत्वासिद्ध इत्यर्थः । न तु स्वरूपासिद्धादावपि व्याप्यत्वं सिद्धत्वं स्यादिति । तथा च यत्र हेतौ यत्साध्यनिरूपिता व्याप्तिः नास्ति, स हेतुः तत्साध्ये व्याप्यत्वासिद्ध इत्यर्थः ।

ननु स्वरूपासिद्धत्वादावपि इदं लक्षणमतिव्याप्तम् यथेयं गौरश्वत्वात्[2], अयं हेतुः स्वरूपासिद्धः व्याप्यत्वासिद्धश्च । अत्रातिव्याप्तेरभावात् व्याप्यत्वासिद्धं स्यादिति चेत् न । इष्टापत्तेः पुरःस्फुर्तिकत्वात् । प्रतिबन्धकं च भिन्नरूपेण व्याप्यत्वासिद्धस्य प्रतिबन्धकत्वं व्याप्तिविरहत्वरूपेण, असिद्धस्य तु पक्षवृत्तित्वेन रूपेण, विरुद्धस्य साध्यतासमानाधिकरणज्ञानत्वेन रूपेणेति भिन्नभिन्नरूपेण प्रतिबन्धकत्वम् । ततः सङ्करो दोषाय न भवतीत्युक्तमेव । **यत्सदिति** – अत्र सत्त्वं भवति हेतुः, यत् शब्दः पक्षः क्षणिकत्वं साध्यम् । अयं व्याप्यत्वासिद्धो भवति । हेतोः सत्त्वस्य क्षणिकत्वरूपसाध्येन सहचाराभावात् ।

अत्र शङ्कते–**अत्रेति** यदि क्षणिकत्वं कुत्रापि प्रसिद्धम् तदा कथं तस्य सत्त्वेन सममसहचारः ?[3] यदि च क्षणिकत्वमप्रसिद्धं तदाऽपार्थकता अप्रसिद्धता–एव दोष इति शङ्कार्थः । **अस्येति** तथा चेदं विरुद्धस्यैवोदाहरणं यतो विरुद्धत्वं नाम साध्यसमानाधिकरणत्वं हेतौ विरुद्धत्वम् । तथा च सत्त्वे हेतौ क्षणिकत्वसामानाधिकरण्यं तिष्ठतीति विरुद्धत्वमेवास्य न व्याप्यत्वासिद्धत्वम् । [4]**घन इति** ननु **न्यायमते** घने क्षणिकत्वासम्भवेनासङ्गातिरिति चेत् न । घनपदेन चरमशब्द, एव ग्राह्यः । तथा च चरमे शब्देऽक्षणिकत्वं **नैयायिकैरपि** स्वीक्रियते । तस्यैव दृष्टान्तत्वं बोध्यमिति मनसि कृत्वा आह– **संश्चेति** तथा चानुमानप्रकारकोऽयं चरमशब्दातिरिक्तः शब्दः क्षणिकः सत्त्वादिति हेतुः, चरमशब्दवदिति । अन्यथाऽनुमानप्रकार एव न क्रियते । तथाहि यद्ययं व्याप्यत्वासिद्ध एव तदा क्षणिकत्वस्य सत्त्वे व्याप्ति[5]र्नास्तीति प्रभाणाभावाद् व्याप्यत्वासिद्धः । **यत्रोपाधिरिति** मूलम् तथा च यदि व्यभिचारित्वेन हेत्वाभासत्वं व्याप्यत्वासिद्धस्य, तदा चावश्यकत्वाद् व्यभिचार एव हेत्वाभासो भवतु[6] । किन्तु व्याप्यत्वासिद्धेनातिरिक्तेनेति ।

अयमर्थः–व्याप्यत्वासिद्धस्तु स एव ज्ञेयः, यत्र हेतौ व्याप्तेर्विरहः । व्याप्तिविरहश्च द्विविधो भवति–एको विशेष्यं यत्साध्यसमानाधिकरणरूप[7]ं तदभावप्रयुक्तः । द्वितीयस्तु विशेषणाभावप्रयुक्तः– विशेषणं भवति । तथा च द्वितीयं व्युत्पादयति **यत्रोपाधिरिति** तथा च यत्र हेतौ उपाधिस्तिष्ठति तत्रावश्यमव्यभिचाराभावरूपो व्यभिचारस्तिष्ठति । तेन तत्र हेतौ व्याप्ति र्नास्ति । अव्यभिचाररूप– विशेषणविशिष्टसाध्यसामानाधिकरण्याभावात् । व्याप्तिस्त्वव्यभिचारि–विशिष्टसाध्यसमाना– धिकरणरूपैव । तथा चात्र यद्यपि विशेष्यं साध्यसामानाधिकरण्यरूपमस्ति तथाप्यव्यभिचाररूपं

१. B व्याप्तिसद्धेतुः तत्साध्ये. २. B –श्चात्. ३. B –चारम् ?. ४. It is जलधर in त.भा.प्र. ५. व्याप्तिरस्तीति (!). ६. B भवति. ७. B –रूपः.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विशेषणं नास्तीति विशेषणाभावप्रयुक्तविशिष्टाभावोऽस्तीति । अनेन रूपेणाप्यनुमितिं प्रति प्रतिबन्धकत्वात् व्याप्यत्वासिद्धत्वमिति सङ्क्षेपे न दोषाय ।

(III) विरुद्धः ।

विरुद्धग्रन्थो यथा-साध्याभावव्याप्यो विरुद्ध इति विरुद्धलक्षणम् । तथा च यत्र हेतौ साध्याभावनिरूपिता व्याप्तिस्तिष्ठति स एव विरुद्धः । यथेयं गौरश्वत्वादियं वा पृथिवी, जलत्वाद्-इत्यत्राश्वत्वं पृथिवीत्वं वा साध्यं भवति । गोत्वं पृथिवीत्वं च तदभावेन[1] गोत्वाभावेन पृथिवीत्वाभावेन च सममश्वत्वजलत्वयोः क्रमेण व्याप्तिरस्ति ।

अत्र शङ्कते - **नन्विति** अत्र लक्षणे नैयत्यांशो नाम व्याप्यभागमध्ये नियमेन सहचार[2] इति । तथा च नियमांशं परित्यज्य सहचारमात्रं ग्राह्यम् । तथा चेदं लक्षणमस्तु साध्याभावसमानाधिकरण विरुद्ध इति वाच्यः । तथा चानेन रूपेण विरुद्धोऽपि संगृहीतः । [3]व्यभिचारोऽपि साध्याभाव समानाधिकरणत्वात् ततो विरुद्धो हेत्वाभासः किमर्थं वाच्य इत्याशङ्कार्थः ।

[4]समाधत्ते-**सहचारस्येति** तथा च साध्येन सममसहचरितोऽसमानाधिकरणो हेतुः स विरुद्धः । व्यभिचारस्तु साध्याभावासमानाधिकरणत्वे सति साध्यसमानाधिकरणः । सत्यन्तं च सद्धेतावतिव्याप्तिवारणाय । सतो भिन्नत्वेन रूपेणानुमितिप्रतिबन्धकत्वाद्विरुद्धोऽपि व्यभिचारिणो भिन्न एव हेत्वाभास इति भावः व्यभिचारग्रन्थे ।

(IV) अनैकान्तिकः ।

संशय हेतुरिति - तथा च संशयो येन जन्यते सोऽनैकान्तिकः, द्वितीयलक्षणार्थः सव्यभिचार इति यत्र व्यभिचारस्तिष्ठतीत्यर्थः । **पूर्वमिति** प्रथमलक्षणपक्षे संशयहेतुत्वमात्रमुक्तम् । द्वितीयलक्षणे कोटिद्वयोपस्थापकत्वम् । सव्यभिचारपदेन साध्यसमानाधिकरणत्वे सति साध्याभावसमानाधिकरणत्वम् । तथा च यः [5]साध्यसाध्याभावरूपकोटिद्वयोपस्थापकत्वं सव्यभिचारस्य बोध्यमित्यनयोर्लक्षणयोर्भेदः । अन्यथा पुनरुक्त स्यादित्यर्थः ।

अत्रेति साधारणानेकान्तिकस्य पक्षवृत्तित्वेन विपृक्षवृत्तित्वेन च कोटिद्वयमुपस्थापितम् । तथा च यो हेतुः पक्षेऽपि वर्तते, विपक्षेऽपि वर्तते, स हेतुः स्वसाध्यं साध्याभावं च स्मारयतीति कोटिद्वयस्मारकत्वम् । तदनन्तरं कोटिद्वयस्मरणरूपकारणसत्त्वेन सन्देहो जायते । यथा वह्नि धूर्मव्याप्तो वा धूमाभावव्याप्तो वा । तथा च वह्नौधूमव्याप्तिनिश्चयो न भवतीति व्याप्तिज्ञानं प्रति व्यभिचारज्ञानं

---

१. B omits तदभावेन. २. B -सहचारमात्रं ग्राह्यम् । तथा चेदं. ३. B adds व्यभिचारोऽपि संगृहीतः. ४. B omits समाधत्ते. ५. B -याभावरूपे कोटि.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रतिबन्धकत्वादित्युक्तम् । तत्त्वसाधारणानैकान्तिकेन सन्देहः कथं जन्यते ? तस्य साध्यसमानाधिकरणत्वेनैव साध्याभावसमानाधिकरणत्वाभावादिति । आशङ्कते-**नन्विति** ।

साध्यात्यन्ताभाववदिति - तथा च विपक्षाद् व्यावृत्तो भवति यो हेतुः, सपक्षादपि यो हेतुर्व्यावृत्तो भवति स एवासाधारण इति । तेनैव सन्देहो जन्यते । तत्र साध्यस्यापि निश्चयः तेन कर्तुं न शक्यते । शङ्का(ङ्क्या) साध्याभावस्यापि निश्चयकर्तु ना तथा च साध्यसन्देह एव भविष्यतीति । असाधारणस्यापि सन्देहजनकत्वम् । ततोऽनैकान्तिकलक्षणं तत्राप्यस्तीति भावः ।

नियमाभाव एवेति यस्मिन् हेतौ व्याप्तिर्नास्ति स व्यभिचारो भवति । सा[1] व्याप्तिश्चान्वयव्यतिरेकिणि तिष्ठति । यत्र च पक्षतातिरिक्तस्थले साध्यसाधनयोः सहचारो वर्ततेऽथवा तद्व्यतिरेकयोरपि सहचारो भवति । यत्र चैवमुभयसहचारो नास्ति स एव व्यभिचार इति भावः ।

एतदेव स्पष्टयति-**नियमश्चेति** साधारणानैकान्तिके सपक्षवृत्तित्वेन विपक्षाद् व्यावृत्तित्वं नास्ति। असाधारणे चोभयव्यावृत्त्या कृत्वा नियमाभावः । यदि सपक्षादपि यो व्यावृत्तस्तर्हि व्यभिचार एव स्पष्ट इत्यर्थः । **बीजमाहेति**-व्याप्तावव्यभिचारस्यैकभागत्वाद् गमकमिति भावः ।

एतदेवाह-**अनुमिताविति । नियमाभाव इति** - यथा विरुद्धे नियमाभावो वर्तते साध्याभावेनापि सह वर्तमानत्वात्; तथा च व्यभिचारेऽपि नियमाभावः साध्याभावेनापि सह हेतो र्वर्तमानत्वादित्यर्थः ।

(V) प्रकरणसमः ।

समबलेति तथा च समानबलं व्याप्तिपक्षतारूपं यस्य हेत्वन्तरस्यास्ति, एतादृशं यत्साध्यविरुद्धसाधकं लिङ्गान्तरं तिष्ठति यस्य सः प्रकरणसम इत्यर्थः ।

अधिकबलेति तथा च यत्रैकस्याधिकबलत्वं तत्रान्यस्य बाध एव । यस्य च न्यूनबलता तस्यैव बाधः । यथा पर्वतो वह्निमान् धूमात्, पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यत्राधिकबलता धूमे तिष्ठति । तत्रैव व्याप्तिपक्षतयोः सत्त्वात् । अत्र पाषाणत्वहेतौ व्याप्तिर्नास्तीति न्यूनबलतेति भावः । **उपजीव्यमिति** मूलम् - उपजीव्यं ततः साधकम् ।

तत्सिद्धिरिति - परमाणोरनित्यत्वसिद्धिर्हि[2] न परमाणुसिद्धिव्यतिरेकेण भवति । येन च प्रमाणेन परमाणुः सिद्धस्तेन प्रमाणेन नित्यत्वेनैव सिद्धः । तथा च परमाणुसाधकमनुमानमनित्यसाधकानुमानस्योपजीव्यं भवति । उपजीव्ये च नित्यत्वमपि विषयो भवति । यथा 'परमाणुर्नित्यः द्रव्यत्वे सति निरवयवत्वात्' । परमाणु-साधकं यथा-'त्रसरेणुः सावयवद्रव्यारब्धः,

१. A omits सा. २. B परमाणोः नित्य०.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चाक्षुषत्वादिति' पक्षधर्मताबलात् निरवयवद्रव्यत्वेन सिद्धिर्जातेति भावः ।

न दुर्लभस्येति तथा च यत्र परामर्शसत्त्वेऽप्यनुमितिः परस्परं प्रतिबन्धेन न जायते, तत्रैव प्रतिपक्षत्वमिति भावः ।

ननु सत्प्रतिपक्षस्थले परामर्शसत्त्वेन कथमनुमितिर्भवति, सामग्र्यां सत्यामवश्यं कार्यसम्भवादिति चेत्, न । अपरपरामर्शाभावविशिष्टपरामर्शस्यैवानुमितिजनकत्वात् । तथा च प्रतिबन्धकाभावरूपा सामग्री तत्र नास्ति । अपरामर्शस्यैव तत्र प्रतिबन्धकसत्त्वात् न तु विरुद्धनिश्चयद्वयसामग्र्याः संशयजनकत्वकल्पनात् । अवश्यमत्र सत्प्रतिपक्षविरुद्धस्थलेविरुद्ध-निश्चयद्वयसामग्र्याऽनुमितिरूपः संशय उत्पाद्य एव ।

अस्यार्थः-विरुद्धा या परस्परं निश्चयद्वयस्य सामग्री सा च संशयजनिका भवति । अस्याश्च संशयजनकत्वं प्रत्यक्षसंशयस्थले क्लृप्तम् । यथा स्थाणुर्वा पुरुषो वा-इत्यत्र सन्देहपूर्वकाले विरुद्धनिश्चय द्वयस्य सामग्री वर्तते । यथापुरुषनिश्चयस्य सामग्री भवति पुरुषत्वज्ञानम्, विशेषणज्ञानं विशेष्येन्द्रियसन्निकर्षश्च विशेष्ये विशेषणस्यासंसर्गाग्रह इति पुरुषनिश्चायिका सामग्री । पुरुषविरुद्धस्थाणुनिश्चायिका सामग्री स्थाणुत्वविषया, पूर्ववत् । तथा च यदा एकदैवोभयनिश्चयस्य जनिका सामग्री मिलिता[१] तदा सन्देह उत्पद्यते । तथा च प्रकृतेऽपि[२] विरुद्धनिश्चयद्वयसामग्र्याः सत्त्वेनानुमितिरूपः संशयो वारयितुमशक्यः । यथा-'शब्दोऽनित्यः, जातिमत्त्वे सति बहिरिन्द्रियग्राह्य-त्वात्, [३]घटवदिति' । 'शब्दो नित्यः, क्षेत्रज्ञात्मभिन्नत्वविभुविशेषगुणत्वात्[४] ।' तथा च [५]प्रथमपरामर्शो-अनित्यत्वव्याप्यजातिमत्त्वविशिष्टबहिरिन्द्रियग्राह्यत्ववानयमित्य-नित्यनिश्चायकसामग्री ।

द्वितीयपरामर्शस्तु तद्विरुद्धनिश्चायिका सामग्री । यथा नित्यत्वव्याप्यक्षेत्रज्ञात्माभिन्न-विभुविशेषगुणत्ववानयमिति नित्यत्वनिश्चायिका सामग्री । तथा च विरुद्धनिश्चयद्वयसामग्र्याः संशयजनिकायाः सत्त्वेनानुमितिरूपसंशयो भविष्यत्येव-शब्दो नित्योऽनित्यो वेत्येव ।[६]

न च विशेषदर्शनीयभावविशिष्टायाः विरुद्धनिश्चयद्वयसामग्र्याः संशयजनकत्वं तादृशमत्र नास्ति, अत्र विशेषदर्शनस्य परामर्शरूपस्य सत्त्वादिति वाच्यम् । एकमात्रकोटिरूपविशेषदर्शनस्यैव संशयाजनकत्वात् । तदभावस्य च संशयहेतुत्वं तस्य च प्रकृतेऽपि सत्त्वात् । अन्यस्थाणुत्वपुरुषत्वो भयव्याप्यदर्शने सति पुरोवर्तिनि पदार्थे तदुभयकोटि [७]संशयानुपपत्तेस्तत्रापि 'पुरुषत्वव्याप्यकरा-दिमानयम्' 'स्थाणुत्वव्याप्यवक्रकोटरादिमानयमिति रूपस्य' विशेषदर्शनस्य सत्त्वात् । न च

---

१. मिलति. २. B omits अपि. ३. A omits घटवदिति and reads यदि. ४. B विभुविशिष्टविशेष.. ५. B त्वाव्याप्य. ६. B omits वा and reads इत्येव ।. ७. B omits the reading between संशयानुप.....एव.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विरुद्धप्रत्यक्षसामग्र्या एव संशयजनकत्वम्, अन्यथा विरुद्धस्मृतिसामग्रीतः संशयरूपस्मृत्यापत्तिः विरुद्धार्थशब्दयोः शाब्दसंशयापत्तिश्चेति वाच्यम् । एतन्मते इष्टापत्तेः ।

तथा च सत्प्रतिपक्षस्थलेऽपि सन्देहरूपाऽनुमितिरिति चेत्, न । तत्रानुमिनोमीत्यनुव्यवसायाभावात् । फलाभावेन निश्चिते प्रत्यक्षसामग्रीविरहसहकृतपरामर्शजन्यत्वमनुमितौ प्रयोजकम् । तथा च सत्प्रतिपक्षस्थलेऽनुमिनोमीति प्रत्ययाभावान्नानुमितिः । सन्देह इत्यनुव्यवसायाभावान्न सन्देहः । तस्मात् फलानुरोधेन विरुद्धद्वयप्रत्यक्षसामग्र्याः संशयजनकत्वम् । एतादृशी च सामग्री सत्प्रतिपक्षस्थले नास्तीति न सन्देहरूपानुमितिरिति । प्रथमपरामर्शस्य साध्यविरुद्धस्य द्वितीयपरामर्शस्य साध्यस्यानुमितिः प्रतिबध्यते । द्वितीयेन च प्रथमस्येति नानुमितिः । किन्त्वनयोः किं तत्त्वमिति जिज्ञासैव जायते इति दिक् ।

(VI) कालात्ययापदिष्टः ।

बाधग्रन्थे **इदं चेति** यद् सदित्यत्र क्षणिकत्वाभावेन प्रत्यक्षेण गृह्यते प्रत्यभिज्ञाया इति बाधः ।

ननु कथं व्याप्यत्वासिद्धः पूर्वमुक्त इति चेत्, न । बाधस्तु पक्षवृत्तिसाध्यानिश्चयत्वेन[1] रूपेणानुमितिप्रतिबन्धकः । व्याप्यत्वासिद्धस्तु व्याप्तिविरहज्ञानत्वेन रूपेणेति धर्मसङ्करो न दोषायेत्युक्तं **क्षणिकत्वस्य प्रसिद्धिरिति** क्षणिकत्वस्य साध्यस्य प्रतियोगिनः प्रसिद्धि र्यदा तदा बाधः । यदा तु नास्ति तदाऽपार्थकता । अप्रसिद्धरूपो दोष इत्यर्थः । **यथायथमिति** तथा च पञ्चानां पक्षधर्मत्वादीनां मध्ये एकतरेणापि हीनत्वे एव हेत्वाभासत्वमित्यर्थः ।

अयं गौरिति अस्मिन् व्याप्यत्वासिद्धादिकेऽपि उपाधिरस्तीति दर्शयति **सास्नोपाधिरिति** यत्र यत्र गोत्वं तत्र तत्र सास्ना, यत्र यत्र पशुत्वं तत्र तत्र सास्ना नास्ति । महिष्यां व्यभिचारात् । तथा च कुत्रचिद् व्याप्यत्वासिद्धेऽप्युपाधिरस्तीति ।

इति हेत्वाभासग्रन्थव्याख्या किञ्चित् ।

[३६] छलम् ।

परतात्पर्येति - परस्य यस्तात्पर्यविषयीभूतः पदार्थः, तत्र शब्दसञ्चारेण शब्दस्यार्थान्तरेण कृत्वा दूषणवचनं तच्छलम् । **अननुभाषणमिति** वस्तुतः तच्छलं न भवति, किन्तु मिथ्याभाषणमिति भावः ।

---

१. B -साध्यभावनि..

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[३७] जातिग्रन्थः ।

जातिग्रन्थे यस्मिन्नुत्तरे कुत्रचिद् व्याप्तिर्नास्ति, कुत्रचिद् पक्षधर्मता नास्ति - इत्यसदुत्तरत्वम् । **स्वतन्त्रेच्छत्वादिति** सूत्रकारस्तु स्वतन्त्रेच्छो भवतीति भावः ।

पक्षनिष्टस्येति पक्षे वर्तते यो धर्मःएतादृशो यः स पक्षधर्मः । स एव परेणोक्तं यत्साधनम्, तस्याव्यापको भवति । तस्य परोक्तादेव साधनादेव हेतोः यदापादानम्, सा उत्कर्षसमा जातिरित्यर्थः । **तथा चेति** एकनिर्वृत्त्या कृत्वाऽपरस्य निर्वृत्तिरनिष्टा भवति । तदापादाने अपकर्षसमा जातिरित्यर्थः । शेषं सुगमम् ।[१]

[३८] उपसंहारः ।

यद्यपि संशयादीनामपि प्रायः प्रमेयान्तर्गतत्वेन भेदेन व्युत्पादनमयुक्तम् [२]तथापि तेषां तत्त्वज्ञानजननद्वारा भिन्नभिन्नरूपेण प्रयोजकत्वमिति भेदेन व्युत्पादनं **महर्षेराशयः** ।

इति श्रीमद्खरतरगच्छाधीश्वर [३]युगप्रधान श्रीजिनचन्द्रसूरिविजयिनि(!) **श्रीजिनमाणिक्य-सूरिशिष्य श्री विनयसमुद्रगणीनां शिष्येण वाचकगुणरत्नगणिना** [४]**गोवर्धनप्रकाशिकातर्क-तरङ्गिणी नाम्नी** [५]सन्दृष्टा-([६]इति श्री तर्कतरङ्गिणीटीका) समाप्ता[७] ।

श्रीमद्रत्नविशालाख्यः स्वशिष्याधीतिहेतवे ।
गुणरत्नगणिश्चक्रे टीकां तर्कतरङ्गिणीम् ॥१॥

श्रीमद् खरतरगच्छे श्री जिनमाणिक्यसूरयोऽभुवन् ।
तेषां शिष्या गणयो विनयसमुद्राभिधाजयिनः ॥२॥

तेषां शिष्यैरतद्विद्वद्गुणरत्नवाचना(का)चार्यैः ।
निजवचनैकहेतौऽपरं श्रुतदेवताभक्त्यै ॥३ ॥

इति प्रशस्तिः ॥ शुभं भवतु ॥ कल्याणमस्तु लेखकपाठकयोः ॥

श्रीः ॥ श्रीः ॥ श्रीः ॥[८]

---

१. गुणरत्न rightly does not discuss निग्रहस्थान the last पदार्थ here, as it is already discussed in the वादप्रकरणम् । गोवर्धन also writes निग्रहस्थानविशेषास्त्वस्माभिः पूर्वमेव निरुक्ता नेहोच्यन्ते । (त.भा.प्र. पृ. ११३). २. B तथा तेषां. ३. B omits the reading between युगप्रधान.....विजयिनि. ४. B गोवर्धनी प्रकाशिकां. ५. B दृष्ट्वा. ६. B omits the readings between इति श्रीतर्कतरङ्गिणी टीका. ७. B adds here कल्याणमस्तु ॥ श्रेयः ॥ ८. All of these verses including the remaining portion are not found in A.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Our latest Publications (2000-2001)

Some Topics in the Development of OIA, MIA, NIA – Dr. H. C. Bhayani (1998)	75-00
Anantanāha Jina Cariyaṁ – Ed. Pt. Rupendrakumar Pagariya (1998)	400-00
Alankāradappaṇa – Ed. Dr. H. C. Bhayani (1999)	50-00
Aṣtaka Prakaraṇa – Dr. K. K. Dixit (1999)	75-00
Siri Candappahasāmi Cariyaṁ – Ed. Pt. Rupendrakumar Pagariya (1999)	250-00
Tattvārtha Sūtra – (Translated into English by Dr. K. K. Dixit)	300-00

SAMBODHI

The Journal of the L. D. Institute of Indology : (Back Vol. 1-21) Per Vol.	100-00
Current Vol. 22 (1999), 23 (2000)	150-00

Our Forthcoming Publications

ડૉ. મો. દ. દેસાઈ સંપાદિત પ્રાચીન કૃતિઓ

Śāstravārtā samuccaya

Saptapadārthī

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org